॥ श्रीः ॥

जैनेन्द्रव्याकरणस्य प्रस्तावः ।

भास्कराचार्यकृतलीलावत्यामन्ते

"अष्टौ व्याकरणानि षट् च भिषजां व्याचष्ट ताः संहिताः
षट् तर्कान् गणितानि पञ्च चतुरो वेदानधीते स्म यः ।
रत्नानां त्रितयं द्वयं च बुबुधे मीमांसयोरन्तरं
सद्ब्रह्मैकमगाधबोधमहिमा सोऽस्याः कविर्भास्करः॥" (१)

इति पद्यं दृष्ट्वा कान्यष्टौ व्याकरणानीति विवेचयन् कविकल्पद्रुमाभिधे धातुपाठे बोपदेवेनोक्तम्

"इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥"

इदं पद्यमवलोक्य एतान्येवाष्टौ व्याकरणानीति निश्चिनवान । ततो जैनेन्द्रव्याकरणमन्विष्यन् चिरेण वाराणस्यामेकस्य जैनस्य पुस्तकसंग्रहे देवनन्दिमुनिकृतस्य जैनेन्द्रव्याकरणस्याभयनन्दिमुनिकृतमहावृत्तिसहितस्यैकं पुस्तकमुपलब्धवान् किन्त्विदं पुस्तकं प्राचीनं स्थलविशेषेषु

---

(१) कलिकातास्थस्कूलबुक्सोसाइटीसमाजद्वारा मुद्रिते पुस्तके द्रष्टव्यम् । प्रक्षिप्तमिदं पद्यं न तु भास्कराचार्येण कृतमिति केचन मन्यन्ते । तथात्वे ऽपि केनचिद्बहुज्ञेन रचितमिति नास्त्यत्र शङ्कावकाशः ।

भूयो विलुप्ताक्षरमशुद्धिबहुलमपि चैकेनैवादर्शपुस्तकेन संशोधनं सम्यङ् न भवतीत्यपि सुनिश्चितमेव तथापि दुर्लभस्यास्य व्याकरणस्य सुलभत्वविधानाय सहसा तथाविधेनैव पुस्तकेन काशीविद्यासुधानिधौ मुद्रणेन प्रकाशयितुमयमारम्भः। अत्राननुभूतश्रमेणाहं यथातथ्येन शोधनकार्यं कृतवान् तदत्र स्खलितं विद्वद्भिः पुस्तकान्तरसंवादेन परिहरणीयं क्षन्तव्यं चेति भूयो भूयोऽभ्यर्थय इति शिवम्।

गवर्नमेंटसंस्कृतकालेज
पुस्तकालय–बनारस
२६ मार्च १९१० ई०

विन्ध्येश्वरीप्रसादद्विवेदी।

ओं नमः परमात्मने Bill No

जैनेन्द्रव्याकरणम् ।

देवनन्दिमुनिकृतम् ।

अभयनन्दिमुनिकृतमहावृत्तिसहितम् ।

देवदेवं जिनं नत्वा सर्वसत्त्वाभयप्रदम् ।
शब्दशास्त्रस्य सूत्राणां महावृत्तिर्विरच्यते ॥ १ ॥
यच्छब्दलक्षणमसुव्रजपारमन्यै-
रव्यक्तमुक्तमभिधानविधौ दरिद्रैः ।
तत्सर्वलोकहृदयप्रियचारुशब्दै-
र्व्यक्तीकरोत्यभयनन्दिमुनिः समस्तम् ॥ २ ॥

शिष्टाचारपरिपालनार्थमादाविष्टदेवतानमस्कारलक्षणं मङ्गलमिदमाहाचार्यः ॥

लक्ष्मीरात्यन्तिकी यस्य निरवद्यावभासते ।
देवनन्दितपूजेशे नमस्तस्मै स्वयम्भुवे ॥ १ ॥

लक्ष्मीः श्रीः सैव विशिष्यते ऽन्तमतिक्रान्तः कालोऽत्यन्तः तत्र भवा आत्यन्तिकी अविनश्वरी आत्मस्वभावाधीना केवलज्ञानादिविभूतिरित्यर्थः । अवद्यात् गर्ह्यान्निष्क्रान्ता निरवद्या निर्दोषा अवभासते शोभते यस्य भगवतः यस्येति सर्वनामपदस्य सामान्यवाचित्वेऽपि अन्य-

स्यैवंविधा श्रीर्न सम्भवतीति पारिशेष्यादर्हद्भट्टारकस्य ग्रहणम् । यच्छब्दाभिहितोर्थस्तच्छब्देन परामृश्यत इति तस्मै देवनन्दितपूजेशे स्वयम्भुवे नमः अस्त्विवत्यध्याहारः देवाः सुराः तैर्नन्दिता अभिवर्द्धिता सा चासौ पूजा च तस्या ईषृ इति क्विपि कृते देवनन्दितपूजेट् तथा स्वयमात्मना भवतीति स्वयम्भूः नमःशब्दयोगे सर्वत्र ङेर्भवति ॥

लोके प्रसिद्धसाधुत्वानां शब्दानामन्वाख्यापनार्थमिदमारभ्यते । अन्वाख्यानं च प्रकृत्यादिविभागेन सामान्यविशेषलक्षणेन शब्दानां व्युत्पादनम् । तच्च शब्दार्थसम्बन्धान्तरेण न सम्भवति । शब्दार्थसम्बन्धसिद्धिश्चानेकान्ताधीनेत्यत आह ॥

सिद्धिरनेकान्तात् ॥ १ ॥

प्रकृत्यादिविभागेन व्यवहाररूपा श्रोत्रग्राह्यतया परमार्थतोपेता प्रकृत्यादिविभागेन च शब्दानां सिद्धिः अनेकान्ताद्भवतीत्यर्थाधिकार आशास्त्रपरिसमाप्तेर्वेदितव्यः । अस्तित्वनास्तित्वनित्यत्वसामान्यसामानाधिकरण्यविशेषणविशेष्यादिकोऽनेकः अन्तः स्वभावो यस्मिन् भावे सोऽयमनेकान्तः अनेकात्मा इत्यर्थः । तस्यावग्रहेहावायधारणात्मकं प्रत्यक्षं तद्व्यवहारान्यथानुपपत्तेरितीदमनुमानंच साधकम् । अथास्तित्वनास्तित्वादीनां परस्परविरुद्धानां कथमैक्याधिकरण्यमसङ्कीर्णरूपता च । यथा भवतामेकत्र हेतौ अन्वयव्यतिरेकयोः जनकयोरपि वा जन्यमानरूपरसापेक्षयोः सहकारित्वासहकारित्वयोः । अथ हेतौ सपक्षविपक्षापेक्षया रूपद्वयं रसे च सभागा-

सभागकार्यापेक्षया । अत्रापि तर्हि स्वरूपपररूपापेक्षया-स्तित्वनास्तित्वे । द्रव्यपर्यायापेक्षया च नित्यत्वानित्यत्वे । द्रव्यपर्याययोश्चान्वयव्यतिरेकाभ्यां सिद्धिरित्यास्तां तावदेतत् । अनेकान्तादितोदमेव ज्ञापकं हेतौ कापि भवति । तेनानित्यः शब्दः कृतकत्वादित्यादि सिद्धम् । उत्तरसूत्रैकदेशाद्याचापेाधिकार (?) इति वक्ष्यति । सस्थानक्रियं स्वमिति। एतच्च वस्तुना साधर्म्यवैधर्म्यात्मकेऽनेकान्ते सत्युपपद्यते । तथाहि अकाराकारयोः ह्रस्वदीर्घकालभेदेन वैधर्म्येऽपि तुल्यस्थानकारणत्वेन साधर्म्यमस्तीति स्वसञ्ज्ञाव्यवहारः सिद्धति । यदि हि साधर्म्यमेव स्यात् तदास्तित्वेनेवान्यैरपि धर्मैः साधर्म्ये सर्वमेकं प्रसज्येत । यदि च वैधर्म्यमेव तदा कस्यचिदस्तित्वमपरस्य नास्तित्वमन्यस्य चान्यत् । अधुमृदिति अन्वयव्यतिरेकाभ्यामर्थवच्छब्दरूपं मृत्सञ्ज्ञकमनेकान्तात् सिद्धति । तथाहि विभक्त्यन्तस्य च शब्दस्य प्रयोगादर्थे ज्ञानमुत्पद्यत इति सङ्घाता अर्थवन्तो दृष्टाः । तदवयवानामप्यन्वयव्यतिरेकाभ्यामर्थवत्ता जायते । वृक्षावित्यत्र विसर्जनीयाभावादेकत्वार्थो निवृत्तः । औकारभावाद् द्वित्वं जातम् । अकारान्तवृक्षशब्दान्वयाज्जातिरन्वयिनी प्रतीयते । अन्वयव्यतिरेकौ च भावावेकान्तवादे न स्तः । तथाह्यपाये ध्रुवमपादानमित्यादिषट्कारकी नित्यक्षणिकपक्षयोर्नोपपद्यते ध्यपायध्रौव्याद्यभावात् । उक्तं च

इदं फलमियं क्रिया करणमेतदेष क्रमो
व्ययोऽयमनुषङ्गजं फलमिदं दशेयं मम ॥
अयं सुहृदयं द्विषत्प्रयतदेशकालाविमा-
विति प्रतिवितर्कयन् प्रयतते बुधो नेतरः ॥

सस्थानक्रियं स्वम् ॥ २ ॥

स्थानं तालवादि क्रिया स्पृष्टतादिका समाना स्थाने क्रिया यस्य सामर्थ्यात् स्थानमपि समानं लभ्यते । अथवा समानं स्थानक्रियं यस्य समानस्येति योगविभागात् सादेशः । तत्स्थानक्रियं स्वसंज्ञं भवति । आत्मलाभमापद्यमाना वर्णास्तिष्ठन्त्यस्मिन्निति स्थानं वर्णोत्पत्तिस्थानमित्यर्थः । तदष्टविधम् ॥

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च नासिकौष्ठौ च तालु च ॥ इति

द्रव्यस्य देशान्तरप्राप्तिहेतुरान्तरः परिस्पन्दः क्रिया । सा चतुर्विधा । स्पृष्टता ईषत्स्पृष्टता विवृतता ईषद्विवृतता चेति । ध्वनावुत्पद्यमाने यया स्थानानि स्पृशति सा स्पृष्टता । मनाक्स्पर्शे ईषत्स्पृष्टता । दूरेण स्पर्शे विवृतता । समीपेन स्पर्शे ईषद्विवृतता । कस्य पुनः किं स्थानम् । अकुहविसर्जनीयाः कण्ठ्याः । हविसर्जनीयावुरस्यावेकेषाम् । जिह्वामूलीयो जिह्वयः ॥ सर्वं मुखस्थानमवर्णमेके मन्यन्ते । इशयच्वेदैतस्तालव्याः । एदैतौ कण्ठतालव्यावेकेषाम् । उप्वोदौदुपध्मानीया ओष्ठ्याः । ओदौतौ कण्ठोष्ठ्यावेकेषाम् । वकारो दन्तोष्ठ्यः । सृक्स्थानमेके वाञ्छन्ति । ऋटुरषा मूर्द्धन्याः । रेफो दन्तमूल्य एकेषाम् । लृतु एकेषाम् । लृतुलसा दन्त्याः । नासिक्योऽनुस्वारः । ञमङणनाः स्वस्थानाः । नासिकास्थाना एकेषाम् । तेषां स्वसञ्ज्ञाप्राप्तिर्दोषः । स्पृष्टिः स्पृष्टं स्पृष्टानुगतं करणं कृतिरुच्चारणमेषामिति स्पृष्टकरणा वर्गाः । ईषत्स्पृष्टकरणा अन्तस्थाः । ईषद्विवृतकरणा ऊष्माणः । विवृ-

तकरणाः स्वराः । तेभ्य एदोतौ विवृततरौ । तेन दध्येतत् मध्वेदनमिति स्वेऽको दीत्वाभावः । ताभ्यामैदौतौ विवृततरौ । तेन दिश्यैन्द्र्यां मध्वौषधम् । ताभ्यामवर्ण इति । तेन पित्रर्थः दध्यत्र मध्वत्र । अन्ये संवृतमकारमिच्छन्ति लोके । शास्त्रव्यवहारे तु विवृतम् । एतच्चायुक्तं लोकशास्त्रयोरुच्चारणं प्रत्यविशेषात् । अथं च प्रपञ्चश्चिन्तनीयः । स्वरेभ्यो विवृततराः अवर्णेच इत्यपि निर्देशे न दोषं पश्यामः । अ अ अ इत्यकारः उदात्तोऽनुदात्तः स्वरितः । स प्रत्येकं ङसञ्ज्ञकः । एवं प्रः । एवं दीः । एवं पः । एवं अष्टादशप्रभेदोऽवर्णः । तथा इवर्णः । तथा उवर्णस्तथा ऋवर्णः तथा ऌवर्णः । कथं ऌकारो द्विमात्रः अशक्तिजानुकरणापेक्षया । सन्ध्यक्षराणां प्रा न सन्ति । तान्यतो द्वादशप्रभेदानि । अन्तस्था यवला द्विप्रभेदाः । नासिक्येतरभेदात् । एवमर्थं चैतेऽण् सु पठ्यन्ते । अण् स्वं गृह्णातीति यथा स्यात् । रेफोष्मणां स्वा न सन्ति । वर्ग्यः स्ववर्ग्येण स्वसञ्ज्ञो भवति । उदाहरणं लोकाग्रम् । मुनीशः । स्थानग्रहणं किम् । कचटतपानां समानक्रियाणां भिन्नस्थानानां मा भूत् । तर्त्ता तर्त्तुमित्यत्र झरो झरि स्वे इति पकारस्य तकारे खं प्रसज्येत । क्रियाग्रहणं किम् । इचुयशानां समानस्थानानां भिन्नक्रियाणां मा भूत् । तत्र को दोषः अरुश्च्योततीत्यत्र झरो झरि स्वे इति शकारस्य चकारे खं प्रसज्येत । ऋकारऌकारयोः स्वसञ्ज्ञा वक्तव्या ॥ * ॥ पितृ ऌकारः पितृकारः । स्वप्रदेशाः स्वेऽको दीरित्येवमादयः । शास्त्रलाघवार्थं संज्ञाकरणम् ॥

हलोऽनन्तराः स्फः ॥ ३ ॥

हलोऽनन्तराः विजतीयैरज्भिरव्यवहिताः सम्बन्धो-

चारणाः स्फसंज्ञा भवन्ति । समुदायवाक्यपरिसमाप्ति-राश्रीयते तेन प्रत्येकं स्फसञ्ज्ञा न भवति । हल इति जात्यपेक्षो बहुत्वनिर्देशः तेन द्व्योर्बहूनां च स्फसञ्ज्ञा । शर्मकर्मेति रमौ । इन्द्रश्चन्द्र इति नदराः । हल इति किम् । तितउः । तनेर्डउः सन्वच्चेति डउः । अत्राकारोक-रावनन्तरौ ॥ स्फान्तखं प्रसज्येत । अनन्तरा इति किम् । पचति पनसम् । आद्यं रूपं प्रत्युदाहरणम् । पनसमि-त्यत्र स्फादेःस्कोऽन्ते चेति सखं स्यात् । स्फइति वर्णपि-ण्डेन सञ्ज्ञाकरणं किम् । एवंरूपः समुदायः स्फसञ्ज्ञो यथा स्यादित्येवमर्थम् । स्फप्रदेशाः स्फे रुः । लिडस्फात् किदि-त्येवमादयः ॥

नासिक्यो ङः ॥ ४ ॥

नासिकायां भवो वर्णः ङः सञ्ज्ञो भवति । नासि-कायाश्चावर्णनगरयोर्नसादेशो ये विहितः । ञमङणना उदाहरणम् । परस्परं स्वसञ्ज्ञा स्यात् इति चेत् नैवम् । स्वस्थानप्रभवा एवामी उपचारान्नासिक्यत्वम् । यथा मुखप्रभवोऽपि स्वर उपचाराद्धंशे भवो वंश्य इत्यु-च्यते । तथापि सति मुख्येऽनुस्वारे नासिक्ये कथमुपचरि-तग्रहणम् । तस्य ङसंज्ञायां प्रयोजनं नास्तीत्यग्रहणम् । ङसञ्ज्ञाकार्यं शान्तो दान्त इति ङस्य ङिझलोःङ्कि-तीति दीत्वम् । नासिक्य इति किम् । तप्तम् । अनुदात्तोप देश इत्यादिना पुः खञ्च प्रसज्येत । पक्तः पक्तवान् इत्यत्र ङस्य ङिझलोरिति दीत्वं स्यात् । वत्वस्य चासिद्ध-त्वात् अनुदात्तोपदेश इत्यादिना चुः खंच प्रसज्येत ॥

अधु मृत् ॥ ५ ॥

धुवर्जितमर्धवच्छब्दरूपं मृत्सञ्ज्ञं भवति । धोरर्थ-

वतः पर्युदासाच्चार्थवत्त्वं लभ्यते । अर्थश्चाभिधेयो भावाभावरूपः । तत्र भावरूपो जातिगुणक्रियाद्रव्यभेदेन चतुर्विधः । गौः । शुक्लः । पाचकः । द्रव्यविवक्षायां जात्यादिनार्थवत्त्वम् । द्रव्याभिधाने तु द्रव्यगुणलिङ्गसंख्याकर्मादयः व्युपदिश्यन्ते । तेषां द्योतनार्थं टाबादयः स्वादयश्चोत्पद्यन्ते । एवं डित्थो डवित्थः । कुण्डं पीठम् । अभावरूपाभिधाने । अभावो विनाशः । शशविषाणम् । अधिवति किम् । अहन् । मृत्वे नखं स्यात् । पर्युदासादर्थवदिति किम् । धनं वनम् । नकारावधेर्मृत्सञ्ज्ञया नखं प्रसज्येत । लूः पूरिति क्व्यन्तस्य धुत्वेपि कृदन्तत्वात् मृत्सञ्ज्ञा । मृत्प्रदेशाः ङ्याम्मृद इत्येवमादयः ॥

कृद्धृत्साः ॥ ६ ॥

कृदन्तं हृदन्तं ससञ्ज्ञकञ्च मृत्सञ्ज्ञं भवति ॥ कृत् । ज्ञाता । ज्ञातव्यम् । हृत् । प्राजापत्यः । आकम्पनिः । सः । जिनधर्मः । साधुवृत्तम् । सिद्धे सत्यारम्भो नियमार्थः । नियमश्च विधिमुखप्रतिषेधफलमिति त्यान्तेषु कृद्धृदन्तस्यैव मृत्संज्ञा । इह मा भूत् । असिचन् । अभवन् । उत्पन्नानां स्वादीनामेकत्वादिनियम इत्यस्मिन् दर्शने स्वाद्युत्पत्तिः स्यात् । इह च काण्डे कुड्ये रमते राजकुलमिति प्रो नपीति मृत्वात्प्रादेशः स्यात् । सग्रहणमपि नियमार्थम् । अर्थवत्संघातानां ससंज्ञकस्यैव मृत्संज्ञा वाक्यस्य मा भूत् । साधुर्द्धर्मं ब्रूते इति सुपो धुमृदोरिति सुपः उप्प्रसज्येत । सग्रहणात् तुल्यजातीयस्यैव सुवन्तसमुदायस्य वाक्यस्य निवृत्तिर्न प्रकृतित्यसमुदायस्य । तेन वा सुपो बहुःप्राक्कु इति बहौ के अकचि कृते बहुतृणं कुमारिका उच्चकैः पठतीति मृत्वं न निव-

र्तते । ननु च सुप्तिङन्तं पदमित्यत्रान्तग्रहणादन्यत्र संज्ञाविधौ त्यग्रहणात्तदन्तविधिर्नास्तीत्युक्तं तत्कथं कृदन्तहृदन्तग्रहणम् । नायं संज्ञाविधिः पूर्वेण विहितायाः मृत्संज्ञायाः नियमोऽयम् । अथवा सादिति षत्वप्रतिषेधादिह तदन्तविधिर्ज्ञायते । अन्यथा सादित्येतस्य केवलस्य मृत्वेनाश्रयत इत्यनेनैव प्रतिषेधः सिद्धः स्यात् । अथ कृदग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति कृदग्रहणं समुदायविज्ञार्थं न नियमार्थम् । तेन देवदत्तेन कृतमित्यादेः समुदायस्य मृत्वात् सुपोधुमृदोरिति सुपः उप्रसज्यते । नैष दोषः । साधनं कृता बहुलमित्यस्यानर्थक्यप्रसङ्गात् । सर्वशब्दानां व्युत्पत्तिरस्तीति अस्मिन् पक्षे पूर्वसूत्रे नास्त्युदाहरणं संज्ञार्थमेव तत् ॥

ग्रो नपि ॥ ७ ॥

मृदिति वर्तमानमर्थात्तान्तं सम्पद्यते । ग्रादेशो भवति नपि वर्तमानस्य मृदः । नञिति नपुंसकलिङ्गस्य संज्ञा पूर्वेषाम् । श्रियमतिक्रान्तं अतिश्रि । अतिरि । अतिवधु कुलम् । भतिनु जलम् । ईकारैकारौ तालव्यौ । ऊकारौकारौ च ओष्ठ्यावस्माकन्तत्स्थानेऽन्तरतम इति परिभाषया अन्त्यस्याचः ग्रादेशः । नपीति किम् । राजकुमारी । अग्रणीः । मृद इति किम् । रमते कुलम् । नन्वलिङ्गत्वादाख्यातस्यात्र ग्रादेशाप्राप्तिरत एवात्रापि न ग्रादेशः काण्डीभूतमिति । इह तर्हि मा भूत् काण्ड्ये तिष्ठतः कुड्ये तिष्ठत इति । अत्र मृदधिकारात् मृदमृदोरेकादेशो मृद्वन्न भवति ॥

स्त्रीगोर्नीचः ॥ ८ ॥

न्यग्भूतो यः स्त्रीत्यः गे शब्दश्च तदन्तस्य मृदः

प्रादेशो भवति । स्त्री इति स्वरितचिन्हितनिर्देशात् स्त्रियामित्येवं विहितस्य ग्रहणम् । निष्कौशाम्बिः । निर्मथुरः । उभयगतिरिह शास्त्रे । तेन एकविभक्तित्वादप्रधानत्वाच्च शास्त्रीयं लौकिकञ्च न्यत्वं गृह्यते । न्यग्रहणे यस्मात्स तदादेरितीयं परिभाषा स्त्रीत्यग्रहणात् नेष्यते । तेन अतितिलपीडनिः । अतिराजकुमारिः । चित्रगुः स्वेतगुः चोक्तत्वादप्रधानत्वाच्च न्यत्वम् । स्त्री इति स्वरितचिन्हितग्रहण किम् । अतिलक्ष्मोः । अतिश्रोः । नीच इति किम् । साधु विद्या । सुगौः । इह राजकुमारीपुत्रः सुगोकुलमिति यदपेक्षं न्यत्वं तत्प्रति तदन्तत्वं नास्तीति न प्रादेशः । मृद इत्यधिकारः किमर्थः । कुमारीपुत्रः गोकुलं वोक्तं न्यगिति प्रादेशः प्रसज्येत ॥ ईयसो वसे प्रतिषेधो वक्तव्यः ॥ * ॥ बह्व्यः श्रेयस्यो यस्य बहुश्रेयसी पुरुषः । विद्यमानश्रेयसी । सान्तो विधिरनित्य इति ऋन्मोरिति कबपि न भवति ॥

हृदुप्युप् ॥ ९ ॥

स्त्रीग्रहणं नीच इति चानुवर्तते । हृदुपि सति स्त्रीत्यस्य नीच उब्भवति ॥ आमलकम् । कुवलम् । बदरम् । आमलक्याः अवयवः फलं नित्यं दुशरादेरिति मयट् । इतराभ्यां प्राग् द्वोरण् । तयोरुप्फल इत्युप् । स्त्रीत्यस्य पूर्वेण प्रादेशे प्राप्ते उबनेन क्रियते । तस्य परेऽचः पूर्वविधाविति स्थानिवद्भाव.द्यस्य ङ्यां चेत्यकारस्य खं प्राप्तमोविधिं प्रति स्थानिवद्भावप्रतिषेधान्न भवति । एवं पञ्चेन्द्रः । पञ्चशष्कुलः । पञ्चेन्द्राण्यो देवता अस्य हृदर्थइति षसःसंख्यादीरश्चेति रसंज्ञः प्राग्द्वोरण् तस्य रस्योवनपत्य इत्युप् । स्त्रीत्यस्योपि संज्ञियोगशिष्टानामन्यतरापाये उभयोरप्यभाव इत्यानुको निवृत्तिः । पञ्चभिः

शष्कुलीभिः क्रीतः आर्हादण्ः रादुबखावित्युप् । हृदिति किम् । गौरीपुत्रः । सुप उबत्र । उपोति किम् । गार्गीत्वम् । नोच इत्येव । अवन्ती कुन्ती कुरूः । अवन्तेरपत्यं स्त्री द्विकुरुनाथजादसाञ्यः इति ञ्यः । तस्य कुन्त्यवन्तीकुरुभ्यः स्त्रियामित्युप् । इतो मनुष्यजातेरिति ङी । ऊङुत इति ऊङ् । अत्र उपि सतीत्युच्यमाने प्रसज्येत ॥

इद्गोण्याः ॥ १० ॥

इकारादेशो भवति गोण्या हृदुपि सति ॥ पञ्चभिर्गोणीभिः क्रीतः पञ्चगोणिः । आर्हादण्ो रादुबखावित्युपि कृते स्त्रीत्यस्य पूर्ववेणोपि प्राप्तेऽनेन इकारः । गोण्या इति सूत्रे प्रकृतप्रादेशेन सिद्धे इद्वचनं किम् । क्वचिदन्यत्रापि यथा स्यात् । पञ्चभिः सूचीभिः क्रीतः पञ्चसूचिः । सप्तसूचिः ॥

आकालो ऽच् प्रदीपः ॥ ११ ॥

आ इति मात्रिकद्विमात्रिकत्रिमात्राणां संहितया निर्देशः । प्रदीप इति सूत्रेऽस्मिन्सुव्विधिरिषृ इति जसः स्थाने सुः । अ आ अ ३ इत्येवं काल इव कालो यस्य सोऽच् यथासंख्यं प्रदीप इत्येवं संज्ञो भवति । अकालः । दधि । मधु । पितृ । आकालः । खट्वा । गौरी । वामोरूः । आ ३ कालः । आगच्छ भो माणव जिनदत्तान् इत्यादयः । कालग्रहणं प्रत्येकं परिमाणार्थम् । ततः अकाल इति विशेषणात् भिन्नकालयोर्दीपयोर्ग्रहणं न भवति । अजग्रहणं किमर्थम् । हलचां सङ्घातनिवृत्त्यर्थम् । प्रतदय । तितउ च्छत्रमिति । प्रदीपप्रदेशाः प्रो नपीत्येवमादयः ॥

अचश्च ॥ १२ ॥

परिभाषेयम् । अचः स्थाने ते प्रदीपसंज्ञका भवन्ति ॥

प्रोनपीति। अतिनु। अतिश्रि। इच्छातो विशेषणविशेष्यभाव इति अजन्तस्य प्रादेशः। अच इति किम्। सुवाक्पूतकुलम्। हलः प्रो न भवति। दीरकृद्ग इति चीयते स्तूयते। अच इति किम्। भिद्यते। शमित्यामदोदीरित्यत्र गृह्यमाणेन शमादिनाञ्जिवशिष्यत इत्यनजन्तस्यापि दीत्वम्। शाम्यति। वाक्यटेः प इत्यत्रापि गृह्यमाणेन टिना अञ्जिवशिष्यते। आगच्छ भो माणव जिनदत्तान्। अच इति किम्। धर्मवित्। तकारस्य मा भूत्। चकारः किमर्थः संज्ञाविधाने नियमार्थः। इह मा भूत्। द्यौः पन्थाः स द्युभ्यां द्युभिः॥

उच्चनीचावुदात्तानुदात्तौ ॥ १३ ॥

अजितिवर्तते। उच्चैरुपलभ्यमानोऽच् उदात्तसंज्ञो भवति। नीचैरुपलभ्यमानोऽनुदात्तसंज्ञो भवति॥ स्थानकृतमुच्चत्वं नीचत्वंच गुणः संज्ञिनो विशेषणम्। समान एव स्थाने ऊर्द्धभागनिष्पन्नोऽच् उदात्तसंज्ञो भवति नीचभागनिष्पन्नोऽनुदात्त इति॥ नित्याः शब्दार्थसम्बन्धा इति यैरिष्यन्ते तेषां निरवयवस्य नित्यस्य शब्दस्य अवयवोपचयापचयाभावात् उदात्तादिव्यपदेशो न घटते सावयवत्वे च तेषामनित्यत्वं प्राप्नोति। न च नित्यस्य स्थानकारणव्यापारविशेषाद्विशेषः प्रसज्यते। क्षणिकपक्षेऽपि नैका नित्या स्वरजातिरस्ति यामपेक्ष्यायमत्रोच्चैरयं नीचैरिति परस्परापेक्षो व्यवहारो भवेत् तस्मादुक्तमनेकान्तमाश्रित्योदात्तादयः समर्थनीयाः। न च लोकप्रतीतेषु शब्देषु विभागेनोदात्तादयः प्रतीयन्ते केवलं शास्त्रे व्यवहारार्थं प्रति संज्ञायन्ते। भू इति उदात्तत्वादिट् भविता। एध स्पर्द्ध इत्येतयोरन्तोऽनुदात्तइति ङनुदात्तेनेत्व इति देो भवति।

एधते । स्पर्द्धते । उदात्तानुदात्तप्रदेशेषु उच्चनीचगुणविशिष्टस्य ग्रहणं प्रत्येतव्यम् ॥

व्यामिश्रः स्वरितः ॥ १४ ॥

उच्चनीचगुणव्यामिश्रोऽच् स्वरितसंज्ञो भवति॥ पच यजइत्यन्तस्य स्वरितत्वात् अस्वरितेतःकर्त्राप्येफल इति देा भवति । पचे। यजे। स्वरितप्रदेशाः स्वरितेनाधिकार इत्येवमादयः ॥

आदैगैप् ॥ १५ ॥

प्रत्येकवाक्यपरिसमाप्तिराश्रीयते । प्रत्येकमादैचां वर्णानामैबित्येषा संज्ञा भवति । पारिशेष्यात्संज्ञासंज्ञिसम्बन्धो ज्ञायते । तथाहि नानर्थकमिदमाचार्यप्रामाण्यात् । साधनानुशासनमपि न सम्भवति। आदैचां प्रत्याहारे उपदेशात् । ऐप्शब्दस्यापि मृत्संज्ञा सिद्धा । नापि पूर्वापरप्रयोगनियमार्थम् । सावैम्म इत्यन्यथापि प्रयोगदर्शनात् । स्थान्यादेशार्थमपि न सम्भवति । अवयात् रायोहलि नावेारात् मृजेरैवित्ति च उभयदर्शनात्। लिङ्गाभावान्नागमागमिभावः। विशेषणविशेष्यभावोऽपि प्रतीतपदार्थयोर्भवति नीलोत्पलवत्। एवमन्यस्यार्थस्यासम्भवात् संज्ञासंज्ञिसम्बन्धः । लघवत्तरा संज्ञा । आदैचामैपा भावितानामतद्भवितानाञ्च सामान्येन ऐप्संज्ञा । तद्भावितानामुदाहरणम् । नाडायनः । दैवदत्तिः । औपगवः । अतद्भवितानाम् । मालामयम् । रैमयम् । नौमयम् । विकारार्थे नित्यं दुशरादेरिति मयट् । आदिति तपरकरणमैजर्थम् । तादपि परस्तपर इति । तेन तवैषा महौषधिरित्यादिषु त्रिमात्रचतुर्मात्राणां निवृत्तिः । आदैगैवित्यत्र सूत्रेऽस्मिन्

सुज्विधिरिष्ट इति जसः स्थाने सुः। ऐप्प्रदेशा मृजेरैबिति एवमादयः॥

अदेङेप्॥ १६॥

अदेङां वर्णानां प्रत्येकमेबित्येषा संज्ञा भवति॥ अत्राप्यतद्भाविताना तद्भावितानामदेङामेप्संज्ञा। अतद्भावितानाम्। पचन्ति। पचे। एधन्ते। पद् इति पररूपम्। तद्भावितानाम्। कर्ता। तरति। चेता। स्तोता। ऋकारस्येबैपप्रसङ्गे स्थानतोऽन्तरतमौ अकाराकारौ भवतः। तौ च प्रसज्यमानावेव रंतौ। अदिति तपरकरणं दीपनिवृत्त्यर्थं एङर्थंच। तेन मालेयं खट्वोढा॥ त्रिमात्रचतुर्मात्राणां निवृत्तिः। ऐप्प्रदेशा मिदेरेबित्येवमादयः॥

इकस्तौ॥ १७॥

परिभाषेयम्। ऐबेपौ संज्ञया विधीयमानौ इक एव स्थाने भवतः। स्थानिनियमोऽयं न विधिरिति। कुत एतत्। सक्थ्यस्थिदध्यक्ष्णामितीको निर्देशात्। एबैपोर्लक्षणान्तरेण विधानाच्च। प्रत्यासत्ते पूर्वमेवुदाहरणे वक्ष्यति। गागर्योः। करोति। नयति। भविता। सावैम्मो अकार्षीत्। अनैषीत्। अहार्षीत्। इच्छातो विशेषणविशेष्यभावः। मिदेरेबित्यत्र गृह्यमाणेन मिदादिना इग विशिष्यते। तेनानन्त्यस्य भवति। जुसि गागर्योरिति च गृह्यमाणमिका विशिष्यते इतीगन्तस्य भवति। इक इति किम्। आत्सक्ष्यक्षरव्यञ्जनानां मा भूत्। यानम्। ग्लायति। उम्भिता। अजित्यनुवर्तनादैबेपोः सम्बन्धे सिद्धे तौ ग्रहणं संज्ञाविधाने नियमार्थम्। द्यौः। पन्थाः। सः। यत्र स्थानी निर्दिश्यते तत्र नेदं व्याप्रियते। यथा ञिणित्यच इति॥

न धुखे ऽगे ॥ १८ ॥

प्रतिषेधसामर्थ्यादेकदेशे धुर्वर्तते । धोः खं यस्मिन्नगे स धुखः । तन्निमित्तावेवैपौ न भवतः ॥ लोलुवः । पोपुवः । मरीमृजः । यङन्तेभ्यः पचाद्यच् यङोऽचीति यङ उप । अतः खात् प्रागेव च यङ उबेषितव्यः । अन्यथा देद्य इत्यत्र अखमजादेश इति कृत्वा तस्य स्थानिवद्भावात् दोङोऽचि ङ्किति युडिति युट् प्रसज्येत । धुग्रहणं किम् । लूञ । लविता । खविधिर्बलवानिति प्रागेव धुसंज्ञाया अनुबन्धनाशः । अत्रागनिमित्तं खं नास्तीति द्यङ्गवैकल्यं नाशङ्कनीयम् । यतो धुग्रहणे सति वसो लभ्यते धोः खं यस्मिन्निति । वसेन अग इत्यस्य विशेषणं किम् । क्रूयी । क्रोपयति । अत्र पुकमाश्रित्य यखं नागनिमित्तमिति न प्रतिषेधः । वसे तु प्रसज्येत । अग इति किम् । रोरवीति । गनिमित्त एव भवत्येव । अत्रापि यङखमगनिमित्तं न भवतीति द्यङ्गवैकल्यं न मन्तव्यम् यतो ऽगग्रहणे सति धुखनिमित्तत्वं लभ्यते इक इत्येव । अभाजि । रागः ॥

ङ्किङ्ति ॥ १९ ॥

गिति किति ङिति च निमित्तभूते यावेवैपौ प्राप्नुतस्तौ न भवतः ॥ गिति । ग्लाभूजिस्थः ग्स्नुरिति । भूष्णुः । जिष्णुः । किति । चितम् । स्तुतम् । भिक्षम् । मृक्षम् । ङिति । चिनुतः । चिन्वेति । मृक्षः । मृजन्ति । इक इत्येव । कामयते । अचिनवमित्यत्र लङो ङित्वात्कस्मान्न प्रतिषेधः । सुभवत्योर्मिङिति अभूत् । भवतेर्हलादौ मिङ्येप्प्रतिषेधवचनं ज्ञापकं ङितो लकारास्यादेशो ङिन्न भवति इति । यासुटो ङित्करणंच ज्ञापकम् ॥

ईदूदेद् द्विर्दिः ॥ २० ॥

ईत ऊत् एत् इत्येवमन्तो यो द्विः स दिसंज्ञो भवति । अग्नी इति । वायू इति । खट्वे इति । तद्धादित्यनेन ङेरङ्शेश्चैकादेशो द्विग्रहणेन गृह्यत इतीदाद्यन्तश्च भवति व्यपदेशिवद्भावेन । मुख्यरूपेणायं द्विरेकारान्तः पचेते इति । पचेथे इति । सत्यां दिसंज्ञायां प्रकृत्याऽचि दिपा इति प्रकृतिभावः । ईदूदेदिति किम् । वृक्षावत्र । तपरकरणमसन्देहार्थम् । मणीवादिषु नेष्यते । मणीव । दम्पतीव । रोदसीव शोभेते । संज्ञाविधौ त्यग्रहणे तदन्तविधिर्नास्तीति अशुक्ले शुक्ले सम्पन्ने शुक्लयास्तां वस्त्रे इति त्यखे त्याश्रयन्यायेन दिसंज्ञा न भवति ॥

द्वुः ॥ २१ ॥

एदिति निवृत्तम् । दकारस्य स्थाने यो मकारस्तस्मात्परावीदूतौ दिसंज्ञौ भवतः । अमी आसते । अमी अत्र । अमू आसाते । अमू अत्र । बहावीरेत इति मत्वमीत्वं च । दादुर्दो मो ऽदसो ऽसेरिति मत्वम् । द्विमात्रस्य औकारस्य द्विमात्र ऊकारः । आश्रयात्मकारादीनां सिद्धिः । द इति किम् । सम्यत्र । दाडिम्यत्र । म इति किम् । द इति तानिर्देशपक्षे ते ऽत्रेत्यत्र दकारादेशस्य परेणादेपि कृते स्थानिवद्भावात्तद्भावाच्च दिसंज्ञा प्रसज्येत । कानिर्देशपक्षे चतुःपद्यर्थ इत्यत्र स्यात् । ईदूदित्येव । इमे ऽत्र । एकयोगनिर्दिष्टानामेकदेशो ऽनुवर्तते निवर्तते चैकदेश इति । एदूग्रहणं निवृत्तमिति । अन्यथा अमुके ऽत्रेत्यत्रानुवर्तनसामर्थ्यादुकारककाराभ्यां व्यवधाने ऽपि वचनप्रामाण्यादिसंज्ञा प्रसज्येत ॥

निरेकाजनाङ् ॥ २२ ॥

निसंज्ञ एकाजनाङ् दिसंज्ञो भवति ॥ अ अपेहि । इ इन्द्रं पश्य । उ अपसर । निरिति किम् । चकारात्र । अन्वयव्यतिरेकाभ्यां प्रकृतेस्त्यस्य च विभागः । अपायिना ह्यनुबन्धलिङ्गेन निरनुबन्धलिङ्गेन निरनुबन्धादकाराद्भिद्यते णल् । एकश्चासावच्च एकाजिति किम । प्राश्नाति । अनाङिति किम् । आ उदकान्तात् । ओदकान्तात् । ङित्करणं किम् । एष्वर्थेषु ङिदयं वर्तते तत्र प्रतिषेधो यथा स्यादन्यत्र दिसंज्ञैव भवति ।

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् ॥

यथाक्रमम् । आ उष्णं ओष्णम् । आ इहि एहि । आ उदकान्तात् ओदकान्तात् । आ अर्भकेभ्यः आर्भकेभ्यः । आर्भकेभ्यो यशः प्रतीतम् । वाक्यपूरणे स्मरणे चार्थे ङित्वाभावादिसंज्ञा । आ एवं नु मन्यसे । आ एवं किल तत् ॥

ओत् ॥ २३ ॥[1]

अनेकाजर्थ आरम्भः । ओदन्तो निर्दिसंज्ञो भवति । अहो इति । उताहो इति । अत्र ओदिति प्रधानं वचनात्तु प्रधानेनापि तदन्तविधिः । तेनेह लाक्षणिकत्वान्न भवति । अदो ऽभवत् । तिरो ऽभवत् । अनुपदेशे ऽदस्तिरोन्तर्द्धाविति निसंज्ञा इह तु गौणत्वान्न भवति । अगौर्गौः सम्पन्नो गो ऽभवत् । स्विधिडाजूर्ध्यादिरिति निसंज्ञा । गौणत्वा-

(१) आदर्शपुस्तके २३, २४ सूत्रद्वयस्य विलुप्तत्वात्तदर्थानुसन्धानेनानुमितम् ।

ग्राहीके गोशब्दस्य कथमैबादिकार्यमिति चेत् ? सामान्येन संस्तुतस्य पदस्य प्रयोगाददोषः ॥

कौ वेतौ ॥ २४ ॥

किनिमित्तो य ओकारस्तदन्त इतौ परतो वा दिसंज्ञो भवति । पटो इति । पटविति । साधो इति । साधविति । काविति किम् । गवित्ययमाह । गौरिति वक्तव्यमशक्तया गो इत्युक्तमनुक्रियत अनेकान्ताश्रयणात् । अनुकार्यानुकरणयोरभेदविवक्षायामसत्यर्थवत्वे विभक्त्यनुत्पादः । इताविति किम् । पटो ऽत्र ॥

उञ् ॥ २५ ॥ (१)

उञित्येतस्य वा दिसंज्ञा भवतीतौ परतः । उ इति । विति । निरेकाजनाङिति नित्यं दिसंज्ञा प्राप्ता । सानुबन्धकनिर्देशः किमर्थः । अहो इति । उताहो इति । निसङ्घातपक्षे निरनुबन्धस्यास्य मा भूत् ॥

उञः ऊम् ॥ २६ ॥

उञः ऊमित्ययमादेशो भवतीतौ परतः । इति द्विमात्रो नासिक्यो दिसंज्ञकश्च ऊं इति यद्यपठितोऽपि निसंज्ञको ऽस्ति तस्येतावेव प्रयोगौ यथा स्यादित्यारम्भः ॥

दाधाभ्वपित् ॥ २७ ॥

दा धा इत्येवं रूपा धवो भुसंज्ञका भवन्ति पितौ वर्जयित्वा । दारूपाश्चत्वारः । प्रणिददाति । दाण् । प्रणिदाता । प्रणिदयते । प्रणिद्यति । धारूपौ द्वौ । प्रणिदधाति ।

(१) आदर्शपुस्तके २५ । २६ इति सूत्रद्वयं विलुप्ताक्षरं तदर्थानुसन्धानेन कल्पितमादर्शान्तरसंवादेन परिशोधनीयम् ॥

प्रणिधयति । दैपः पित्करणं ज्ञापकम् । अत्र प्रतिपदोक्त-परिभाषा नाश्रीयते । भुसंज्ञाकार्यं नेर्गदनदेत्यादिना णत्वं भुमेत्यादिना हलीत्वं च । दीयते । धीयते । धीतं वत्सेन । अपिदिति किम् । दायत बर्हिः । अवदायते भाजनम् । भुप्रदेशाः भुस्थोरित्येवमादयः ॥

क्तक्तवतु तः ॥ २८ ॥

क्तश्च क्तवतुश्च तसंज्ञौ भवतः । रूपसंज्ञेयम् । कृतः । कृतवान् । भूत इति वर्त्तमाने न इति क्तक्तवतुरूपौ त्यौ भवतः । कारितः । कारितवान् । ते सेटीति णेः खम् । भिन्नः । भिन्नवान् । द्रान्तस्य तो न इति नत्वम् । ककारः कित्कार्यार्थः । उकार उगित्कार्यार्थः । तप्रदेशाः ते सेटीत्येवमादयः ॥

संज्ञा खुः ॥ २९ ॥

संज्ञाशब्दवाच्योऽर्थः खुसंज्ञो भवति । खुप्रदेशाः खावन्यपदार्थ इत्येवमादयः ॥

भावकर्म्म ङिः ॥ ३० ॥

भावकर्म्मशब्दवाच्योऽर्थो ङिसंज्ञो भवति । ङिप्रदेशाः जिङावित्यंवमादयः । तत्र भावकर्मणोर्ग्रहणं प्रत्येतव्यम् ॥

शि धम् ॥ ३१ ॥

शि इत्येतद्धसंज्ञं भवति । शि इति नपुंसके जसिशसोरादेशस्यार्थवतो ग्रहणम् । कुण्डानि तिष्ठन्ति । कुण्डानि पश्य । धप्रदेशाः धेकावित्येवमादयः ॥

सुडनपः ॥ ३२ ॥

सुडिति प्रत्याहारेण स्वौजसमौटां ग्रहणम् । सुट् धसंज्ञो भवति नपुंसकलिङ्गादन्यस्य । राजा । राजानौ । राजानः । राजानम् । राजानौ । धेकाविति दीत्वम् । सुडिति किम् । राज्ञः पश्य । अनप इति किम् । सामनी । वेमनी । अनप इति पर्युदासात् स्त्रीपुंसम्बन्धिनः सुटो धसंज्ञा नपुंसके न विधिर्न प्रतिषेधः । तत्र पूर्वेण जसिशसोरादेशस्य शेर्धसंज्ञा भवत्येव । ननु व्यक्तं स्त्रीपुंसग्रहणमेव कर्त्तव्यम् । एवं तर्ह्यनप इति निर्देशात् सापेक्षस्यापि नसः सविधिर्भवतीति ज्ञाप्यते । तेन अश्राद्धभोज्यलवणभोजीत्येवमादयः सिद्धाः ॥

कतिः संख्या ॥ ३३ ॥

कतिशब्दः संख्यासंज्ञो भवति । कतिकृत्वः । कतिधा । कतिकः । किं परिमाणमेषां किमः संख्यापरिमाणे डतिश्चेति डतिः । कति वारान् भुङ्क्ते । कतिभिः प्रकारैः । कतिभिः क्रीत इति । यथाक्रमं संख्याया अभ्यावृत्तौ कृत्वम् । संख्याया विधार्थे धा । संख्यायाः कोतिशत इति क इत्येते भवन्ति । ननु प्रदेशेषु संख्याग्रहणेनान्वर्थविज्ञानात् संख्यायते ऽनयेति कृत्वा कतिशब्दस्यापि ग्रहणे सिद्धे किमर्थमिदम् । नियमार्थम् । अनिर्ज्ञातेषु कतिशब्दस्यैव संख्यारूपता । तेन भूरिप्रभूतादीनां निवृत्तिः संख्यावाङ्डो ऽबहुगणादित्यत्र बहुगणयोः प्रतिषेधाद्भवति संख्याग्रहणेन ग्रहणम् । बहुकृत्वः । गणकृत्वः । वैपुल्यसङ्ख्येयानं संख्यात्वम् । वतोर्वेडिति वचनं ज्ञापकं भवति वत्वन्यस्य संख्याग्रहणेन ग्रहणम् । तावतिकः । तावत्कः । संख्याप्रदेशाः संख्यायाः को ऽतिशत इत्येवमादयः ॥

ष्णान्तेल् ॥ ३४ ॥

कतिः संख्येति वर्तते । षकारनकारान्ता संख्या कतिशब्दश्च इल्संज्ञौ भवतः । ष्णान्तेति पदस्य संख्यापेक्षः स्त्रीलिङ्गनिर्देशः । कतेरनुवर्त्तनसामर्थ्यादिल्संज्ञा । षट् । पञ्च । सप्त । कति तिष्ठन्ति । उविल इति जस उप् ष्णान्तेति संख्याविशेषणं किम् । विप्रुषः पामान इति अन्तग्रहणं वसनिर्देशेन संख्याप्रतिपत्त्यर्थमुपदेशिकार्थं च । तेन शतानीत्यादौ न भवति । इल्प्रदेशा उविल इत्येवमादयः ॥

सर्वादि सर्वनाम ॥ ३५ ॥

सर्वादयः शब्दाः प्रत्येकं सर्वनामसंज्ञा भवन्ति । सर्वे । सर्वस्मै । सर्वेषाम् । स्त्रियाम् । सर्वस्यै । विश्वे । विश्वस्मै । उभशब्दस्य सर्वनाम्नोभावेत्येवमर्थः पाठः । उभाभ्यांहेतुभ्यां उभयोर्हेत्वोर्वसति । द्विवचनटाप्परश्चायम् । उभौ पक्षे । उभे कुले । उभे विद्ये । उभयस्मिन् । उभयेषाम् । जसि प्रथमचरमादिविकल्पात् पूर्वनिर्णयेनायमेव विधिः । उभये इति । डतरडतम इति त्यौ । कतरस्मै । इतर अन्य अन्यतर । इतरस्मै । अन्यस्मिन् । अन्यतरस्मै । त्वमित्ययं शब्दो ऽन्यवाची । त्वे । त्वेषाम् । नेम । नेमस्मिन् । जसि वक्ष्यमाणो विकल्पः । नेमे । नेमाः । समशब्दः सर्वशब्दार्थे । समे । समस्मिन् । अन्यत्र यथासख्यं समाः । समे देशे तिष्ठतीति भवति । सिमः । सिमस्मै । पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् । स्वमज्ञातिधनाख्यायाम् । अतरं बहिर्योगोपसंव्यानयोः । त्यद् तद् एतद् अदस इदम् एक द्वि । अत्वविधिं प्रति

द्विपर्यन्ता त्यदादयः । युष्मद् अस्मद् भवत् किम् । त्यदादीनां यद्यत्परं तत्तदुभयवाचि । सर्वनामेत्यन्वर्थसंज्ञाविज्ञानात् संज्ञोपसर्जनानां न भवति । सर्वोनाम कश्चित्तस्मै सर्वाय देहि । अतिक्रान्तः सर्वमतिसर्वस्तस्मै अतिसर्वाय । पूर्वपदात् स्वाङ्ग इति णत्वं न भवति । सर्वनामप्रदेशा आम्यात्सर्व्वनाम्न इत्येवमादयः ॥

वा दिक्समे ॥ ३६ ॥

दिगुपदिष्टे से वसंज्ञके सर्वादीनि वा सर्वनामसंज्ञकानि भवन्ति । न वे इति प्रतिषेधे प्राप्ते वचनम् । दक्षिणपूर्वस्यै दक्षिणपूर्वायै । उत्तरपूर्वस्यै । उत्तरपूर्वायै । दक्षिणस्याश्च दिशोर्यदन्तरालमिति प्रदाय दिशो ऽन्तराल इति वसः । सर्व्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति पूर्वपदस्य पुंवद्भावः । उत्तरपदस्य स्त्रीगोर्नीच इति प्रः । पुनष्टाप । प्रतिपदोक्तस्य दिक्समस्य ग्रहणादिह नास्ति विकल्पः । दक्षिणैव पूर्वा अस्य मुग्धस्य दक्षिणपूर्वाय देहि । दक्षिणा च सा पूर्वा च सा अस्मिन्नपि विग्रहे परत्वादिशो ऽन्तराले इतीयं प्राप्तिर्न राज्ञा दण्डवारितेति कर्तव्यमेवेदं सूत्रम् । दिग्ग्रहणं किम् । न वे इति प्रतिषेधं वक्ष्यति तस्य प्रतिषेधस्यास्य च विकल्पस्य विषयज्ञापनार्थम् । सग्रहणं किम् । साधिकारविहिते वसे विकल्पो यथा स्यादातिदेशिके मा भूत् । दक्षिणदक्षिणस्मै देहि । आबाध इति द्वित्वम् । ववदतिदेशश्च न व इत्यत्रापीदं सग्रहणमनुवर्तते नापि न प्रतिषेधः । वग्रहणं किम् । दक्षिणोत्तरपूर्वाणाम् । द्वन्द्वे विकल्पो मा भूत् । ननु प्रतिपदोक्तस्य ग्रहणमत्रोक्तं ततो द्वन्द्व इत्येव प्रतिषेधः सिद्ध उत्तरार्थं तर्हि वग्रहणम् ॥

न वे ॥ ३७ ॥

वसे सर्वादीनि सर्वनामसंज्ञानि न भवन्ति । द्व्यन्याय त्र्यन्याय । सर्वनामसंख्ययोरिति वक्तव्ये न पूर्वनिपातः संख्याया । एवं प्रियविश्वाय । प्रियोभाय । इदमेव प्रतिषेधवचनं ज्ञापमत्र तदन्तविधिरस्तीति । तेन परमसर्वस्मै इत्यत्रापि सर्वनामसंज्ञा । ननु सर्वनामसंज्ञायामन्वर्थविज्ञानात्संज्ञोपसर्जननिवृत्तिरुक्ता सर्वोपसजनश्च वस इति सर्वनामसंज्ञायाः प्राप्त्यभावात्सूत्रमिदमनर्थकम् । नानर्थकमेतत् प्रयोजनसद्भावात् । त्वकं पिताऽस्य अहकं पिताऽस्य त्वत्कपितृकः । मत्कपितृकः । वसावयवस्य सर्वनामसंज्ञाविरहादग्मा भूत् । कुत्साद्यर्थे के परतस्त्येधवोश्चेति त्वमादेशौ स इत्येव । एकैकस्मिन् । एकोवव चदित्यातिदेशिके वसे प्रतिषेधो मा भूत् । बाधिकारे पुनर्वग्रहणंवसगर्भे द्वन्द्वे ऽपि नित्यप्रतिषेधार्थम् । वस्त्रान्तरगृहान्तरा इति ॥

भासे ॥ ३८ ॥

भासे सर्वादीनि सर्वनामसंज्ञानि न भवन्ति । मासपूर्वाय । संवत्सरपूर्वाय । मासेन पूर्वः । पूर्वावरसदृशादिसूत्रेण भासः । स इतिवर्त्तमाने पुनः सग्रहणं भासार्थे वाक्ये ऽपि तत्संज्ञाप्रतिषेधार्थम् । मासेन पूर्वाय । मुख्ये च पूर्वावरेत्यादिभासे यद्वाक्यं तत्र प्रतिषेधो न साधनं कृता बहुलमिति भासे । त्वयका कृतम् । मयका कृतम् । अन्यथा त्वत्केन कृतं मत्केन कृतमित्यनिष्टं स्यात् । त्वयका मयकेति पूर्वं त्वमादेशौ ततः सुवन्तादक् । तथाह्यग्विधौ वक्ष्यति मृदः सुप इति वद्व्ययमपीहा-

नुवर्त्तते। अभिधानतश्च व्यवस्था। तत्र मृतः प्राक् टेरभवति। युष्मकाभिः। अस्मकाभिः। युष्मकासु। अस्मकासु। युवकयोरावकयोरिति । क्वचित्तु सुबन्तस्यटेः प्राक्। त्वयका। मयका। त्वयकि। मयकि॥

द्वन्द्वे ॥ ३९ ॥

द्वन्द्वे से सर्वादिनि सर्वनामसंज्ञानि न भवन्ति। कतरकतमाय। कतरकतमात्। कतरकतमानाम्॥

वा जसि ॥ ४० ॥

द्वन्द्वे से सर्वादयः सर्वनामसंज्ञा वा भवन्ति। कतरकतमे। कतरकतमाः। पूर्वेण नित्यप्रतिषेधः प्राप्तः। जसीत्याधारनिर्देशाज्जसि कार्यं शीभावो विभाष्यते। अक्तु पूर्वणैव प्रतिषिद्धः। यदि जसि परतस्तत्संज्ञाविकल्पेत तदा संज्ञापक्षे ऽभवेत्। कतरकतमके इत्यनिष्टं प्रसज्येत। कुत्साद्यर्थविवक्षायां तु के सति तेन व्यवधानान्न शीभावः। अतः कतरकतमाका इति सिध्यति। न च के ऽपि सति स्वार्थे कस्य प्रकृतिग्रहणेन ग्रहणमन्यथा सर्वादौ डतरडतमग्रहणमनर्थकं स्यात् सर्व्वनाम्न एव तयोर्विधानात्॥

प्रथमचरमतयाल्पार्द्धकतिपयनेमाः ॥ ४१ ॥

प्रथमादयः शब्दाः जसि वा सर्वनामसंज्ञा भवन्ति। प्रथमे। प्रथमाः। चरमे। चरमाः। तय इति त्यग्रहणं तेन वचनात्संज्ञाविधावपि तदन्तविधिः। द्वावयवावेषामिति द्वितये। द्वितयाः। संख्याया अवयवे तयडिति तयट एकदेशविकृतस्यानन्यत्वाद्विकल्पः। द्वये। द्वयाः। उभये। अमुभयशब्दः सर्वादित्वान्नित्यं सर्वनामसंज्ञः।

अल्पे। अल्पाः। अर्द्धे। अर्द्धाः। कतिपये। कतिपयाः। नेमे। नेमाः। नेमशब्दस्य प्राप्ते ऽन्येषामप्राप्ते विभाषा। अत्रापि जसः कार्य्यं प्रति विकल्पः। कुत्सायर्थे के कृते तेन व्यवधानात्पश्चे ऽपि सर्वनामसंज्ञा न भवति। तेन प्रथमका इत्यादि सिद्धम्॥

पूर्वादयो नव॥ ४२॥

पूर्वादयो नव सर्वादौ व्यवस्थिता जसि वा सर्वनामसंज्ञा भवन्ति। तथाहि। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां स्वमज्ञातिधनाख्यायामन्तरंबहिर्योगोपसंव्यानयोरिति। पूर्वे। पूर्वाः। परे। पराः। अवरे। अवराः। दक्षिणे। दक्षिणाः। उत्तरे। उत्तराः। अपरे। अपराः। अधरे। अधराः। व्यवस्थायामिति किम्। दक्षिणा इमे गाथका अपरा वादिनः। नात्र दिग्देशकालकृतो ऽवधिनियमो व्यवस्था प्रतीयते किं तर्हि ग्रावोद्गमन्यार्थता च। असंज्ञायामिति किम्। उत्तराः कुरवः। व्यवस्थायामपीयं संज्ञा। तेषां स्वे शिष्याः स्वाः। यदा ज्ञातिधनयोः संज्ञारूपेण वर्तते स्वशब्दस्तदा नास्ति सर्वनामसंज्ञा। उल्मुकानीव स्वा दहन्ति विद्यामाना अपि स्वा न दीयन्ते। अन्तरे गृहाः। अन्तरा गृहाः। अन्तरा गृहा नगरबाह्या इत्यर्थः।

अपुरीति वक्तव्यम्।

अन्तरायाः पुरः आगतः। बाह्याया इत्यर्थः। अन्तरे शाटकाः। अन्तराः शाटकाः। उपसंव्यानमित्युत्तरीयवस्त्रस्य संज्ञा। बहिर्योगोपसंव्यानयोरिति किम्। इमे ग्रामाणामन्तराः। अयमनयोरन्तरे स्थितः। जसि कार्यं

विभाष्यते अक्तु भवत्येव प्रतिषेधाभावात् । पूर्वके । पूर्वका इत्येवमादि ज्ञेयम् ॥

ङिङस्योरतः ॥ ४३ ॥

पूर्वादयो नव चेति चानुवर्तते । अकारान्तानि नव पूर्वादीनि ङिङस्योर्वा सर्वनामसंज्ञानि भवन्ति । पूर्वस्मिन् । पूर्वे । पूर्वस्मात् । पूर्वात् । परस्मिन् । परे । परस्मात् । परादित्यादि योज्यम् । ङिङस्याश्रयं कार्य्यं विभाष्यते अक्तु भवत्येव । अत इति किम् । पूर्वस्याम् । पूर्व्वस्याः ॥

तीयस्य ङिति ॥ ४४ ॥

तीयस्यान्तस्य ङिति वा सर्वनामसंज्ञा भवति । द्वितीयस्मै । द्वितीयाय । तृतीयस्याः । तृतीयायाः । इह मुखादागतः पार्श्वादागतः मुखपार्श्वतसोरीय इतीयः । मुखतीयः । पार्श्वतीयः । पर्वते जातः पर्वतीय इति । अमीषां लाक्षाणिकत्वादग्रहणम् । ङितीति किम् । द्वितीयानाम् । ङिति कार्यं विकल्पते अक्तु न भवत्येव । कुत्साद्यर्थे के कृते द्वितीयकाय ॥

इग्यणो जिः ॥ ४५ ॥

इक् यो यणः स्थाने भूतो भावी वा स जिसंज्ञो भवति । इक् यणः स्थाने भावित्वेनासत्त्वात् कथं जिसंज्ञ इति ? चेत् संज्ञिनो भावित्वात्संज्ञापि भाविनी । यथास्य सूत्रस्य शाटकं वयेति भावो । यथा षेष्यस्य पुत्रपत्योर्जिः । वसोर्जिरिति । कारोषगन्धोपुत्रः । विदुषः । यस्य शास्त्रान्तरेण भूतो यणः स्थाने इग्भूतो जिसंज्ञो यथा जेरिति

परपूर्वत्वं जेरिति दीत्वम् । हूतो गृहीतः । यदि यणः स्थाने इक् भाव्यमानो जिसंज्ञ इहापि स्यात, अदुहितराम्, अक्षय्युभ्यामक्षय्युवा । दुह आत्मकर्म्मणि लङ् । स्तोश्च जिश्चेति ञ्नियकोः प्रतिषेधः । शप्तस्योप् अत्र लस्य स्थाने इदूवकारस्य स्थान उदूतौ । ततश्च जेरिति परपूर्वत्वं हल इति दीत्वं च प्रसज्येत । नायं दोषः । भाविन्या संज्ञया विधीयमानस्येको जित्वात् । कार्यकालं संज्ञापरिभाषमिति । जिप्रदेशाः षेस्य पुत्रपत्योर्जिरित्येवमादयः ॥

तास्थाने ॥ ४६ ॥

रियेयमनुसूत्रमुचारिता ता सास्थान एव ज्ञातव्या । बहवेः हि तार्थाः । स्वस्वामिसम्बन्धसमोपसमूहविकारावयवस्थानादयः । तेषु प्राप्तेषु नियमः क्रियते अन्यार्थसम्प्रत्ययो मा भूदिति । नित्यशब्दार्थसम्बन्धविवक्षायां स्थानशब्दः प्रसङ्गवाची । प्रसङ्गश्च प्राप्तार्हत्वं स्वार्थप्रत्यापकावसरो वा । यथा गुरोः स्थाने शिष्य उपचर्य्यते इति गुरोः प्रसङ्ग इति गम्यते । एवमस्तेः स्थाने प्रसङ्गे भूर्भवति । भविता । भवितुम् । भवितव्यम् । ब्रूञः प्रसङ्गे वचिर्भवति । वक्ता । वक्तुम् । वक्तव्यम् । अनित्यशब्दार्थसबन्धविवक्षायामपकर्षवाची स्थानशब्दः । यथा गोः स्थाने अश्वं बधान । एवमस्तेः स्थाने ऽपकर्षे भूर्भवति । अस्तेरनन्तर अस्तेः समोप इत्येवमादयो निवर्तिता भवन्ति । यत्र तानिर्देशे सम्बन्धविशेषो न निर्ज्ञातस्तत्रेयं परिभाषोपतिष्ठते । शास इत्येवमादिषु तु शासोय उस्तस्येत्यवयवयोगो निर्ज्ञात इति नेयं व्याप्रियते ॥

स्थाने ऽन्तरतमः ॥ ४७ ॥

अन्तरः प्रत्यासन्नः। स्थाने प्राप्यमाणानामन्तरतम एवादेशो भवति । आन्तर्य्यं च शब्दस्य स्थानार्थगुणप्रमाणतः । स्थानतः । लोकाग्रम् । स्वे ऽकोदीरिति कन्ध्व एवाकारो दीर्भवति । अर्थतः । वतण्डस्यापत्यं स्त्री वतण्डादिति यञ् तस्य स्त्रियामुवित्युप । वतण्डी चासौ युवतिश्च वातण्ड्ययुवतिः । पोटायुवतोस्तोकादिसूत्रेण यसंज्ञः षसः स्त्र्युक्तपुंसकादिना पुंवद्भावः प्राप्तो जातिश्चेति प्रतिषिद्धः पुंवद्यजातीयदेशोय इत्यर्थतो वात्तण्डाशब्दो भवति । गुणतः । पाकः । त्यागः । अल्पप्राणस्य तादृश एव शेषवतस्तादृश एव । प्रमाणतः । अमुष्मै । अमूभ्याम् । प्रस्य प्रः । दोसंज्ञकस्य दीः । स्थान इति वर्तमाने पुनः स्थानग्रणं यत्रानेकमान्तर्य्यं सम्भवति तत्र स्थानत एव भवति। चेता । स्तोता । प्रमाणतो ऽकारः प्राप्तः स्थानतो ऽन्तरतमावेकारौकारौ च । तत्र पुनः स्थानग्रहणात्स्थानकृतमेवान्तर्यं बलीय इत्येकारौकारौ भवतः । तमग्रहणं किम् । वाग्घसति हकारस्य पूर्व्वसवर्त्वे स्वोष्मणस्सोष्मा द्वितीयः प्राप्तो नादवतोनादवां स्तृतीयः । तमग्रहणाद्यः सोष्मा नादवांश्च चतुर्था भवति ॥

रन्तो ऽण उः ॥ ४८ ॥

स्थाने ऽण् प्रसज्यमान एव रन्तो भवति । लक्षणान्तरेण विधीयमान एवाण् विधानबलेन तत्साहायकं प्रतिपद्यमानेन रन्तो भाव्यत इत्यर्थः । अकर्तरीति निर्देशात्सर्वादेशो न भवति । कर्त्ता । किरति । गिरति । द्वैमातुरः । भरतः शात्तमातुरः । द्व्योमात्त्रोरपत्यं तस्यापत्यमित्यण् परतो मातुरुत्संख्यासम्भद्रादेरित्युकारादेशः । उरिति किम् । गेयम् । पन्थाः । अणिति किम् । मातापितरौ । सौधातकिः ।

आनङ्ङकङौ । सङ्घातावेतौ नाणौ । महर्षिरित्यत्र द्वयोः स्थाने एव कथं रन्तः । यो हि द्वयोस्तानिर्दिष्टयोः स्थाने भवति सो ऽन्यतरेणापि व्यपदिश्यते । नरस्य पुत्रः । नार्याः पुत्रः । ऋकारलृकारयोः स्वसंज्ञोक्ता । तेन तवल्कारः लत्वम् । रन्त इति लणो लकाराकारेण प्रश्लेषनिर्देशात् प्रत्याहारग्रहणं तेनादोषः ॥

अन्ते ऽलः ॥ ४९ ॥

तानिर्दिष्टस्य य उच्यते विधिः सो ऽन्ते वर्तमानस्यालः स्थाने भवति । तास्थान इति तास्थाने निर्ज्ञातस्यानेनान्त उपसंहारः क्रियते । टित्किन्मितस्त्ववयवसम्बन्धतानिर्दिष्टस्य विधीयमाना अन्तस्य न भवन्ति । इद्वोण्याः पञ्चगोणिः । दशगोणिः । अन्तस्येद्भवति । ननु पुंसोदोयिति वर्तमाने इति खमितीद्रूपस्ययो ऽन्त्यस्तस्य प्राप्नोति । नानर्थके ऽन्ते ऽलो विधिरिति न भवति । तास्थाने इत्यस्य योगस्यकिं प्रयोजनम् । यस्तानिर्दिष्टस्तस्य स्थाने आदेशो यथा स्यादधिकस्य मा भूत् । पादः पदिति । द्विपदः पद्य पादन्तस्य न भवति ॥

ङित् ॥ ५० ॥

ङितः सर्व्वे कालः ङिच्च आदेशो ऽनेकालू सो ऽन्तेलः स्थ ने भवति । वक्ष्यति युष्मदस्मदे एकङः खञ् । यौष्माकीणः । आस्माकीनः । दकारस्याकङ अकारोच्चारणसामर्थ्यात्पररूपाभावः । सिद्धे सत्यारम्भो नियमाय ङिदेवानेकालन्त्यस्य स्थाने अतो ऽन्यः सर्वस्य । अस्ति ब्रूत्राभूवचीत्येवमादयः सर्व्वादेशाः ॥

परस्यादेः ॥ ५१ ॥

परस्य कार्यं शिष्यमाणमादेरलः स्थाने वेदितव्यम् । क्व च परस्य कार्यम् । यत्र कानिर्देशेन ईकेत्यव्यवाये पूर्वपरयोरिति परस्य । ताप्रकृतिः । ईदासः । आसीनो भुङ्क्ते । द्व्यन्तर्गेरीदपः । द्वीपः । अन्तरीपः । समीपः ॥

शित्सर्वस्य ॥ ५२ ॥

शिदादेशः सर्वस्य स्थाने वेदितव्यः । जश्शसोः शिः । धनानि तिष्ठन्ति । वनानि पश्य । इदमेव ज्ञापकयनुबन्धकृतमनेकाल्त्वं न भवतीति । तेन दिव उदित्येवमादिषु सर्वादेशो न भवति । ण अल् णलिति प्रश्लेषनिर्दशाण्णलादयः सर्वादेशाः । अभ्राभ्य औशिति परस्यादेरितोमम्बाधित्वा शित्वेन परत्वाद्वा सर्वादेशः ॥

टिदादिः ॥ ५३ ॥

टित्यः स तानिर्दिष्टस्यादिर्भवति । लाद्यगस्येट् । लविता । लवितुम् । लवितव्यम् । तास्थान इत्यस्यायमपवादः । चरेषृ इत्येवमादौ तानिर्देशाभावान्नादौ विधिः । अथवा मध्येऽपवादाः पूर्वान्विधोन्बाधन्त इति तास्थान इत्यस्यैव बाधो न तु ल्पःपरत्वस्य ॥

किदन्तः ॥ ५४ ॥

कित्यः स तानिर्दिष्टस्यान्ते भवति । मुण्डो भीषयते । भियो णिच् हेतुभयार्थे इतः षुञित्यमिति षुक णेः । भीस्म्योर्हेतुभय इति दः । पूर्वोक्तपरिहारादातः क इत्येवमादिषु नातिप्रसङ्गः ॥

परोऽचो मित् ॥ ५५ ॥

अन्त इति वर्तते । अर्थवशाद्विभक्तिपरिणामः । मिद्यः स तानिर्दिष्टस्यान्त्यादचः परो भवति । अन्तग्रहणानुवृत्तेर्हलन्तस्यापि भवति । अन्यथा अच इति विशेषणं तेन तदन्तविधिः स्वयमेव लभ्येतेति वक्ष्यति । इदिद्धोर्नुम् । नन्दिता । नन्दितुम् । नन्दितव्यम् । व्यपदेशिवद्भावादत्रान्त्यत्वम् । रुधितुदादिभ्यां श्नश्नौ । रुणद्धि । भिनत्ति । तास्थाने त्यः पर इत्यनयोरयमयवादः । मध्ये ऽपवादाः पूर्वान् विधीन् बाधन्त इत्यनित्या परिभाषा । तृणह इति निर्देशात् ॥

स्थानीवादेशो ऽनल्विधौ ॥ ५६ ॥

स्थानं प्रसङ्गो ऽस्यास्तीति स्थानीव भवत्यादेशः । स्थान्याश्रयेषु कार्येष्वनलाश्रयेषु स्थान्यादेशयोर्नानात्वात् स्थानिकार्यमादेशे न प्राप्नोतीत्यतिदिश्यते । धुगुकृत्हृत्सुम्मिङपदगादेशः प्रायः प्रयोजयन्ति । धेरादेशो धुरिव भवति । अस्तेर्भुभावे धेर्विहितास्तव्यादयः सिद्धाः । भवितव्यम् । भविता । गेरादेशो गुरिव भवति । त्रयाणाम् । गेर्नामीति दीत्वं सिद्धम् । कृदादेशः कृदिव । प्रकृत्य । प्रहृत्य । ल्यादेशे कृते पिति तुक्सिद्धः । हृदादेशो हृदिव । अक्षैर्दीव्यति आक्षिकः । शालाकिकः । प्राग्याघृठणाः । इकादेशे कृते कृदत्सा इति कृत्संज्ञा सिद्धा । सुवादेशः सुविव । वृक्षाय । डेर्यादेशे ऽपि सुपीति दीत्वं सिद्धम् । भिदादेशो भिदिव । बभूवतुः । बभूवुः । अतुस्युसि च कृते सुम्मिङन्तं पदमिति पदसंज्ञाया पदस्येति रित्वं सिद्धम् । पदादेशः पदमिव भवति । ग्रामो घः । स्वं ग्रामो नः । स्वबस्नसोः कृतयोः पदस्येतिरित्वं सिद्ध-

म् । गादेशो ग इव । अचिनुतम् । ङित्वादेप्प्रतिषेधः । इवेति किम् । स्थानी आदेशस्य संज्ञेति मा विज्ञायि । अत्र को दोषः । आङो यमहन इति वधेरेव दविधिः स्याङन्तेस्त्वाश्रयो न स्यात् । इवग्रहणादुभयत्र भवति । आहत । आवधिष्ट । आदेशग्रहणं किम् । विकारमात्रेऽपि यथा स्यात् । पचतु । पचन्तु । ङिङन्तं पदं सिद्धम् । अनल्विधाविति किम् । द्यौः । पन्थाः । स्यः । द्युपथित्यदादेशा न । स्थानिवद्भावे हल्ङ्याप इति सोः खं प्रसज्येत । अलः परो विधिरयं प्राप्तः । क इष्ट इत्यत्रेकारस्य स्थानिवद्भावे हशिरेरुत्वं प्रसज्येत । अलि विधिरयम् । प्रदीव्येति क्त्वात्यस्य स्थानिवद्भावे वलाद्यगस्येट् प्रसज्येत । अलःस्थानिविधिरयम् । अलाश्रयो विधिः अल्विधिः । शाकपार्थिवादिवन्मयूरव्यंसकादित्वात्सः ॥

परेऽचः पूर्वविधौ ॥ ५७ ॥

आदेशः स्थानीवेति वर्तते । अजादेशः परनिमित्तकः पूर्वविधौ कर्तव्ये स्थानीव भवति । पटुमाचष्टे पटयति । णिनिमित्तस्य टिखस्य स्थानिवद्भावादुङोऽत इति ऐम्न भवति । अवधीत् । अगनिमित्तस्यातः खस्य स्थानिवद्भावादतोनादेर्धेरिति हलन्तलक्षण ऐग्विकल्पो न भवति । पूर्वेणानल्विधाविति प्रतिषेध उक्ते अल्विध्यर्थमिदम् । पर इति किम् । वैयाघ्रपद्यः । पादस्य खमजादेशः परनिमित्तो न भवतीति पद्भावे स्थानीव न भवति । युवतिर्जायाऽस्य युवजानिः । जायाया निङ् न परनिमित्तक इति वलि व्यो खं न प्रतिबध्नाति । अच इति किम् । प्रगत्य । प्ये परतो ङस्य खं परनिमित्तं प्रस्य तुकि कर्त्तव्ये स्थानीव न भवति । पूर्वविधाविति किम् ।

नैधेयः । निधेरपत्यं द्यच इतोऽनिञ इति ढणि परविधौ कर्त्तव्ये आत्खस्य न स्थानिवद्भावः । अन्यथा त्रयचो ढण् न स्यात् । हे गौः । परविधौ सुखे कर्त्तव्ये ऐपो न स्थानिवद्भावः । अचोऽनादिष्टात् पूर्वविधौ स्थानिवद्भावः । इह मा भूत् । अचीकरत् । अजीहरत् । अत्र हि णौकच्युङ इति प्रादेशे कृते द्वित्वे च प्र देशस्य स्थानिवद्भावात् धौ कच्यनक्खे सन्वदिति सन्वद्भावो न प्राप्नोति । आदिष्टादेशोऽचः पूर्व्व इति स्थानिवद्भावाभावाद्भवति । वाय्वोरध्वर्य्वोरित्यत्र यखविधिं प्रति स्थानिवद्भावप्रतिषेधाद्वालि व्यो खमिति यखं प्राप्नोति । कर्तव्योऽत्र यत्नः ॥

न पदान्तद्वित्ववरेयखस्वानुस्वारदीर्घविधौ॥५८॥

पदान्तादिविधिष्वजादेशः स्थानीव न भवति । पूर्वेण प्राप्तस्य स्थानिवद्भावस्य प्रतिषेधोऽयम् । पदान्तविधौ । कौ स्तः । कानि सन्ति । असः खं ङिन्निमित्तमावादेशे यणादेशे च कर्तव्ये स्थानीव न भवति । अथ नात्र नियमः पूर्वविधेः । स्तः कौ सन्ति कानि इत्यपि प्रयोगात् । आदिष्टाच्चाचः पूर्वमौकारादि । इदं तर्ह्युदाहरणम् । अभिषन्ति । निषन्तिं । द्वित्वविधौ । दद्यत्र । मद्ध्वत्र । यणादेशस्य स्थानिवद्भावप्रतिषेधादनचीति धकारस्य द्वित्वं सिद्धम् । असिद्धं बहिरङ्गमन्तरङ्ग इति स्फान्तस्य खं न भवति । वरे विधौ । यायावरः । यातेर्यङन्ताद्यो यङ इति वरे कृते अतः खस्यागनिमित्तस्य स्थानिवद्भाव प्रतिषधाद्यखे च कृते अकारस्य स्थानिवद्भावादिटि चात्खमिति आत्खं न भवति । ईविधौ । आमलकम् । पच्चदाच्चिः । आमलक्यारवयवः फलं नित्यं दुशरादेरिति मयट् । तस्य उप्फल इत्युप् । हृदुप्युबिति स्त्रीत्यस्योप् परनि-

मित्तकस्तस्य स्थानिवद्भावप्रतिषेधाद्यस्य ङ्याञ्चेत्यखं न भवति । पञ्चभिर्दार्त्तोभिः क्रीतः रादुबखाविति ठण् । उपि स्त्रीत्यस्योप् । तस्य स्थानिवद्भावप्रतिषेधादिकारस्य खं न भवति । यखविधौ । कण्डूतिः । कण्डूयतेः क्तिचि कृतौ खाविति क्तिचि कृते अतः खस्यागनिमित्तस्य स्थानिवद्भावप्रतिषेधाद्वलि व्योः खमिति यखं भवति । उवादेशं प्रति स्थानिवद्भावः स्यादिति चेद् भवतु । च्छ्वोः शूड् भविष्यति । ततः स्वेकोदीत्वं योऽनादिषूत्पूर्व इति न्यायात्पुनरुवादेशो न भवति । स्वविधौ । शिण्ढि । पिण्ढि । श्नसः खस्य स्थानिवद्भावप्रतिषेधादत्रानुस्वारस्य परस्वत्वम्भवति । अनादिषूदचः पूर्वस्थानी नकारस्तस्यैवायं विधिः । अनुस्वारविधौ । शिंषन्ति । पिंषन्ति । नश्चापदान्तस्य झलीत्यनुस्वारे कर्त्तव्ये नकारः श्नसः खमित्यनादिष्टादचः पूर्व इत्यखं न स्थानिवद्भवति । दीविधौ । प्रतिदीन्नः । प्रतिदीन्ना । अनः खस्य परनिमित्तस्य स्थानिवद्भावप्रतिषेधात् हल्यभक्कुर्छुर इत्यनुवृत्तावुङीति दोत्वं सिद्धम् । वकारो हल्परोऽस्मादेव वचनात् । चर्विधौ । जक्षतुः । जक्षुः । गमहनजनखनघसोऽनङि ङ्किदीत्युङः खं घकारस्य चर्त्वे कर्तव्ये स्थानीव न भवति । गिर्योरिति प्रकृतिपूर्वत्वेनान्तरङ्गे दीत्वे कर्तव्ये यणादेशो ऽसिद्धः ॥

द्वित्वे ऽचि ॥ ५९ ॥

नपदान्तद्वित्वेत्यतो द्वित्वग्रहणमनुवर्तते । तत्कार्यविशेषणम् । द्वित्वनिमित्ते ऽचि अजादेशो द्वित्वे कर्त्तव्ये स्थानीव भवति । रूपातिदेशोऽयम् । आदुङ्णिखान्तस्याद्यादेशाः प्रयोजनम् । आत्खम् । पपतुः । पपुः । इटि चात्खमिति आत्खस्य स्थानिवद्भावादेकाचो लिटि द्वित्वं सिद्धम् ।

उङः खम् । जग्मतुः । जग्मुः । गमहनजनखनघसोऽनङीत्युङः खस्य स्थानिवद्भावाद् द्वित्वं भवति । णिखम् । आटिटत् । लुङि कचि णिखे च कृते णिखस्य स्थानिवद्भावादच इति द्वितीयस्यैकाचो द्वित्वं भवति । अन्तस्यादेशः । चक्रतुः । चक्रुः । यणादेशस्य स्थानिवद्भावादेकाचो द्वित्वं भवति । अयाद्यादेशाः । अहं निनाय निनय । अहं लुलव लुलाव । अयाद्यादेशानां स्थानिवद्भावादस्य णलि नेनै लोलौ इति द्वित्वं भवति । द्वित्वनिमित्त इति किम् । दुद्रूषति । ऊठि यणादेशो घेर्नतृठ द्वित्वनिमित्तमिति स्थानिवद्भावो न भवति । अचीति किम् । जेघ्रीयते । देध्मीयते । यङि द्वित्वनिमित्ते घाध्मोरीकारादेशः स्थानीव न भवति । द्वित्वे कर्त्तव्य इति किम् । जग्ले । मग्ले । धेराकारस्याचः स्थानं न भवति ॥

ईप्केत्यव्यवाये पूर्वपरयोः ॥ ६० ॥

ईकेति यत्र निर्दिश्यते तत्र पूर्वस्याव्यवहितस्य कार्यं भवति । केति यत्र निर्दिश्यते तत्र परस्याव्यवहितस्य कार्यं भवति । ताप्रकृत्तिर्भवतीत्यर्थः । इति करणोऽर्थनिर्देशार्थः । ईप्केति इमे संज्ञे द्वयोर्विभक्त्योः प्रत्यायिके प्रसिद्धे । ताभ्यामितिशब्दः परः प्रयुज्यमानो विभक्तिप्रतिपाद्यो योऽर्थस्तं प्रत्याययति । ईबर्थो यत्र निर्दिश्यते कार्यो यत्र निर्दिश्यत इत्यर्थः । ईबर्थनिर्देशः । अचीको यण् । दध्युदकम् । मध्वियत् । अव्यवाय इति किम् । धर्म्मविदत्र । कार्थनिर्देशः । अचात् । ददति । दधति । अव्यवाय इति किम् । चिकीर्षन्ति । शपा व्यवायात् झेरदादेशो न भवति ॥

नाशः खम् ॥ ६१ ॥

नाशोऽनुपलब्धिरभावोऽप्रयोग इत्यनर्थान्तरम् । एतैः शब्दैः प्रतिपाद्यमानस्यार्थस्य खमित्येषा संज्ञा भवति । इतिकरणोऽनुवर्तते । तेन नाशार्थस्य संज्ञेयं लभ्यते । स्थानिग्रहणं चानुवर्तते । प्रसङ्गवांश्च स्थानी । तेन प्रसक्तस्य नाशः खसंज्ञो भवति । भाविनो नाशस्य संज्ञित्वं संज्ञापि भाविनीति नेतरेतराश्रयदोषः । वक्ष्यति बलिव्योः खम् । दासेरः । क्षुद्राभ्यो वेति ढ्रण । इटि चात्खम् । गोदः । यिखम् । जह्यात् । खप्रदेशा बलिव्योः ख मित्येवमादयः ।

उबुजुस् ॥ ६२ ॥

तस्यैव नाशस्य उप् उच् उस् इत्येताः संज्ञा भवन्ति । संज्ञासङ्करप्रसङ्ग इति चेत् उप् उच् उस् संज्ञाभिर्भावितस्य नाशस्य एताः पृथक्संज्ञास्तेनादोषः । नोमतागोरिति प्रतिषेधो ज्ञापकः खसंज्ञाया अत्र समावेशो भवति । ततः पञ्च सप्तेति त्याश्रयं पदत्वं सिद्धम् । वसस्याचि खमिति वर्तमाने वोब् दुहदिहादिसूत्रे उब्वचनं ज्ञापकमुबुजुसः सर्वस्य स्थाने भवन्ति नान्तस्य । एता अपि भाविन्यः संज्ञाः । उदाहरणम् । पञ्चशष्कुलम् । पञ्चभिः शष्कुलीभिः क्रीतम् । रादुवखाविति आर्हीयस्य ठण उप् । ततो हृदुप्युबिति स्त्रीत्यस्योप् । जुहोति । बिभेति । उज् जुहोत्यादिभ्य इति शप उच् । तत उचि द्वित्वम् । पञ्चालाः । पञ्चालानां निवासो जनपद इत्यागतस्याणो जनपद उसिति उस् । ततो युक्तवदुसि लिङ्गसंख्ये इति लिङ्गसंख्यातिदेशः । उबुजुसप्रदेशा हृदुप्युबित्येवमादयः ।

त्यखे त्याश्रयम् ॥ ६३ ॥

त्यस्य खे कृतेऽपि त्याश्रयं कार्यं भवति । सुम्मिङक्किप्यङणिखानि प्रायः प्रयोजयन्ति । सुपः खम् । धर्मवित् । सेाः खे ऽपि पदसंज्ञा भवति । मिङः खम् । अधोक् । हल्ङ्याप इति तिपः खेऽपि पदसंज्ञायां एङ्घत्वभष्टुजश्त्वचर्त्वानि भवन्ति । क्विपः खम् । अग्निचित् । क्विपो नाशेऽपि तुक् । क्विपो यङः खम् । पापचीति । यङो नाशेऽपि द्वित्वादिकार्यं भवति । णिखम् । कार्यते । हार्यते । णेरभावेप्यैच्भवति । प्रथमं त्यग्रहणं किम् । आघनीत । आङ्पूर्वाङन्तेर्विध्यादिलिङ् । आङो यमहन इति दः । लिङोऽनन्त्यस्य खमिति सीयुडेकदेशस्य सकारस्य खेऽपि त्याश्रयं कार्यं झलि ङ्क्ङिति ङस्य खं न भवति । द्वितीयं त्यग्रहणं किम् । वर्णाश्रयं मा भूत् । गवे हितम् । त्यखे सत्यपि अचीति वर्णाश्रया अवादयो न भवन्ति ॥

नेामता गेाः ॥ ६४ ॥

उमता वचनेन नाशिते त्ये यो गुस्तस्य त्याश्रयं न भवति । मृषृः । जुहुतः । शबाश्रयावैबेपौ न भवतः । गर्गा इति बहुत्वविवक्षायां यञिञोरुपि कृते तदाश्रय आदेरैम्न भवति । गेारिति किम् । पापक्ति । जरीगृहीति । द्वित्वं ञिश्च भवतः । नेामतेति येागविभागः । तेन गेारन्यत्रापि क्वचित्स्याश्रयं न भवति । परमवाचः । परमवाचा । अन्तर्वर्तिनां विभक्तिमाश्रित्य पदत्वात्कुत्वं प्राप्तं नेामतेति प्रतिषिध्यते ॥

अन्त्याद्यचष्टिः ॥ ६५ ॥

अच इति जातिनिर्देशः । निर्द्धारणे च ता । समानजातीयस्यैव लोके निर्द्धारणं प्रसिद्धमिति द्वितीयमजग्रहणं लभ्यते । अचां योऽन्त्यो ऽच् तदादिशब्दरूपं टिसंज्ञं भवति । धर्मविदत्र इच्छब्दः । ज्ञानमुदत्र उच्छब्दः । आतामाथामित्यत्र आम्शब्दः । पचेते । पचेथे । टिद्दटेरे इति टेरेत्वम् । अहं पचे इति व्यपदेशिवद्भावात्तदादित्वम् । टिप्रदेशा टिद्दटेरे इत्येवमादयः । ॥

उपान्त्यालुङ् ॥ ६६ ॥

अलामन्त्यस्य समीप अलुङ् संज्ञो भवति । अन्त्यग्रहणादलां समुदायो लभ्यते । अल्समुदायापेक्षया ह्यन्ते । ऽल् भवति न केवलः । पच इत्यकारः । पाचकः । भेदकः उपान्त्य इति किम् । व्यवहितस्यान्त्यस्य च मा भूत् । अलिति किम् । समुदायस्य मा भूत् । उङ्प्रदेशा उङोऽतः ध्युङ इत्येवमादयः ॥

येनालि विधिस्तदन्ताद्योः ॥ ६७ ॥

येन शब्देन यो विधिर्विधीयते स तदन्तस्य भवति । अलि यो विधिः स तदादौ भवति । योचोरासुयुव इत्यचो यविधिर्विधीयत इत्यजन्ताद्भवति । चेयम् । जेयम् । केवलाद्व्यपदेशिवद्भावेन । एयम् । अध्येयम् । आतः क इत्याकारान्तात्कः । गोदः । कम्बलदः ॥ सत्यविधौ न तदन्तविधिः ॥ * ॥ सविधौ । कषूं परमश्रित इति इप्सो न भवति । त्यविधौ । सूत्रनडस्यापत्यं सौत्रनडिः । नडादेः फणिति फण् न भवति ॥ उगित्कार्यं वर्णकार्यं च तदन्तादपि भवतीति वक्तव्यम् । । भवती । अतिभवती । दात्तिः । ल्पात्तिः । नैतद्वक्तव्यम् । सुपा श्रितादयो विशिष्यन्ते न तु श्रितादिभिः

किञ्चिद्विशेषणेन च तदन्तविधिः । मृदा नडादयो विशिष्यन्ते न नडादिभिर्मृदा । उक्ता च वर्णेन च मृद्विशिष्यते । अलीति वर्णनिर्देशः । अलि यो विधिः स तदादौ भवति । श्नुधुभ्रुवां य्वोरियङुवङौ । चिक्षियतुः । चिक्षियुः । व्यपदेशिवद्भावेन केवले ऽपि तदादित्वम् । चिक्षिय । येनेति करणे भा । विधिशब्दः कर्मसाधनः ॥

अक्ष्वादेर्ङुः ॥ ६८ ॥

अक्ष्विति जातिनिर्देशो निर्द्धारणे चेप् । अक्षु आदिभूतोऽच् ऐप् यस्य समुदायस्य स ङुसंज्ञो भवति । ऐतिकायनस्य शिष्य ऐतिकायनीयः । दोश्छ इति छः । आम्बष्ठस्यापत्यमाम्बष्ठ्यः । ञ्नित्कुरुनाद्यजादकोशलाञ्ञ्य इति ञ्यः । द्रुघणा अस्मिन्देशे सन्ति वुञ्छराकठेलादिसूत्रे अरीहणादित्वाद्ढञ् । द्रौघणके जातो द्रौघणकीयः । दोः कषोऽङ इति छः । अक्ष्विति किम । हलामविवक्षार्थम् । आपगवीयः । कापटवीयः । जात्यपेक्षया बहुत्वं किम् । द्वयच एकाचश्च ङुसंज्ञा यथा स्यात् । मालामयम् । वाङ्मयम् । आदिरिति किम् । सभासन्नयने जातः साभासन्नयनः । छः प्रसज्येत । ऐबिति किम् । दत्तस्यायं दात्तः । दुप्रदेशा दोश्छ इत्येवमादयः ।

त्यदादिः ॥ ६९ ॥

त्यदादीनि शब्दरूपाणि ङुसंज्ञानि भवन्ति । अक्ष्वादिरिति नेहाभिसम्बध्यते । यद्यभिसम्बन्ध्येत तदोपसर्जनत्वे सत्यपि वचनात्तदादेरेव ङुसंज्ञा स्यान्न केवलानामिति । त्यदीयः । तदीयः । तवापत्यं त्वादायनिः । मादायनिः । वा वृद्धादेरिति फिञ् । त्यदादिः सर्वादेरन्तर्गण आ परिसमाप्तेः ॥

एङ् प्राग्देशे ॥ ७० ॥

अक्ष्वादेरिति वर्तते । एङ् यस्याचामादिस्तद्संज्ञं भवति प्राचो देशाभिधाने । एणीपचने जात एणीपचनीयः । एवं गोनर्दीयः । भोजकटीयः । एङिति किम् । आहिच्छत्रः । कान्यकुब्जः । प्राग्ग्रहणं किम् । देवदत्ती नाम वाहीकेषु ग्रामस्तत्र भवो दैवदत्तः । देश इति किम् । गोमती नाम नदी तस्यां भवो गौमतः । वा नाम्न इति यदा दुसंज्ञा नास्ति तदेदमुक्तम् । भिन्नलिङ्गो नदी देशोग्रामो पुरमिति ज्ञापकान्नदी देशग्रहणेन न गृह्यते । शरावती नाम नदी तस्याः पूर्वो देशः प्राग्देशः । उत्तरस्तू दीचां देशः ॥

वा नाम्नः ॥ ७१ ॥

पुरुषैर्व्यवहाराय सङ्केतितः शब्दः संज्ञा नाम । नाम धेयस्य वा दुसंज्ञा भवति । पद्मनन्दीयम । पाद्मनन्दिनम् । देवदत्तीयम् । दैवदत्तम् । नाम्न इति किम् । देवैर्दत्त देवदत्त इति यः क्रियानिमित्तको देवदत्तशब्दस्तस्य काश्यादिषु पाठाट्ठकठञावेव भवतः । वेति व्यवस्थितविभाषा । तेन घृतप्रधानो रौढिः घृतरौढिः संज्ञेयम् । तस्य शिष्या घृतरौढीयाः । एवमुदनपाणीयाः । वृद्धाम्भीयाः । वृद्धकाश्यपीयाः । नित्यं दुसंज्ञा । जिह्माकात्यहरितकात्ययोर्न भवत्येव । जैह्माकाताः । हारितकाताः ॥

अणुदित्स्वस्यात्मना ऽभाव्यो ऽतपरः ॥ ७२ ॥

अण् उदिच्च गृह्यमाणः स्वस्य ग्राहको भवति आत्मना सह भाव्यमानं तपरं च वर्जयित्वा । इदमणग्रहणं परेण णकारेण । ऋतःस्यादेरिति तपरनिर्देशाज्ज्ञा

यते । यस्य ङ्याञ्च । दाक्षिः । चैालिः । दैत्यः । कौमारः । अस्य च्वौ । शुक्लीभवति । मालीभवति । उदित् । स्तोः श्चुना श्चुः । ष्टुना ष्टुः । अभाव्य इति किम् । भाव्यन्ते उत्पाद्यन्ते त्यादेशटित्किन्मितस्ते स्वस्य ग्राहका न भवन्ति । अस्त्यात् । त्यदादेरः । टित् । लविता । कित् । बभूव । मित् । सृजिदृशोरम् । अतपर इति किम् । भिसोऽत ऐ । वृद्भैः । खट्वाभिरित्यत्र न भवति । तकार इद्यस्य सोऽयं तिदिति सिद्धे परग्रहणमुभयार्थम् । तः परोऽस्मात्तपरस्तादपि परस्तपरः । इदमेव ज्ञापकं सविधौ केति योगविभागोऽस्ति । आदैगैप् । अदेङेप तपरत्वादैजेङादिषु त्रिमात्रचतुर्मात्राणां निवृत्तिः । अभाव्बोऽतपर इति पृथग्भावान्नञुच्चारणं किम् । क्वचिद्भाव्योऽपि स्वं गृह्णातीति ज्ञापनार्थम् । अमूभ्याम् । संज्ञासूत्रमिदं न परिभाषा । साहि नियमार्था भवति । न चाणुदितां स्वस्यास्वस्य च ग्रहणं प्राप्तं येन स्वस्यैवेति नियमः स्यात् ॥

अन्त्येनेतादिः ॥ ७३ ॥

अन्त्येनेत्संज्ञकेन गृह्यमाण आदिस्तन्मध्यपतितानां ग्राहको भवत्यात्मना सह ॥ आद्यन्तौ सम्बन्धिशब्दौ । अतः सामर्थ्यादाद्यन्तव्यतीरेकेण तन्मध्यपाति वस्तु प्रत्येकसंज्ञित्वेनाक्षिप्तम् । अ इ उ इत्येतेषां प्रत्येकमणिति संज्ञा । एवमक अच् अट् इत्येवमादयः । अन्त्येनेति किम् । सुडित्यत्र आदिना टा इत्येतस्य टकारेण ग्रहणं मा भूत् । अन्त्येनेतीदमेव ज्ञापकं सहार्थे गम्यमानेऽपि भा भवति ॥

असंख्यं भि ॥ ७४ ॥

संख्या एकत्वादिका सा यस्य न विद्यते तदसंख्यं

भिसंज्ञं भवति ॥ एकत्वादिनिबन्धना विभक्त्युत्पत्तिरसंख्यादप्राप्ता सुपो भेरिति वचनाद्भवति । के पुनरसंख्याः स्वर। अन्तर। प्रातर। सायम्। नक्तम्। अस्तम। वस्तोः। दिवा। दोषा। ह्यः। श्वः। कम्। शम। योर्मयः। च। ना। अन्नस्। विहायसा। रोदसो। ओम्। भूः। भुवः। स्वस्ति। समया। निकषा। अन्तरा। बहिस। साम्प्रतम। अद्धा। सत्यम्। इद्धा। मुधा। मृषा। वृथा। मिथ्या। मिथो। मिधु। मिथुनम्। अनिशम्। मुहुः। अभीक्ष्णम्। मङ्क्षु। झटिति। उच्चैस्। नीचैस्। अवश्यम्। सामि। साचि। विष्वक्। अत्वक। आनुषक। साजक। द्राक्। प्राक। धिगृक। पृथक्। धिक्। हिरुक। जोक। मनाक्। शनैः। ईषत्। जोषम्। तूष्णीम्। कामम्। निकामम्। प्रकामम्। आरात्। अरम्। वरम्। परम्। चिरम्। तिरः। नमः। स्वयम्। भूयः। प्रायः। प्रवाहुकम्। आर्यहलम। कु। अलम्। बलवत्। अतीव। सुष्ठु। दुष्ठु। ऋते। सपदि। साक्षात्। सनात्। सना। सु। सहसा। युगपत्। अपांशु। पुरा। पुरतः। पुरस्तात्। पुरः। इत्येवंप्रकारा निसंज्ञकाश्च सर्वे च वा ह अह एवम्प्रभृतयो हृतश्च तसादयस्तत इत्यादयो व्यर्थाः कृतश्च सुमाम्नुमादयः क्त्वाप्यादेशश्चेति । हसश्चेति केचित्पठन्ति । तत्तु चिन्त्यम् । उपाग्निकमित्यकोऽसम्भवात् । उपकुम्भमन्यत् इति सुमो दर्शनात् । उपकुम्भीकृत्येति ईत्वविधानाच्च । सामान्यविषया भिसंज्ञा । विशेषविषया निसंज्ञा । असंख्यग्रहणं किम् । यत्रासंख्यात्वं प्रतीयते तत्र भिसंज्ञा । उच्चैः । परमोच्चैः । अस्ति । स्वस्ति । उपसर्जने मा भूत् । अत्युच्चैः । अत्युच्चैसौ । अत्युच्चैसः । अत्यस्तिः । भिप्रदेशाः सुपो भेरित्येवमादयः ॥

गाङ्कुटादेरञ्णिन्ङित् ॥ ७५ ॥

गाङित्येतस्मात् कुटादिभ्यश्च धुभ्यः परे ऽञ्णितस्त्या ङितो भवन्ति ॥ विनापि वतमतिदेशो गम्यते । गाङिति व्याख्यानादिङादेशो गृह्यते । कुटादिस्तुदादेरन्तर्गणो यावत् वृत्शब्द इति । गाङ् । अध्यगीषृ । अध्यगीषाताम् । अध्यगीषत । लुङ्लुङोर्वेति इङो गाङादेशः । भूमादिसूत्रेणेत्वम् । कुटादि । कुटिता । कुटितुम् । कुटितव्यम् । पुटिता । पुटितुम् । पुटितव्यम् । व्यचेरनसि कुटादित्वम् । विचिता । विचितुम् । विचितव्यम् । अनसीति किम् । उद्व्यचाः । अस् सर्वधुभ्य इत्यस् । अञ्णिदिति किम् । उत्कोटयति । उत्कोटो वर्तते । ङितीव ङिद्वत् । ईबन्ताद्वर्दो गम्यते । तेन उच्चुकुटिषति इत्यत्र ङनुदात्तेतो द इति दो न भवति ॥

इङ्विजः ॥ ७६ ॥

अन्त्येनेतादिरित्यत आदिरिति वर्तते । विजेर्धोरुत्तर इडादिस्त्यो ङिद्वति ॥ उद्विजिता । उद्विजितुम् । उद्विजितव्यम् । इडिति किम् । उद्वेजनम् । उद्वेजनीयम् । विज इति किम् । लविता ॥

वेर्णोः ॥ ७७ ॥

ऊर्णोतेः परः इडादिस्त्यो वा ङिद्वति ॥ प्रोर्णुविता । प्रोर्णविता । अप्राप्ते विकल्पोऽयम् । दसंज्ञके तु लङ इटि परत्वान्नित्यो विधिः । प्रौर्णुवि । अञ्णिदित्येव । भविदिटि प्रोर्णाविष्यते । इडादिरित्येव । प्रोर्णवनम् । प्रोर्णवनीयम् ॥

गो ऽपित् ॥ ७८ ॥

अपित् गसंज्ञको ङिद्भवति ॥ कुरुतः । कुर्वन्ति । चिनुतः । चिन्वन्ति । मृषृः । मृजन्ति । ग इति किम् । कर्ता । मार्ष्टा । अपिदिति किम् । करोति । मार्ष्टि । अपिदिति प्रसज्यप्रतिषेधः । यद्येवं तुदानि लिखानोत्यत्र पिदपितोरेकादेशः पिद्भवतीति ध्युङ एप्प्रसज्येत । नायं दोषः । लोडादेशस्य पित्वं न चाटः । अथवायं पर्युदासः । इह तर्हि च्यवन्ते प्लवन्त इति परापेक्षपिदपितोरेकादेशस्य पितोऽन्यत्वमस्तीत्येप्प्रतिषेधः प्रसज्येत । नैष दोषः । वार्णाद्धावं बलीय इति प्रागेवैकादेशादेप् ॥

लिडस्फात्किद् ॥ ७९ ॥

अपिदित्येव । अस्फान्तात्परोऽपिल्लिङ् किद्भवति । बिभिदतुः । बिभिदुः । ममृजतुः । ममृजुः । लिडिति किम् । यष्टा । अस्फादिति किम् । ममन्थतुः । ममन्थुः । ननु ररन्धिव ररन्धिम इत्यत्रास्फाद्विहितो लिट् । नैवम् । नुम्विधावुपदेशग्रहणाश्रयणात् । एवञ्च कुण्डा दुण्डेत्यत्र सरोहलेति अस्त्यो भवति । अपिदित्येव । बिभेदिथ । ङिदिति वर्त्तमाने किद्ग्रहणं किम् । ईजतुः । ईजुः । ङिति जिर्न स्यात् । अयमेव किद्विषयः । ववृते । वृवृधे इत्यत्र परत्वादेपि कृते स्फान्तत्वमिति चेत् इषूवाचित्त्वात्परशब्दस्येत्यदोषः । अस्फादिति प्रसज्यप्रतिषेधः । न चेत् अस्फान्ताद्विहित इति पर्युदासे हि हलन्तादेव लिट् कित् स्यात् । वोर्णोरित्यतो वेति व्यवस्थितविभाषाऽनुवर्तते । ततः श्रन्थिग्रन्थिदम्भिस्वञ्जीन्धिभ्योऽपि किद्भवतीत्येके । श्रेथतुः । श्रेथुः । ग्रेथतुः । ग्रेथुः । देभतुः ।

देभुः । परिषस्वजे । परिषस्वजाते । समीधे । समीधाते । समीधिरे ॥

मृडमृदगुधकुषवदवसः क्त्वा ॥ ८० ॥

मृडमृदगुधकुषवदवस इत्येतेभ्यः परः क्त्वा त्यः किद्भवति । मृडित्वा । मृदित्वा गुधित्वा । कुषित्वा । उदित्वा । उषित्वा । सिडे विधिरारभ्यमाणो नियमार्थः । तुल्यजातीयस्य च नियमः सेट् क्त्वा तुल्यजातीयः । तेन मृडादिभ्य एव क्त्वा सेट किद्भवति नान्येभ्यः । देवित्वा । वर्तित्वा । सेडिति विशेषणं किम् । भुक्त्वा । मुक्त्वा । मृडादिभ्यः क्त्वैव किद्भवति इति विपरीतो नियमो नाशङ्कनीयः । एवं हि क्लिश इति कित्त्ववचनमनर्थकं स्यात् । प्रतिषेधाभावात् । गुधिकुष्योस्तु व्युडोवोहलः संश्चेति विकल्पे प्राप्ते नित्यार्थः पाठः ॥

क्लिशः ॥ ८१ ॥

परः क्त्वा सेट् किद्भवति । क्लिशित्वा । पूर्वेण नियमेन कित्वे निवर्तिते व्युडोवोहलः संश्चेति विकल्पः प्राप्तः । पूर्वं सूत्रे इषृतोऽवधारणार्थं योगान्तरम् ।

मुषग्रहिरुदविदः संश्च ॥ ८२ ॥

मुषग्रहिरुदविद इत्येतेभ्य परः संश्च क्त्वा च सेट् किद्भवति । मुमुषिषति । जिघृक्षति । रुरुदिषति । विविदिषति । मुषित्वा । गृहीत्वा । रुदित्वा । विदित्वा । ग्रहेर्मृडादिनियमान्निवृत्तौ विध्यर्थमितरेषां व्युडोवोहलः संश्चेति विकल्पे प्राप्ते वचनम् ॥

झलिकः ॥ ८३ ॥

क्त्वेति निवृत्तम् । अन्तेनेतादिरित्यत आदिरिति

वर्तते । इगन्ताङोः परो झलादिः सन्निकृष्यते । सामर्थ्यात्सन्निहितस्य धोरिका तदन्तविधिः । चिचीषति । निनीषति । रुरूषति । चिकीर्षति । लुलूषति । यदि सनि दीत्ववचनसामर्थ्यान्त्रात्रिकद्विमात्रिकयोरेवभावः सिद्ध इत्यस्यानर्थक्यम् । णिखमपि तर्हि न स्यात् झीप्सति । एतस्मिंस्तु सति चिचीषत्यादिषु सावकाशं दीत्वं परत्वान्णिणखेन बाध्यते । झलादिरिति किम् । शिशयिषते । इक इति किम् । पिपासति । सनीत्येव । कर्ता ॥

हलन्तात् ॥ ८४ ॥

सन् झलिक इति वर्तते । अन्तशब्दः समीपवचनः । इकोऽन्तः समीपो यो हल् तदन्ताङोर्झलादिः सन्निकृष्यते भवति । बिभित्सति । बुभुत्सते । विवृत्सति । अन्तग्रहणं किम् यियक्षति । जिर्न भवति । नात्रेक्समीपाद्धलः परः सन् । एवं वा सूत्रार्थः । इकः परो हलन्तो हलवयवो यो धुस्तस्मादुत्तरो झलादिः सन्निकृष्यते भवति । अन्तग्रहणं स्पष्टार्थमुक्तमस्मिन् व्याख्याने । इक इति कानिर्देशः किम् । यियक्षति । झलित्येव । विवर्द्धिषते । निरेकाजनाङित्यत्र एकग्रहणं ज्ञापकमुक्तमन्यत्र वर्णग्रहणे जातिग्रहणमिति । तेनेह हलग्रहणेन भिन्नेष्वभिन्नाभिधानप्रत्ययनिमित्तं हल् जातिर्गृह्यते । ततो धिप्सतीति सिद्धम् ॥

सिलिङ् दे ॥ ८५ ॥

सन्निति निवृत्तम् । झलिकः हलन्तादिति च वर्तते । सिश्च लिङ् च दे इको हलन्तात्परौ झलादी कितौ भवतः । सेरेव दपरत्वं विशेषणं न लिङोऽसम्भवात् । द एव हि लिङ् झलादिः । अभित्त । अबुद्ध । भित्सीष्ट । भुत्सीष्ट ।

द इति किम् । अस्राक्षीत् । कित्वे सृजिदृशोरमागमो न स्यात् । वदव्रजेत्यादिनैप । इक इत्येव । अयषु । यक्षीष्ट । जिः प्रसज्येत । हलन्तादित्येव । अचेषु । चेषीष्ट । एम्न स्यात् । झलादिरित्येव । अवर्तिषु । वर्तिषीष्ट । एम्न स्यात् ॥

उः ॥ ८६ ॥

अर्तेर्व्याख्यानादग्रहणम् । ऋवर्णान्ताङोः परौ सिलिङौ दे झलादी कितौ भवतः । अकृत । अहृत । कृषीष्ट । द्विमात्रस्य । अस्तीर्ष्टाम् । स्तीर्षीष्ट । लिङ्योर्द इत्यनिटपक्षे इष्टव्यम् । झलादिरित्येव । अस्तरिष्ट । स्तरीषीष्ट ॥

गमो वा ॥ ८७ ॥

गमेर्ङोः परौ सिलिङौ दे झलादी वा कितौ भवतः । समगत । वा गमः कित्वे अनुदात्तापदेशेत्यादिना ङ्खं प्राङ्गोरिति सेः खम् । पक्षे समगंस्त । सङ्गंसीष्ट ।

हनः सिः ॥ ८८ ॥

हन्तेर्ङोः परः सिर्दे किद्भवति । आहत । आहसाताम् । आहसत । सेः कित्वान्ङस्य खम् । अन्यथा अनिदित इति उङः खस्य प्रतिषेधः स्यात् । पुनः सिग्रहणं लिङ्निवृत्त्यर्थम् । दग्रहणमनुवर्तते । एवं नित्यो वधादेश इति इह प्रयोजनं नास्ति ॥

यमः सूचने ॥ ८९ ॥

यमेर्ङोः सूचनेऽर्थे वर्तमानात्परः सिर्दे किद्भवति ॥ सूचनं गन्धनमाविष्करणमित्यर्थः । उदायत । उदायसाताम् । उदायसत । अकर्मकत्वे आङो यमहन इति दः । सूचन इति किम् । आयंस्त कूपाद्रज्जुम् । सकर्मकत्वे समुदाङ्यमो ग्रन्थ इति दः ॥

वोपयमे ॥ ९० ॥

उपयमो दारस्वीकारः । उपयमेऽर्थे वर्तमानाद्यमेर्डोः परः सिर्द्वा किद्भवति ॥ उपायत कन्याम् । उपायंस्त कन्याम् । स्वीकृतावुपाद्यम इति दः । इयमऽप्राप्ते विभाषा । स्वीकारसूचने पूर्वविप्रतिषेधेन पूर्वेण नित्यो विधिः ॥

भुस्थोरिः ॥

द इति वर्तते । भुसंज्ञकानां स्था इत्येतस्य च धोरिकारोऽन्तादेशो भवति सौ सिश्च दे कित् । अदित । अधित । उपास्थित । प्रादिति सेः खम् । सन्निपातपरिभाषाया अनित्यतां वक्ष्यति । तिष्ठतेरुपान्मन्त्रकरणे धेरिति दः । इत्ववचनसामर्थ्यादेषो निवृत्तिः सिडिति किद्ग्रहणमुत्तरार्थमनुवर्त्तमानं सेरपि विशेषणम् ।

तः सेट् पूङ्शीङ्स्विन्मिद्क्ष्विद्धृषो न ॥ ९१ ॥

पूङ्शीङ्स्विद्मिद्क्ष्विद्धृष इत्येतेभ्यः परस्तसंज्ञः सेट् न किद्भवति ॥ पवितः । पवितवान् । श्युकः किती इटि प्रतिषिद्धे पूङ इति तत्वोरिड् विभाषितः । शीङ् । शयितः । शयितवान् । अनुबन्धो यङुबन्तनिवृत्त्यर्थम् । शेश्यितः । शेश्यितवान् । एर्गिवाक्चादुडोऽसुधिय इति यत्वम् । स्विदा । प्रस्वेदितः । प्रस्वेदितवान् । प्रमेदितः । प्रमेदितवान् । प्रक्ष्वेदितः । प्रक्ष्वेदितवान् । प्रधर्षितः । प्रधर्षितवान् । वैयात्ये धृषू इत्येव भवति । पूङस्तयोर्व्यक्तखार्था इति कर्मणि क्तः । शीङो धिगत्यर्थाचेति कर्तरि चेति । स्विदादीनां कर्त्तरि चारम्भे क्त इति कर्त्तरि क्तः । आदितः सेटि प्रतिषेधे वाभावारम्भयोरिति पक्षे भवति ।

त इति किम् । पवित्वा । पूङ इतीट्पक्षे मृडादिनियमादकित्वम् । सेडिति किम् । पूतः । पूतवान् ॥

मृषः स्वार्थे ॥ ९२ ॥

स्वार्थस्तितिक्षा । मृषेर्द्धोः स्वार्थे वर्तमानात्तसंज्ञः सेट् न किद्भवति । मर्षितः । मर्षितवान् । स्वार्थ इति किम् । अपमृषितं वाक्यमाह । धूनामनेकार्थत्वात् स्वार्थग्रहणं पठितापेक्षम् । पाठस्तूपलक्षणम् । सेडित्येव । मृषु सहने चास्योदितवात् यस्य वेतीटि प्रतिषिद्धे मृषृम् ॥

वोदुङो भावारम्भयोः क्तः ॥ ९३ ॥

त सेण्न किदिति वर्तते । उदुङो धोः शब्विकरणात्परो भावे चारम्भे च तः सेड् वा न किद्भवति । भावग्रहणं क्तस्य विशेषणम् । आरम्भ आद्यः क्रियाक्षणः । स धोर्विशेषणम् । द्युतितमस्य । द्योतितमस्य । सम्बन्धे ता । कर्तृत्वविवक्षायां नक्तिनेत्यादिना ताप्रतिषेधः । द्युतितमनेन । लोठितमनेन । प्रलुठितः । प्रलोठितः । प्रलुठितवान् । प्रलोठितवान् । कर्त्तरि चारम्भे क्त इति कर्त्तरि क्तः । उदुङ इति किम् । विदितमनेन । प्रविदितः । भावारम्भयोरिति किम् । रुचितः कार्षापणः । शब्विकरणादिति किम् । गुधितमस्य । प्रगुधितः । श्राविकरणोऽयम् । सेडित्येव । रूढमस्य । प्ररूढः । तपरकरणमसन्देहार्थम् । निकुचित इति नकारस्य खे कृते सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येत्युदुङो विकल्पो न भवति । विहितविशेषणाद्वा ॥

नोङः स्थफाक्टा ॥ ९४ ॥

सेडिति वर्तते वेति च । नकारोङो धोस्थकारान्तात् फकारान्ताच्च क्त्वा सेट् वा किद्भवति । श्रथित्वा । श्रंथि-

त्वा । ग्रथित्वा । ग्रन्थित्वा । गुफित्वा । गुम्फित्वा । मृडादिनियमान्नित्यमकित्वे प्राप्ते विधिर्विभाष्यते । नोङ इति किम् । गोफित्वा । नन्वत्रापि व्युङोवोहलः संश्चेति विकल्पेन भाव्यम् । एवं तर्हि ऋफेरर्फित्वा प्रत्युदाहरणम् । थफान्तादिति किम् । संसित्वा ॥

वञ्चिलुञ्च्यृत्तृषिमृषिकृषः ॥ ९५ ॥

वञ्चिलुञ्च्यृतितृषिमृषिकृष् इत्येतेभ्यः परः क्त्वा सेड् वा किद्भवति । वचित्वा । वञ्चित्वा । लुचित्वा । लुञ्चित्वा । ऋतेर्वागइति यदा ईयङ् न भवति तदा ऋतित्वा । अर्त्तित्वा । तृषित्वा । तर्षित्वा । मृषित्वा । मर्षित्वा । कृषित्वा । कर्षित्वा । मृडादिनियमान्नित्यमकित्वं प्राप्तम् सेडित्येव । वङ्क्त्वा । मृष्ट्वा । वेादित इति पक्षे नेट् ॥

व्युङो ऽवो हलः संश्च ॥ ९६ ॥

सेडिति वर्तते वेति च ॥ उकारोङ इकारोङश्च धोरवकारान्ताद्धलादेः परः संश्च क्त्वा च सेटौ वा कितौ भवतः । उकारेकारोङो ऽजन्तत्वासम्भवाद्धलग्रहणमादिविशेषणम् । द्युतिषते । द्योतिषते । द्युतिस्वाप्योर्जिरिति षस्य जिः । द्युतित्वा । द्योतित्वा । लिलिखिषति । लिलेखिषति । लिखित्वा । लेखित्वा । सन्नकिदेव क्त्वापि सेण्मृडादिनियमादकित् । तयोरप्राप्तं कित्वमनेन विधीयमानं विकल्प्यते । व्युङ इति किम् । विवर्तिषते । वर्त्तित्वा । अव इति किम् । दिदेविषति । देवित्वा । हलादेरिति किम् । एषिषिषति । एषित्वा । सनि एपि कृते द्वित्वम् । सेडित्येव । बुभुक्षते । भुक्त्वा ॥

युक्तवदुसि लिङ्गसंख्ये ॥ ९७ ॥

युक्तः प्रकृत्यर्थः । प्रत्ययार्थेन सम्बन्धात् । उसोऽर्थ उस् । उसि युक्त इव लिङ्गसंख्ये भवतः । ईबर्थे वत् । उसिति नाशस्य संज्ञा । उसा नष्टस्य त्यस्यार्थः साहचर्यादुस् । तत्रोसर्थे प्रकृत्यर्थे इव लिङ्गसंख्ये विधीयेते । लिङ्गं स्त्रीपुंनपुंसकानि । संख्या एकत्वद्वित्वबहुत्वानि । पञ्चालो नाम राजा तस्यापत्यं राष्ट्रशब्दाद्राज्ञोऽञित्यञ् । बहुत्वे तस्योपि कृते पञ्चालाः क्षत्रियाः पुल्लिङ्गा बहुसंख्याः । तेषां निवासो जनपदस्तस्य निवासादूरभवावित्यागतस्याणो जनपद उसित्युस् । क्षत्रियेषु ये लिङ्गसंख्ये ते जनपदेऽपि भवतः । पञ्चालाः । कुरवः । अङ्गाः । वङ्गाः । कलिङ्गाः । एवं वरणानामदूरभवः । गोदौ नाम ह्रदौ तयोरदूरभवः । वरणादेरिति उस् वरणाः शिरीषाः । गोदौ । अर्थातिदेशाद्विशेषणानामपि तद्वत्ता सिद्धा । पञ्चाला रमणीया बहून्ना बहुक्षीरघृता बहुमाल्यफलाः । वरणा रमणीयाः । गोदौ रमणीयौ । अजातेरिति वक्तव्यम् । पञ्चाला जनपदः । गोदौ ग्रामः । अत्र जनपदग्रामयोर्जातित्वान्नातिदेशः । जात्यर्थो जातिः । तेन तद्विशेषणानामपि प्रतिषेधः । पञ्चाला जनपदो रमणीयः । नेदं वक्तव्यम् । सञ्ज्ञाप्रामाण्यात् । यथा वर्षा आपो दारा गृहाः सिकता इत्येवमादीनां संज्ञाशब्दानां संज्ञाप्रामाण्यादेव स्वलिङ्गेन स्वसंख्यया च साधुत्वमेवं जातेरपि भविष्यति । पञ्चालादीनान्तु संज्ञाशब्दानामन्वाख्यानप्रदर्शनार्थमुस्लिङ्गसंख्यातिदेशश्च विधीयते इत्यदोषः । उसीति किम् । आमलकं फलम् । उपि कृते फलेऽर्थे आमलकशब्दस्य स्त्रीलिङ्गं मा भूत् । लिङ्गसंख्ये इति किम् ।

बदर्या अदूरभवो ग्रामः । वरणादित्वादुस् तस्य वनं बदरीवनम् । वनस्पतित्वातिदेशो मा भूत् । विभाषौषधिवनस्पतिभ्य इति णत्वं प्रसज्येत । वेति व्यवस्थितविभाषानुवृत्तेर्मनुष्यार्थे उसि विशेषणानां न लिङ्गसंख्यातिदेशः । पञ्चाला अभिरूपः । वद्रिका दर्शनीयः । पञ्चेव मनुष्य इवे प्रतिकृतौ क इतिकः । तस्योस् मनुष्य इत्युस् । खलतिकादिषु संख्यातिदेश एव । खलतिकस्य पर्वतस्यादूरभवानि खलतिकं वनानि । हरीतक्यादिषु लिङ्गातिदेश एव । हरीतक्या अवयवः फलानि हरीतक्यादेरित्युस् । हरितक्यः फलानि । तिष्यपुनर्वसूनां भद्वन्द्वे द्वित्वम् । तिष्य एकः पुनर्वसू द्वौ । तेषां भद्वन्द्वे द्वित्वं भवति । उदितौ तिष्यपुनर्वसू । तिष्यपुनर्वसूनामिति किम् । राधानुराधाः । श्रवणधनिष्ठाः । भग्रहणं किम् । तिष्ये जातः । पुनर्वस्वोर्जातौ तत्र जात इत्यागतस्याणो भेभ्यो बहुलमित्युप् । तिष्यश्च पुनर्वसू च तिष्यपुनर्वसवो माणवकाः । ननु गौणत्वादेवात्र न भविष्यति । पर्यायार्थं तर्हि भग्रहणम् । पुष्यपुनर्वसू सिद्धपुनर्वसू इति । बहुवचननिर्देशः किमर्थः । एकवद्भावे मा भूत् । इदं तिष्यपुनर्वसु । इदमेव ज्ञापकं वा तरुमृगादिसूत्रे वेति योगविभागोऽस्ति । द्वन्द्व इति किम् । यस्तिष्यस्तौ पुनर्वसू येषां ते तिष्यपुनर्वसवो मुग्धाः । तिष्यादय एवात्र विपर्ययेण प्रतीयन्त इति भविषयत्वमस्ति । जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्यामिति न वक्तव्यम् । सामान्यविशेषात्मकत्वाद्वस्तुनः । विशेषेष्वनुवृत्ताकारबुद्धिनिमित्तं सामान्यत्वम् । वृत्ताकारबुद्धिहेतवो विशेषाः । तत्र सामान्यविवक्षायामेकत्वं भवति । सम्पन्नो

व्रीहिः । विशेषविवक्षायां बहुत्वम् । सम्पन्ना व्रीहयः । संख्यानुप्रयोगे जातिविवक्षैव । एको व्रीहिः सम्पन्नः सुभिक्षं करोति । असदो द्वयोरेकस्य च वा बहुत्वं न वक्तव्यम् । कत्वमहं ब्रवीमि । आवां ब्रूवः । वयं ब्रूम इति । आत्मनइन्द्रियाणां च स्वातन्त्र्यं पारतन्त्र्यं विवक्षया भविष्यति । कदाचिदात्मा स्वतन्त्रो भवति । अनेनाक्ष्णा पश्यामि । कदाचिदिन्द्रियाणां स्वातन्त्र्यम् । इदम्मेऽक्षि पश्यति । तत्रात्मनः स्वातन्त्र्यविवक्षायामेकत्वमिन्द्रियाणां स्वान्त्र्ये बहुत्वम् । सविशेषणस्यात्मविवक्षैव । अहं देवदत्तो ब्रवीमि । अहं साधुर्ब्रवीमि । युष्मदि गुरावुभयविवक्षा । त्वं मे गुरुः । यूयं मे गुरवः । एतच्च शब्दशक्तिस्वाभाव्यात् । फल्गुनीप्रोष्ठपदानां नक्षत्रे द्वयोर्बहुत्वं वेति वक्तव्यम् । कदा पूर्वे फल्गुन्यौ कदा पूर्वाः फल्गुन्यः । कदा पूर्वे प्रोष्ठपदे पूर्वाः प्रोष्ठपदाः । यदा फल्गुनीसमीपगते चन्द्रमसि फल्गुनीशब्दो विवक्ष्यते तदा बहुत्वमन्यदा द्वित्वम् । स्वाभाविकत्वादभिधानस्यैकशेषानारम्भः । स्वभावत एव शब्द एकशेषमनपेक्ष्य एकत्वद्वित्वबहुत्वेषु वर्तते । अत एवैकशेषानारम्भः । एकत्वादीनां प्रकृत्युपात्तानामभिव्यक्तये विभक्त्युपादानम् । यथा एको द्वौ बहवः पञ्च सप्तेति । एवं वृक्षः वृक्षौ वृक्षाः । अथ प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानं तत्रानेकार्थाभिधाने अनेकशब्दत्वं प्रसक्तमत एकशेषः । अत्रोच्यते । यदि भिन्नेष्वभिन्नाभिधानप्रत्ययहेतुर्जातिः शब्दार्थः । तस्याः प्रत्यायने एक एव शब्दः समर्थः । अथ द्रव्यं शब्दार्थः । तच्चानेकं व्यावृत्ताभिधानबुद्धिलिङ्गम् । तस्याभिधित्सायामनेकशब्दत्वे प्राप्त एकशेष इति ।

एतदप्ययुक्तम् । अवशिष्टः शब्दो निवृत्तशब्दस्य यद्यर्थमभिधत्ते तदास्य द्वित्वेऽपि वृत्तिरिति किमेकशेषेण । अथ नाभिधत्ते तदा पश्चादपि स एवार्थः कथमनेकत्रार्थे वृत्तिः । सरूपाणां द्वन्द्वनिवृत्त्यर्थमेकशेष इत्यपि नास्त्यनभिधानात् । न हि भवति द्वौ च द्वौ च द्वरिति । अथ विरूपशब्दार्थ एकशेषः । तथाहि । वृद्धो यूना तल्लक्षणश्चेदेव विशेषः । अपत्यमन्तर्हितं वृद्धम्' । एवकारो भिन्नक्रमः । विशेषो वैरूप्यम् । वृद्धः शिष्यते यूना सह वचने वृद्धयुवलक्षणे एव यदि विशेषः समानायां प्रकृतौ । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ । दाक्षिश्च दाक्षायणश्च दाक्षी । वृद्ध इति किम् । औपगवश्चानन्तर औपगविश्च युवा औपगवौपगवी । गार्गिगार्ग्यायणौ । यूनेति किम् । गर्गश्च गार्ग्यश्च गर्गगार्ग्यौ । तल्लक्षण एवेति किम् । गार्ग्यवात्स्यायनौ । अत्र प्रकृतिविशेषोऽप्यस्ति । एवकारः किमर्थः । भागवित्तिभागवित्तिकौ । भागवित्तेरपत्यं युवा । दोष्वणसौवीरेषु प्राय इत्यत्र क्षेपस्यापि भावान्न । तल्लक्षण एव विशेष इति किम् । वैदश्च वृद्धो वैदश्च युवा वैदवैदौ । तल्लक्षणवैरूप्याभावात् द्वन्द्वो भवत्येव । स्त्री पुंवच्च । स्त्री वृद्धा यूना सह वचने शिष्यते पुंवद्भावश्चास्या भवति तल्लक्षण एव यदि विशेषः । गार्गी च गार्ग्यायणश्च गार्ग्यौ । दाक्षी च दाक्षायणश्च दाक्षी । नेदं द्वयं वक्तव्यम् । जीवति वंश्ये वृद्धं द्वयमभिधत्ते । अजीवति वृद्धयूनोर्द्वन्द्वो नास्त्यनभिधानात् । जीवति वंश्ये वृद्धा स्त्री युवानश्च सामान्येन वृद्धशब्द एवाभिधत्ते द्वन्द्वस्य चानभिधानम् । यद्यपि पुमान् स्त्रिया सह वचने शिष्यते तल्लक्षण एव यदि विशेषः । कठश्च कठी च कठौ । मयूरश्च मयूरी च मयूरौ । प्राणिधर्मयोः स्त्रीपुंसयोर्ग्रहणादिह

न भवति । नदनदीति । घटघटी । स एवोदञ्चनादि । तल्लक्षण इत्येव । कुक्कुटमयूर्यौ । एवकार इत्येव । इन्द्रेन्द्राण्यौ । भवभवान्यौ । पुंयोगलक्षणोऽप्यत्र विशेषः । इदमपि जातिमात्रविवक्षया सिद्धति । द्वन्द्वस्य चानभिधानम् । अभिधाने द्वन्द्वोऽस्ति । नदनदीपतिः । ब्राह्मणवत्साब्राह्मणीवत्सौ । भ्रातृपुत्रौ स्वसृदुहितृभ्यां शिष्यत इति न वक्तव्यम् । भ्राता च स्वसा च भगिनी वा भ्रातरौ । पुत्रश्च दुहिता च पुत्रौ । विवक्षया द्वन्द्वानभिधानञ्च । इदं तर्हि वक्तव्यम् । नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यान्तल्लक्षण एव यदि विशेष इति । शुक्लश्च वस्त्रं शुक्लश्च कम्बलः शुक्ला च साटी तदिदं शुक्लम् । तानीमानि शुक्लानि । नेदं ज्यायस्त्रिषु लिङ्गेषु नपुंसकस्य प्रश्नादौ प्राधान्यात्तेन सामान्यविशेषापेक्षया वचनभेदः । पिता मात्रा स्वसुरः स्वश्रूव्यान्यत स्यामित्यपि न वक्तव्यम् । असामान्यविवक्षया पितरौ स्वसुराविति द्वन्द्वोऽप्यस्ति । मातापितरौ । स्वश्रूस्वसुरौ । स्वश्रूशब्दः स्त्रियामिहैव निपातितः । त्यदादीनि सर्वैर्नित्यम् । सर्वैरिति त्यदादिभिरन्यैश्च सहवचने त्यदादीनि शिष्यन्त इत्येतदपि नास्ति । त्यदादीनामन्यापेक्षया सामान्यवाचित्वं त्यदादिषु च यद्यत्परं तत्तत्सामान्यवाचीति तत्प्रयोगो युक्तः । स च देवदत्तश्च तौ । कश्च देवदत्तश्च कौ । स च यश्च यौ । अथात्र कस्य लिङ्गं स च स्थाली च कुण्डञ्चस च देवदत्ता च कुण्डं चेति । उच्यते । द्वन्द्वापवादोऽयम् । द्वन्द्वे चान्त्यलिङ्गम् । अत्रापि तदेव युक्तम् । इदं चापि न वाच्यम् । ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री । ग्राम्या ये पशवस्तेषां सङ्घेषु स्त्री शिष्यते अतरुणाश्चेद् ग्राम्यपशवः । गावश्च स्त्रियो गावश्च पुमांसः ।

गाव इमाः । अजा इमाः । ग्राम्यग्रहणं किम् । आरण्यानां मा भूत् । रुरव इमे । पृषत इमे । पशुग्रहणं किम् । ब्राह्मणा इमे । सङ्घेष्विति किम् । एतौ गावौ चरतः । अतरुणेष्विति किम् । वत्सा इमे । वर्करा इमे । कथं नेदं वक्तव्यं लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति । अन्यथा अश्वा इमे इत्येवमादिषु एकशेषेषु अनिष्टं स्त्रीलिङ्गं प्रसज्येत ॥*॥

इत्यभयनन्दिमुनिविरचितायां जैनेन्द्रव्याकरणमहावृत्तौ प्रथमस्याध्यायस्य प्रथमः पादः समाप्तः ॥



भूवादयो धुः ॥ १ ॥

भू इत्येवमादयः शब्दाः प्रत्येकं धुसञ्ज्ञा भवन्ति । भू एव स्पर्द्धे इत्यादि । धोरित्यधिकृत्य लडादिविधिः कार्यं भवति । एधते स्पर्द्धते । आदिशब्दो व्यवस्थावाची । तेन आणवयत्यादीनां निरासः । अर्थपदोपलक्षितानाञ्च व्यवस्था । ततो धुसमानशब्दानां यावामादिवित्येवमादीनां सर्वनामविकल्पप्रतिषेधस्वर्गादिवाचिनामग्रहणम् । भूशब्द आदिरेषामिति वसे चादय इति प्राप्नोति । नैवम् । भूवादीनां वकारोऽयं लक्षणार्थः प्रयुज्यते । इकोयणभिर्व्यवधानमेकेषामिति संग्रहः । तेन त्रियम्बकं यजामहे वायुवम्वरयोरिवेत्यादि सिद्धम् । भुवो वार्थं वदन्तीति भवतेः सम्पदादिपाठात्क्विप् । भुवं भवनं क्रियां वदन्तीति बहुलवचनादण्यन्तादपि वदेरौणादिके इञि कृते भूवादयः । अस्मिन्पक्षे शिष्टाप्रयोगादाणवयत्यादीनां क्षेपः । भ्वर्था वा वादयः स्मृताः । अथवा वा गतिगन्धनयोरित्यस्मात्पर आदिशब्दः । भुवो वादयो वाच्यवाचकभावसम्बन्धे ता भ्वथ इत्यर्थः । ये तु वकारो मङ्गलार्थ इति पठन्ति । त इदं वाच्याः । यद्याधिक्याद्वकारो मङ्गलमतिप्रसङ्गः स्यात् । एतेन तत् ज्ञानं प्रत्युक्तम् । मङ्गलाभिधेयश्च वकारो नाममालादिषु न पठ्यते । वृत्तौ मध्यनिपातश्च चिन्त्यः । धुप्रदेशा धोर्यङ्क्रियासमभिहार इत्येवमादयः ॥

अकर्मको धिः ॥ २ ॥

अकर्मको धुर्धिसञ्ज्ञो भवति । कर्त्राप्यमित्यादिना लक्षणेन विहितं कर्म तदविवक्षितं वा नास्याकर्मकः । धिप्रदेशा अनोर्द्धेरित्येवमादयः ॥

कार्यार्थो ऽप्रयोगीत् ॥ ३ ॥

शास्त्रे अन्यस्य कार्यार्थमाश्रीयते प्रयोगे च न श्रूयते यः स इत्सञ्ज्ञो भवति । अइउण् णकारः । ञिमिदा स्नेहने टुनदि समृद्धौ । डुकृञ् करण इत्यादिषु ञिटुडवो डेङ्स्यादिषु ङकारः । कार्यार्थ इति किम् । कुलास्खः कुलीनः । परमकुलीन इत्यत्र खकारस्याऽप्रयोगित्वात् खित्यर्ह्रस्वमचइति मुम् प्रसज्येत । अप्रयोगीति किम् । परमकुलीनः । ईनादेशः कार्यमिति मुम् स्यात् । ननु कार्यार्थोऽप्रयोगी च खः कथं नेत्सञ्ज्ञः । उभयविशेषणोपादानात् । अन्यस्य कार्यार्थो भूत्वा योऽप्रयोगीत्यदोषः । अन्वर्था चेयमित्संज्ञा । एति गच्छति नश्यतीत् तेन तस्य लोप इति न वक्तव्यम् । प्रयोगानुसारेणाप्रयोगित्वावगतेः । प्रतिपत्तिगौरवमिति चेदुपदेशेऽजनुनासिकदित्यनुनासिकत्वमपि प्रयोगादेवावसीयत इति समानम् । इत्प्रदेशाष्टिदादिरित्येवमादयः ॥

यथासंख्यं समाः ॥ ४ ॥

यथासंख्यं यथाक्रमं समाः शिष्यमाणा भवन्ति । यथासंख्यं यावद्यथाबृत्यसादृश्य इति हसः । समास्तुल्याः । तुल्यत्वच्च द्विष्ठमतः पूर्वादिष्टानामनुदिष्टाः समाः ज्ञेयाः । मिप्थस्थतसोऽतंततां प्रथमसंख्यस्य मिपः प्रथमसंख्योऽम् इत्येवमादि योज्यम् । समा इति किम् । सङ्घाङ्कलक्षणेषेऽञ्यञिञामण् सङ्घादयश्चत्वारोऽर्था अञादयस्त्रयो वैषम्यात् सङ्घादिषु चतुर्ष्वर्थेष्वञंतादण् भवति । तथा यञन्तादिञन्ताच्च । समशब्दस्य सर्वार्थे युक्तार्थे च सर्वनामसञ्ज्ञोक्ता न तुल्यार्थे ॥

स्वरितेनाधिकारः ॥ ५ ॥

स्वरितेन लिङ्गेनाधिकारो वेदितव्यः । त्यः परः ङ्याम्मृद इत्येवमादिः। स्वरित इति आचार्यप्रतिज्ञया लिङ्गम् । व्यामिश्रः स्वरित इत्यस्याचो धर्मत्वेन रोरीत्येवमादिषु ह्रस्वसम्भवादग्रहणम् । अधिकारो विनियोगो व्यापार इत्यर्थः । स्वरितेनेति योगविभागाद्यथासंख्यमपि स्वरितेन ज्ञेयम् ॥

ङ्नुदात्तेतो दः ॥ ६ ॥

ङकारेतोऽनुदात्तेतश्च धोर्द एव भवति । ङितः । षूङ् । सूते । शीङ् । शेते । इङ् । अधीते । अनुदात्तेतः । आस । आस्ते । वस । वस्ते । चक्ष । आचष्टे । चक्षेर्ङित्करणमनर्थकमनुदात्तेत्त्वाद्युच् । विचक्षणः । लः कर्मणि च भावे च धेरिति धोर्लकारा विहिताः । तद्द्वारेण दविधौ मविधौ च प्राप्ते प्रकृतिनियमोऽयम् । ङ्नुदात्तेतो द एव भवति । दस्त्वनियमः । सोऽन्येभ्योऽपि प्राप्तः । ममिति द्वितीयो नियमः । यत्र मञ्च दञ्च प्राप्नोति तत्र ममेव भवति । यदि त्वनियमः स्यान् ङ्नुदात्तेत एव दो भवति नान्येभ्यस्तदान्यत्र मस्य सिद्धत्वान् ममिति सूत्रमनर्थकं स्यात् । तदारम्भादिष्टावधारणं सिद्धम् । किञ्च त्वनियमे हि ङ्नुदात्तेतोऽपि मं प्राप्नोति तन्निवृत्तये शेषान्ममिति शेषग्रहणं कुर्यात् । तदकरणं च ज्ञापकं प्रकृतिनियमस्य ॥

ङौ ॥ ७ ॥

ङिरिति भावकर्मणोः सञ्ज्ञा । ङौ द एव भवति । आस्यते भवता । सुप्यते भवता । भावस्यैकत्वं युष्मदस्मदर्थाऽसम्भवश्च । कारकेभ्यः पृथग्भूतो धोरर्थः स्वप्रधा-

नको भावः । एति जीवन्तमानन्द इत्यत्र आनन्दो बाह्य एतेः कर्तृत्वेन विवक्षित इति दो न भवति । कर्मणि । क्रियते कटः । कर्मकर्त्तरि । लूयते केसरः । भिद्यते कुसूलः स्वयमेव । अर्थनियमोऽयम् । दस्तु कर्तर्यपि प्राप्तः स मिमित्यनेन नियमेन निवर्त्यते । यदि ङावेव दो भवतीति त्यनियमः स्याद् भावकर्मणोरनियतत्वान्मेऽपि प्राप्ते तन्निवृत्त्यर्थं शेषात् कर्तरि मिमित्युच्यत शेषाकरणं ज्ञापकमर्थनियमस्य । एवं प्रकृतिनियमे ऽर्थनियमे च सति मिमित्यत्र कर्तृग्रहणं शेषग्रहणञ्च प्रत्याख्यातम् ॥

कर्तरि ञे ॥ ८ ॥

कर्त्तरि आर्थे दो भवति । कर्मव्यतिहारे ञ इति ञो विहितस्तत्सहचरितः कर्मव्यतिहारो आर्थः । कर्मव्यतिहारश्च कर्मग्रहणसामर्थ्यात् क्रियाव्यतिहारः । अन्यस्य कर्तुमिष्टां क्रियां यदान्यः करोति तदिष्टां चेतरस्तदा क्रियाव्यतिहारः । व्यतिलुनीते । व्यतिपुनीते । आरम्भसामर्थ्यात् कर्तर्येव सिद्धे कर्तृग्रहणमुत्तरार्थं न गतिहिंसार्थेभ्य इति । कर्तरि कर्मव्यतिहारे विहितस्य दस्य प्रतिषेधो यथा स्यादिह मा भूत् । व्यतिभूयते सेनया । व्यतिगम्यन्ते ग्रामाः । व्यतिहन्यन्ते दस्यवः । क्रियाव्यतिहार इति किम् । पारिभाषिककर्मव्यतिहारे मा भूत् । देवदत्तस्य धान्यं व्यतिलुनन्ति ॥

न गतिहिंसार्थेभ्यः ॥ ९ ॥

गत्यर्थेभ्यो हिंसार्थेभ्यश्च धुभ्य आर्थे दो न भवति । व्यतिगच्छन्ति । व्यतिधावन्ति । हिंसार्थेभ्यः । व्यतिहिंसन्ति । व्यतिभिन्दन्ति । व्यतिछिन्दन्ति । व्यतिपिंषन्ति ।

बहुवचननिर्देशो हसादिसंग्रहणार्थः । व्यतिहसन्ति । व्यतिजल्पति । व्यतिपठन्ति । व्यतिकथयन्ति । हृवह्योरप्रतिषेधो वक्तव्यः । सम्प्रहरन्ते राजानः । व्यतिवहन्ते नद्यः । गतिहिंसयोः प्रतिषेधो गतिहिंसाहेतौ न भवति । व्यतिगमयन्ते । व्यतिभेदयन्ते ॥

परस्परान्योन्येतरेतरे ॥ १० ॥

परस्पर अन्योन्य इतरेतर इत्येतेषु प्रयुक्तेषु आर्थे दो न भवति । परस्परस्य व्यतिलुनन्ति । अन्योन्यस्य व्यतिलुनन्ति । इतरेतरस्य व्यतिलुनन्ति । व्यतिभ्यां द्योतितेऽपि कर्मव्यतिहारे परस्परादिपदप्रयोगो द्वावपूपौ भक्षयेति यथा । परस्परादिशब्दानां कथं सिद्धिः । द्वित्वप्रकरणे कर्मव्यतिहारे सर्वनाम्नो द्वित्वम् । सवच्च बहुलमिति वक्ष्यति ॥

निविशः ॥ ११ ॥

नि इति स्वरूपस्य ग्रहणं न निसञ्ज्ञाया । निपूर्वाद्विशो दो भवति । निविशते । निविशेते । निविशन्ते । लावस्थायामडागमः । तद्वृत्तौ न व्यवधायकः । न्यविशत । ममिति मं प्राप्तम् । सनिर्देशः समर्थार्थः । सामर्थ्यञ्च धोर्गिना । तेनेह न भवति । मधुनि विशन्ति भ्रमराः । अनर्थकत्वाद्वा ॥

परिव्यवक्रियः ॥ १२ ॥

परि वि अव इत्येवंपूर्वात् क्रीणातेर्दो भवति । परिक्रीणीते । विक्रीणीते । अवक्रीणीते । अकर्त्राप्ये फले विधिरयम् । अनर्थकत्वादिह न भवति उपरि क्रीणाति । गवि क्रीणाति । अपचाव क्रीणीवः । क्री इति अनुकर-

णम् । अनुकार्येणार्थवत्त्वान्मृत्वे सति स्वादिविधिः । प्रकृतिवदनुकरणमिति धुत्वातिदेशादियादेशः । उत्तरत्र जेरिति निर्देशात् वत्करणादपि स्वाश्रयोऽपि क्वचिदेव ॥

विपराजेः ॥ १३ ॥

वि परा इत्येवंपूर्वाज्जयतेर्दो भवति । विजयते । पराजयते । अत्रापि सनिर्देशः समर्थस्य गेर्ग्रहणार्थः । तेनेह न भवति । बहुविजयति वनम् । परा जयति सेना ॥

आङो दो ऽव्यसने ॥ १४ ॥

व्यसनं कसनं विवरणं वा । अन्येषां दारूपाणां व्यसने वृत्तिर्नास्ति । आङ्पूर्वाद्दातेरव्यसनेऽर्थे दो भवति । विद्यामादत्ते । अकर्त्राप्ये फले प्रापणार्थमिदम् । अव्यसनमिति किम् । आस्यं व्याददाति । पिलकं व्याददाति । विपादिकां व्याददाति । स्वाङ्गकर्मकादिति वक्तव्यम् । इह मा भूत् । व्याददते पिपीलिकाः पतङ्गमुखम् । यद्यकर्त्राप्ये फले प्राप्तस्याव्यसन इति प्रतिषेधः कर्त्राप्ये फले व्यसने दः प्राप्नोति । नैवम् । अव्यसन इति योगविभागाद् येन केनचित्प्राप्तस्य प्रतिषेधः । आङिति ङित्करणं किम् । आ ददात्यसौ भिक्षामिदानीमहमस्मार्षम् । आङिति योगविभागः । तेन स्थः प्रतिज्ञाने दो भवति । अनित्यं शब्दमातिष्ठन्ते । गमयतेः कालहरणे । आगमयस्व तावदेवदत्त । नुप्रच्छिभ्याञ्च । आनुते शृगालः । आपृच्छते गुरुमिति सिद्धम् ॥

क्रीडो ऽनुपर्याङः ॥ १५ ॥

अनुपरि आङ इत्येवंपूर्वात् क्रीडो दो भवति ॥ अनुक्रीडते । परिक्रीडते । आक्रीडते । गिसाहचर्यादनो

गैरेव ग्रहणादिह न भवति । माणवकमनु क्रीडति । माणवकेन सहेत्यर्थः । भार्थ इत्यनुना योग इप् गितिसञ्ज्ञाप्रतिषेधश्च । शिक्षेर्जिज्ञासायां दो वक्तव्यः । शकेः सन्नन्तस्येदं ग्रहणम् । विद्यासु शिक्षते । धनुषि शिक्षते । कर्मविवक्षायां शिक्षां चक्रे । हरतेर्गतिताच्छील्ये । पैतृकमश्वा अनुहरन्ते मातृकं गावः । मातुरागतं ऋतष्ठणिति ठण । गतिताच्छील्य इति किम् । मातरमनुहरन्ति । शप उपलम्भन इति च वक्तव्यम् । वाचा शरीरस्पर्शनमुपलम्भः । देवदत्ताय शपते । उपलम्भन इति किम् । शपति ॥

समो ऽकूजे ॥ १६ ॥

सम्पूर्वात् क्रीडो ऽकूजेऽर्थे दो भवति । संक्रीडते । संक्रीडेते । संक्रीडन्ते । अकूज इति किम् । संक्रीडन्ति शकटानि । अव्यक्तं शब्दं कुर्वन्तीत्यर्थः ॥

स्थो ऽवविप्राच्च ॥ १७ ॥

अव विप्र इत्येवंपूर्वात् सम्पूर्वाच्च तिष्ठतेर्दो भवति । अवतिष्ठते । वितिष्ठते । प्रतिष्ठते । सन्तिष्ठते ॥

ज्ञीप्सास्थेयोक्तौ ॥ १८ ॥

परपरितोषार्थमात्मरूपादिप्रकाशनं ज्ञीप्सा । स्थीयते ऽस्मिन् निर्णयरूपेणेति स्थेयः । बहुलवचनादधिकरणे य । ज्ञीप्सायां स्थेयोक्तौ च तिष्ठतेर्दो भवति । ज्ञीप्सायाम् । तिष्ठते कन्या । छात्रेभ्यस्तिष्ठते ब्राह्मणी । छात्रेभ्यः स्वाभिप्रायप्रकाशनेनात्मानं रोचयतीत्यर्थः । ज्ञीप्सनक्रियया कर्मव्यपदेशभाजां छात्राणामुपेयत्वात् संप्रदानत्वम् । स्थेयोक्तौ । देवदत्ते तिष्ठते । त्वयि तिष्ठते । मयि तिष्ठते । संशयान्निश्चयं करोतीत्यर्थः ।

उद ईहे ॥ १९ ॥

उत्पूर्वात्तिष्ठतेरीहार्थे वर्तमानाद्दो भवति । गेहे उत्तिष्ठते । धर्मे उत्तिष्ठते । घटत इत्यर्थः । ईह इति किम् । अस्माद् ग्रामाच्छतमुत्तिष्ठति । उत्पद्यत इत्यर्थः । ईह इति ईहतेः पर्यायग्रहणात् गम्यमानायामीहायां न भवति । आसनादुत्तिष्ठति । उत्तिष्ठति सेना । अस्माद् ग्रामाद्दिष्टिः (?) पञ्च पुरुषा उत्तिष्ठन्ति ॥

उपान्मन्त्रकरणे ॥ २० ॥

उपपूर्वात्तिष्ठतेर्मन्त्रकरणे दो भवति । जगत्योपतिष्ठते । तृष्ट्वुभोपतिष्ठते । मन्त्रकरण इति किम् । भर्तारमुपतिष्ठति भार्या यौवनेन । उपादिति योगविभागः । तेन देवपूजासङ्गतिकरणमित्रकरणपथिषु दो भवति । देवपूजायाम् । सीमन्धरमुपतिष्ठते । सङ्गतिकरणे । रथिकानुपतिष्ठते । मित्रकरणे । महामात्रानुपतिष्ठते । सङ्गतिकरणमुपश्लेषः । मित्रकरणं मानसः सम्बन्धः । पथि । अयं पन्थाः स्रुघ्नमुपतिष्ठते ॥ वा लिप्सायामिति वक्तव्यम् ॥ * ॥ भिक्षुको दातृकुलमुपतिष्ठते । उपतिष्ठति वा ॥

धेः ॥ २१ ॥

अकर्मको धिरिति । उपपूर्वात्तिष्ठतेर्धेर्दो भवति । यावद्भुक्तमुपतिष्ठते । यावदोदनमुपतिष्ठते । भोजने भोजने ओदने ओदने उदीक्षत इत्यर्थः । धेरिति किम् । स्वामिनमुपतिष्ठति ॥

व्युत्तपः ॥ २२ ॥

धेरिति वर्तते । वि उदित्येवम्पूर्वात्तपतेर्द्दो भवति ।

वितपते । ज्वलतीत्यर्थः । उत्तपते । धेरित्येव । उत्तपति सुवर्णं सुवर्णकारः । वितपति पृथ्वीमादित्यः । दहतीत्यर्थः । व्युद इति किम् । निधूपति । दीप्यत इत्यर्थः ॥ स्वाङ्गकर्मकाच्चेति वक्तव्यम् ॥ * ॥ वितपते पाणिम् । उत्तपते पाणिम् । आत्मीयमङ्गं स्वाङ्गं न पारिभाषिकं तत्र तेनेह न भवति । वितपति परपाणिम् । उत्तपति देवदत्तो यज्ञदत्तस्य पृष्ठम् ॥

आङो यमहनः ॥ २३ ॥

आङ्पूर्वाभ्यां यम हन इत्येताभ्यां धिभ्यां दो भवति । आयच्छते । दीर्घो भवतीत्यर्थः । आहते । आघ्नाते । आघ्नते । यमः कर्त्राप्ये फले समुदाङ्यमो ग्रन्थ इति दः सिद्धोऽन्यत्रेदम् । धेरित्येव । आयच्छति रज्जुम् । आहन्ति पापम् ॥ स्वाङ्गकर्मकाच्चेति वक्तव्यम् ॥ * ॥ आहते वक्षः । स्वाङ्गादिति किम् । परकीयाङ्गे कर्मणि मा भूत् । आहन्ति शिरः परकीयम् ॥

समो गम्प्रच्छिस्वृच्छिश्रुविद्रुदृशः ॥ २४ ॥

धेरिति वर्तते । सम्पूर्वेभ्यो गम्-प्रच्छि-स्वृ-ऋच्छि श्रु-विद्-दृश्-इत्येतेभ्यो दो भवति । सङ्गच्छते । संपृच्छते । संस्वरते । ऋ इति ऋच्छतेरियर्तेश्च ग्रहणम् । समृच्छते । समियृते । समरिष्यते । ऋच्छतेरनादेशस्य ग्रहणम् । आदेशस्य ऋग्रहणेन सिद्धत्वात् । समृच्छिष्यते । संशृणुते । विदेरादादिकस्य ग्रहणं मवद्भिस्साहचर्यात् । संवित्ते । संपश्यते । धेरित्येव । सङ्गच्छति सुहृदम् । संवेत्ति धर्मम् । गेरस्यत्यूह्योर्वेति वक्तव्यम् ॥ * ॥ निरस्यते । निरस्यति । समूहति । समूहते ॥

निसंव्युपाद् ह्वः ॥ २५ ॥

पुनः संग्रहणाङेरिति निवृत्तम् । नि-सं-वि-उप इत्येवम्पूर्वात् ह्वयतेर्दो भवति । निह्वयते । संह्वयते । विह्वयते । उपह्वयते । ह्वयतेरात्वेन विकृतनिर्देशेऽपि प्रकृतिग्रहणं न व्यो लिटीति निर्देशात् ॥

आङः स्पर्द्धे ॥ २६ ॥

स्पर्द्धः पराभिभवेच्छा । आङ्पूर्वात् ह्वयतेः स्पर्द्धविषये दो भवति । मल्लो मल्लमाह्वयते । छात्रश्छात्रमाह्वयते । स्पर्द्धयाह्वानं करोतीत्यर्थः । स्पर्द्ध इति किम् । गामाह्वयति ॥

गन्धनावक्षेपसेवान्यायप्रतियत्नप्रकथोपयोगे कृञः ॥ २७ ॥

गन्धनं सूचनम् । अवक्षेपो भर्त्सनम् । सेवा संश्रयः । अविधिना प्रवृत्तिरन्यायः । अविद्यमानार्जनं विद्यमानसंस्कारो वा प्रतियत्नः । प्रबन्धेन कथनं प्रकथा । उपयोगो धर्मादिनिमित्तो व्ययः । गन्धनादिष्वर्थेषु वर्तमानात् कृञो दो भवति । गन्धने । उत्कुरुते । अयमिमं सूचयतीत्यर्थः । अवक्षेपे । श्येनो वर्तिकामुपकुरुते । भर्त्सयतीत्यर्थः । सेवायां । गणकानुपकुरुते । सेवत इत्यर्थः । अन्याये । परदारानुपकुरुते । न्यायमनपेक्ष्य तेषु प्रवर्तत इत्यर्थः । प्रतियत्ने । एधो दकस्योपस्कुरुते । प्रतियत्ने कृञ इति कर्मणि ता । उपात्प्रतियत्नवैकृतेत्यादिना सुट् । प्रकथायाम् । जनापवादान् प्रकुरुते । उपयोगे । शतं प्रकुरुते । धर्माद्यर्थं विनियुङ्क्ते इत्यर्थः । एतेष्विति किम् । कटं करोति । आविः

करोतीत्यत्र आविः शब्द एव गन्धने वर्तते न करोतिः । अपकारप्रयुक्तं वा सूचनं गन्धनमित्यदोषः ॥

प्रसहने धेः ॥ २८ ॥

प्रसहनमभिभवः । अधिपूर्वात्कृञः प्रसहनेऽर्थे दो भवति । शत्रूनधिकुरुते । वादिनोऽधिकुरुते । अभिभवतीत्यर्थः । प्रसहन इति किम् । अधिकरोति । अकर्त्राप्ये फले ममेव भवति ॥

शब्दकर्मणो वेः ॥ २९ ॥

कर्मेह कर्त्राप्यम् । विपूर्वात् करोतेः शब्दकर्मकाद्धो भवति । ध्वाङ्क्षो विकुरुते स्वरान् । क्रोष्टा विकुरुते स्वरान् । शब्दकर्मण इति किम् । विकरोति कटम् । शब्दग्रहणेन शब्दविशेषाः स्वरादयो गृह्यन्ते । तेनेह न भवति । विकरोति शब्दम् । विकरोत्यनुवाकम् । विकरोत्यध्यायमसावह्ना ॥

धेः ॥ ३० ॥

विपूर्वात्करोतेर्धेर्दो भवति । विकुर्वते सैन्धवाः । साधुदान्ता ओदनस्य पूर्णाश्छात्रा विकुर्वते । तृप्त्यर्थे योगे उपसंख्यानमिति करणे ता ॥

सम्मानोत्सञ्जनोपनयनज्ञानभृति-
गणनव्यये नियः ॥ ३१ ॥

सम्मानः पूजनम् । उत्सञ्जनमुत्क्षेपः । उपनयनमाचार्यकरणम् । ज्ञानमवगमः । भृतिर्वेतनादानम् । ऋणशुल्कादिनिर्यातनं गणनम् । व्ययो धर्मादिष्वर्थविनियोगः । सम्मानादिषु यथासम्भवं विशेषणेषु नयतेर्द्धोदो भवति । सम्माने । नयते चार्वी स्याद्वादे । चार्वी

बुद्धिस्तद्योगादाचार्योऽपि तथोक्तः । विनयेषु प्रतिपादनेन सम्मानं करोतीत्यर्थः । उत्सञ्ज्ञने । बालमुदानयते । उत्क्षिपतीत्यर्थः । उपनयने । माणवकमुपनयते । आत्मनः शिष्यभावेन माणवकं प्रापयतीत्यर्थः । ज्ञाने । नयते चार्वी तत्त्वार्थे । तत्त्वपदार्थान् निश्चिनोतीत्यर्थः । भृतौ । कर्मकरानुपनयते । वेतनादानेन पुष्णातीत्यर्थः । गणने । मद्रकाः कारं विनयन्ते । निर्यातयन्तीत्यर्थः । व्यये । शतं विनयते । सहस्रं विनयते । एतेष्विति किम् । अजां नयति ग्रामम् ॥

कर्तृस्थे कर्मण्यमूर्तौ ॥ ३२ ॥

नयतेः कर्ता लकारवाच्यः । रूपाद्यात्मिका मूर्तिः । कर्त्राप्यफलता कर्मता । तेन कर्त्राप्ये क्रियाफले सिद्धेऽपि दे नियमार्थमेतत् । कर्तृस्थ इति किम् । देवदत्तो जिनदत्तस्य क्रोधं विनयति । कर्मणीति किम् । बुद्धा विनयति । अमूर्ताविति किम् । गडुम् विनयति ॥

किरतेर्हर्षजीविकाकुलायकरणे ॥ ३३ ॥

किरतेर्दो भवति हर्षजीविकाकुलायकरण इत्येतेषु गम्यमानेषु । हर्षे । अपस्किरते वृषभो हृष्टः । जीविकायाम् । अपस्किरते कुक्कुटो भक्षार्थी । कुलाये निवासः । कुलायकरणे । अपस्किरते श्वा आश्रयार्थी । चतुष्पाच्छकुनिष्वपाङ्हर्षादाविति सुट् ॥

वृत्तिसर्गतायने क्रमः ॥ ३४ ॥

वृत्तिरविघातः । सर्ग उत्साहः । तायनं पृथुभावः । वृत्त्यादिष्वर्थेषु वर्तमानात् क्रमेर्दो भवति । वृत्तौ । नये

ष्वस्य क्रमते बुद्धिः । न प्रतिबध्यत इत्यर्थः । सर्गे । क्रमते जैनेन्द्राध्ययनाय । उत्सहत इत्यर्थः । तायने । नास्मिन्मूढे शास्त्राणि क्रमन्ते । न तायन्त इत्यर्थः । एतेष्विति किम् । क्रामति । क्रमो म इति दीत्वम् ॥

परोपात् ॥ ३५ ॥

वृत्तिसर्गतायन इति वर्तते । पर-उप-इत्येवम्पूर्वात् क्रमेर्दो भवति । पराक्रमते । उपक्रमते । सिद्धे सत्यारम्भो नियमाय परोपाभ्यामेव नान्यस्माद्धेः । अनुक्रामति । वृत्त्यादिष्वित्येव । पराक्रामति । उपक्रामति ॥

ज्योतिरुद्गतावाङः ॥ ३६ ॥

आङ्पूर्वात् क्रमेर्ज्योतिषामुद्गमनेऽर्थे दो भवति । आक्रमते सूर्यः । आक्रमते चन्द्रमाः । आक्रमन्ते ज्योतींषि । ज्योतिरुद्गताविति किम् । आक्रामति धूमो हर्म्यतलम् । आक्रामति माणवकः कुतपमित्यत्रोद्गतिरपि नास्ति ॥

वेः स्वार्थे ॥ ३७ ॥

स्वार्थः पादविक्षेपः । विपूर्वात् क्रमेः स्वार्थे दो भवति । सुष्ठु विक्रमते । साधु विक्रमते । विक्रमणमश्वादीनां गतिविशेषः । स्वार्थ इति किम् । विक्रामत्यजिनसन्धिः । स्फुटतीत्यर्थः ॥

प्रादारम्भे ॥ ३८ ॥

आरम्भः प्रथमं कर्म । प्रपूर्वात् क्रम आरम्भे दो भवति । प्रक्रमते भोक्तुम् । परोपादित्यत उपादिति वर्तते । उपक्रमते भोक्तुम् । आरभते भोक्तुमित्यर्थः ।

आरम्भ इति किम् । पूर्वेद्युः प्रक्रामति । अपरेद्युरुपक्रामति । पूर्वस्मिन्नहनि यदनेन गतं तदपरस्मिन्नागच्छतीत्यर्थः ॥

वा ऽगेः ॥ ३९ ॥

अगेः क्रमो वा दो भवति । क्रमते । इयमप्राप्ते विभाषा । वृत्त्यादिषु पूर्वेण नित्यो विधिः । अगेरिति किम् । संक्रामति ॥

ज्ञो ऽपन्हवे ॥ ४० ॥

अपन्हवो ऽपलापः । अपन्हवेऽर्थे जानातेर्दो भवति । शतमपजानीते । सहस्रमपजानीते । अपन्हव इति किम । चिदपि जानासि ॥

धेः ॥ ४१ ॥

ज्ञानातेर्द्धेर्दो भवति । सर्पिषो जानीते । दध्नो जानीते । सर्पिषा दध्ना चोपायनेन सम्पद्यत इत्यर्थः । ज्ञो स्वार्थे करण इति करणे ता । अकर्त्राप्ये फले इदं दविधानम् । धेरिति किम् । स्वरेणपुत्रं जानाति ॥

संप्रतेरस्मृतौ ॥ ४२ ॥

स्मृतिराध्यानं चिन्तनं वा । सम्प्रतिपूर्वाज्ज्ञानातेरस्मृत्यर्थे दो भवति । शतं सञ्जानीते । शतं प्रतिजानीते । अस्मृताविति किम् । मातुः सज्ञानाति । पितुः सज्ञानाति । स्मर्थदयेषां कर्मणीति ता ॥

दीप्युपोक्तिज्ञानेहविमत्युपमन्त्रणे वदः ॥ ४३ ॥

दीप्तिः प्रकाशनम् । उपेत्योक्तिरुपोक्तिः । उपसान्त्वनमित्यर्थः । ज्ञानं पदार्थावगमः । ईहा यत्नः । नानाम-

तिर्विमतिः । उपमन्त्रणं रहस्यनुकूलनम् । दीप्त्यादिष्वर्थेषु वदतेर्दो भवति । दोग्धौ । वदते चार्वी । तत्वार्थे दीप्यमानो वदतीत्यर्थः । उपोक्तौ । कर्मकरानुपवदते । उपेत्य सम्भाषत इत्यर्थः । ज्ञाने । वदते चार्वी । चन्द्रोदये जानाति वदितुमित्यर्थः । ईहे । कोऽस्मिन् क्षेत्रे वदते । को यत्न इत्यर्थः । विमतौ । गेहे विवदन्ते । गोष्ठे विवदन्ते । विचित्रं भाषन्त इत्यर्थः । उपमन्त्रणे । कुलभार्यामुपवदते । परदारानुपवदते । अनुकूलयतीत्यर्थः । एतेष्विति किम् । वदति देवदत्तः ॥

व्यक्तवाक्समुक्तौ ॥ ४४ ॥

व्यक्तवाचो व्यक्तवर्णत्वान्मनुष्यादयः प्रसिद्धाः । सम्भूय वचनं समुक्तिः । व्यक्तवाचां समुक्तौ गम्यमानायां वदतेर्दो भवति । सम्प्रवदन्ते ग्राम्याः । सम्प्रवदन्ते साधवः । सम्भूय भाषन्त इत्यर्थः । व्यक्तवागिति किम् । सम्प्रवदन्ति कुक्कुटाः । समुक्ताविति किम् । देवदत्तोवदति जिनदत्तम् । सादृश्ये पुनरर्थे वा । *धेरिति किम् । पूर्वमुक्तमनुवदति । व्यक्तवाक्समुक्ताविति किम् । अनुवदन्ति वाप्यः ॥

वा विवादे ॥ ४५ ॥

विवादो विप्रलापस्तत्र वर्तमानाद्वदतेर्वा दो भवति । विप्रवदन्ते सांवत्सराः । विप्रवदन्ति सांवत्सराः । विप्रवदन्ते वादिनः । विप्रवदन्ति वादिनः । युगपद्विरुद्धं वदन्तीत्यर्थः । व्यक्तवाग्ग्रहणमनुवर्तते । ततो व्यक्तवाक्समुक्ताविति नित्ये प्राप्ते विकल्पः । विवाद इति किम् । सम्प्रवदन्ते साधवः । व्यक्तवागित्येव । सम्प्र-

* आत्मादर्शपुस्तके कश्चिद्देशो निपतितः ।

वदन्ति शकुनयः । समुक्ताविति एव । सम्प्रवदन्ति वादिनः क्रमेण ॥

ग्रो ऽवात् ॥ ४६ ॥

अवपूर्वाद्गिरतेर्दो भवति । अवगिरते । अवगिरेते । अवगिरन्ते । गृणातेरवपूर्वस्य प्रयोगो नास्ति । अवादिति किम् । गिरति । निगिरति ॥

प्रतिज्ञाने समः ॥ ४७ ॥

प्रतिज्ञानमभ्युपगमः । प्रतिज्ञानेऽर्थे सम्पूर्वाद्गिरतेर्दो भवति । अनेकान्तात्मकं वस्तु सङ्गिरते । शतं सङ्गिरन्ते । प्रतिज्ञान इति किम् । सङ्गिरति ॥

उच्चरेा ऽधेः ॥ ४८ ॥

उत्पूर्वाच्चरतेरधेर्दो भवति । गुरूवचनमुच्चरते । उल्लङ्घ्य चरतीत्यर्थः । अधेरिति किम् । धूम उच्चरति । उदूर्ध्वं गच्छतीत्यर्थः ॥

समो भया ॥ ४९ ॥

सम्पूर्वाच्चरतेर्भा तेन योगे दो भवति । रथेन सञ्चरते । अश्वेन सञ्चरते । भान्ते प्रयुक्ते दो भवति न तु गम्यमाने । भायुक्तादिति किम् । त्रींल्लोकान् सञ्चरति जिनधर्मः । अत्र स्वात्मनेति करणं गम्यमानम् ॥ दाणश्च सा चेदर्थे ऽशिष्टव्यवहारे इति वक्तव्यम् ॥ * ॥ सम्पूर्वादाणो भायोगे दो भवति सा चेदर्थे भा । इदमेव ज्ञापकमशिष्टव्यवहारे भाऽपि भवतीति । दास्या सम्प्रयच्छते ॥ वृषल्या सम्प्रयच्छते कामुकः । सम इति सम्बन्धे ता तेन प्रशब्देन व्यवधानं न भवति । अथ

इति किम् । पाणिना सम्प्रयच्छति । नेदं वक्तव्यम् । कर्मव्यतिहारे दः । सहार्थे च भा द्रष्टव्या ॥

स्वीकृतावुपाद्यमः ॥ ५० ॥

पाणिग्रहणमविरोधो वा स्वीकृतिः । उपपूर्वाद्यमः स्वीकृतावर्थे दो भवति । कन्यामुपयच्छते । भार्यामुपयच्छते । स्वीकृताविति किम् । परभार्यामुपयच्छति ॥

श्रुस्मृदृशः सनः ॥ ५१ ॥

श्रु-स्मृ-दृश-इत्येतेभ्यः सन्नन्तेभ्यो दो भवति । श्रुश्रूषते शास्त्रम् । सुस्मूर्षते पूर्ववृत्तम् । दिदृक्षते देवम् । श्रुदृशिभ्यामकर्मकावस्थायां समो गम्यृच्छीत्यादिना दो विहितस्तत्र सनः पूर्ववदित्येव दः सिद्धः सकर्मकार्थमिदम् । स्मरतेरप्राप्ते विधानम् ॥

ज्ञः ॥ ५२ ॥

जानातेः सन्नन्तात् दो भवति । जिज्ञासते धर्मम् । ज्ञोऽपन्हवे धेः संप्रतेरस्मृताविति जानातेर्दो विहितः । तथा कर्त्राप्ये फले ज्ञोऽगेरित्यत्र पूर्ववत्सन इति सिद्धस्ततोन्यत्रेदं वचनम् ॥

नानोः ॥ ५३ ॥

अनुपूर्वाज्जानातेः सन्नन्तादो न भवति । पुत्रमनुजिज्ञासति । भृत्यमनुजिज्ञासति ॥ सकर्मकादिति वक्तव्यम् ॥ * ॥ इह मा भूत् । अनुजिज्ञासते मनसा नेा वक्तव्यम् । पूर्वेण प्राप्तस्यायं प्रतिषेधः । पूर्वेण च सकर्मकादेव सन्नन्तादो विहितः । धेस्तु सनः पूर्ववदिति दः । अनोरिति किम् । पुत्रं जिज्ञासते ॥

प्रत्याङ्भ्रुवः ॥ ५४ ॥

नेति वर्तते । प्रति आङ् इत्येवम्पूर्वात् श्रृणोतेः सन्नन्तादो न भवति । प्रतिशुश्रूषति । आशुश्रूषति शास्त्रम् । श्रुस्मृदृशः सन इति प्राप्तस्यानेन प्रतिषेधः । सनिर्देशः समर्थार्थः । सामर्थ्यञ्च धोर्गिना । तेनेह न प्रतिषेधः । देवदत्तं प्रतिशुश्रूषते ॥

सदेर्गात् ॥ ५५ ॥

नेति निवृत्तमसम्भवात् । गनिमित्तभूतः सदिरुपचाराद्गः । सदेर्गविषयादो भवति । शीयते । शीयेते । शीयन्ते । पाघ्रादिना शीयादेशः । गादिति किम् । शत्स्यति । अशत्स्यत् । शिशत्सति ॥

मृङो लुङ्लिङोश्च ॥ ५६ ॥

म्रियतेर्लुङ्लिङोर्गपराच्च दो भवति । अमृत । मृषीष्ट । आशिषि लिङ् । ङरिति सिलिङो कित्-म् । गपरात् खल्वपि । म्रियते । म्रियस्व । रिङ् यलिङश इति रिङादेशः । ङित्वादेव दे सिङे नियमार्थमिदमन्यत्र दो न भवति । मरिष्यति । अमरिष्यत् । ममार ॥

सनः पूर्ववत् ॥ ५७ ॥

पूर्वेण तुल्यं वर्तत इति पूर्ववत् । पूर्वञ्च प्रत्यासत्तेः सनः । पूर्वो यो धुस्तद्वत्सन्नन्तादो भवति । येभ्यो धुभ्यो येन विशेषणेन दो विहितस्तेभ्यः सन्नधिकेभ्योऽपि दो भवतीत्यर्थः । यथा ङनुदात्तेतो द इति । शेते । आस्ते । एवं सन्नन्तादपि शिशयिषते । आसिसिषते । गिविशेषणेन निविशा निविशते । निविविक्षते । अर्थविशेषणेन

गन्धनादिना उत्कुरुते । अयमिममुच्चिकीर्षते । उभयविशेषेण ज्योतिरुद्गतावाङः । आक्रमते । आचिक्रंसते । स्नोर्दार्थात् क्रम इतीट्प्रतिषेधः । कारकविशेषेण । ज्ञोऽपन्हवे धेः । सर्पिषा जानीते । सर्पिषा जिज्ञासते । इह जुगुप्सते मीमांसत इति गुप्प्रकृतेरवयवस्यानुदात्तेत्करणं सन्नन्तसमुदायस्य विशेषकमिति दः सिद्धः । यद्येवं गोपायत्यादावपि स्यात् । कर्तव्योऽत्र यत्नः । पूर्ववदिति किम् । शिशत्सति । सुसूर्षति । अत्र दनिमित्तं नास्ति ॥

आम्वत् तत्कृञः ॥ ५८ ॥

आम्ग्रहणेन यस्मादाम् विहितस्तस्य ग्रहणम् । आम इव आम्वत् । तस्य कृञ् तत्कृञ् । यस्मादाम् तस्येव धोस्तत्कृञो दो वेदितव्यः । ईहाञ्चक्रे । ईक्षाञ्चक्रे । लिटि परतः सरोरिजादेरित्याम् । आम इति परस्योप् । लस्य कृत्वान्मृत्वे सति स्वादिविधिः । सुपो ङेरिति तस्योप् । लिड्वत् कृञीत्यनुप्रयोगस्य करोतेरनेन दः । विधिर्नियमश्चात्रेष्यते । पूर्ववदिति वर्तते । अकर्त्राप्ये फले पूर्ववदो भवतीति विधिः । कर्त्राप्ये फले आम्वदेव दो भवति । तेन दाईस्यैवामन्तस्य प्रयोगे दो भवतीति नियमादिह न भवति । उदुम्भाञ्चकार । तदग्रहणं किम् । आमन्तानुप्रयोगस्य ग्रहणं यथा स्यादिह मा भूत् । ईहते । करोतीति कृञ्ग्रहणं किमर्थम् । करोतेरेव यथा स्यादिह मा भूत् । ईक्षामास । ईक्षाम्बभूव । इह कृञ्ग्रहणादन्यनिरासार्थाज्ज्ञायते लिड्वत्कृञीत्यत्र प्रत्याहारग्रहणं कृभ्वस्तियोग इत्यत आरभ्य कृञो द्वितीयेति ञकारेण ॥

युजो ऽयज्ञपात्रे गेः ॥ ५९ ॥

अकर्त्राप्यफलार्थोऽयमारम्भः । युजेर्गिपूर्वादो भवत्ययज्ञपात्रविषये । प्रयुङ्क्ते । वियुङ्क्ते । नियुङ्क्ते । अयज्ञपात्र इति किम् । द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति । गेरिति किम् । युनक्ति । युज समाधावित्यस्यानुदात्तेत्त्वादग्रहणम् ॥

उदः ॥ ६० ॥

उत्पूर्वाद्युजेरयज्ञपात्रे दो भवति । उद्युङ्क्ते । नियमोऽयं हलन्तेषु उद एव नान्यस्मात् । निर्युनक्ति । दुर्युनक्ति । संयुनक्ति ॥

सं क्ष्णोः ॥ ६१ ॥

सम्पूर्वात् क्ष्णुवो दो भवति । संक्ष्णुते । संक्ष्णुवाते संक्ष्णुवते शस्त्रम् ॥

भुजो ऽदौ ॥ ६२ ॥

शब्दे कार्यस्यासम्भवाददावित्यर्थग्रहणम् । भुजेरद्यर्थवर्तमानादो भवति । भुङ्क्ते । भुञ्जाते । भुञ्जते । अद्यर्थासम्भवात्तौदादिकस्य भुजेरग्रहणम् । निभुजति पाणिम् । अदाविति किम् । भुनक्ति वसुधां भरतः । पालयतीत्यर्थः ॥

णेर्भीस्मेर्हेतुभये ॥ ६३ ॥

ण्यन्ताभ्यां भी स्मि इत्येताभ्यां हेतुभयेऽर्थे दो भवति । तद्योजको हेतुरिति हेतुः । तस्य भयशब्देन भावसाधनेन काभीभिरिति षसः । भयग्रहणेन विस्मयोपीह लक्ष्यते । मुण्डो भीषयते । ईतः षुङ्नित्यमिति षुक् । मुण्डो विस्मापयते । जटिलो विस्मापयते । स्मिङ इत्यात्वम् ।

हेतुभय इति किम् । कुञ्चिकयैनं भाययति । वाचा विस्राययति । अकर्त्राप्यफलार्थोऽयमारम्भः ॥

वञ्चने गृधिवञ्चेः ॥ ६४ ॥

णेरिति वर्तते । वञ्चनं विसंवादनम् । गृधि वञ्चि इत्येताभ्यां ण्यन्ताभ्यां वञ्चनेऽर्थे दो भवति । माणवकं गर्द्धयते । माणवकं वञ्चयते । विसंवादयतीत्यर्थः । वञ्चन इति किम् । श्वानं गर्द्धयति । काङ्क्षामस्योत्पादयतीत्यर्थः । अहिं वञ्चयति । गमयतीत्यर्थः ॥

लियो ऽधार्ष्ट्यसम्माननेे च ॥ ६५ ॥

णेरिति वर्तते । न धार्ष्ट्यमधार्ष्ट्यं शालीनीकरणम् । सम्माननं पूजनम् । लिनातेर्लीयतेश्च ण्यन्तादधार्ष्ट्यसम्माननयोर्वञ्चने च वर्तमानाद्दो भवति । अधार्ष्ट्ये । श्येनो वर्तिकामुपलापयते । अभिभवतीत्यर्थः । सम्माननेे । जटाभिरालापयते । हेतौ भा । आत्मानं पूजयतीत्यर्थः । वञ्चने च कस्त्वामुल्लापयते । प्रलम्भयतीत्यर्थः । विभाषा लियोरिति व्यवस्थितविभाषाश्रयणादेषु त्रिषु नित्यमात्वम् । अधार्ष्ट्यादिष्विति किम् । बालकमुल्लापयति ॥

कृञो मिथ्यायोगेऽभ्यासे ॥ ६६ ॥

णेरिति वर्तते । अभ्यासो गुणनिका । करोतेर्ण्यन्तान्मिथ्याशब्दयोगे ऽभ्यासेऽर्थे दो भवति । पदं मिथ्या कारयते । स्तुतिं मिथ्या कारयते । सदोषं पुनःपुनरुच्चारयतीत्यर्थः । कृञ इति किम् । पदं मिथ्या वाचयति । मिथ्यायोग इति किम् । स्तोत्रं सुष्ठु कारयति । अभ्यास इति किम् । सकृत्पदं मिथ्या कारयति । एकवारमुच्चारयतीत्यर्थः ॥

अस्वरितेतः कर्त्राप्ये फले ॥ ६७ ॥

णेरिति निवृत्तम् । उत्तरत्र णिच इति निर्देशात् । ञितः स्वरितेतश्च ये धवस्तेभ्यो दो भवति कर्तारमाप्नोति चेत् क्रियाया फलम् । फलं सर्वं क्रियातो भवतीति सामर्थ्यात् क्रिया लभ्यते । फलग्रहणं मुख्यफलपरिग्रहार्थम् । ञितः । पुनीते । लुनीते । कुरुते । स्वरितेतः । यजते । वयते । मुख्यक्रियाफलमत्र कर्तारमाप्नोति । कर्त्राप्ये फल इति किम् । पचन्ति भक्तकराः । वयन्ति भृतकाः । नात्र मुख्यं फलं किन्तु भृतिरानुषङ्गिकं वा फलम् । अस्वरितेत इति किम् । याति । वाति ॥

वदो ऽपात् ॥ ६८ ॥

अपपूर्वाद्वदतेर्दो भवति कर्त्राप्ये फले । एकान्तवादमपवदते । कर्त्राप्ये फले इत्येव । अपवदति । इतः प्रभृति कर्त्राप्ये फले दो वेदितव्यः ॥

समुदाङ्यमो ऽग्रन्थे ॥ ६९ ॥

सम उत् आङ् इत्येवम्पूर्वाद्यमेरग्रन्थविषये दो भवति । व्रीहीन् संयच्छते आत्मनश्चेद् व्रीहयो भवन्ति । भारमुद्यच्छते । पापमायच्छते । अग्रन्थ इति किम् । उद्यच्छति चिकित्सां वैद्यः । चिकित्सेति वैद्यकग्रन्थः । कर्त्राप्ये इत्येव । संयच्छति आयच्छति परस्य वस्त्रम् । आङो यमहन इत्यनेन धेर्दविधानमुक्तम् ॥

ज्ञो ऽगेः ॥ ७० ॥

जानातेरगिपूर्वाद्दो भवति कर्त्राप्ये फले । गां जानीते । अगेरिति किम् । स्वर्गलोकं प्रजानाति । कर्त्राप्ये फले इत्येव । परस्य गां जानाति ॥

णिचः ॥ ७१ ॥

णिजन्तादो भवति कर्त्राप्ये फले । कटं कारयते । ओदनं पाचयते । लक्षणे स्वरितेत्करणात् ज्ञायते हेतुमण्णिचेा ग्रहणमिदम् । कर्त्राप्ये फले इत्येव । परस्य कटं कारयति ॥

पादम्याङ्यमाङ्यसपरिमुहरुचिनृतुधेट्वदुवसः ॥७२॥

णिच इति वर्तते । पा दमि आङ्यम् आङ्यस परिमुह-रुचि-नृत्-धेट्-वद्-वस-इत्येतेभ्यो ण्यन्तेभ्यः कर्त्राप्ये फले दो भवति । पाययते । दमयते । आयामयते यमोऽपरिवेषण इति मित्सञ्ज्ञाप्रतिषेधात् प्रो न भवति । आयासयते । परिमोहयते । रोचयते । नर्तयते । धापयते । वादयते । वासयते । पाधेटोरद्यर्थत्वान्नृतिवद्योश्चल्यर्थत्वाच्चल्यद्यर्थादिति मं प्राप्तमन्येषामणौ धेः प्राणिकर्तृकादिति तत आरम्भः ॥

वा वाग्गम्ये ॥ ७३ ॥

वागिति नेदं पारिभाषिकस्यार्द्धपात्रवागित्यस्य ग्रहणं किं तर्हि वाक्छब्दः । पदान्तरमित्यर्थः । वाग्गम्ये कर्त्राप्ये फले वा दो भवति । स्वं धान्यं पुनीते । स्वं धान्यं पुनाति । षड्भिर्योगैर्नित्यं दे प्राप्ते विकल्पोऽयम् ॥

मम् ॥ ७४ ॥

नियमार्थम् । यस्मान्मं दश्च प्राप्नोति तस्मान्ममेव भवति । पूर्वेण प्रकरणेन प्रकृतिनियमः कृतो दस्त्वनियत इत्युभयप्राप्तिरस्ति । याति । वाति । प्रविशति । आक्रामति धूमः । डौ द एव भवतीति अर्थनियमो व्याख्या-

तः । ततः कर्त्तरि मं द्रष्टव्यम् । यदि वा कर्त्तरि जे इत्यतः कर्त्तरि इति वर्तते । तेनेह न भवति । गम्यते । रम्यते ।

परानुकृञः ॥ ७५ ॥

परा अनु इत्येवंपूर्वात् कृञो मं भवति । गन्धनादिषु दः प्राप्तस्तदपवादोऽयम् । पराकरोति । अनुकरोति । कर्त्राप्ये फले ममेव भवति । कस्मान्न नियमः । तत्रापूर्वो विधिरस्तु नियमो वास्त्वित्यपूर्व एव विधिर्भवति ॥

प्रत्यभ्यतिक्षिपः ॥ ७६ ॥

प्रति अभि अति इत्येवम्पूर्वात् क्षिपो मं भवति । प्रतिक्षिपति । अभिक्षिपति । अतिक्षिपति । स्वरितेत्त्वाद्दः प्राप्तः । एतेभ्य इति किम् । आक्षिपते ।

प्रवहः ॥ ७७ ॥

प्रपूर्वाद्वहतेः कर्त्राप्ये फले मं भवति । प्रवहति ॥

मृषः परेः ॥ ७८ ॥

परिपूर्वान्मृषतेर्मं भवति । परिमृष्यति । परिमृष्यतः । परिमृष्यन्ति । वहिमपि केचिदनुवर्तयन्ति । परिवहति । परेरिति किम् । मृष्यते परीषहान् साधुः ॥

व्याङ्भ्यश्च रमः ॥ ७९ ॥

वि आङ् इत्येवम्पूर्वात् परिपूर्वाच्च रमेर्मं भवति । विरमति । आरमति । परिरमति । अनुदात्तेत्त्वाद्दः प्राप्तः । एतेभ्य इति किम् । रमते । अभिरमते ॥

उपात् ॥ ८० ॥

उपपूर्वाच्च रमेर्मं भवति । भार्यामुपरमति । पृथग्योग उत्तरार्थः ॥

वा धेः ॥ ८१ ॥

उपपूर्वाद्रमेर्धेर्वा मं भवति । यावद्भुक्तमुपरमति । उपरमते । निर्वर्तत इत्यर्थः ॥ विरिरंसतीत्यत्र पूर्वस्य दनिमित्ताभावात् सनः पूर्ववदिति दो न भवति ॥

बुध्युध्नशजनेङ्प्रुद्रुश्रोर्णेः ॥ ८२ ॥

कर्त्राप्ये फले णिच इति दे प्राप्ते ऽयमारम्भः । बुध युध नश जन इङ् प्रु द्रु श्रु इत्येतेभ्यो ण्यन्तेभ्यो मं भवति । येऽत्राकर्मकास्तेषामणौ धेः प्राणिकर्तृकादिति सिद्धे अप्राणिकर्तृकार्थं ग्रहणम् । प्रवत्यादीनामचल्यार्थम् । बोधयति पद्मम् । योधयति काष्ठानि । नाशयति पापम् । जनयति पुण्यम् । अध्यापयति शास्त्रम् । प्रावयति ग्रामम् । प्रापयतीत्यर्थः । द्रावयति लोहम् । विलापयतीत्यर्थः । स्रावयति तैलम् । स्यन्दयतीत्यर्थः ॥

चल्यद्यर्थात् ॥ ८३ ॥

णेरिति वर्तते । चलेरर्थः कम्पनम् । अदेरर्थोऽभ्यवहारः । चल्यर्थेभ्यो ऽद्यर्थेभ्यश्च धुभ्यो ण्यन्तेभ्यो मं भवति । चल्यर्थेभ्यः । चलयति । चोपयति । कम्पयति । कम्पने चलेरिति मित्सञ्ज्ञार्थां प्रादेशः । अद्यर्थेभ्यः । निगारयति । भोजयति । आशयति । सर्वत्राद्यर्थकादेर्नेष्यते । आदयन्ते देवदत्तेन । इह पय उपयोजयते देवदत्तेनेति भक्षणार्थाभावान्मं न भवति । सकर्मकार्थमप्राणिकर्तृकार्थञ्च सूत्रम् ॥

अणौ धेः प्राणिकर्तृकात् ॥ ८४ ॥

अण्यन्तावस्थायां यो धुर्द्विः प्राणिकर्तृकस्तस्मादण्यन्तान्मं भवति । आस्ते देवदत्तः । आसयति देवदत्तम् । शेते देवदत्तः । शाययति देवदत्तम् । अणाविति किम् । चेतयमानं प्रयोजयति । चेतयते । ननु च णिच इत्यत्र हेतुमण्णिचो ग्रहणं व्याख्यातम् । अणाविति तस्यायं प्रतिषेधः । तेनात्र मं भवत्येव चेतयतीति । इदं तर्हि प्रत्युदाहरणम् । आरोहयमाणं प्रयोजयति आरोहयते । अथवा ऽणाविति धेर्विशेषणम् । अणौ यो धिस्तस्य ग्रहणं यथा स्यात् । अन्यथा धुग्रहणे ण्यन्तविशेषणे इहैव मं स्याच्चेतयमानं प्रयोजयति चेतयति । आसयति इत्यादौ न स्यात् । धेरिति किम् । कटं कुर्वाणं प्रयोजयति कारयते । प्राणिकर्तृकादिति किम् । शुष्यन्ति व्रीहयः । शोषयते व्रीहीनातपः । प्राण्योषधिवृक्षेभ्योऽवयवे चेति पृथग्निर्देशादिह शब्दशास्त्रे वनस्पतिकायाः प्राणिग्रहणेन गृह्यन्ते ॥

क्यषो वा ॥ ८५ ॥

क्यषन्ताद्वा मं भवति । वावचनसामर्थ्यात् पक्षे दोऽपि भवति । अपटत्पटद्भवति पटपटायति । पटपटायते । अव्यक्तानुकरणादनेकाचोऽनितौ डाजिति डाच् । डाचीति द्वित्वम् । मौ डाचि नित्यमिति तकारस्य पररूपत्वम् । टिखम् । डाज्लोहितात्क्यषीति क्यष् । एवमलोहितो लोहितो भवति लोहितायति । लोहितायते ॥

द्युद्भ्यो लुङि ॥ ८६ ॥

कृपूपर्यन्ता द्युतादयः । वेति वर्तते । द्युतादिभ्यो वा मं भवति लुङि परतः । व्यद्युतत् । व्यद्योतिष्ट । अलु-

टत् । अलोटिषृ । मविधिपक्षे द्युत्पुषादिलित्सर्त्तिशास्त्यर्तिभ्यः इत्यङ् । यद्यपि मे अङ्विधानसामर्थ्यान्मविधिर्लब्धस्तथाप्यनुदात्तेत्करणं लुङोऽन्यत्र सावकाशमिति नित्यं मं स्यादिति विकल्पार्थं वचनम् । लुङीति किम् । द्योतते । द्युता सहचरिता इतरेऽपि तथोच्यन्त इति बहुवचननिर्देशः ।

स्यसनोर्वृद्भ्यः ॥ ८७ ॥

द्युतादिष्वन्तर्भूता वृतादयः । वृतादिभ्यो वा मं भवति स्ये सनि च सति । वर्त्स्यति । अवर्त्स्यत् । विवृत्सति । वर्तिष्यते । अवर्तिष्यत । विवर्तिषते । एवं वृध् सृध स्यन्द इत्येते योज्याः । मविधौ न वृतादेरितीदप्रतिषेधः ॥

लुटि च क्लृपः ॥ ८८ ॥

क्लृपेर्लुटि स्यसनोश्च वा मं भवति । कल्प्ता । कल्प्तारौ । कल्प्तारः । कल्प्स्यति । अकल्प्स्यत् । चिक्लृप्सति । कल्पितारः । कल्पिष्यते । अकल्पिष्यत । चिकल्पिषते । क्लृपेर्वृतादित्वादेव स्यसनोर्विकल्पे सिद्धे चकारेणानुकर्षणमसन्देहार्थम् । क्लृप इति लत्वं किमर्थम् । ऋकारस्यस्य रेफभागस्य रेफग्रहणेन ग्रहणं यथा स्यात् । क्लृप्तवान् । मातॄणाम् । लत्वं णत्वञ्च सिद्धम् ॥

स्पर्द्धे परम् ॥ ८९ ॥

स्पर्द्धे परं कार्यं भवति । द्वयोः प्रसङ्गयोरन्यार्थयोरेकस्मिन् युगपदुपनिपाते सङ्घर्षः स्पर्द्धः । यञ्यतो दीः सुपीति दीत्वस्यावकाशः । देवाभ्याम् । वृक्षाभ्याम् । बहौ झल्येदित्यस्यावकाशः । देवेषु । वृक्षेषु । इहोभयं

प्राप्नोति । देवेभ्य इति सूत्रविन्यासे परमेत्वं भवति । अप्रवृत्तौ पर्याये वा प्राप्ते वचनम् । कार्यकालं सञ्ज्ञापरिभाषमिति । यावन्ति कार्याणि तावद्वा सूत्रस्य भेद इति विधिर्नियमश्चेदं सूत्रम् । यत्र परस्मिन्कार्ये कृते पुनः प्रसङ्गविज्ञानात्पूर्वं तत्र विधिः । यत्र परमेव कार्यं दृश्यते सकृद्गते परनिर्णये बाधितो बाधित एवेति । तत्र नियमः । तद्यथा द्वित्वस्यावकाशः । बेभिद्यते । जेरवकाशः । विचति । वेविच्यते इति परत्वाज्जौ कृते पुनः प्रसङ्गाद् द्वित्वम् । जसिशसोः शिरित्यस्यावकाशः । कुण्डानि । ङेसुटोरमित्यस्यावकाशः । यूयं राजानः । इह यूयं गुरुकुलानि इति पर एवाम्भावः । अतुल्यबलयोः स्पर्धो न भवति । उत्सर्गादपवादः । परनित्यविचारणे भवेन्नित्यम् । नित्यात्तथान्तरङ्गम् । तस्मादप्यनवकाशं यत् । एकार्थयोरपि नास्ति विरोधः । धेर्विहितास्तव्यादयः पर्यायेण भवन्ति ॥

नब्बाध्य आसम् ॥ ९० ॥

नपा निर्दिष्टो बाध्यो भवति आ साधिकारपरिसमाप्तेरित्येषोऽधिकारो वेदितव्यः । लोके संज्ञासमावेशो दृष्ट इन्द्रः शक्रः पुरन्दर इति । शास्त्रेऽपि त्यः कुञ्च इति शेषोऽगएवेत्यवधारणाज्ज्ञापयति इहापि संज्ञासमावेशः स्यादिति यत्नः क्रियते । यत्र नपः समावेश इष्यते तत्र चशब्दोपादानमस्ति । यथा यश्चैकाश्रय इति । वक्ष्यति प्रो धि च । विदि । भिदि । स्फे रुः । शिक्षि । भिक्षि । नपा निर्दिष्टा धिसंज्ञा रुसंज्ञया बाध्यते । समावेशे हि अततक्षदित्यत्र धौ कच्यनके सन्वदिति कच्परे धौ परतः

सन्वद्भावः प्रसज्येत । अविव्रजदित्यत्र धेर्दीत्वं स्यात् । नबिति किम् । बाभ्रव्यः । पुल्लिङ्गा सुसंज्ञा पुल्लिङ्गया भसंज्ञया बाध्यते ॥

स्वौ स्त्र्याख्यौ सुः ॥ ९१ ॥

स्त्रियमाचक्षाते इति स्त्र्याख्यौ । प्रे इति नियमादप्राप्तः सुपीति योगविभागात्कः । यावोकारोकारौ स्त्र्याख्यौ तदन्तं शब्दरूपं सुसंज्ञं भवति । सुम्भिङन्तं पदमित्यत्रान्तग्रहणमन्यत्र सज्ञाविधौ तदन्तविधिप्रतिषेधार्थमिह नाश्रीयते आमीयुवोरिति नियमारम्भात् । स्वाविति यणादेशादूकारो द्विमात्रस्तत्साहचर्यादीकारो द्विमात्रः । ईकारः । कुमारी । गौरी । लक्ष्मीः । ऊकारः । ब्रह्मबन्धूः । वामोरूः । यवागूः । अयमोरित्यादि सुसंज्ञाकार्यम् । स्वाविति किम् । मात्रे । दुहित्रे । स्त्र्याख्याविति किम् । हे ग्रामणीः । हे खलपूः । नेमौ स्त्रियमेवाचक्षाते । आख्याग्रहणं किम् । शब्दार्थे स्त्रीत्वे यथा स्यात् पदान्तरगम्ये मा भूत् । ग्रामण्ये स्त्रियै । खलप्वे स्त्रियै । उभयलिङ्गानामिष्वसनिप्रभृतीनां शब्दार्थ एव स्त्रीत्वम् । इष्वै असन्यै स्त्रियै । तथा गुणशब्दानां पट्व्यै स्त्रियै । इदञ्चाख्याग्रहणस्य प्रयोजनम् । कुमारीमिवात्मानमाचरति आचारे सर्वसृभ्यः क्विबिति क्विप् । कुमार्यै देवदत्ताय । लक्ष्मीमतिक्रान्ताय अतिलक्ष्म्यै । प्रागेव सुसंज्ञा वृत्ता तदन्तान्सुकार्यं भवति । इह अतिकुमारये देवदत्ताय । प्रादेशे कृते आमनलविधाविति प्रतिषेधान्सुकार्यं न भवति ।

स्त्री ॥ ९२ ॥

स्त्रीशब्दश्च सुसंज्ञो भवति । आमीयुवोः वा ङिति प्रश्चेति नियमविकल्पयोः सामान्येन पुरस्तादपवादः । हे स्त्रि । स्त्रीणाम् । स्त्रियै । प्रादेशनुडागमाः सिद्धाः ॥

आमीयुवोः ॥ ९३ ॥

आमि परत इयुवोः स्थानिनौ य्वौ स्त्र्याख्यौ सुसञ्ज्ञौ भवतः । सिद्धे सत्यारम्भो नियमार्थ आम्येव सुसंज्ञा नान्यत्र । हे श्रीः । हे भ्रूः । इयुवोरिति किम् । प्रध्यै । वर्षाभ्वै ॥

वा ॥ ९४ ॥

वा सुसंज्ञा भवतीत्यामीयुवोः । श्रीणाम् । श्रियाम् । भ्रूणाम् । भ्रुवाम् ॥

ङिति प्रश्च ॥ ९५ ॥

य्वोर्यः प्रः स्त्र्याख्य इयुवोश्च स्थानिनौ यौ य्वौ तेषां ङिति वा सुसंज्ञा भवति । कृत्यै । कृतये । धेन्वै । धेनवे । पक्षे स्वऽसखीति सुसंज्ञा । सोर्ङित्येप् । इयुवौ । श्रियै । श्रिये । भ्रुवै । भ्रुवे । स्त्र्याख्याविति एव । अग्नये । अतिकृतये । अतिश्रिये । अतिभ्रुवे देवदत्ताय । य्वौ य्वोः प्र इति किम् । मात्रे । दुहित्रे ।

स्वसखि ॥ ९६ ॥

प्रो य्वोरिति वर्तते । य्वोः प्रस्सुसंज्ञो भवति सखिशब्दं वर्जयित्वा । असखीति प्रतिषेधात् सिद्धौ भेति निदश चाख्याख्यस्य ख्याख्यस्य च प्रस्येह ग्रहणम् । अग्नये । वायवे । ख्याख्यश्च यो सुसंज्ञो न भवति तस्य ग्रहणम् । कृतये । धेनवे । सुसंज्ञाविषये नञ्वाध्य आस-

मिति सुसंज्ञा बाध्यते । कृत्याम् । धेन्वाम् । असखीति किम् । सख्युः । सख्यौ । असखीति पर्युदासोऽयम् । तेन शोभनः सखा सुसखा । अतिसखा । अतिसखेरागच्छति अतिसखेः । स्वसखिशब्दादन्यत्वमस्तीति सुसंज्ञा । मृदुग्रहणेन तदन्तविधिरिति वा । ग्वोः प्र इत्येव । पित्रे । मात्रे । सुप्रदेशाः सेर्ङितीत्येवमादयः ॥

पतिः से ॥ ९७ ॥

पतिशब्दः स एव सुसंज्ञो भवति । प्रजापतिना । प्रजापतये । पतिरेव स इति कस्मान्न नियमः । एवं हि द्वन्द्वे स्था इति पूर्वनिपातवचनमनर्थकं स्यात् द्वन्द्वे पतिरिति ब्रूयात् । नह्यन्यस्य से सुसंज्ञासम्भवः । अपि चानेकप्राप्तावेकस्य नियम इतिवचनमनर्थकं स्यात् । पटुमृदुगुप्त पटव इति । स इति किम् । पत्या । पत्ये ॥

प्रो धि च ॥ ९८ ॥

प्र इति मात्रिकस्य संज्ञा । प्रो धिसञ्ज्ञो भवति । भेत्ता । बोद्धा । धीति नपा निर्देशः किमर्थः । पुल्लिङ्गया रुसञ्ज्ञया बाधा यथा स्यात् । प्रयोजनमग्रे वक्ष्यते । चशब्दः सञ्ज्ञान्तरसमावेशार्थः । धि च भवति यच्चान्यत्प्राप्नोति तच्च भवति । इहाप्रविनय्य गत इति सुसंज्ञासमावेशः । विश्च ना च विनरौ तावाचष्टे णिच । णाविष्ठवन्मृद इति इष्ठवद्भावः । टिखम् । प्रशब्देन योगः । क्त्वो प्यादेशे णिखे प्राप्ते धिसंज्ञायां सत्यां प्ये धिपूर्वादिति णेरयादेशः सिद्धः । सुसंज्ञायाश्च पूर्वनिपातः । अन्यथेकारोकाराभ्यामन्यत्र सावकाशा धिसंज्ञा इकारोकारविषयत्वादनवकाशया सुसंज्ञया बाध्येत ॥

स्फे रुः ॥ ९९ ॥

प्र इति वर्तते । स्फसञ्ज्ञे परतः प्रो रुसञ्ज्ञो भवति । कुण्डा । हुण्डा । स्पर्द्धा । नुम्विधावुपदेशाश्रयणात्प्रागेव नुम् । सरोरुहल इति अस्त्यः । अजाद्यतष्टाप् ॥

दीः ॥ १०० ॥

दीरिति द्विमात्रस्य सञ्ज्ञा । दीश्च रुसञ्ज्ञो भवति । ईहाञ्चक्रे । लिटि परतः सरोरिजादेरित्याम् । शेषमाम्वक्तत्कृञइत्यत्रोक्तम् । रुरिति पुल्लिङ्गनिर्देशः किमर्थः । ईकारोकारविषयया सुसञ्ज्ञया बाधा मा भूत् । द्वयोः समावेशे हे परमवाणी३कइत्यत्र ऋसमोरिति सुसञ्ज्ञाश्रयः कप् । रुसञ्ज्ञाश्रयोऽनृतानन्तस्याप्येकैकस्य रोरिति पविधिश्च सिद्धः ॥

यत्ये तदादि गुः ॥ १०१ ॥

यो हि यस्मात्त्यः स तस्येत्युच्यते यस्य धोर्मृदो वा त्यस्तस्मिन् परतस्तदादिशब्दरूपं गुसञ्ज्ञं भवति । केवलायाः प्रकृतेर्व्यपदेशिवद्भावात्तदादित्वम् । देग्धि । जुहोति । करिष्यति । कुण्डानि । गुकार्यमेबिडागमश्च । जसि नोङ इति दीत्वञ्च । यदिति सञ्ज्ञिनिर्देशार्थम् । अन्यथा तदादीति न लभ्येत तथाच त्ये सति पूर्वमात्रस्य गुसञ्ज्ञा स्यात् । तत्र को दोषः । इह न्यविशत प्राकरोदिति सगेरडागमः स्यात् । यत्य इति यच्छब्देन त्यस्य विशेषणं किम् । अस्यापत्यमिः । देवदत्तइं पश्येत्यत्र आदेरैप् स्यात् । अस्य स्थानिवद्भावाद्व्यवधानमिति चेत् योऽनादिष्टादचः पूर्वस्तं प्रति स्थानिवद्भावः । आदिष्टाच्चैषोऽचः पूर्वो निष्पन्नस्य पदस्य पदान्तरेणाभिसम्बन्धात् । यत्य इति ईन्निर्देशः

किमर्थः । यत्र्यस्तदादि गुरित्युच्यमाने यस्य त्यः सम्भवति तस्यान्यस्मिन्नपि शब्दे गुसंज्ञा स्यात् । तथा च स्त्रियै इदं रुयर्थं भुवे इदं भ्वर्थम् । इयुवौ प्रसज्येयाताम् । तदादिवचनं किमर्थम् । यत्रानेकस्त्यः सम्भवति तत्र तदादेर्गुसंज्ञा यथा स्यात् । करिष्यति । कुण्डानि । स्यान्तस्य सनुमूकस्य च गुसंज्ञायां यज्यतो दी धेकाविति दीत्वं सिद्धम् । गुरिति पुल्लिङ्गनिर्देशो भपदसंज्ञासमावेशार्थः । इह बाभ्रव्य इति गुसंज्ञाश्रय आदेरैप् । भसंज्ञाश्रयः कडोरोऽस्वयम्भुव इति ओकारः । इह च यजुःपण्यमस्य याजुष्कः । गुसंज्ञाश्रय आदेरैप् स्वादावधे इति पदत्वे पदसंज्ञाश्रयानि रिसत्वषत्वानि सिद्धानि । नपुंसकलिङ्गा हि गुसंज्ञा हेतुरपत्यं हैत्र इत्यत्र सावकाशा सती पदसंज्ञया बाध्येत ।

सुम्मिङन्तं पदम् ॥ १०२ ॥

नः क्य इति नियमारम्भात् सुबिति प्रत्याहारग्रहणं नेपो बहोः । मिङा साहचर्याद्वा । सुबन्तं मिङन्तं च शब्दरूपं पदसंज्ञं भवति । सूपकारः पचति । पदसंज्ञाश्रयो रित्वादिविधिः । वासूसादेशविधिश्च भवति । ननु सुम्मिङौ त्यौ त्यग्रहणे यस्मात्स तदादेर्ग्रहणमित्यन्तग्रहणं किमर्थम् । अन्यत्र संज्ञाविधौ तदन्तविध्यभावज्ञापनार्थम् । तेन दृषत्तीर्णेत्यत्र क्तान्तस्य क्तक्तवतुइत्यनेन तसंज्ञा नास्तीति द्रान्तस्य तो न इत्येष विर्धिहषद्कारापेक्षया न भवति । इह च कुमारीगौरितरा तादीझइत्यनेन तरान्तस्य झसंज्ञा नास्तीति झरूपेत्यादिना प्रादेशो न भवति । पदमिति नपा निर्देशो भसंज्ञया बाधा यथा स्यादित्येवमर्थः । अन्यथा राज्ञः राजन्य इत्यत्र भसंज्ञाश्रय-

मनो खं पदसंज्ञाश्रयं नखञ्च स्यात् । पदप्रदेशा पदस्येत्येवमादयः ॥

नः क्ये ॥ १०३ ॥

क्य इति क्यच्क्यङ्क्यषामविशेषग्रहणम् । क्ये परतो नान्तस्य पदसंज्ञा भवति । राजानमिच्छति राजीयति । राजेवाचरति राजायते । अचर्म चर्म भवति चर्मायते । पदत्वे सति नखं सिद्धम् । नखं सुविधिकृत्सुकीति नियमादन्यत्र सिद्धमिति क्यचो तीत्वं दीरकृद्र इति दीत्वञ्च भवति । त्यखे त्याश्रयमिति पदत्वे सिद्धे नियमार्थमिदम् । नान्तमेव क्ये पदसंज्ञं भवति नान्यत् । वाक्यति । शुक्यति । कुत्वं न भवति । नान्तं क्य एवेति विपरीतो नियमो नाशङ्कनीयः । अकावितिं कौ नखप्रतिषेधात् ज्ञायते पदत्वे हि नखप्राप्तिः ॥

सिति ॥ १०४ ॥

सिति त्ये परतः पूर्वं पदसंज्ञं भवति । भवतोऽयं भवदीयः । भवतष्ठसञ्छसाविति छस् । यचिभइति पदसंज्ञायां बाधितायां पुनरारम्भः । एवमूर्णा अस्यास्तीति ऊर्णायुः । ऊर्णाहंशुभंभ्यश्च युस्मिति युस । यस्य ङ्याश्चेति खं न भवति । अहँय्युः । अहंयुः । शुभंय्युः । शुभंयुः । वा पदान्तस्येति परस्वविकल्पः ॥

स्वादावधे ॥ १०५ ॥

अध इति प्रतिषेधाद्धाया एकस्य सोर्ग्रहणम् । स्वादौ धवर्जिते परतः पूर्वं पदसंज्ञं भवति । राजभ्याम् । राजभिः । राजत्वम । राजता । अध इति किम् । राजानौ राजानः ।

यद्येवं राजेत्यत्रापि प्रतिषेधः स्यात् । नैवं शङ्क्यम् । अध इति पर्युदासोऽयं धादन्यत्र पदसंज्ञा विधीयते । धे तु पूर्वेण भविष्यति । यद्येवं सुवाचौ सुवाच इत्यत्रान्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वं प्राप्नोति । अस्तु तर्हि प्रसज्यप्रतिषेधः । राजेत्यत्र अकाविति प्रतिषेधात् ज्ञायते सौ पदसंज्ञा भवति । एवमप्यध इति अनन्तरस्य स्वादौ विधेः प्रतिषेधोऽयं सुवाचौ सुवाच इत्यत्र पूर्वेण प्राप्तिरस्त्येव कर्तव्योऽत्र यत्न उत्तरपदत्वे चापदादिविधौ त्यलक्षणं न भवतीति ॥

यचि भः ॥ १०६ ॥

स्वादावध इति वर्तते । यकारादावजादौ च स्वादौ धवर्जिते पूर्वं भसंज्ञं भवति । गार्ग्यः । वात्स्यः । दाक्षिः । प्लाक्षिः । पूर्वेण पदसंज्ञा प्राप्ता भत्वाद्यस्य ङ्याश्चेत्यखम् । नभोऽङ्गिरोमनुषां वत्युपसङ्ख्यानम् ॥*॥ नभसा तुल्यं वर्तते इति नभस्वत् । अङ्गिरस्वत् । मनुष्वत् । वृष्णोवस्वश्वयोर्धवोर्भसंज्ञेति केचित् । वृष्णो वसुः वृषण्वसुः । वृषणश्वः ।

मत्वर्थे स्तौ ॥ १०७ ॥

मत्वर्थे त्ये परतः सकारान्तं तकारान्तञ्च भसंज्ञं भवति । तपस्वी । यशस्वी । विनस्मायामेधास्रज इति विन् । मतोर्विशेषणत्वेपि मत्त्वर्थग्रहणेन ग्रहणम् । यथा देवदत्तशालापण्डिता आनीयन्तामित्युक्ते देवदत्तो विशेषणभूतोऽपि यदि पण्डितः सोऽपि आनीयते । भास्वान् । विद्युत्वान् । मरुत्वान् । स्ताविति किम् । राजवद् गृहम् ॥

कारके ॥ १०८ ॥

कारक इत्ययमधिकारः । यदित उर्द्धमनुक्रमिष्यामः कारक इत्येवं तद्वेदितव्यम् । कारकं निर्वर्तकं हेतुर्वा । कस्य ? क्रियायाः । का च क्रिया । ध्वर्थः । कारक इति निर्द्धारणलक्षणेयमीप् । जात्यपेक्षैकवचनम् । सौत्रो वा निर्देशः । कारकेषु यद्ध्रुवं तदपादानं यः कर्मणोपेयेऽर्थः स सम्प्रदानमित्यादि योज्यम् । वक्ष्यति ध्यपाये ध्रुवमपादानम् । ग्रामादागच्छति । स्वर्गादवरोहति । अपायक्रिययोर्ग्रामोऽपि निर्वर्त्तकः । देवदत्तोऽपि ध्रुवत्वाद् ग्रामोऽपादानम् । कारक इति किम् । वृक्षस्य पर्ण पतति । कुड्यस्य पिण्डः पतितः । अपायक्रियाया निर्वर्तकत्वेन वृक्षः कुड्यञ्च न विवक्षितम् । अकथितञ्च । आपादानादिभिरकथित च कारकं कर्मसंज्ञं भवति । आचार्यं धर्मं पृच्छति । कारक इति किम् । आचार्यस्य शिष्यं धर्मं पृच्छति । आचार्यस्य शिष्यविशेषणत्वादकारकत्वम् । यदा कारकञ्चारकञ्च सर्वमकथितमप्रतिपादितमित्यर्थस्तदेदं प्रत्युदाहरणम् । असङ्कीर्तितमिति व्याख्याने कारकमेव लभ्यते । प्रदेशेषु कारकाभिधानेऽपादानादीनां ग्रहणम् ॥

ध्यपाये ध्रुवमपादानम् ॥ १०९ ॥

धीर्बुद्धिः । प्राप्तिपूर्वको विश्लेषोऽपायः । धिया कृतो अपायो ध्यपायः । धीप्राप्तिपूर्वको विभाग इत्यर्थः । धीग्रहणे ह्यसति कायप्राप्तिपूर्वक एवापायः प्रतीयेत धीग्रहणेन सर्वः प्रतीयते । ध्रुवमविचलं अवधिभूतं वा । ध्यपाये साध्ये यद् ध्रुवं तदपादानसंज्ञं भवति । ग्रामादागच्छति । ग्रामो देवदत्तं नानुपतति इति ध्रुवः । अथवा अपायात्प्रागपि ग्रामः । अपाऽयेपि ग्राम एव । देवदत्त-

स्त्वपाये ग्रामग्रहणेन न गृह्यत इति ग्रामो ध्रुवः । एवमश्वाद्धावतः पतितः । गच्छतः सार्थादवहीनः । देवदत्तो जिनदत्तादागतः । मेषौ परस्परतोऽपसर्पतः । शृङ्गाच्छरो जायते । गङ्गा हिमवतः प्रभवति । इह ग्रामान्नागच्छतीति पूर्वमपादानसंज्ञा पश्चात्प्रतिषेधः । धियाऽपायस्य विशेषणं किम् । अधर्माज्जुगुप्सते । प्रेक्षापूर्वकारी दुःखहेतुरधर्म इति बुध्या संप्राप्य ततो निवर्तत इति अपादनत्वम् । एवमधर्माद्विरमति प्रमाद्यति । व्याघ्राद्बिभेति । चौरेभ्यस्त्रायते । अध्ययनात् पराजयते । न शक्नोतीत्यर्थः । यवेभ्यो गां वारयति । अकार्यात्सुतं वारयति । कूपादन्धं वारयति।उपाध्यायादन्तर्धत्ते। भयं सञ्चिन्त्य निवर्तत इत्यर्थः । विवक्षातः कारकाणि भवन्ति । उपाध्यायादधीते । उपाध्यायाच्छृणोति । अविवक्षायां नटस्यं शृणोति । ग्रन्थिकस्य शृणोति । ध्रुवमिति किम् । अरण्ये बिभेति । नात्र भयावधिभूतमरण्यं किं तर्हि चौराः । नपा निर्देशः किमर्थः । वक्ष्यमाणाभिः संज्ञाभिर्बाधा यथा स्यात् । धनुषा विध्यति । पुलिङ्गया करणसंज्ञया बाधात् । कांस्यपात्र्यां भुङ्क्ते । पुलिङ्गाधिकरणसंज्ञैव । धनुर्विध्यतीति कर्तृसंज्ञा । इह गां दोग्धि पय इति परत्वात्कर्मसंज्ञा । अपादानप्रदेशाः कापादाने इत्येवमादयः ॥

कर्मणोपेयः सम्प्रदानम् ॥ ११० ॥

उपपूर्वादिङो घे कृते उपेय इति भवति । कर्मणा य उपेयोऽर्थस्तत्कारकं सम्प्रदानसंज्ञं भवति । उपाध्यायाय गा ददाति । देवाय बलिं प्रयच्छति । कर्मणेति किम् । गवा उपाध्यायमुपैति । सम्प्रदानमित्यन्वर्थसंज्ञाकरणात् ददा-

त्यर्थानां धूनां द्रव्येण कर्मणा उपेयोऽर्थः सम्प्रदानमिति। तेनेह न भवति। देवदत्तस्य वस्त्रं दर्शयति। मित्रस्य कार्यं कथयति। अजां नयति ग्रामम्। सम्यक् प्रदानं सम्प्रदानमिति चाश्रितम्। तेनेह न भवति। घ्नतः पृष्ठं ददाति। रजकस्य वस्त्रं ददाति। राज्ञो दण्डं ददाति। इह तर्हि कथं श्राद्धाय निगृह्णते। युद्धाय सन्नह्यति। तिष्ठते ब्राह्मणी छात्रेभ्यः। तादर्थ्यात् सिद्धम्। अथवा कथंचिद्विवक्षितभेदाभिः सन्दर्शनप्रार्थनाध्यवसायक्रियाभिः क्रियापि व्याप्या सती कर्मतयोपेयत्वात् सम्प्रदानत्वम्। तेनेहापि भवति। रोचते देवदत्ताय मोदकः। स्वदते देवदत्ताय मोदकः। पुष्पेभ्यः स्पृहयति। मित्राय कथयति। मित्राय क्रुध्यति। मित्राय द्रुह्यति। मित्राय ईर्ष्यति। मित्रायासूयति। मित्राय कुप्यति। कोपादन्यत्र क्रुधादानां प्रार्थनादिभिः क्रियाविशेषैर्भेदो न विवक्षितः इति क्रियायाः कर्मव्यपदेशो नास्ति। भार्यामीर्ष्यति। ओषधं द्वेष्टि। शप उपलम्भनेऽर्थे भेदः। देवदत्ताय शपते। न्हुङ आत्मनि न्हवे भेदः। मित्राय न्हुते। अन्यत्र मित्रं न्हुते। राधीक्ष्योर्दैवालोचने। पुत्राय राध्यति। पुत्राय ईक्षते। अन्यत्र पुत्रस्य राध्यति। पुत्रमीक्षते। यत्र च प्रत्याङ्पूर्वः शृणोतिरभ्युपगमे वर्तते। देवदत्ताय प्रतिशृणोति। अनुप्रतिपूर्वश्च गृणातिर्यदि कथयितुः प्रोत्साहने वर्तते। आचार्याय अनुगृणाति। आचार्याय प्रतिगृणाति। इह भेदाभेदविवक्षा। देवदत्ताय श्लाघते। देवाय प्रणमति। देवं प्रणमति। गत्यर्थानां चेष्टायामसम्प्राप्तावुभे। यथा ग्रामाय गच्छति। ग्रामं गच्छति। ग्रामाय व्रजति। ग्रामं व्रजति चेष्टायामिति

किम् । मनसा पाटलिपुत्रं गच्छति । असम्प्राप्ताविति किम् । पन्थानं गच्छति । भार्यां गच्छति । अन्यत्राभेदविवक्षैव । कटं करोति । ओदनं पचति शास्त्रं पठति । सम्पोश्च क्रुधिद्रुह्योः । मित्रमभिक्रुध्यति । मित्रमभिद्रुह्यति । सिद्धिरनेकान्तादित्यतो भेदाभेदोभयविवक्षा प्रत्येतव्या । परेषामपि प्रतिपत्तिगौरवं तुल्यम् । क्व क्रियाया व्याप्यत्वमिष्टं क्व च नेति दुर्बोधम् ॥

धारेरुत्तमर्णः ॥ १११ ॥

ऋणे उत्तम उत्तमर्णः । निपातनात् सविधिः । धारयतेरुत्तमर्णो योऽर्थस्तत्कारकं सम्प्रदानसंज्ञं भवति । देवदत्ताय गां धारयति । उत्तमर्ण इति किम् । देवदत्ताय शतं धारयति दरिद्रः ॥

परिक्रयणम् ॥ ११२ ॥

परिक्रीयते ऽनेनेति परिक्रयणं तत्कारक सम्प्रदानसंज्ञं भवति । शताय परिक्रीतः । सहस्राय परिक्रीतः । साधकतमत्वात् करणसंज्ञा प्राप्ता ॥

साधकतमं करणम् ॥ ११३ ॥

क्रियायामतिशयेन साधकं साधकतमं तत्कारकं करणसंज्ञं भवति ।

दानेन भोगं दयया सुरूपं
ध्यानेन मोक्षं तपसेष्टसिद्धिम् ।
सत्येन वाक्यं प्रशमेन पूजां
वृत्तेन जन्माग्रमुपैतिमर्त्यः ॥

तमग्रहणं किमर्थम् । यथा रूपप्रस्तावे अभिरूपाय कन्या देयेत्युक्ते ऽभिरूपतमायेति गम्यते । एवमिहापि कारकाधिकारादकारके संज्ञावृत्तिर्नास्तीति साधकं कर-

णमित्युक्त ऽपि साधकतममिति गम्यते तदेतत् तमग्रहणं ज्ञापकमन्यत्र तमग्रहणेन विना प्रकर्षो न लभ्यते । तेनाधारोऽधिकरण इत्यनेन मुख्यामुख्ययोरधिकरणत्वं सिद्धम् । तिलेषु तैलम् । गङ्गायां घोषः । साधकतमस्याविवक्षायां स्यातङ्याऽनुविधीयते इति भवति । पुंल्लिङ्गनिर्देशः किमर्थः । परिक्रयणसंज्ञया [illegible] सम्प्रदानसंज्ञया बाधा मा भूत् । शतेन परिक्रीतः । शतात् साऽपि भवति । शताय परिक्रीतः । दिवः कर्म [illegible] समावेशो यथा स्यात् । अक्षैर्दीव्यति ॥

दिवः [illegible] ॥

दिवेः साधकतमं [illegible] कर्म संज्ञं भवति । अक्षान् दीव्यति । शलाकां दीव्यति । नयनिर्देशात् करणत्वमपि ॥

आधारोऽधिकरणः ॥ ११५ ॥

आश्रियते ऽस्मिन् क्रियेत्याधारः । इदमेव निपातनमधिकरणे घञः । आधारो यस्तत् कारकमधिकरणसंज्ञं भवति । यद्येवं कर्तृकर्मणोरधिकरणसंज्ञा प्राप्ता तदाश्रितत्वात् क्रियायाः । एवं तर्हि कर्तृकर्मणोः क्रियाश्रययोर्धारणादाधारोऽभिप्रेतः । पूर्वं तमग्रहणेन ज्ञापितं गौणस्याप्याधारस्याधिकरणत्वम् । कर्तृकर्मणोः सत्यपि क्रियाधारत्वेऽनवकाशत्वात् कर्तृकर्मसंज्ञे भविष्यतः । भेदविवक्षायामधिकरणत्वमपि । अशनक्रिया देवदत्ते वर्तते । विक्लेदनं तण्डुलेषु । औपश्लेषिको वैषयिकोऽभिव्यापक इत्याधारस्त्रिविधः प्रोक्तः । कटाकाशतिलेषु च । औपश्लेषिकः । कटे आस्ते । स्थाल्यां पचति । वैषयिकः । आकाशे

शकुनयः । गङ्गायां घोषः । गुरौ वसति । यदधीना यस्य स्थितिः स तस्याधारोऽभिव्यापको विभागाप्रतीतेः । तिलेषु तैलम् । दधनि सर्पिः । अधिकरणप्रदेशा ईबधिकरण इत्येवमादयः ॥

कर्मैवाधिशीङ्स्थासः ॥ ११६ ॥

अधिपूर्वाणां शीङ् स्था आस् इत्येषामाधारो यस्तत् कारकं कर्मसञ्ज्ञमेव भवति । ग्राममधिशेते । पर्वतमधितिष्ठति । प्रासादमध्यास्ते । एवकारः पुंल्लिङ्गाधिकरणसञ्ज्ञासमावेशनिवृत्त्यर्थः । कर्मप्रदेशाः कर्मणीवित्येवमादयः ॥

वसेऽनुपाध्याङः ॥ ११७ ॥

अनु उप अधि आङ् इत्येवम्पूर्वस्य वसतेराधारो यस्तत् कारकं कर्मसंज्ञं भवति । ग्राममनुवसति । गिरिमुपवसति । गृहमधिवसति । वनमावसति । इह कथं ग्रामे उपवसति । भोजननिवृत्तिं करोतीत्यर्थः । अत्रापि त्रिरात्रादेराधारस्य कर्मत्वं प्रतीयते ॥

अभिनिविशश्च ॥ ११८ ॥

अभिनि इत्येवंपूर्वस्य विशतेराधारो यस्तत् कारकं कर्मसंज्ञं भवति । ग्राममभिनिविशते । गेहमभिनिविशते । चकारात् क्वचिदधिकरणसंज्ञाऽपि भवति । या वा संज्ञा यस्मिन्नभिनिविशते । अर्थेष्वभिनिविष्टः । कल्याणेऽभिनिवेशः ॥

कर्त्राप्यम् ॥ ११९ ॥

कर्त्रा क्रियया यदाप्यं तत् कारकं कर्मसंज्ञं भवति ।

कर्तृग्रहणादाप्यग्रहणसामर्थ्याद्वा क्रिया लभते । तत्र कर्म ॥

प्राप्यं विषयभूतञ्च निर्वर्त्यं विक्रियात्मकम् ।
कर्तुश्च क्रियया व्याप्यमीप्सितानीप्सितेतरत् ॥

आप्यत्वसामान्यं सर्वत्र विद्यते । प्राप्यम् । ग्रामं गच्छति । आदित्यं पश्यति । विषयभूतम् । जैनेन्द्रमधीते । हिमवन्तं शृणोति । निर्वर्त्यम् । घटं करोति । ओदनं पचति । विक्रियात्मकम् । काष्ठानि दहति । घटं भिनत्ति । ईप्सितम् । गुडं भक्षयति । ओदनं भुङ्क्ते । अनीप्सितम् । ग्रामं गच्छन् व्याघ्रं पश्यति । कटंकानमृद्नाति । अनुभयम् । ग्रामं गच्छन् वृक्षमूलान्युपसर्पति । कर्त्रेति किम् । माषेष्वश्वं बध्नाति । अश्वेन कर्मणा भक्षणक्रियया माषाणामाप्यानां कर्मसंज्ञा मा भूत् । अथ सर्वाणि कारकाणि कर्त्राप्यन्त इति कर्मसंज्ञा प्राप्नोति । नैष दोषः । सर्वेषु कारकेष्वाप्येषु आप्यग्रहणसामर्थ्यादाप्यतमे संप्रत्ययः । तेन करणादिषु न भवति । पयसा ओदनं भुङ्क्ते । इह कथं कर्मत्वं गेहं प्रविशतीति । आधारस्याविवक्षया ॥

अकथितञ्च ॥ १२० ॥

अकथितमसङ्कीर्तितम् । अपादानादिभिर्विशेषकारकादिभिरकथितञ्च यत् कारकं तत् कर्मसंज्ञं भवति । अकथितमप्रधानमिति गृह्यमाणे इह देवदत्तात् गां याचत इत्यप्रधानतयाऽपादानसंज्ञा कर्मसंज्ञया बाध्येत ।

दुहियाचिरुधिप्रच्छिभिक्षिचित्रामुपयोगनिमित्तमपूर्वविधौ ॥

ब्रुविशासिगुणेन च यत् सचते तदकीर्तितमाचरितं कविना ।

दुहि । गां दोग्धि पयः । गौः कारकमपादानत्वेनासङ्कीर्तितमपायस्याविवक्षितत्वात् । गोरप्याप्यत्वेन सिद्धं कर्मत्वमिति चेत् परिगणनार्थमिदं वक्तव्यम् । इह मा भूत् । नटस्य शृणोति श्लोकम् । याचि । माणवकं गां याचते । याचनमात्रेणापायस्याविवक्षितत्वात् । रुधि । गामवरुणद्धि व्रजम् । सतोऽप्याधारस्याविवक्षा । अनुदरा कन्येति यथा । प्रच्छि । आचार्यं धर्मं पृच्छति । प्रश्नमात्रेणापायस्याविवक्षा । भिक्षि । देवदत्तं गां भिक्षते । चिञ् । वृक्षमवचिनोति फलानि । उपयोगनिमित्तं प्रयोगनिमित्तम् । अथवा· उपयोगो दुग्धादि तन्निमित्तं गवादि । इहापि तर्हि स्यात् । पाणिना कांशपात्र्यां दोग्धि । पाण्यादिकमप्युपयोगनिमित्तमित्याह । अपूर्वविधौ । यस्य पूर्वो विधिर्नोक्तः । इह तु पूर्वमेव करणसञ्ज्ञा अधिकरणसञ्ज्ञा च विहिता । ब्रुविशास्योर्गुणेन च क्रियया कर्मणा वा यत् सचते सम्बध्यते तदकीर्तितमित्युक्तमाचार्येण । ब्रुवि । माणवकं धर्मं ब्रूते । शासि । माणवकं धर्ममनुशास्ति । माणवकस्य सम्प्रदानत्वेनाविवक्षा । अकथितमिति किम् । देवदत्तात् गां याचते । चकारोऽनुक्तसमुच्चयार्थः । तेन कालभावाध्वगन्तव्यः कर्मसंज्ञा ह्यकर्मणामिति लब्धम् । काले । मासमास्ते । संवत्सरं वसति । भावे । गोदोहं स्वपिति । अध्वा च स गन्तव्यश्चेति इच्छया विशेषणत्वम् । क्रोशमास्ते । क्रोशं स्वपिति । देशोऽपि कर्मसंज्ञा इति केचित् । कुरूनास्ते । कुरून् स्वपिति । अथ नीवहि-

हरतिकृषजयत्यादयो द्विकर्मका उपलभ्यन्ते । तेषां कथं द्विकर्मकत्वं प्रधानाप्रधानकर्मणोः सामान्येनाप्यत्वात् । अजां नयति ग्रामम् । भारं वहति ग्रामम् । भारं हरति ग्रामम् । शाखां कर्षति ग्रामम् । देवदत्तो जिनदत्तं शतं जयति । देवदत्तो ग्रामं शतं दण्डयति । अयं तु विशेषः ।

प्रधानकर्मण्यभिधेये लादीनाहुर्द्विकर्मणाम् ।
अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः ॥

नीयते अजा ग्रामम् । उह्यते भारो ग्रामम् । ह्रियते भारो ग्रामम् । कृष्यते शाखा ग्रामम् । जीयते जिनदत्तः शतम् । दण्ड्यते जिनदत्तः शतम् । अप्रधाने कर्मणि दुहादीनाम् । दुह्यते गौः पयः । याच्यते माणवको गाम् । अवरुध्यते गां व्रजः । पृच्छ्यते आचार्यो धर्मम् । भिक्ष्यते देवदत्तो गाम् । अवचीयते वृक्षः फलानि । उच्यते माणवको धर्मम् । शिष्यते माणवको धर्मम् । ण्यन्ते कर्तुश्च कर्मण इति उत्तरसूत्रेणाण्यन्तावस्थायां यः कर्ता ण्यन्तावस्थायां कर्मतामापन्नः प्रयोज्यस्तस्याभिधाने लादीनाहुः । बोध्यते माणवकः शास्त्रम् । गम्यते माणवको ग्रामम् । भोज्यते माणवक ओदनम् । आस्यते माणवको मासम् । अध्याप्येते माणवकौ जैनेन्द्रम् । ननु ण्यन्तेषु धुषु ण्यन्तवाच्यया क्रियया प्रेषणाध्येषणलक्षणया यदाप्यते तत् प्रधानं कर्म । अवयवक्रियया यदाप्यतेऽप्रधानम् । एवं च सति प्रधानकर्मण्यभिधेये लादीनाहुरित्यनेनैव सिद्धत्वादनर्थकमिदं ण्यन्ते कर्तुश्च कर्मण इति । नानर्थकं समुच्चयार्थमेतत् प्रधाने कर्मणि लादयो भवन्त्यप्रधाने च । तेन बोध्यते माणवकं धर्मः । भोज्यते माणवकमोदनः । अध्याप्यते माणवकं

जैनेन्द्रः । अकर्मणां गत्यर्थानां च प्रधान एव कर्मणि लादयः । आस्यते माणवको मासम् । आस्यते माणवको गोदोहम् । गम्यते माणवको ग्रामम् । प्राप्यते माणवको ग्रामम् ॥

ज्ञागम्यद्यर्थधेरणि कर्ता णौ ॥ १२१ ॥

ज्ञार्थानां गम्यर्थानामद्यर्थानां धीनाञ्च धूनामण्यन्तानां यः कर्ता स णौ सति कर्मसंज्ञो भवति । ज्ञार्थानाम् । जानाति माणवको धर्मम् । ज्ञापयति माणवकं धर्मम् । बुध्यते माणवको धर्मम् । बोधयति माणवकं धर्मम् । पश्यति माणवको ग्रामम् । दर्शयति माणवकं ग्रामम् । गम्यर्थानाम् । गच्छति माणवको ग्रामम् । गमयति माणवकं ग्रामम् । याति माणवको ग्रामम् । यापयति माणवकं ग्रामम् । अद्यर्थानाम् । भुङ्क्ते ओदनं माणवकः । भोजयति माणकमोदनम् । अश्नाति माणवक ओदनम् । आशयति माणवकमोदनम् । धीनाम् । आस्ते माणवकः । आसयति माणवकम् । शेते माणवकः । शाययति माणवकम् । अत्रापि पूर्ववण्णिजन्तवाच्यया क्रियया प्रेषणाध्येषणलक्षणया आप्यत्वात् कर्मसंज्ञा सिद्धा । यद्यपि स्वातंत्र्यमाप्यत्वञ्चास्ति तथापि कर्मैवेत्यवधारणात् कर्तृसंज्ञा न भवतीति । एवं सिद्धे नियमार्थमिदं तेषामेवाणौ कर्ता एयन्ते कर्मसंज्ञो भवति नान्येषाम् । पचत्योदनं देवदत्तः । पाचयत्योदनं देवदत्तेन । अणि कर्तेति किम् । गमयति देवदत्तो जिनदत्तम् । तमन्यः प्रयुङ्क्ते । गमयति देवदत्तेन जिनदत्तम् । नयत्यादयः प्रापणार्था न गत्यर्थास्तेनेह कर्मसंज्ञा न भवति । अजां नयति देवदत्तः । नाय-

यति देवदत्तेन । भारं वहति वाहीकः । वाहयति वाहीकेन । यदा गत्यर्थतासंभवस्तदा भवति कर्मसंज्ञा । वहन्ति बलीवर्दा यवान् । वाहयन्ति बलीवर्दान् यवान् । प्रवहत्युदकं देवदत्तः । प्रवाहयत्युदकं देवदत्तम् ॥ अद्यर्थेषु अदिखाद्योः प्रतिषेधो वक्तव्यः ॥ * ॥ अत्ति देवदत्तः । आदयति देवदत्तेन । खादयति देवदत्तः । खादयति देवदत्तेन ॥ अथवा सर्वमद्यर्थकार्यमदेर्न भवति इति वक्तव्यमधिकरणे तविधिं मुक्त्वा ॥ * ॥ आदयते माणवकेन । चल्यद्यर्थादिति ममापि न भवति । भक्षिरहिंसार्थः कर्मसंज्ञो न भवति इति वक्तव्यम् । भक्षयति पिण्डीं देवदत्तः । भक्षयति पिण्डीं देवदत्तेन । अहिंसार्थस्येति किम् । भक्षयति बलीवर्दो यवम् । भक्षयति बलीवर्दं यवम् । अत्र हिंसाऽस्ति । वनस्पतिकायानां प्राणित्वात् । प्रकृतेन कर्मणा अकर्मका इह गृह्यन्ते तेन विग्रहणे कालादिकर्मणः कर्ता कर्मसंज्ञो भवति । आस्ते मासं देवदत्तः । आसयति मासं देवदत्तम् । आस्ते गोदोहं देवदत्तः । आसयति गोदोहं देवदत्तम् । आस्ते क्रोशं देवदत्तः । आसयति क्रोशं देवदत्तम् ॥

शब्दे च ॥ १२२ ॥

शब्दे कर्मभावेन क्रियाभावेन च यो धुर्वर्तते तस्याण्यन्तस्य कर्ता णौ कर्मसंज्ञो भवति । शब्दकर्मणः । शृणोति देवदत्तः शब्दम् । श्रावयति देवदत्तं शब्दम् । उपलभते देवदत्तः शब्दम् । उपलम्भयति देवदत्तं शब्दम् । अधीते माणवकस्तर्कम् । अध्यापयति माणवकं तर्कम् । शब्दक्रियस्य । जल्पति देवदत्तः । जल्पति देवदत्तम् । विलपति

देवदत्तः । विलापयति देवदत्तम् । चशब्दो ऽनुक्तसमुच्चयार्थः । तेन ह्वयत्यादिषु न भवति । ह्वयति देवदत्तः । ह्वापयति देवदत्तेन । क्रन्दति देवदत्तः । क्रन्दयति देवदत्तेन ।

हृक्रोर्न वा ॥ १२३ ॥

हृ कृ इत्येतयोरण्यन्तयोर्यः कर्ता स ण्यन्तयोर्न वा कर्मसंज्ञो भवति । नवेति निर्देशात् प्राप्ते चाप्राप्ते च विकल्पः । प्राप्ते । अभ्यवहरति देवदत्तः । अभ्यवहारयति देवदत्तं देवदत्तेनेति वा । विहरति देवदत्तः । विहारयति देवदत्तं देवदत्तेनेति वा । विकुर्वते सैन्धवाः । विकारयन्ति सैन्धवान् सैन्धवैरिति वा । अधर्यगम्यर्थे धिसंज्ञायां पूर्वेण प्राप्तिः । अप्राप्ते । हरति माणवको भारम् । हारयति माणवकं माणवकेन वा । करोति कटं देवदत्तः । कारयति कटं देवदत्तं देवदत्तेन वा । चकारोऽनुक्तसमुच्चयार्थोऽनुवर्तते । तेन अभिवदिदृश्योर्द्विषये विकल्पः । अभिवदति गुरुं देवदत्तः । अभिवादयते गुरुं देवदत्तं देवदत्तेन वा । पश्यन्ति भृत्या राजानम् । दर्शयते भृत्यान् भृत्यैरिति वा । णिच इति दविधिः ।

स्वतन्त्रः कर्ता ॥ १२४ ॥

स्वतन्त्र आत्मप्रधानः । क्रियासिद्धौ स्वतन्त्रो योऽर्थस्तत्कारकं कर्तृसंज्ञो भवति । देवदत्तः पचति । देवदत्तेन कृतम् । प्रेषितः करोतीत्यत्रापि स्वातन्त्र्यं गम्यते । अनिच्छायामकरणात् । इह स्थाली पचतीति स्वातन्त्र्यं विवक्षितम् ॥

तद्योजको हेतुः ॥ १२५ ॥

योजकः प्रेरकस्तस्य स्वतन्त्रस्य योजको योऽर्थस्तत्कारकं हेतुसंज्ञं भवति । पुल्लिङ्गकर्तृसंज्ञासमावेशात् कर्तृसंज्ञं च । कारयति । भोजयति । हेतुत्वाद्धेतुमतीति णिच् । कर्तृत्वाल्लकारवाच्यता । गौणस्यापि योजकस्य हेतुत्वम् । भिक्षा वासयति । कारीषोऽग्निरध्यापयति । तद्योजक इति वचनं ज्ञापकं तृजकाभ्यां कर्तरीत्यस्य तासप्रतिषेधस्यानित्यत्वम् ॥

निः ॥ १२६ ॥

अधिकारोऽयम् । प्राग्घोस्ते इत्यतः प्राक् । यानित उर्द्धमनुक्रमिष्यामो निसंज्ञास्ते वेदितव्याः । वक्ष्यति चादिरसत्वे । च वा ह अह एव । निरिति पुल्लिङ्गनिर्देशः किमर्थः गितिसंज्ञाभ्यां समावेशो यथा स्यात् । निप्रदेशा निरेकाजनाङित्येवमादयः ॥

चादिरसत्वे ॥ १२७ ॥

सीदत अस्मिंल्लिङ्गसंख्ये इति सत्वम् । लिङ्गसंख्यावद्द्रव्यमित्यर्थः । चादयो निसंज्ञका भवन्ति न चेत् सत्वे वर्तन्ते । च वा ह अह एव एवम् नूनम् शश्वत् खलु कूपत् कुवित् नेत् चेत् चण् कचित् यत्र नह हन्त माकिम् नकिम् माङ् । ङकारो माङि लुङीति विशेषणार्थः । अङिति माशब्दे मा ऽभवत् मा भविष्यति । न नञ् । ञकारो नञिति विशेषणार्थः । नहि वात्वाक ननु चत्वेच तु द्वै न्वै नुवै रूवै रेवै श्रौषट् वौषट् स्वाहा स्वधा ओम् तथाहि खलु किल अथ अवस् स्म अस्मि आ इ उ ऊ ऋ ऌ ए ऐ ओ औ उञ् लुञ् आदह आतङ्क वेलायाम् मात्रायाम् यावत् यथा किम् यत् तत् यदि पुरा धिक् हे हैा पाट प्याट उताहो

आहो अथो अधो मानो मनु नाना मन्ये असि ब्रूहि हिनु तु इति इव वत धवत एवं आ आं शं हिकम् हिरुक् शुभम् सुकम् शुकम् तुकम् नहि कम् ऊतम् सत्यम् अडा नो हि मुधा न चेत् जातु कथम् ऋते कुत्र अपि आदक आवहानोश्चित् वाह्यस् वत् दिष्ट्या पशु युगपत् फट् सह अनुषक् ताजक् नाजक अङ्ग पुत्र अये अरे अवे वट् वेट् वाट् उं श्वत्तिवत् मर्या ईप कीम् सीम् गिविभक्तीस्वरप्रतिरूपकाश्च । गिप्रतिरूपका अवदत्तमित्यादौ । दुर्नीतन्दुर्नय इति णत्वं न भवति । असत्व इति किम् । अस्यापत्यमिरिति ॥

प्रादिः ॥ १२८ ॥

प्रादयो निसंज्ञा भवन्त्यसत्वे । प्रपरापसमनिर्दुर्व्याङ्न्यधयोऽप्यतिसूदभयश्च । प्रतिना सह लक्षयितव्याः पर्युपयोरपि लक्षणमत्र । असत्व इत्येव । विप्रातीति विप्रः । परा जयति सेना । पृथक्करणमुत्तरार्थम् । प्रादीनामेव गिसंज्ञा यथा स्याचादीनां मा भूत् । उत्तरत्र प्रादिग्रहणे क्रियमाणे अक्रियायोगे निसंज्ञा न स्यात् । आ एवं नु मन्यसे । आ एवं किल तत् ॥

क्रियायोगे गि ॥ १२९ ॥

क्रियायोगे प्रादयो गिसंज्ञा भवन्ति । प्रणमति । परिणायकः । गेरसेऽपि विकृतेरिति णत्वं सिद्धम् । क्रियायोग इति किम् । प्रगता नायका अस्मादेशात् प्रनायको देशः । नन्वत्रापि क्रिया ऽस्ति । योगग्रहणसामर्थ्यात् यद्क्रियायुक्तास्तं प्रति गितिसंज्ञा भवति । गमिक्रियया चात्र योगः । मरुच्छब्दस्योपसंख्यानम् । मरुत्तः । गिस्तोऽच इति अनजन्तत्वेऽप्युपसंख्यानसामर्थ्यात्तादेशः । प्रज्ञाश्र-

ङार्चोदृत्तिभ्यो ण इति निर्देशाद्द्विषये श्रतेो गित्वम् । तिरोऽन्तर्डावितिं निर्देशादन्तःशब्दस्यापि क्यादिविषये ॥

ति ॥ १३० ॥

तिसंज्ञाश्च प्रादयो भवन्ति क्रियायोगे । प्रकृत्य । प्रस्तुत्य । तिसंज्ञायां तिकुप्रादय इति षसः । प्यस्तिवाक्से त्क इति प्यादेशः । पुंल्लिङ्गा गिसंज्ञा समाविशति । अभिषिच्य । प्रणम्य । षत्वणत्वे सिद्धे । योगविभागः किमर्थः । उत्तरत्र तिसंज्ञैव यथा स्यात् गिसंज्ञा मा भूत् । इह ऊरीस्यादिति । गिप्रादुर्भ्यां यच्च्यस्तेरिति षत्वं स्यात् ॥

च्विडाजूर्यादिः ॥ १३१ ॥

च्व्यन्तो डाजन्तमूरीप्रभृतयश्च शब्दाः क्रियायोगे तिसंज्ञा भवन्ति । अशुक्लं शुक्लं कृत्वा शुक्लीकृत्य । डाच् । अपटत् पटत् कृत्वा पटपटाकृत्य । कृभ्वस्तियोगे च्विडाचौ विहितौ तत्साहचर्यादूर्यादीनामपि कृभ्वस्तिभिरेव योगे तिसंज्ञा भवति । ऊर्यादिषु च्व्यर्थो न संभवति । ऊरीकृत्य । उररीकृत्य । ऊरीभूय । उररीभूय । ऊरीउररीशब्दावङ्गीकरणे विस्तारे च । पांपीशब्दो विध्वंसे माधुर्य्ये सकरुणविलापे । चंतालीआंतालीशब्दौ वर्णे । वेताली वैरूप्ये । धूसीशब्दः कान्तौ बाञ्छायाञ्च । सकलासंमकलाध्वंसकलाभ्रंसकला एते हिंसायाम् । गुलुगुधाशब्दौ पीडायाम् । सत्रः सहार्थे । फलू फली विक्ली अक्ली एते विकारे । आलंवी आलोष्टी केवासी केवाली वर्षाली भस्ससा मस्मसा एते हिंसायाम् । औषट् वौषट् वषट् स्वाहा स्वधा एते दानार्थाः । चादिषु च पाठादक्रियायोगे

ऽपि निसंज्ञा । प्रादुस् श्रत् आविस । प्रादुःकृत्य । प्रादुर्भूय । श्रद्धाय । आविर्भूय । आविःशब्दः साक्षादादौ च पठ्यते । तस्य वा कृञ्जाति करोतियोगे तिसंज्ञाविकल्पः । आविष्कृत्य । आविष्कृत्वा ॥

अनितावनुकरणम् ॥ १३२ ॥

अव्यक्तो व्यक्तो वा शब्दोऽनुक्रियते तेनेत्यनुकरणम् । अनितिपरमनुकरणं क्रियायोगे तिसंज्ञं भवति । खाट्कृत्य । पटत्कृत्य । अनिताविति किम् । खाडिति कृत्वा निरष्ठीवत् । खाट्छब्दस्य धोः प्राक् प्रयोगः सविधिश्च प्रसज्येत । ध्वादेः षः स इत्यत्र सुब्धुष्ठीवतिष्वष्कतिष्ट्यायतीनां प्रतिषेध उक्तः ॥

सदादरानादरयोः ॥ १३३ ॥

आदरः सम्भ्रमः । अवज्ञानमौदासीन्यं वा ऽनादरः । सच्छब्द आदरानादर इत्येतयोरर्थयोस्तिसंज्ञो भवति । आदरे । सत्कृत्य । अनादरे । असत्कृत्य । अनादर इत्यर्थनिर्देशात् सच्छब्दस्य तदन्तविधिरिष्टः । तेनेहापि भवति । परमसत्कृत्य । तिसंज्ञायां निसंज्ञासमावेशः । निसंज्ञस्यासंख्यत्वाज्ज्ञिसज्ज्ञा । आदरानादरयोरिति किम् । सत्कृत्वा काण्डं गतः । विद्यमान कृत्वेत्यर्थः ।

भूषापरिग्रहे ऽलमन्तः ॥ १३४ ॥

अलमन्तरित्येतौ शब्दौ भूषायामपरिग्रहे चार्थे यथासंख्यं तिसंज्ञौ भवतः । अलङ्कृत्य । भूषयित्वेत्यर्थः । अन्तर्हृत्य । मध्ये हृत्वेत्यर्थः । भूषापरिग्रह इति किम् । अलं कृत्वा । अन्तर्हृत्वा मूषिका गताः । पर्याप्तं कृत्वेत्यर्थः ।

परिगृह्येत्यर्थः । तिरोन्तर्द्धौतिज्ञापकादन्तःशब्दस्य गिसंज्ञाऽपि । अङ्किविधिणत्वेषु प्रयोगदर्शनात् । अन्तर्द्धा । अन्तर्द्धिः । अन्तर्णयः ॥

कणेमनः अड्घाते ॥ १३५ ॥

अडाघातोऽभिलाषनिवृत्तिः । कणेमनःशब्दौ अडाघातेऽर्थे तिसंज्ञौ भवतः । कणेशब्द ईयन्तप्रतिरूपको निसंज्ञोऽभिलाषातिशये वर्तते । मनःशब्दोऽपि तत्साहचर्यादिह तादृशः । कणेत्य भुङ्क्ते । मनोहत्य भुङ्क्ते । अडाघात इति किम् । तन्दुलावपने कणे हत्वा गतः । मनो हत्वा गतः । चेतो हत्वेत्यर्थः ॥

पुरोऽस्तं झिः ॥ १३६ ॥

पुरस् अस्त मित्येतौ झिसंज्ञौ क्रियायोगे तिसंज्ञौ भवतः । पुरःशब्दः पूर्वाधरावराणां पुरधवोसीत्यत्र साधितः । अस्तंशब्दोऽनुपलब्धौ वर्तते । पुरस्कृत्य गतः । अस्तङ्कृत्य पुनरुदेति । नमःपुरसोस्त्योरिति सत्वम् । झिरिति किम् । पूः पुरौ पुरः कृत्वा गतः । अस्तं कृत्वा काण्डं गतः ॥

गत्यर्थवदे ऽच्छः ॥ १३७ ॥

झिरिति वर्तते । अच्छशब्दो झिसंज्ञः गत्यर्थं वदतौ च तिसंज्ञो भवति । अच्छगत्य । अच्छगम्य । प्ये वा म इति वा मस्य खम् । अच्छोद्य । अच्छशब्दो दृढार्थे आभिमुख्ये च वर्तते । झिरित्येव । उदकमच्छं गत्वा ॥

अनुपदेशे ऽदः ॥ १३८ ॥

अवचनात्मिका प्रतिपत्तिरनुपदेशः । अदःशब्दोऽनुपदेशे तिसंज्ञो भवति । अदःकृत्य । अनुपदेश इति किम् । अदः कृत्वा गतः । एतत् कृत्वा गत इति परस्य कथयति ॥

तिरोऽन्तर्द्धौ ॥ १३९ ॥

तिरःशब्दोऽन्तर्द्धाने तिसंज्ञो भवति । तिरोभूय । अन्तर्द्धाविति किम् । तिरो भूत्वा स्थितः । तिर्यग्भूत्वा स्थित इत्यर्थः ॥

वा कृञि ॥ १४० ॥

तिरःशब्दोऽन्तर्द्धौ कृञि वा तिसंज्ञो भवति । प्राप्ते विकल्पः । तिरस्कृत्य । तिरः कृत्वा । तिरसो वेति सत्वम् । अन्तर्द्धावित्येव । तिरः कृत्वा काष्ठं गतः ॥

उपाजेऽन्वाजे ॥ १४१ ॥

उपाजे अन्वाजे ईबन्तप्रतिरूपकावेतौ कृञि वा तिसंज्ञौ भवतः । उपाजेकृत्य । उपाजे कृत्वा । अन्वाजोकृत्य । अन्वाजे कृत्वा । दुर्बलस्य भग्नस्य वा बलाधानं कृत्वेत्यर्थः ॥

साक्षादादिः ॥ १४२ ॥

वेति वर्तते । साक्षात्प्रभृतीनि शब्दरूपाणि कृञि वा तिसंज्ञानि भवन्ति । च्विडाजूर्यादिरित्यतो मण्डूकप्लुत्या च्विग्रहणमर्थपरमनुवर्तते । तेन च्व्यर्थे तिसंज्ञाविकल्पोऽयम् । साक्षात्कृत्य । साक्षात्कृत्वा । मिथ्याकृत्य । मिथ्याकृत्वा । यदा च्विरुत्पद्यते तदा च्विडाजूर्यादिरित्यनेन नित्यं तिसंज्ञा भवति । साक्षात् । मिथ्या । चिन्ता ।

भद्रा । रोचना । लोचना । अमा । आस्या । अङ्का । आस्रा । प्राजर्या । प्राजरुहा । वीजर्या । वीजरुहा । संसर्या । अर्थे । लवणम् । उष्णम् । शीतम् । उदकम् । आईम् । तिसन्नियोगे लवणादीनां मकारान्तत्वं निपात्यते । अग्नौ । वसे । विकम्पने । विहसने । अग्नौप्रभृतय ईबन्तप्रतिरूपका निपातनं वा । वेति व्यवस्थितविभाषानुवर्तनाल्लवणादीनां च्व्यन्तानां मकारौकारनिपातनं न भवति । लवणीकृत्य । वसीकृत्य । नमस् । प्रादुराविःशब्दौ ऊर्यादिष्वपि पठ्येते । तयोः कृञि विकल्पार्थं इह पाठः ॥

मनस्युरस्यनत्याधाने ॥ १४३ ॥

मनसिउरसिशब्दौ ईबन्तप्रतिरूपकौ निपातनं च । अत्याधानमुपश्लेषः । मनसि उरसि इत्येतौ अनत्याधानेऽर्थे कृञि वा तिसंज्ञौ भवतः । उरसिकृत्य । उरसि कृत्वा । मनसिकृत्य । मनसि कृत्वा । निश्चित्येत्यर्थः । अनत्याधान इति किम् । उरसि कृत्वा पाणिं शेते ॥

मध्ये पदे निवचने ॥ १४४ ॥

अनत्याधान इति वर्तते । मध्ये पदे निवचने इत्येते शब्दाः कृञि वा तिसंज्ञा भवन्ति अनत्याधाने । एकारान्तता पूर्ववद्वेदितव्या । मध्येकृत्य । मध्ये कृत्वा । पदेकृत्य । पदे कृत्वा । निवचने इति वचनाभावे वर्तते । निवचनेकृत्य । निवचने कृत्वा । अनत्याधान इत्येव । हस्तिनः पदे कृत्वा हस्तमास्ते ॥

हस्ते पाणौ स्वीकृतौ तिः ॥ १४५ ॥

हस्ते पाणौ इत्येतौ स्वीकृतावर्थे कृञि तिसंज्ञौ भवतः । हस्तेकृत्य । पाणौकृत्य । भार्यां कृत्वेत्यर्थः ।

स्वीकृताविति किम् । हस्ते कृत्वा कार्षापणं गतः । नात्र दारस्वीकारः । पुनस्तिग्रहणं नित्यार्थम् ॥

प्राध्वं बन्धे ॥ १४६ ॥

प्राध्वमिति मकारान्तो भिसंज्ञः शब्द आनुलोम्ये वर्तते । प्राध्वंशब्दः कृञि तिसंज्ञो भवति बन्धो निमित्तं चेत् । प्राध्वङ्कृत्य । बन्धनिमित्तमानुलोम्यमिह प्राध्वंकरणम् । बन्ध इति किम् । प्रगतमध्वानं प्राध्वं कृत्वा शकटं गतः । तिकुप्रादय इति षसः । गेरध्वन इति सान्तोऽकारः । प्रतिपदोक्तपरिभाषानाश्रयणे प्रत्युदाहरणमिदम् ॥

जीविकोपनिषदाविवे ॥ १४७ ॥

उपनिषद्रहस्यम् । जीविका उपनिषदित्येतौ शब्दाविवशब्दस्यार्थे कृञि तिसंज्ञौ भवतः । जीविकाकृत्य । उपनिषत्कृत्य । जीविकामिव उपनिषदमिव कृत्वेत्यर्थः । इवार्थ इति किम् । जीविकां कृत्वा गतः ॥

प्राग्धोस्ते ॥ १४८ ॥

प्रयोगनियमोऽयम् । ते गितिसंज्ञा धोः प्रागेव प्रयोक्तव्याः । तथा चैवोदाहृतम् । ते इति वचनं किमर्थम् । अनन्तराणां तीनां गीनां च ग्रहणार्थम् ॥

लो मम् ॥ १४९ ॥

नवानां लकाराणामनुबन्धापाये ल इति सामान्येन निर्देशः । लादेशो मसंज्ञो भवति । मिप् वस् मस् सिप् थस् थ तिप् तस झि शतृ । नपा निर्देशः पुंल्लिङ्गया दसंज्ञया बाधा यथा स्यात् । समावेशे हि आक्रमत

आदित्यः। सङ्गस्यत इत्यत्र क्रमो मे दीत्वं गमेरिण्मे इति इट् प्रसज्येत। शतरि मसंज्ञा सावकाशेति मिङ्क्षु वक्ष्यमाणाभिरस्मदादिभिः संज्ञाभिर्बाध्यत्वं नाशङ्कनीयम्। सावैम्म इति ववनं ज्ञापकं मिङां मसंज्ञाऽपि भवतीति॥

इङानं दः॥ १५०॥

इङिति प्रत्याहार इडित्यतः प्रभृति आ झङो ङकारेण। इङ च आनश्च दसंज्ञौ भवतः। इट् वहि महि थास् आथाम् ध्वम् त आताम् झङ्। आन इति शानो गृह्यते॥

मिङस्त्रिशोऽस्मद्युष्मदन्याः॥ १५१॥

मिङो मसंज्ञानि दसंज्ञानि च त्रीणि त्रीणि वचनानि अस्मद्युष्मदन्य इति एवंसंज्ञानि भवन्ति। मिप् वस् मस इत्यस्मद्। सिप् थस् थेति युष्मद्। तिप् तस् झोत्यन्यः। दानामपि। इट् वहि महि इत्यस्मद्। थास् आथां ध्वमिति युष्मद्। त आतां झडित्यन्यः। मिङ इति किम्। अनुत्तरस्य दस्य मस्य च ग्रहणार्थम्। त्रिश इति संख्यैकाद्वीप्सायामिति शस्॥

साधने स्वार्थे॥ १५२॥

अस्मदादयोऽन्वर्थसंज्ञा अनुवर्तन्ते। लस्येत्यधिकृत्याविशेषेण मिङादयो विहितास्तन्नियमोऽयम्। स्वस्यार्थः स्वोऽर्थो वा स्वार्थस्तस्मिन् स्वार्थे साधने ऽस्मदादयो वेदितव्याः। अस्मत्पदस्यार्थे साधने ऽस्मत्त्रिकं युष्मत्पदस्यार्थे साधने युष्मत्त्रिकमाभ्यामन्यस्यार्थे साधने ऽन्यत्त्रिकं भवति। अस्मदाद्यर्थानां साधनत्वे सति नियमो

ऽयम् । ततोऽस्मदादिपदानामनुप्रयोगे सत्यसति चास्मदादयो भवन्ति । अहं पचामि । आवां पचावः । वयं पचामः । पचामि । पचावः । पचामः । त्वं पचसि । युवां पचथः । यूयं पचथ । पचसि । पचथः । पचथ । स पचति । तौ पचतः । ते पचन्ति । पचति । पचतः । पचन्ति । एवं द्विविधावपि योज्यम् । भावे ऽस्मद्युष्मदर्थयोरभावात् भावस्य चाभ्यामन्यत्वादेकत्वाच्च तस्मिन् साधने ऽन्य एव भवति । आस्यते भवता । ग्लायते भवता । यत्रास्मदाद्यर्था युगपत् साधनं तत्र क इष्यते । पूर्वनिर्णयेन यः पूर्वः । अत्र किमस्मदर्थ एव साधने ऽस्मद् भवति इत्यवध्रियते आहोस्विदस्मदर्थे साधने ऽस्मदेव भवतीति । उभयथाऽप्यदोषः सर्वेषां नियतत्वात् । ननु द्वितीये पक्षे त्वया कुर्वाणेनेत्यत्र दोषः । मैवम् । त्रिकापेक्षया नियमो न साधनापेक्षया ॥

प्रहासे मन्यवाचि युष्मन्मन्यतेरस्मदेकवच्च ॥१५३॥

मन्य इति मन्यतेरेकदेशः । ब्रूते इति वाक् । मन्यो वाक् यस्य प्रहासस्य तस्मिन् मन्यवाचि प्रहासे गम्यमाने युष्मद्भवति मन्यतेश्चास्मद्भवति एकवच्च । अस्मद्युष्मदोर्व्यत्ययार्थोऽयमारम्भः । एहि मन्ये रथेन यास्यसि न हि यास्यसि यातस्ते पिता । एहि मन्यसे रथेन यास्यामीति प्राप्तम् । एवमेहि मन्ये ओदनं भोक्ष्यसे न हि भोक्ष्यसे भुक्तः सो ऽतिथिभिः । द्वित्वबहुत्वविवक्षायामपि मन्यतेरेकवद्भावो भवति । एवं मन्ये रथेन यास्थथ न यास्थथेति । प्रहास इति किम् । एहि मन्यसे ओदनं भोक्ष्य इति सुष्ठु मन्यसे साधु मन्यसे ॥

एकद्विबहवश्चैकशः ॥ १५४ ॥

यान्यस्मद्युष्मदन्यसञ्ज्ञानां संज्ञित्वेनोपात्तानि षट् त्रिकाणि तान्येकश एक द्वि बहु इत्येवंसंज्ञानि भवन्ति । मिवित्येकः । वसिति द्विः । मसिति बहुः । एवं शेषेषु त्रिकेषु योज्यम् । अस्मदादिसञ्ज्ञाः पुंल्लिङ्गा एकादिभिः सह समाविशन्ति ॥

सुपश्च ॥ १५५ ॥

त्रिश इति वर्तते । सुपश्च त्रिकाणि एकद्विबहुसंज्ञानि भवन्त्येकशः । सु इत्येकः । औ इति द्विः । जसिति बहुः । एवं शेषेषु त्रिकेषु नेयम् । उभयत्र चशब्दः साधने स्वार्थे इत्यस्यानुकर्षणार्थः । एकार्थे साधने एको मिप् भवति । द्व्यर्थे द्विर्वस् । बह्वर्थे बहुर्मस् । एवं मिङ्ङु सुप्सु च योज्यम् । ननु च साधने स्वार्थे इत्येतन्मिङ उपपद्यते यतः साधनं कारकं क्रियाया निर्वर्तकं क्रिया च ध्वर्थः । धोश्च मिङो विहिता इति साधनवाचित्वोपपत्तेः । सुपस्त्वक्रियावाचिनो ङ्याम्मृदो विधीयन्त इति तत्र साधने स्वार्थे इत्येतन्न घटते । नैष दोषः । अक्रियावाचिनोऽपि विधीयमानाः सुपः क्रियावाचिपदान्तरमाकाङ्क्षन्ति । पदान्तरवाच्यायाः क्रियायाः साधनभावोपपत्तेः सुप्स्वपि साधने स्वार्थे इत्ययं व्यवहारो युज्यते । देवदत्तः पचति । देवदत्तौ पचतः । देवदत्ताः पचन्ति । यत्रापि क्रियापदं न प्रयुज्यते वृक्षः प्लक्ष इति तत्राप्यस्ति भवतीति परः सन्निहितस्तदपेक्षया व्यवहारः । मिङः सामान्येन धुमात्राद्विधीयन्ते सुपश्च मृन्मात्रात्तेषां सङ्करेण प्राप्तौ

नियमोऽयम् । त्यनियमोऽर्थनियमो वा । एकार्थ एव साधने एको भवति द्वयर्थ एव साधने द्विर्भवति बह्वर्थ एव बहुर्भवतीति त्यनियमः । एकार्थे साधने एक एव भवति द्वयर्थे द्विरेव भवति बह्वर्थे बहुरेव भवतीत्यर्थ-नियमः । त्यनियमपक्षे सुपो भेरिति वचनं ज्ञापकमेक-त्वादीनामभावेऽप्युत्पद्यन्ते भेः सुप इति । अर्थनियमपक्षे एकत्वादयो नियता त्याऽन्न व्यभिचरन्ति त्याः पुनरनियता एकत्वादीनामभावे व्यतिकरणेन भिसञ्ज्ञकेभ्यो भवन्ति । तत्र सुपो भेरित्युपि कृते सुबन्तं पदं भवति ॥

विभक्ती ॥ १५६ ॥

सुप इत्यनुवर्तते त्रिश इति च । सुपां त्रीणि त्रीणि वचनानि विभक्तीसंज्ञानि भवन्ति । सु औ जसिति त्रिको वर्गस्तस्य विभक्तो इति संज्ञा । त्रिकसमुदाये संज्ञा विहिता अवयवे ऽप्युपचर्यते । एवं सर्वत्र सुपां त्रिकेषु योज्यम् । सिडां विभक्तीसंज्ञायां न गुणो नापि दोषः । विभक्तीशब्दस्य कथं सिडिः । विपूर्वाद्भजेः क्तिच्कृतौखा-वितिक्तिच् तस्मात् कृदिकारादक्तेरिति ङीविधिः । महा-संज्ञाकरणमुत्तरार्थम् ॥

तासामापपरास्तद्धुलचः ॥ १५७ ॥

तस्य विभक्तीशब्दस्य हलोऽचश्च आकारपकारपरा-स्तासां विभक्तीनां यथासंख्यं संज्ञा भवति । वा इप् भा अप् का ता ईप् इति एताः संज्ञाः । सुपस्त्रिश इति चानुवर्तते । सु औ जसिति वा । अम् औट् शसिति इप् । टा भ्यां भिसिति भा । ङे भ्यां भ्यसिति अप् । ङसि

भ्यां भ्यसिति का । ङस् ओस् आमिति ता । ङि ओस् सुप् इति इप् । तासां ग्रहणं सुव्विभक्त्युपादानार्थम् । सपूर्वायावाया इत्येवमादयो निर्देशाः सौत्राः ॥

इत्यभयनन्दिविरचितायां जैनेन्द्रव्याकरणमहावृत्तौ प्रथमस्याध्यायस्य द्वितीयः पादः समाप्तः ॥ २ ॥

समर्थः पदविधिः ॥ १ ॥

परिभाषेयम् । समर्थपदाश्रयत्वात् समर्थः । पदसम्बन्धी विधिः पदविधिः । सर्वः पदविधिः समर्थो वेदितव्यः । समर्थानां पदानां विधिर्वेदितव्य इत्यर्थः । द्विविधं सामर्थ्यमेकार्थीभावः परस्परव्यपेक्षा च । तत्र सविधिनामधुहद्विधिषु स्वभावत एकार्थीभावः सामर्थ्यमन्यत्र व्यपेक्षा । एकार्थीभावे सङ्गतार्थः संसृष्टार्थो वा समर्थः । व्यपेक्षायां सम्बद्धार्थः सम्प्रेक्षितार्थो वा समर्थः । वक्ष्यति इप् तच्छ्रितातीतपतितगतात्यस्तैः । धर्मं श्रितो धर्मश्रितः । समर्थग्रहणं किम् । व्याचष्टे मुनिर्धर्मं श्रितः शिष्यो गुरुकुलम् । अत्र व्यपेक्षा नास्ति । भा गुणोक्त्यर्थनेनैः । मदेन पटुर्मदपटुः । समर्थग्रहणं किम् । दन्ती भ्रमति मदेन पटुः शास्त्रेण । अन्नदर्थार्थबलिहितसुखरक्षितैः । रथाय दारु रथदारु । समर्थग्रहणं किम् । गच्छ त्वं रथाय दारु देवदत्तस्य गेहे । का भीभिः । संसाराद्भयं संसारभयम् । समर्थग्रहणं किम् । ध्यानी निःक्रामति संसाराद्भयमरण्ये । ता । मोक्षस्य मार्गो मोक्षमार्गः । समर्थ ग्रहणं किम् । अनन्तसुखं मोक्षस्य मार्गः स्वर्गस्य व्रतम् । ईप्छौण्डैः । अक्षेषु शौण्डो ऽक्षशौण्डः । समर्थग्रहणं किम् । मूढः शक्तौऽक्षेषु शौण्डः पिबति पानागारे । पदग्रहणं किम् ।

तिष्ठतु दध्यशान त्वं शाकेन । तिष्ठतु कुमारी च्छत्रं हर देवदत्तात् । वर्णविधौ समर्थपरिभाषा नावतरतीत्यानन्तर्यमात्रेण यणादेशस्तुग्विधिश्च भवति । वा पदस्येत्यत्र पदग्रहणं द्विमात्रस्य विशेषणमिति पदविधिरयं न भवतीति विकल्पेन तुक् ॥

सः ॥ २ ॥

स इत्ययमधिकारो वेदितव्य आ पादपरिसमाप्तेः । समुदायवाक्यपरिसमाप्तिश्चाश्रीयते तेन पदसमुदाये संज्ञा न प्रत्येकमिति । वक्ष्यति यावद्यथावधृत्यसादृश्ये । यथावृद्धमतिथीन् भोजय । नित्यत्वात् सविधेरस्वपदविग्रहेणार्थः प्रदर्श्यते ये ये वृद्धा इति । वीप्सायां यथाशब्दः । स इति पुंलिङ्गनिर्देशः किमर्थः । हादिभिर्विशेषसंज्ञाभिः समावेशो यथा स्यात् ॥

सुप् सुपा ॥ ३ ॥

सुबन्तं सुबन्तेन सह सो भवतीत्येतदधिकृतं वेदितव्यमा पादपरिसमाप्तेः । वक्ष्यति इच्छति इत्यादि । धर्मश्रितः । लक्षणञ्चेदं सुबन्तं सुबन्तेन सह सो भवति । यदृच्छया ऽतर्कितोपस्थिते चित्रीकरणे वा ऽभिष्यते । तेन काकतालीयादयः सिद्धाः । तथाहि यदृच्छया तालस्य पतनं सन्निहितं काकश्चातर्कित उपस्थितः स काकस्तेन तालेन पतता हतः । अस्मिन्नर्थे ऽनयोः सामान्येन सः । काकश्च तालञ्च काकतालं तदिव काकतालीयम् । इवे प्रतिकृतावित्यधिकृत्य कुशाग्राच्छ इति चानुवर्तमाने सादृश्यादिति च्छो भवति । एवमजाकृपाणीयमन्धकवर्तकीयम् ॥

ह्रः ॥ ४ ॥

अधिकारोऽयम् । यानित ऊर्ध्वमनुक्रमिष्यामो ह्रसंज्ञास्ते वेदितव्याः षमित्यतः प्राक् । वक्ष्यति स्तोके प्रतिना । सूपप्रति । शाकप्रति । अस्वपदेन विग्रहः । अस्त्यत्र किञ्चित् सूपस्य मात्रा स्तोकमिति वा । अत्रान्ये मन्यन्ते अनव्ययस्याव्ययभवनमव्ययीभाव इत्यन्वर्थसंज्ञा कर्तव्या । एतच्चायुक्तम् । असंख्यस्य झिसंज्ञा युज्यते । अस्य च संख्या विद्यते । उपकुम्भेन । उपकुम्भाभ्याम् । उपकुम्भैः । दोषः खल्वपि झिसंज्ञायां झिसर्वनाम्नोऽक् प्राटेरिति यथेहाग्भवति । उच्चकैः । नीचकैरिति । एवमिहापि प्राप्नोति उपाग्निकं प्रत्यग्निकमिति । तथा खित्यर्भेर्मुमच इति झेः प्रतिषेध उच्यते दोषामन्यमहः दिवामन्या रात्रिः । स इहापि प्राप्नोति । उपकुम्भंमन्यः। उपमणिकांमन्यः । इह च अस्य च्वाविति झेः प्रतिषेधो वक्ष्यति दोषाभूतमहः दिवाभूता रात्रिरिति । स इहापि प्राप्नोति उपकुम्भीभूतः । उपमणिकीभूतः । तस्माल्लघीयसी ह इति संज्ञा युक्ता । यद्येवं कृकमिकंसकुम्भकुशाकर्णीपात्रेऽतो झेरित्यनेन सत्वस्य प्रतिषेधो न प्राप्नोति उपपयःकार इति । अद्युस्थस्येति तत्र वर्तते । हसे च द्यु स्थो भवतीति प्रतिषेधः सिद्धः । पूर्वपदप्राधान्यञ्च सहस्याभिधानवशाज्ज्ञेयम् । हप्रदेशा हादित्येवमादयः ।

झि विभक्त्यभ्यासदुर्ध्यर्थाभावातोत्यसंप्रतिव्यृद्धि-
शब्दप्रभवपश्चाद्यथानुपूर्व्ययौगपद्य-
संपत्साकल्यान्तोक्तौ ॥ ५ ॥

विभक्तौ-अभ्यास-ऋद्धि-अर्थाभाव अतीति-असंप्रति-व्यृद्धि-शब्दप्रभव-पश्चात्-यथा-आनुपूर्व्य-यौगपद्य-सम्पत्-साकल्य-अन्तोक्ति इत्येतेष्वर्थेषु यत् झिसंज्ञं वर्तते तत् सुबन्तेन समर्थेन सह हसंज्ञकः सो भवति । विभक्त्यर्थः कारकमधिकरणादि । स्त्रीषु कथा वर्तते । अधिस्त्रि । अधिकुमारि । ईबन्तेन वृत्तिः । हश्चेति नपुंसकलिङ्गातिदेशः । प्रो नपीति प्रादेशः । हादिति सुप उप् । अभ्यासः समीपम् । उपकुम्भम् । उपगुरु । कुम्भस्याभ्यास इत्यर्थप्रदर्शनं तान्तेन वृत्तिरिति केचित् । तदयुक्तम् । उपशब्दोऽयं द्योतकः स उत्तरपदार्थव्यतिरेकं न जनयति अभ्यासादीनान्तु शब्दानां वाचकानां सन्निधाने व्यतिरेकः प्रतीयते यथा धवश्च खदिरश्चेत्यस्यार्थे समुच्चयो धवखदिरस्य तस्माद्धान्तेन वृत्तिः । विभूतेराधिक्यं ऋद्धिः । मद्राणां ऋद्धिः सुमद्रं सुमगधं वर्तते । पूर्वपदार्थस्य प्राधान्ये हसः । यदा तु मद्रा ऋद्धया विशिष्यन्ते तदा शोभना मद्राः सुमद्रा इति तिकुप्रादय इति षसः । अथाभाव उत्तरपदार्थप्रध्वंसः । अभावो मक्षिकाणाममक्षिकम् । विमक्षिकम् । निर्मक्षिकम् । अर्थग्रहणं किम् । धर्माभावे इतरेतराभावे च मा भूत् । न भवति ब्राह्मणो गौरश्वो न भवतीति । अतीतिरतीतत्वम् । स्वत एवातिक्रान्तत्वमित्यर्थः । अतीतानि तृणानि अतृणम् । नितृणम् । एवं निशीतं निवातं वर्तते । न सम्प्रति असम्प्रति नेदानीमित्यर्थः । न सम्प्रति तैसृकमतितैसकम् । नायं तैसृकस्याच्छादनस्योपभोगकाल इत्यर्थः । तिसृका नाम ग्रामस्तत आगतं तैसृकम् । विगम ऋद्धेर्व्यृद्धिः । गन्दिकानामृद्धेर्विगमो

दुर्गन्दिकम् । दुर्यवनम् । शब्दप्रभवः शब्दस्य प्रकाशमानता । श्रीदत्तस्य शब्दप्रभव इतिश्रीदत्तम् । तच्छ्रीदत्तमहो श्रीदत्तम् । श्रीदत्तशब्दो लोके प्रकाशत इत्यर्थः । पश्चात् । रथानां पश्चादनुरथं पादातम् । यथार्थो योग्यता । अनुरूपं सुरूपो वहति । सादृश्यमपि यथार्थः । उत्तरत्रासादृश्य इति प्रतिषेधाज्ज्ञायते । सदृशं व्रतस्य सव्रतम् । सशीलम् । हे काल इति सहस्य सादेशः । पूर्वं पूर्वमनुपूर्वं तस्य भाव आनुपूर्व्यम् । अनुज्येष्ठं प्रविशन्तु भवन्तः । ज्येष्ठानुक्रमेणेत्यर्थः । आनुपूर्व्यं विन्यासविशेष इति यथार्थात् पृथगुक्तम् । यौगपद्यसम्पत्साकल्यान्तोक्तिषु सहशब्दो वर्तते । यौगपद्यमेककालता । सचक्रं धेहि । युगपच्चक्रे धेहीत्यर्थः । सधुरं प्राज । युगपद्धुरौ प्राजेत्यर्थः । सम्पत् सिद्धिः । आत्मभावनिष्पत्तिरित्यर्थः । वृत्तस्य सम्पत् छत्रस्य सम्पत् सवृत्तं साधूनाम् । सच्छत्रं शालङ्कायनानाम् । साकल्य । सतृणमभ्यवहरति । सर्वेण सहाभ्यवहरतीत्यर्थः । अन्तः समाप्तिः । प्राभृतपर्यन्तमधीते । एवं सबन्धं सटीकम् । अत्र परिसमाप्तिरसाकल्येऽप्यध्ययने प्रतीयत इति साकल्ये नन्तर्भावः । इह आचण्डालं प्रयच्छतीति अन्तोक्तिरभिविधिरप्यस्ति । परत्वात् पर्यपाङ्बहिरञ्चवः कर्मेति विभाषा भवति । आचण्डालमाचण्डालेभ्य इति । वीप्सायां वा हसो वक्तव्यः । प्रत्यर्थम् । प्रतिपर्यायम् । अर्थमर्थं प्रति । पर्यायं पर्यायं प्रति ॥

यावद्यावधृत्यसादृश्ये ॥ ६ ॥

प्रसक्तस्य परिमाणमवधृतिः । सादृश्यं तुल्यता । यावत्

यथा इत्येतौ शब्दाववधृति असादृश्य इत्येतयोरर्थयोः सुपा सह यथासंख्यं हसो भवति । यावदमत्रं यावदवकाशमतिथीन् भोजय । यावन्त्यमत्राणि तावतो भोजयेत्यवधार्यते । यथावृद्धं साधूनर्चय । यथापटु । यथाध्यापकम् । वृद्धानतिक्रमेणेत्यर्थः । उत्तरपदार्थानतिवृत्तिर्यथाशब्दस्यार्थो वीप्सा सादृश्यञ्च । अवधृत्यसादृश्य इति किम् । यावद्दत्तं तावद्भुक्तम् । यथा देवदत्तस्तथेन्द्रदत्तः । पूर्वेणैव यथार्थे हसे सिद्धे सादृश्ये प्रतिषेधार्थमिह यथाशब्दोपादानम् । गुणक्रियाछायासादृश्ये हसो वक्तव्यः ॥ गुणः । यथाशक्ति । यथाबलम् । क्रिया । यथोपदेशम् । छाया । यथासुखम् । न वक्तव्यम् । अत्राप्युत्तरपदार्थानतिवृत्तिर्गम्यते ॥

स्तोके प्रतिना ॥ ७ ॥

भीति निवृत्तम् । स्तोकं मात्रा । स्तोकेऽर्थे प्रतिना सह सुबन्तं हसो भवति । सूपस्य मात्रा सूपप्रति । शाकप्रति । स्तोक इति किम् । वृद्धं प्रति विद्योतते विद्युत् । लक्षणेऽत्र प्रतिशब्दो वर्तते ॥

परिणा ऽक्षशलाकासंख्याः ॥ ८ ॥

अक्षशब्दः शलाकाशब्दः संख्या च परिणा सह हसो भवति । परिणाक्षशलाकासंख्यमिति सिद्धे बहुवचननिर्देशादिदृसंग्रहो लब्धो वेतिसिंहावलोकनाद्वा । अक्षादयो यदा भान्ता एकत्वञ्चाक्षशलाकयोः पूर्वोक्तस्यान्यथावृत्तौ परिशब्दो यदा वर्तते कितवव्यवहारविषये तदा वृत्तिरिष्यते । तथाहि पञ्चिका नाम द्यूतं यत्र पञ्चात्ताः

शलाका वा पात्यन्ते पञ्चस्वेकरूपासु पातयिता जयत्यन्यथा पाते जीयते । अक्षेणेदं न तथा वृत्तं यथा पूर्वं जये अक्षपरि । शलाकापरि । संख्या । एकपरि । द्विपरि । त्रिपरि । चतुःपरि । परिणेति किम् । सुबन्तमात्रे मा भूत् । अक्षादय इति किम् । पाशकेनेदं न तथा वृत्तम् । एकत्वेऽक्षशलाकयोरिति किम् । अक्षाभ्यां न तथा वृत्तम् । कितवव्यवहार इति किम् । अक्षेणेदं न तथावृत्तं शकटे ॥

वा ॥ ९ ॥

वेत्ययमधिकारः । यदित ऊर्ध्वमनुक्रमिष्यामस्तद्वा भवतीति वेदितव्यः । इत उत्तरः सविधिर्वा भवति पक्षे वाक्यमपि साधु भवति । पूर्वस्तु सविधिर्नित्यः । तेनास्वपदेन तत्र विग्रहो ज्ञेयः ॥

पर्यपाङ्बहिरञ्चवः कया ॥ १० ॥

परि अप आङ बहिस् अञ्चु इत्येते सुबन्ताः कान्तेन सह वा इसो भवति । परित्रिगर्तं वृष्टो देवः । वाक्यपक्षे परेर्वर्ज्जने वा वचनमिति वा द्वित्वम् । परि परि त्रिगर्त्तेभ्यः । परि त्रिगर्त्तेभ्यः । अप त्रिगर्त्तेभ्यः । वर्जने ऽपपरिभ्यामिति का । आपाटलिपुत्रं वृष्टो देवः । आ पाटलिपुत्रात् । आकुमारं यशः समन्तभद्रस्य । आ कुमारेभ्यः । काऽमर्यादावचन इति मर्यादाभिविध्योः का । बहिर्ग्रामम् । बहिर्ग्रामात् । इदमेव ज्ञापकं बहिःशब्दयोगे का भवति । अञ्चु । प्राग्ग्रामात् । प्राची दिग् रमणीया इति वगृह्य दिक्छब्देभ्यो वा केभ्योऽस्ताद्दिग्देशयोः काल इति अस्तात् । तस्याञ्चेरुदित्युप । सुपो धेरिति सुप उप् ।

पदत्वात् कुत्वम् । तेन योगे ता प्राप्ता तां बाधित्वा दिक्छब्दत्वात् का प्राप्ता तां बाधित्वा तातसर्थत्येनेति तायां प्राप्तायां अञ्चुप्र इति का भवति । कयेति किम् । परिगतः । अपगतः । वर्जनार्थाभावात् का नास्तीति कुतिप्रादय इति नित्यं षसो भवति ।

लक्षणेनाभिमुख्ये ऽभिप्रती ॥ ११ ॥

लक्ष्यतेऽनेनेति लक्षणम् । तद्वाचिना सुबन्तेन सह अभिप्रतिशब्दावाभिमुख्ये वर्तमानौ वा हसो भवति । अभ्यग्नि शलभाः पतन्ति । प्रत्यग्नि शलभाः पतन्ति । अग्निमभि पतन्ति । अग्निं प्रति पतन्तीति वाक्यम् । अत्राग्निना चिह्नेन शलभपातो लक्ष्यते । वीप्सेत्थम्भूत-लक्षणेऽभिनेप् । भागे चानुप्रतिपरिणेति चेप् । लक्षणेनेति किम् । ह्रदं प्रति गतः । दिङ्मोहात्तत्रैव पुनरागत इत्यर्थः । आभिमुख्य इति किम् । अभ्यङ्का गावः । अभिनवः प्रतिनवोऽङ्को यासामिति । यद्यपि पूर्वपदार्थप्रधानो हसस्तथापोहार्थविशेषाभावेऽन्यपदार्थेऽपि स्यात् । अभि-प्रती इति किम् । येनाग्निस्तेन गतः । येनेत्यस्याग्निना सह हसो न भवति ॥

यत्समया ऽनुः ॥ १२ ॥

समयावाची अनुशब्द उपचारात् समया । यस्य समया यत्समया । मुख्येन समयाशब्देन योगाभावादिह न भवति । अत एव नक्षितेत्यादिनाऽपि न तासप्रतिषेधः । अनुर्यत्समयावाची तेन लक्षणभूतेन सह वा हसो भवति । अनुवनं गतोऽशनिः । वनमनुगत इति वाक्यम् । भागे

चानुप्रतिपरिणेति लक्षणेप । वनेन समीपस्थमशनिगमनं लक्ष्यते । झिविभक्त्यभ्यास इत्येवं सिद्धे विकल्पार्थं वचनम् । यत्समयेति किम् । वृक्षमनु विद्योतते ॥

आयामिना ॥ १३ ॥

अनुरिति वर्तते । लक्षणेनेति च । अनुनायामिना लक्षणभूतेन सह वा ह्रसो भवति ह्रयोः प्रकृतिहीनयोर्दीर्घयोर्योगे ऽनुः प्रयुज्यमान उभयोर्दीर्घत्वमाह । तत्र प्रसिद्धायामेन लक्षणेनातिशयेन दीर्घेण वा ह्रसवृत्तिर्भवति । अनुगङ्गं वाराणसी । अनुसोनं पाटलिपुत्रम् । वाक्यमपि साधु भवति । गङ्गामन्वायता वाराणसी । नद्यायामेन पत्तनायामो लक्ष्यते । लक्षणे इप् । अथवा हेतावनुना भार्थइतीष् । गङ्गया सहायतेत्यर्थः ॥

तिष्ठद्गवादीनिच ॥ १४ ॥

तिष्ठद्गु इत्येवमादीनि च शब्दरूपाणि ह्रसंज्ञानि भवन्ति । समुदाया एते ह्रसंज्ञाः कार्यार्थं पाठादेवं निपात्यन्त इत्यर्थः। तिष्ठद्गु कालविशेषेऽन्यपदार्थे तिष्ठन्ति गावो यस्मिन् काले दोहाय तिष्ठद्गु । त्यद्योरिति लटः शत्रादेशो निपातनाद्वा । स्त्रीगोर्न्नीच इति प्रादेशः । वहन्ति गावो यस्मिन् काले वहद्गु । आयतीगवम् । पूर्वपदस्य निपातनात् पुंवद्भावाभाव अकारश्च सान्तो निपात्यते । खलेवुसम् । निपातनादीपोऽलुप् । लूनयवम् । लूयमानयवम् । लूयन्ते यवा यस्मिन् काले त्यद्योरिति लटः शानादेशः । पूतयवम् । पूयमानयवम् । संहृतयवम् । संह्रियमाणयवम् । संहृतवुसम् । संह्रियमाणवुसम् । एते कालविशेषेऽन्यपदार्थे उक्ताः । समभूमिसमपदातिशब्दौ पूर्वपदार्थप्रधानौ

समत्वं भूमेः समत्वं पदातेरिति । उत्तरपदार्थप्रधाने तु समा भूमिः समभूमिरिति षस एव। हसे पूर्वपदस्य केचिन्मकारान्तत्वमपीच्छन्ति। समम्भूमि। समम्पदाति। सुषमम्। विषमम्। निःषमम्। दुःषमम्। अवरसमम्। समशब्देन पूर्वपदार्थप्राधान्ये हसः। अत्र शोभनत्वं समस्येत्येवमादिवाक्यमप्यूह्यम्। उत्तरपदार्थप्राधान्ये तु षसः। समाशब्दः संवत्सरवाचि। तेन वक्ष्यमाणो हसः। आयतीसमा। आयतीसमम्। पापसमम। पुण्यसमम्। केचित्तु समशब्देनैव भासमिच्छन्ति। आयत्या सममायतीसमम्। प्रगतमन्हः प्रान्हम्। उत्तरपदार्थप्राधान्ये षसः। प्रान्हे कल्याणनामानावुदितौ तिष्यपुनर्वसू। प्रथम। प्रमृगम्। प्रदक्षिणम्। अपदक्षिणम्। सम्प्रति। असम्प्रति। इच्। दण्डादण्डि। मुसलामुसलि। जइजिति इच् सान्तः। अन्यस्यापीति पूर्वपदस्य दीत्वम्। चशब्दोऽवधारणार्थः। तिष्ठद्गवादीन्येव नान्यैः सह वृत्तिं लभन्ते। परमं तिष्ठद्गु। सन्महत्परमेत्यादिना षसो न भवति।

पारे मध्ये तया वा ॥ १५ ॥

पारेमध्येशब्दौ तान्तेन सह हसो भवति वावचनात्षसोऽपि। प्रकृतेन वाग्रहणेन वाक्यस्य साधुत्वमभ्यनुज्ञायते। हसन्नियोगेन वानयोरेकारान्तता निपात्यते। पारं गङ्गायाः। मध्यं गङ्गायाः। पारेगङ्गम्। मध्येगङ्गम्। तासपक्षे गङ्गापारम। गङ्गामध्यम् ॥

संख्या वंश्येन ॥ १६ ॥

विद्याजन्मादिकृतः सन्तानो वंशः। तत्र भवो

वंश्यः । संख्या वंश्यवाचिना सह हसो भवति । द्विमुनी व्याकरणस्य वंश्यौ । द्विमुनि व्याकरणस्य । अत्र सम्बन्धे ता । यदा व्याकरणस्याचार्ययोरभेदविवक्षा यावेतौ द्वौ मुनी तावेव व्याकरणमिति द्वौ मुनी वंश्यौ द्विमुनि व्याकरणमिति तदा सामानाधिकरण्यं भवति । एवं सप्तकासि त्रिकोशलम् । एकाश्रयस्य वसस्य चापवादोऽयम् ॥

नदीभिश्च ॥ १७ ॥

बहुवचननिर्देशादर्थस्येदं ग्रहणम् । नदीवाचिभिः शब्दैः सह संख्या हसो भवति । सप्त सिन्धवः समाहृताः सप्तसिन्धु । सप्तगङ्गम । द्वियमुनम् । तिस्रो गोदावर्यः समाहृताः । त्रिगोदावरम् । कृष्णोदकृपाण्डुपूर्वाया भूमेरः सान्त इष्यते । गोदावर्याश्च नद्य श्च संख्याया उत्तरे यदा इति अस्त्यः सान्तो भवति । नदीशब्दोऽपि नदीवचन इति तेनापि वृत्तिः । प नदम् । अत्राऽप्यः सान्तः । चकारः किमर्थः समाहारे यथा स्यादिह मा भूत् । वीरावतीको देशः । एका नदी एकनदी ॥

खावन्यपदार्थे ॥ १८ ॥

संख्येति निवृत्तम् । नदीभिरिति वर्तते । अन्यपदार्थे खुविषये नदीभिः सह सुबन्तं हसो भवति । उन्मत्तगङ्गं देशः । लोहितगङ्गम् । शनैर्गङ्गम् । तूष्णीगङ्गम् । अत्र वृत्तिपदेन संज्ञा गम्यत इति सामर्थ्यान्नित्यः समासविधिः । उन्मत्ता गङ्गा यस्मिन् देशे इति सादृश्यमात्रेणार्थकथनं यथा गौरित्यस्यार्थे गच्छतीति । खाविति किम् । शीघ्रा गङ्गा यस्मिन् देशे स शीघ्रगङ्गो देशः । अन्यपदार्थ इति किम् । कृष्णावेष्णा । कृष्णा नाम नदीविशेषस्तल्लक्षणः ॥

षम् ॥ १९ ॥

अधिकारोऽयं प्राग् वसात् । यदित ऊर्ध्वमनुक्रमिष्यामः षसंज्ञः सो भवति इत्येवं वेदितव्यम । वक्ष्यति इष्टच्छ्रितार्तातपतितगतात्यस्तैः । धर्मं श्रितो धर्मश्रितः । नपा निर्देशः किमर्थः । इह वीरपुरुषको ग्राम इति पूर्वापरप्रथमादिसूत्रेण प्राप्तः स्वपदार्थविषयत्वादन्तरङ्गः षसो बहिरङ्गेन वसेन बाध्यो यथा स्यात् । उत्तरपदार्थप्रधानत्वं षसन्याभिधानवशात् ॥

इषा च प्राप्तापन्ने ॥ २० ॥

इबन्तेन सह प्राप्तापन्ने शब्दरूपे षसो भवति । प्राप्तो जीविकां प्राप्तजीविकः । आपन्नो जीविकामापन्नजीविकः । स्त्रीगोर्न्नीच इति प्रादेशः । चकारः किमर्थः । आकारादेशसमुच्चयार्थः । प्राप्ता जीविकां प्राप्ताजीविका । आपन्नो जीविकामापन्नाजीविका । प्रपञ्चार्थमिदं सूत्रम् । वसेनाप्येतत् सिध्यति । यदा कर्मणि क्तस्तदा प्राप्ता जीविका येनेति विग्रहो यदा कर्तरि तदा प्राप्ता जीविका यं पुरुषमिति ॥

इष्टच्छ्रितातीतपतितगतात्यस्तैः ॥ २१ ॥

तच्छब्देन प्राप्तापन्नयोर्ग्रहणम् । इबन्तं श्रित अतीत पतित गत अत्यस्त इत्येतैश्च सह षसो भवति । जीविकां प्राप्तो जीविकाप्राप्तः । सुखापन्नः । धर्मश्रितः । संसारमतीतः । संसारातीतः । नरकं पतितो नरकपतितः । मोक्षं गतो मोक्षगतः । तुहिनमत्यस्तस्तुहिनात्यस्तः । इबितिपदं सूत्रे वानिर्दिष्टे चोक्तं न्यगिति न्यक्संज्ञं

तस्य वृत्तौ पूर्वमिति पूर्वनिपातः। महान्तं धर्मं श्रित इति सापेक्षत्वाद्वृत्त्यभावः। यदा महांश्चासौ धर्मश्च महाधर्म इति तदा महाधर्मश्रित इति भवति ॥

स्वयं क्तेन ॥ २२ ॥

स्वयमित्येतत् भिसंज्ञं क्तान्तेन सह षसो भवति। इवधिकारो ऽसम्भवादिमं योगमुत्प्लुत्य गच्छति। स्वयन्धौतौ पादौ। स्वयंगुप्ताः। कृद्ग्रहणे तिकारकपूर्वस्यापि ग्रहणम्। स्वयंविलीनमाज्यम्। एकपदं प्रयोजनम्। स्वयंधौतस्येदं स्वायंधौतम् ॥

खट्वा ऽक्रमे ॥ २३ ॥

आचार्यासनं खट्वा। उत्पथगमनमक्रमः। खट्वाशब्द इबन्तः क्तान्तेन सह षसो भवति अक्रमे। खट्वारूढो जाल्मः। खट्वाश्रितः। खट्वास्तृतः। सर्व एते अविनीतपर्यायाः। गुरुभिरनुज्ञातेन खट्वा आरोढव्या तदन्यथाकरणमक्रमोऽत्र प्रतीयते। अत्रापि वृत्तिपदेनाक्रमो गम्यत इति नित्यः सविधिः। वाक्यं सादृश्यमात्रेण। अक्रम इति किम्। खट्वामारूढोऽध्यापको ऽध्यापयति ॥

सामि ॥ २४ ॥

सामि इत्यर्द्धवाचि भिसंज्ञं तत् सुबन्तं क्तान्तेन षसौ भवति। सामिकृतम्। सामिभुक्तम्। सङ्घाताद्वृत्पत्तिः प्रयोजनम्। इबित्युपेक्षया गच्छति ॥

कालाः ॥ २५ ॥

कालवाचिनः शब्दा इबन्ताः क्तान्तेन सह षसो भवति। कालाध्वन्यविच्छेद इत्यनेन या विहितेप् तस्या

उत्तरसूत्रेणाक्रान्तेन वृत्तिं वक्ष्यति विच्छेदे क्रान्तेनेहोदाहरणम् । षण्मुहूर्त्ताश्चराः । ते उत्तरायणेऽहर्गच्छन्ति । दक्षिणायने रात्रिम् । तेन नास्त्यविच्छेदः । अहरतिसृता मुहुर्त्ताः । अहःसंक्रान्ताः । रोसुपीत्यन्हो नकारस्य रेफादेशः । रात्र्यारूढाः । रात्रिसंक्रान्ताः । मासं प्रमितो मासप्रमितश्चन्द्रमाः । मासं प्रमातुमारब्धः प्रतिपच्चन्द्रमाः । तेन विच्छेदः ॥

अविच्छेदे ॥ २६ ॥

क्रान्तेनेति निवृत्तम् । अविच्छेदोऽत्यन्तसंयोगः । कालाः इबन्ताः सुबन्तेन सह षसो भवति अविच्छेदे । अविच्छेदश्च कालस्य द्रव्यक्रियागुणैः सम्बन्धिभिर्व्याप्तिः । अत्यन्तं सुखमत्यन्तसुखम् । अत्यन्तरमणीयम् । सर्वरात्रकल्याणी । सर्वरात्रशोभना । कालाध्वन्यविच्छेद इतीप् ॥

भा गुणोक्त्यार्थैनोनैः ॥ २७ ॥

भान्तं गुणोक्त्या अर्थशब्देन गुणवाचिभिश्च शब्दैः सह षसो भवति । शङ्कुलया खण्डः शङ्कुलाखण्डः । गुणवचनादुबिति मतोरुप् । एवं गिरिणा काणः गिरिकाणः । मदेन पटुर्मद पटुः । कुसुमैः सुरभिः कुसुमसुरभिः । कार्यकारणभावलक्षणमत्र सामर्थ्यं शङ्कुलादिकृतत्वात् खण्डत्वादीनाम् । उक्तिग्रहणं किमर्थम् । उच्यते इत्युक्तिः । गुणेनोक्तिर्गुणोक्तिः । गुणद्वारेण द्रव्ये यः शब्दो वर्त्तते तेन वृत्तिर्यथा स्यात् केवलेन गुणेन मा भूत् । मदेन पाटवम् । वृत्तेन पाटवम् । अर्थेन । धान्येनार्थो धान्यार्थः । पुण्येनार्थः पुण्यार्थः । अर्थशब्दोऽत्र प्रयोजनवाची । ऊनैः । माषेणोनो माषोनः । माषविकलम् । एतैरिति किम् । गोभिर्वपावान् । अस्त्यत्र

कार्यकारणभावः । गोभिः कृतत्वाद्वपावत्वस्य । इह कस्मान्न भवति । अदृणा काणः । असामर्थ्यात् । नात्र काणत्वमाक्षिकृतमन्येन केनापि काणः कृतः । केवलमदृणा काणत्वयुक्ता लक्ष्यते । इह कस्मान्न भवति । दध्ना पटुः । घृतेन पटुः । अनभिधानात् ॥

पूर्वावरसदृशकलहनिपुणमिश्रश्लक्ष्णसमैः ॥२८॥

पूर्व-अवर-सदृश-कलह-निपुण-मिश्र श्लक्ष्ण-सम इत्येतैः सह भान्तं षसो भवति । मासेन पूर्वो मासपूर्वः । संवत्सरपूर्वः । मासावरः । संवत्सरावरः । अस्मादेव वचनाद्वा । हेतौ वा । पित्रा सदृशः । पितृसदृशः । भाऽतृलोपमाभ्यां तुलार्थैरिति भा । विद्यया सदृशो विद्यासदृशः । असिना कलहोऽसिकलहः । वाचा निपुणो वाङ्निपुणः । गुडेन मिश्रा गुडमिश्राः । तिलमिश्रा धानाः । वाचा श्लक्ष्णो वाक्श्लक्ष्णः । जिह्वाश्लक्ष्णः । मात्रा समो मातृसमः । कुलेन समः कुलसमः ॥

साधनं कृता बहुलम् ॥ २९ ॥

साधनं कारकं तत् कृदन्तेन बहुलं षसो भवति । कर्तृ । अहिना हतोऽहिहतः । करणम् । विषेण हतो विषहतः । कृद्ग्रहणे तिकारकपूर्वस्यापि । नखनिर्भिन्नः । तथा देवदत्तेन नखैर्निर्भिन्नः देवदत्तनखनिर्भिन्नः । कर्म । ग्रामं गमी ग्रामगमी । ओदनं बुभुक्षुरोदनबुभुक्षुः । अपादानम् । ग्रामनिर्गतः । अधर्मजुगुप्सुः । सम्प्रदानम् । पादाभ्यां ह्रियते पादहारको भूपः । अधिकरणम् । गले चोपते गलेचोपकः । युङ्भावबहुलमिति बहुलवचनादुभयत्र कर्मणि

ण्वुच् । क्वचिन्न भवति । दात्रेण लूनवान् । परशुना छिन्नवान् । व्याप्तैरधिकार्थवचन इष्यते । कुक्कुटैः सम्पात्याः कुक्कुट-सम्पात्या ग्रामाः । अत्यासन्नताकथनम् । काकपेया नदी । श्वलेह्यः कूपः । कण्टकसंचेय ओदनः । बाष्पच्छेद्यानि तृणानि । क्वचिन्न भवति । काकैः पातव्याः । काकैः पानीया नदी । क्वचिदधिकार्थाभावेऽपि । वुसोपेन्ध्यम् । तृणोपेन्ध्यम् । पूर्वमुत्तरञ्च कारकविभक्तीलक्षणं सविधानमस्यैव प्रपञ्चः । साधनमिति किम् । भिक्षाभिरुषितः । हेतौ भा । कृद्ग्रहणं किम् । कृदन्तेनैव वृत्तिर्यथा स्यात् सुबन्तेन मा भूत् । अभ्रविलिप्तो । क्तादल्प इत्यकारान्तात् ङीविधिः सिद्धः । सुप्पुंलिङ्गयुक्ताङ्गवति ॥

भक्ष्यान्नाभ्यां मिश्रणव्यञ्जने ॥ ३० ॥

मिश्रणव्यञ्जनवाचिनी सुबन्तेन भक्ष्यान्नवाचिभ्यां यथासंख्यं षसो भवति । गुडेन मिश्रा धाना गुडधानाः । वृत्तौ क्रियाया अन्तर्भावादप्रयोगः । एवं गुडपृथुकाः । तिलपृथुकाः । व्यञ्जनम् । दध्ना उपसिक्त ओदनो दध्योदनः । घृतौदनः ।

अप्तदर्थार्थबलिहितसुखरक्षितैः ॥ ३१ ॥

तस्मै इदं तदर्थम् । अबन्तं तदर्थेनार्थशब्देन च बलिहित-सुख-रक्षित इत्येतैश्च सह षसो भवति । स्थाय दारु । स्थदारु । कुण्डलाय हिरण्यम् । कुण्डलहिरण्यम् । बहुलग्रहणानुवृत्तेः प्रकृतिविकृतिभावे तदर्थेन वृत्तिः । विकृतिः प्रकृत्या सह इत्यर्थः । इह न भवति । रन्धनाय स्थाली । अवहननायोदूखलम् । इदमेव ज्ञापकं तादर्थ्ये

अप् भवति । कथमश्वघासो हस्तिविधेति । तासेन सिद्धम् । अर्थशब्देन नित्यं वृत्तिः । मात्रे इदं मात्रर्थम् । त्रिलिङ्गता लोकाश्रयत्वाल्लिङ्गस्य । आतुरार्था यवागूः । आतुरार्थः सूपः । देवाय बलिः । देवबलिः । गृहबलिः । तादर्थ्ये अप् । गोभ्यो हितं गोहितम् । अश्वहितम् । हितयोगे इदमेव ज्ञापकमपः । गोभ्यः सुखं गोसुखम् । अप्चाशिष्येत्यादिना अप् । गोभ्यो रक्षितं गोरक्षितम् । तादर्थ्ये अप् ।

का भीभिः ॥ ३२ ॥

बहुवचनादर्थविज्ञानम् । कान्तं भीवचनैः सह षसो भवति । वृकेभ्यो भीः वृकभीः । वृकभ्यो भीतो वृकभीतः । वृकेभ्यो भीतिः वृकभीतिः । वृकेभ्यो भयं वृकभयम् । सुष्ठ्वनुग्रहार्थम् । पूर्वस्यायं प्रपञ्चः ।

मुक्तापेतापोढपतितापत्रस्तैः प्रायः ॥ ३३ ॥

मुक्त-अपेत-अपोढ-पतित-अपत्रस्त इत्येतैः सह कान्तं प्रायः षसो भवति । भवान्मुक्तो भवमुक्तः । पापापेतः । सुखापोढः । स्वर्गपतितः । तरङ्गापत्रस्तः । सर्वत्रापादाने का । प्राय इति किम् । प्रासादात् पतितः । भोजनादपत्रस्त इत्येवमादौ न भवति ॥

स्तोकान्तिकदूरार्थकृच्छ्र क्तेन ॥ ३४ ॥

स्तोक अन्तिक दूर इत्येवमर्थाः शब्दाः कृच्छ्रशब्दश्च कान्ताः क्तान्तेन सह षसो भवति । स्तोकान्मुक्तः । अन्तिकादागतः । अभ्यासादागतः । दूरादागतः । विप्रकृष्टादागतः । कृच्छ्रान्मुक्तः । कृच्छ्राल्लब्धः । स्तोकार्थकृच्छ्रेभ्यो

ऽपादाने का । दूरान्तिकार्थेभ्य इप्चेति का । कायाः स्तोकादेरित्यनुप् ।

ईप्छौण्डैः ॥ ३५ ॥

ईबन्तं शौण्डादिभिः सह षसो भवति । शौण्डैः सहचरिताः शौण्डाः । अक्षेष प्रसक्तः शौण्डोऽक्षशौण्डः । पानशौण्डः । वृत्तौ प्रसक्तिक्रियाया अन्तर्भावादप्रयोगः । सर्वत्र अधिकरणे ईप् । शौण्ड धूर्त कितव व्याड संवीत समीरण अन्तर् वने अन्तर्वनान्तः । अधि । राज्ञि अधि राजाधीनम् । अषडक्षाभितंग्वधिघोरिति खः । यदा पूर्वपदार्थप्राधान्यं विभक्त्यर्थश्च तदा हसः । अन्तर्वणम् । अधिस्त्रि । पण्डित । कुशल । चपल । निपुण ॥

सिद्धशुष्कपक्वबन्धैः ॥ ३६ ॥

सिद्ध-शुष्क-पक्व-बन्ध इत्येतैरीबन्तं षसो भवति । कांपिल्ये सिद्धः कांपिल्यसिद्धः । सांकाश्यसिद्धः । ऊके शुष्कः । ऊकशुष्कः । छायाशुष्कः । कुम्भीपक्वः । स्थालीपक्वः । चक्रबन्धः । चारकबन्धः । साधनं कृतेत्यस्यैव प्रपञ्चः ।

ऋणे त्र्यैः ॥ ३७ ॥

ईबन्तं त्र्यन्तैः सह षसो भवति ऋणे गम्यमाने । मासे देयमृणं मासदेयम् । मासैकदेशे मासशब्दः । अधिकरणे ईप् । एवं सवत्सरदेयम् । नियोगतः कार्यमृणम् । तेनेहापि भवति पूर्वाह्णज्ञेयम् । प्रातरध्येयम् । अत्र यत्यान्तेनैवाभिधानादिह न स्यात् । मासे दातव्यम् । मासे दानीयम् । ऋण इति किम् । मासे देया भिक्षा ।

खौ ॥ ३८ ॥

खुविषये ईबन्तं सुबन्तेन सह षसो भवति । अरण्येतिलकाः । वृत्तिपदेन संज्ञा गम्यत इति नित्यः सविधिः । ईषोऽङ्ग इत्यनुप् । एवमरण्येमाषकाः । वनेकसेरुकाः । वनेवल्वजकाः । पूर्वाह्णेस्फोटकाः । कूपेपिशाचिकाः ।

क्तेनाहोरात्रभेदाः ॥ ३९ ॥

भेदा अवयवाः । क्तान्तेन सह अहोरात्रभेदा ईबन्ताः षसो भवति । पूर्वाह्णकृतम् । अपराह्णकृतम् । पूर्वरात्रभुक्तम् । अपररात्रभुक्तम् । भेदग्रहणं किम् । उलूखलैराभरणैः पिशाची यदभाषत । एतत्तु ते दिवा नृत्त रात्रौ नृत्तन्तु द्रक्ष्यसि ।

तत्र ॥ ४० ॥

क्तेनेति वर्तते । तत्रेत्येतत् क्तान्तेन सह षसो भवति । तत्रकृतम् । तत्रभुक्तम् । तत्रपीतम् । ऐकपद्यं प्रयोजनम् ।

क्षेपे ॥ ४१ ॥

क्षेपः कुत्सा । क्षेपे गम्यमाने ईबन्तं क्तान्तेन सह षसो भवति । कृद्ग्रहणे तिकारकपूर्वस्यापि । अवतप्तेनकुलस्थितं एतत् । कार्येष्वनवस्थितत्वं तवेदमित्यर्थः । षे कृति बहुलमित्यनुप् । एवमुदकेविशीर्णं भस्मनिहुतम् । निष्फलं तवेदमित्यर्थः ।

ध्वाङ्क्षैः ॥ ४२ ॥

क्तेनेति निवृत्तम् । क्षेप इति वर्तते । बहुवचनादर्थनिर्देशः । ध्वाङ्क्षवाचिभिः सुबन्तं षसो भवति क्षेपे ।

तीर्थे ध्वाङ्क्ष इव तीर्थध्वाङ्क्षः । वृत्ताविवार्थस्यान्तर्भावः । तीर्थकाकः । श्राद्धवायसाः । अनवस्थित एवमुच्यते । ध्वाङ्क्षैरित्यर्थनिर्देशात्तत्सदृशानामपि ग्रहणमिति केचित् । तीर्थश्वा । तीर्थसारमेयः । तीर्थसृगालः । क्षेप इति किम् । तीर्थे ध्वाङ्क्षो वास्यते ।

पात्रेसमितादयश्च ॥ ४३ ॥

क्षेप इति वर्तते । पात्रेसमितादयश्च शब्दा गणपाठादेव निपातिताः षसंज्ञा भवन्ति क्षेपे । पात्रे एव समिताः पात्रेसमिताः । पात्रेबहुलाः । न क्वचित्कार्य इति क्षेपो गम्यते । निपातनादनुप् । उदुम्बरे मशक इव उदुम्बरमशकः । उदुम्बरकृमिः । कूपकच्छपः । अवटकच्छपः । कूपमण्डूकः । उदपानमण्डूकः । नगरकाकः । नगरवायसः । एतेष्विवार्थो वृत्तावन्तर्भूतः । मातरिपुरुषः । अयुक्तकारीत्यर्थः । पिण्डीशूरः । निरुत्साह इत्यर्थः । गेहेक्ष्वेडी । गेहेनर्दी । गेहेनर्ती । गेहेविजिती । गेहेव्याडः । गर्भेतृप्तः । गर्भेदृप्तः । आखनिकवकः । गोष्ठेशूरः । गोष्ठेविजिती । गोष्ठेक्ष्वेडी । गेहेशूरः । गेहेमेही । गेहेदासः । गोष्ठेपटुः । गोष्ठेपण्डितः । गोष्ठेप्रगल्भः । कर्णेचुरुचुराः । चकारो ऽवधारणार्थः । पासत्रेमितादय एव न वृत्त्यन्तरं लभन्ते । परमाः पात्रेसमिताः । अत एव क्वान्तेनापीह वृत्तिः सार्थिका अन्यथा क्षेप इत्यनेनैव सिद्धा स्यात् ।

पूर्वकालैकसर्वजरत्पुराणनवकेवलं यच्चैकाग्रये ॥ ४४ ॥

एकाश्रयः समानाधिकरणम् । पूर्वकालवाचि-एक-सर्व-जरत्-पुराण-नव-केवल इत्येते सुबन्ता एकाश्रये सति सुबन्तेन सह यसंज्ञः सो भवति षसंज्ञश्च । पूर्वः कालो यस्य स पूर्वकालः । सम्बन्धिशब्दत्वादपरकालेन तस्य वृत्तिः । पूर्वं स्नाताः पश्चादनुलिप्ताः स्नातानुलिप्ताः । कृषृसमीकृतम् । च्छिन्नप्ररूढम् । दग्धप्ररूढम् । एकसाटी । एकचर्या । एकभिक्षा । सर्वदेवाः । सर्वपदार्थाः । जरद्धस्ती । जरद्भवः । पुरा भवं पुराणम् । सायञ्चिरम्प्राह्णेप्रगेभ्यस्तनडिति तनट् । अत एव निपातनात्तखम् । पुराणान्नम् । पुराणशास्त्रम् । नवावसथः । केवलमसहायं ज्ञानं केवलज्ञानम् । विशेषणवृत्तेरयं प्रपञ्चः । चशब्दः षसंज्ञासमावेशार्थः । अन्यथा राजपुरुषादौ कृतार्था षसंज्ञा बाध्येत । मोषिका गौः मोषकगवी । स्त्र्युक्तपुंस्कादिना पुंवद्भाव नधुहृत्कोड इति प्रतिषिद्धो यसंज्ञायां पुंवद्यजातीयदेशीयेति पुनर्भवति । षसंज्ञाश्रयो गोरहृदृपीति टः सान्तः । इत उत्तरमेकाश्रयाधिकारो यावन्मयूरव्यंसकादयश्चेति । एकाश्रय इति किम । एकस्या साटी ।

दिक्संख्यं खौ ॥ ४५ ॥

दिग्वाचि संख्यावाचि च सुबन्तं एकाश्रये सुबन्तेन सह षसो भवति खुविषये । पूर्वेषुकामसमी । अपरेषुकामसमो । पूर्वकृष्णमृत्तिका । अपरकृष्णमृत्तिका । दक्षिणपञ्चालाः । उत्तरपञ्चालाः । संख्या । पञ्चाम्राः । पञ्चवटाः । सप्तर्षयः । खाविति किम् । दक्षिणा ग्रामाः । षष्ठ ग्रामाः ।

हृदर्थद्युसमाहारे ॥ ४६ ॥

दिक्संख्यमिति वर्तते । हृदर्थविषये द्यौ परतः समाहारेऽभिधेये दिक्संख्यमेकाश्रये सुबन्तेन सह षसो भवति । दिक् । हृदर्थे । पूर्वस्यां शालायां भवः षसे कृते समुदायाद्दिगादेरखाविति णः । पौर्वशाल· । आपरशालः । द्यौ । पूर्वा शाला प्रिया अस्य पूर्वशालाप्रियः । अपरशालाप्रिय· । अवयवापेक्षया षसाः । पूर्वपदस्य पुंवद्भावः । दिशां समाहारो नास्ति । क्रियागुणापेक्षयाऽपि समाहारे अनभिधानम् । संख्या । हृदर्थे । पञ्चभिः शष्कुलीभिः क्रीतः पञ्चशष्कुलः । अनेन षसे कृते तस्य संख्यादोरश्चेति रसंज्ञायां आर्हीयस्य ठणो रादु स्वावित्युप् । हृदुप्युविति स्त्रीत्यस्योप् । पञ्चानां नापितानामपत्य पाञ्चनापितिः । रस्योबनपत्य इति वचनं ज्ञापकं हृदर्थेपि से हृदुत्पत्तिर्भवति । द्यौ । पञ्च गावो धनमस्येति पञ्चगवधनः । अवयवसापेक्षया गोरहृदुपोति टः सान्त· सिडः । द्वे ऽहनी जातस्य द्यन्हजातः । एभ्योऽन्होन्ह इत्यन्हादेशः । समाहारे । पञ्च पूलाः समाहृताः पञ्चपूली । अनेन षसः । उत्तरसूत्रेण रसंज्ञायां रादिति ङीविधि । कथं षण्णगरी अत्रापि क्रियागुणापेक्षया समाहारोऽस्ति । लब्धा शोभनाचेति गम्यते समाहारस्यैकत्वादेकवचनम् । ननु समाहारः समूह स तु हृदर्थ एव न पृथक् समाहारनिर्देशात् । समूहार्थस्य त्यस्यानुपपत्तिः पञ्चानां कुमारीणां समाहारः पञ्चकुमारी । त्योत्पत्तौ हि रस्योबनपत्य इत्युप् प्रसज्येत । ततश्च हृदुप्युविति स्त्रीत्यस्योप् स्यात् ।

संख्यादी रश्च ॥ ४७ ॥

हृदर्थद्युसमाहार इत्यत्र संख्यादिर्यः स उक्तः स

रसंज्ञो भवति । हृदर्थे । द्यावनुयोगौ वेत्यधीते वा द्यनुयोगः । रस्योबनपत्य इत्यण उप् । पञ्चसु कपालेषु संस्कृतः पञ्चकपालः । द्यौ । पञ्च नावः प्रिया अस्य पञ्चनावप्रियः । नावो रादिति टः सान्तः । समाहारे । पञ्चपूली । चशब्दः षसंज्ञासमावेशार्थः । द्वे अङ्गुली समाहृते द्व्यङ्गुली । षेङ्गुलेर्ङिसंख्यादेरिति अः सान्तः । रादिति ङीविधिश्च सिद्धः ।

कुत्स्यं कुत्सनैः ॥ ४८ ॥

कुत्स्यवाचि सुबन्तं कुत्सनवाचिना षसो भवति । वैयाकरणखसूचिः । प्रत्यासत्तेः शब्दप्रवृत्तिनिमित्तस्य कुत्सायामयं सविधिः । रूपसिद्धिं पृष्टो निःप्रतिभः सन् यं खं सूचयति वीक्षते स खसूची । खसूचित्वं कुत्सनम् । विशेषणस्य परनिपातार्थ आरम्भः । एवं क्षत्रियभीरुः । श्रोत्रियकितवः । भिक्षुविटः । मीमांसकदुर्दुरूढः । कुत्स्यमिति किम् । वैयाकरणः कितवः । न हि वैयाकरणत्वं कितवत्वेन कुत्स्यते । कुत्सनैरिति किम् । कुत्सितो ब्राह्मणः ।

पापाणके कुत्स्यैः ॥ ४९ ॥

पापाणकशब्दौ कुत्सनवचनौ कुत्स्यवचनैः षसो भवति । पापकुलालः । आणकनापितः । पूर्वयोगेन कुत्स्यस्य पूर्वनिपाते प्राप्ते परनिपातार्थ आरम्भः ।

सामान्येनोपमानम् ॥ ५० ॥

उपमानोपमेययोः साधारणो धर्मः सामान्यम् । उपमीयते परिच्छिद्यते अनेन सादृश्येनार्थ इत्युपमानम् । उपमा-

नवाचि सुबन्तं सामान्यवाचिना सुबन्तेन सह षसो भवति । निराधारं सामान्यं न प्रतीयत इति सामान्यधर्मेण विशिष्टं यदुपमेयं तेनात्र वृत्तिः । शस्त्रीव श्यामा शस्त्रीश्यामा देवदत्ता । शस्त्रीशब्दः श्यामगुणमुपादाय देवदत्तायां वर्तत इति एकाश्रया वृत्तिर्न्न विरुध्यते । मृगीव चपला मृगचपलेति पुंवद्भावश्च भवति । एवं कुमुदस्येनी हंसगमनी न्यग्रोधपरिमण्डला दूर्वाकाण्डश्यामा सरकाण्डगौरी । सामान्येनेति किम् । फला इव तण्डुलाः । पर्वता इव बलाहकाः । उपमानमिति किम् । देवदत्ता श्यामा ।

व्याघ्रैरुपमेयेऽतद्योगे ॥ ५१ ॥

तस्य समानस्य योगः प्रतिषिध्यते । उपमेयार्थवाचिव्याघ्रादिभिः सह षसो भवत्यतद्योगे । उपमेयशब्दस्य सम्बन्धित्वादुपमाने वृत्तिः । साधारणधर्मः सामान्यं हि वृत्तावन्तर्भूतम् । अतद्योग इत्यनेन विशिष्टः साधारणधर्मः प्रतिषिध्यते । पुरुषोऽयं व्याघ्र इव पुरुषव्याघ्रः । पुरुषविशेषस्य परनिपातार्थ आरम्भः । व्याघ्र सिंह ऋषभचन्दन वृक वृषभ वृष वराह हस्तिन् कुञ्जर रुरु पुण्डरीक स्त्री पलाविका । आकृतिगणोऽयम् । तेन मुखकमलं करकिशलयं पुरुषचन्द्रादि सिद्धम् । अतद्योग इति किम् । पुरुषोऽयं व्याघ्र इव शूरः । इदमेव प्रतिषेधवचनं ज्ञापकं भवति प्रधानस्य सापेक्षस्यापि वृत्तिः । तेन राजपुरुषो दर्शनीयः । राजपुरुषः पण्डित इत्येवमादि सिद्धम् ।

विशेषणं विशेष्येणेति ॥ ५२ ॥

एकाश्रय इति वर्तते । यत् सामान्याकारेण प्रवृत्तं सत् अनेकप्रकाराधारभूतं वस्तु प्रकारान्तरेभ्यो वृत्त्यै-

कत्र प्रकारे अवस्थापयति तद्विशेषणम् । अनेकप्रकाराधार-भूतं वस्तु विशेष्यम् । विशेषणवाचिना सह षसो भवति । कृष्णश्च स कम्बलश्च स कृष्णकम्बल । लोहिता च सा साटी च सा लोहितसाटी । अर्द्धं च तत् पिप्पलो च सा अर्द्धपिप्पली । यदा पिप्पल्यवयवे पिप्पलीशब्द-स्तदेय वृत्तिरेकाश्रयाधिकारात् । यदा समुदाये वर्तते तदा पिप्पल्यर्द्धमिति तासः । भिक्षैकदेशे भिक्षाशब्द । द्वितीया भिक्षा द्वितीयभिक्षा । तृतीयभिक्षा । चतुर्थभिक्षा । तुर्य-भिक्षा । इह भिक्षाद्वितीयमिति तासो नोपपद्यते । डदुग्र-हणादिप्रतिषेधस्य बलीयस्त्वात् । कायैकदेशे कायशब्दः । पूर्वः कायः पूर्वकायः । अपरः कायः । अपरकायः । उत्तर-कायः । एवं मध्यान्हः । सायान्हः । पूर्वं कायस्येति अवयव-सम्बन्धे तासानभिधानं पूर्वं कायादिति प्राप्नोति । विशेष-णविशेष्ययोरन्यतरस्य ग्रहणेऽपि सम्बन्धिशब्दत्वादुभयोः प्रतिपत्तिरिति द्वयनिर्देशो व्यर्थः । नैवं यत्र पूर्वोत्तरप-दयोः प्रत्येकं विशेषणविशेष्यभावस्तत्र यथा स्यादिह मा भूत् । वृक्षः शिंशपा । शिंशपा हि वृक्षार्थं न व्यभिचरतीति न तस्या विशेष्यत्वम् । यदा शिंशपादिशब्दाः फलादिष्वपि वर्तन्ते तदोभयोर्विशेष्यत्वे सविधिर्भवत्येव । शिंशपा-वृक्षः । पलाशवृक्षः । उभयोर्विशेषणत्वे कस्य पूर्वनिपात इति चेत् प्रधानद्रव्यापेक्षयान्वर्थस्य नीचो गुणस्य पूर्व-निपातः । यद्यप्युत्पलादिशब्दो जातिशब्दस्तथापि जाति-र्द्रव्यस्योत्पत्तेः प्रभृत्या विनाशादात्मभूता प्रतीयत इति जातिनिमित्तः शब्दो द्रव्यशब्दो व्यवस्थाप्यते । अत एव विशेष्यत्वमुत्तरपदार्थस्य द्रव्यद्वारेण जातेरनीलत्वादना-

धेयातिशयत्वाच्च सामानाधिकरण्यन्तु जात्यपेक्षया जाते-र्भेदाभेदविवक्षा अनेकान्ताधिकाराल्लभ्यते । विशेषण-मिति किम् । तक्षकः सर्पः । संज्ञैषा । अस्यां विशेष्यत्वमेव विशेषणत्वम् । विशेष्येणेति किम् । लोहितस्तक्षक । तस्य लोहितत्वाव्यभिचाराद्विशेष्यत्वम् । इतिशब्दः किमर्थो यत्र लोके विवक्षा तत्र यथा स्यात् । इह न भवति रामो जामदग्न्यः । अर्जुनः कार्तवीर्यः । इह कृष्णसर्पः । लोहितादिः लोहितशालिरित्येवमादिषु संज्ञाशब्देषु नित्यः सविधिः । वाक्यन्तु सादृश्यमात्रेण । नीलोत्पलादिषूभयम् । नीलमुत्पलं नीलोत्पलम् । इहेच्छया विशेषणत्वम् । स्वञ्चकुण्टः । कुण्टस्वञ्चः ।

पूर्वापरप्रथमचरमजघन्यसमानमध्य-मध्यमवीराः ॥ ५३ ॥

पूर्व-अपर-प्रथम-चरम-जघन्य-समान-मध्य-मध्यम-वीर इत्येते एकाश्रये सुपा सह समस्यन्ते षसो भवति । पूर्वपुरुषः । अपरपुरुषः । प्रथमपुरुषः । चरमपुरुषः । जघन्य-पुरुषः । समानपुरुषः । मध्यपुरुषः । मध्यमपुरुषः । वीर-पुरुषः । इह सूत्रे पूर्वशब्दो वीरशब्दश्चोपसर्जनं तयोर्वृत्तौ परत्वात् वीरशब्द उपसर्जनम् । वीरपूर्वः । वृन्दारकना-गकुञ्जरैस्तदित्यत्र नागशब्दः प्रधानं पोटायुवतीत्यत्र प्रवक्तृशब्दः प्रधानं तयोर्वृत्तौ परत्वात् प्रवक्ता प्रधानम् । नागप्रवक्ता ॥

श्रेण्यादि कृतैः ॥ ५४ ॥

श्रेण्यादयः कृतादिभिः सह एकाश्रये षसो भवति ।

वैषम्याद्यथासङ्ख्यं न भवति । श्रेण्यादिषु च्व्यर्थग्रहणं कर्तव्यं न कर्त्तव्यमितिशब्दानुवृत्तेस्तत्र च वृत्तिः । अश्रेणयः श्रेणयः कृताः श्रेणिकृताः । अनूका ऊकाः कृताः ऊककृताः । च्व्यर्थादन्यत्र श्रेणयः कृताः । करोतेरनेकार्थत्वाद्दण्डिता पूजिता वेति गम्यते । विकल्पेन च्विर्विधीयते यदा च्विस्तदा परत्वात् तिकुप्रादय इति नित्यं षसः । श्रेणीकृताः । ऊकीकृताः । श्रेणी ऊक पूग कुन्दुम राशि निचय विषय विशिष्ट निर्धन देव इन्द्र मुण्ड श्रमण भूत वदान्य अध्यापक ब्राह्मण क्षत्रिय पटु पण्डित कुशल चपल निपुण इति श्रेण्यादिः । कृतादिराकृतिगणः । कृत मित मत भूत उक्त समाज्ञात समाख्यात समाम्नात सम्भावित अवधारित संसेवित अवकल्पित निराकृत उपकृत इत्येवमादि । क्रियाकारकसम्बन्धोऽत्र न विशेषणविशेष्यभाव इति ।

विसमाप्तौ क्तो ऽनञ् ॥ ५५ ॥

विगता समाप्तिः विसमाप्तिः । ईषन्निष्पत्तिरित्यर्थः । अनञ्क्तान्तं विसमाप्तौ सामर्थ्यात् क्तान्तेन समस्यते षसो भवति । एकस्यां हि क्रियायां विसमाप्तिर्भवति न क्रियाभेद इति सामर्थ्यम् । क्तान्तस्यानञिति प्रतिषेधान्नञ्पूर्वेणापि क्तान्तेन सविधिः । कृतञ्च तदकृतञ्च कृताकृतम् । कृतभागसम्बन्धात् कृतम् । अकृतभागसम्बन्धात्तदेवाकृतम् । एवं भुक्ताभुक्तम् । पीतापीतम् । अशितानशितम् । क्लिष्टाक्लिशितम् । क्लिशस्तत्कोरिति वेट् । मुक्तविमुक्तम् । पीतविपीतम् । कृतापकृतम् । विसमाप्ताविति किम् । सिद्धं चाभुक्तं च । क्रियाभेदे विसमाप्तिर्नास्ति एकस्याः समाप्तत्वादपरस्या अननुष्ठानात् । क्त इति किम् । कर्तव्यं

तदकर्तव्यं च । अनञिति किम् । अकृतं च तत्कृतञ्च । ननु कृद्ग्रहणे तिकारकपूर्वस्यैव ग्रहणमनञिति किमर्थम् । नञ्-पूर्वेणापिवृत्त्यर्थमितिशेषः । इह गतप्रत्यागतः यातानुयात इत्येवमादिषु पूर्वकालैकेत्यादिना षसः ॥

सन्महत्परमोत्तमोत्कृष्टं पूज्येन ॥ ५६ ॥

सत्-महत्-परम-उत्तम-उत्कृष्ट इत्येते सुबन्ताः । पूज्यवचनेन सह समस्यन्ते षसो भवति । संश्च सः पुरुषश्च सत्पुरुषः । महापुरुषः । परमपुरुषः । उद्गततमः उत्तमः । अत एव निपातनात् किमेन्मिङ्भिभादामद्रव्य इत्याम् न भवति । उत्तमपुरुषः । उत्कृष्टपुरुषः । पुज्येनेति वचनादत्र सदादयः पूजावचना ज्ञातव्याः । पूज्येनेति किम् । उत्कृष्टो गौः । कर्दमादुद्धृत इत्यर्थः ॥

वृन्दारकनागकुञ्जरैस्तत् ॥ ५७ ॥

पूज्येनेति वर्त्तमानमर्थवशाद्धान्तं संपद्यते । वृन्दारकादिभिः सह तत् पूज्यवाचि सुबन्तं समस्यते षसो भवति । तदित्यनेन पूज्यवचनेनाभिसम्बन्धात् वृन्दारकादयः पूजावचना गृह्यन्ते । गौश्चासौ वृन्दारकश्च गोवृन्दारकः । पुन्नागः । गोकुञ्जरः । अश्वकुञ्जरः । व्याघ्रादेराकृतिगणत्वात् व्याघ्रैरुपमेयेऽतद्योग इत्येव सिद्धे सामान्यप्रयोगेऽपि यथा स्यादित्यारम्भः । गोनागो बलवान् । तदिति किम् । शोभना शीमा फणा अस्य सुशीमो नागः ॥

कतरकतमौ समर्थौ ॥ ५८ ॥

किंशब्दात् किंयत्तदो निर्द्धारणे द्वयोरेकस्य डतरः वा बहूनां जातिप्रश्ने डतमः । तयोः परतश्चिखे कृते कतर-

कतमशब्दौ सिद्धयतः । समर्थौ सङ्गतार्थौ समानार्थावेकार्थावित्यर्थः । तौ सुबन्तेन सह समस्येते षसो भवति । कदा चानयोः समानार्थत्व यदा जातिप्रश्ने तौ व्युत्पाद्येते तदा तयोः समानार्थत्वम् । कतरश्च स गार्ग्यश्च कतरगार्ग्यः। कतमगार्ग्य । कतरकठ । कतमकठः । वृङ्चरणैः सहेति जातिवाचित्वम् । समर्थाविति किम् । कतरो भवतोर्देवदत्तः । द्रव्यप्रश्नोऽयम् । समर्थग्रहणं हि कतरस्यैव विशेषणं डतरस्याविशेषेण विधानान्न कतमस्य । डतमस्य जातिप्रश्न एव तैर्विधानात् । अतः कतमो भवतां देवदत्त इति व्यावृत्त्युदाहरणमत्रानुपपन्नम् । कतरकतमयोः प्रश्ने विहितयोः सविधिना न गार्ग्यादेर्विशेष्यव्यवस्थेति वचनम् ॥

क्षेपे किम् ॥ ५९ ॥

क्षेपः कुत्सा । यो हि यदर्थस्तस्य तदर्थाननुष्ठानं क्षेपः । किमेतत् क्षेपे गम्ये सुबन्तेन समस्यते षसो भवति । को नाम राजा किंराजा । यो न रक्षति । न स्वति किम इति सान्तप्रतिषेधः । किंसखा । योऽभिद्रुह्यति । किङ्गौः । यो न वहति । गोरहद्रुपीति सान्ते टे प्राप्ते न स्वति किम इति प्रतिषेधः । सर्वत्र स्वकार्याभावात् क्षेपः । क्षेप इति किम् । को राजा पाटलिपुत्रे । किमिति योगविभागः तेन संज्ञायां शुकादिभिः सह किंशब्दः समस्यते षसो भवति । किंशुकः पलाशः । किंशुलुकः पर्वतः । किंपुरुषो मयुः । किन्नरः स एव । किञ्जलकः पुष्परेणुः । किङ्किरातः । किंवदन्तीत्यादयः सिद्धाः ॥

पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः॥ ६० ॥

पोटादीनामितरेतरयोगो द्वन्द्वः । पोटादिभिः सहैकाश्रये जातिः समस्यते षसो भवति । विशेषणस्य परनिपातार्थ आरम्भः । जातिद्वारेण यः शब्दो द्रव्ये वर्त्तते स इह जातिशब्दोऽभिप्रेतः । इभ्या च सा पोटा च इभ्यपोटा । इभ्येति जातिशब्दः । स्त्री भूत्वा राज्यपालनार्थं या पुंवेषेण युज्यते सा पोटा । यापि गर्भ एव दास्य गता साऽपि पोटा । स्त्र्युक्तपुंस्केत्यादिना पुंवद्भावे प्राप्ते जातिश्चेति प्रतिषिद्धे पुंवद्यजातीयदेशीय इति पुंवद्भावः । एवमार्य पोटा । युवतिस्तरुणी । इभ्ययुवतिः । क्षत्रिययुवति । अग्निश्च स स्तोकश्च तदग्निस्तोकम् । दधि च तत् कतिपयञ्च दधिकतिपयम् । स्तोककतिपयशब्दावेकार्थौ । सकृत्प्रसूता गृष्टिः । गौश्च सा गृष्टिश्च गोगृष्टिः । धेनुरभिनवप्रसवा । गोधेनुः । वशा वन्ध्या । गोवशा । वेहत् गर्भघातिनी । गर्भधारिणीत्यन्ये । गोवेहत् । महता वत्सेन या दुह्यते सा बस्कयिणी । गोबस्कयिणी । प्रवक्ता उपाध्यायः । कठप्रवक्ता । कठश्रोत्रियः । अध्यापकोऽध्येता । कठाध्यापकः । कठधूर्तः । बुद्धिमानित्यर्थः । धूर्तग्रहणमिहाकुत्सार्थम् । अथवा आश्रयिषु कुत्सितेषु तद्भवति । आश्रयेषु तु कुत्स्येषु इदम् । ब्राह्मणधूर्तः क्षत्रियधूर्त इति यदा हि ब्राह्मणत्वमाश्रयि कुत्स्यते तदा तेनैव सिद्धं सविधानम् । यदा तु तद्युक्तो देवदत्तः कुत्स्यते तदर्थमिदम् । जातिरिति किम् । देवदत्तः प्रवक्ता । देवदत्तशब्दस्याजातिवचनत्वादवृत्तिः । जातेर्विशेष्यायाः पूर्वनिपातार्थ आरम्भः ।

चतुष्पाद्भिर्णया ॥ ६१ ॥

जातिरिति वर्तते । चत्वारः पादा यस्याः सा चतु-

ष्पाङ्गवादिजातिः । सुसंख्यादेरित्यकारस्य खम् । चतुष्पाज्जातिर्गर्भिणीशब्देन सहैकाश्रये समस्यते षसो भवति । गौश्च सा गर्भिणी च गोगर्भिणी । अजगर्भिणी । पुंवद्यजातीयदेशीय इति पुंवद्भावः । चतुष्पादिति किम् । ब्राह्मणी गर्भिणी । जातिरित्येव । कालाद्यो गर्भिणी । स्वस्तिमतो गर्भिणी । चतुष्पदः सञ्ज्ञैषा । न तु जातिः । विशेष्यस्य पूर्वनिपातार्थं वचनम् ॥

प्रशंसोक्त्या ॥ ६२ ॥

जातिरिति वर्तते । उच्यते इत्युक्तिः शब्दः । प्रशंसाशब्देन सह जातिवाचि सुबन्त समस्यते षसो भवति । गौश्च स प्रकाण्डञ्च तत् गोप्रकाण्डम् । प्रशस्तो गौरित्यर्थः । एवमश्वप्रकाण्डम् । गोमतल्लिका । अश्वमचर्चिका । गोकुमारी । गोतल्लजकः । अभिधाः जातिरित्येव । देवदत्ता कुमारी ॥

युवा खलतिपलितवलिनजरद्भिः ॥ ६३ ॥

खलति पलित वलिन जरदित्येतैरैकाश्रयैर्युवशब्दः समस्यते षसो भवति । युवा खलतिः युवखलतिः । युवतिः खलती युवखलती । युवा पलितः युवपलितः । युवतिः पलिता युवपलिता । वलयोऽस्य सन्ति वलिनः । पामादित्वान्नः । युवा वलिनः युववलिनः । युवतिर्वलिना युववलिना । जृषोऽतृ इति अतृत्ये कृते जरदिति भवति । युवा जरन् युवजरन् । युवतिर्जरती युवजरती । मृद्ग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् । पुंवद्यजातीयदेशीय इति पुंवद्भावात् तिशब्दस्य निवृत्तिः ॥

व्यतुल्याख्या अजात्या ॥ ६४ ॥

ख्यान्तास्तुल्याख्याश्च अजातिवाचिना सह समस्यन्ते षसो भवति । परनिपातः फलम् । भोज्यञ्च तदुष्णञ्च भोज्योष्णम् । भोज्यलवणम् । पानीयशीतम् । हरिणीयपूर्णो घटः । तुल्याख्याः । तुल्यश्च स श्वेतश्च स तुल्यश्वेतः । सदृशश्वेतः । तुल्यमहान् । सदृशमहान् । अजात्येति किम् । भोज्य ओदनः । तुल्यो वैश्यः । इह तुल्यसन्नितिपूज्यत्वाभावात् परत्वाद्वानेन सः । इह कथमेकाश्रया वृत्तिः । कृष्णसारङ्गः । लोहितसारङ्गः । कृष्णशबलः । लोहितशबलः । यदि सारङ्गादिशब्दा जातिवचना जातेः कथञ्चिद्द्रव्यादभिन्नत्वमित्येकाश्रयत्वमस्ति ततो विशेषणलक्षणः सः । अथ पूर्वोत्तरपदयोर्वर्णविशेषवाचित्वं तत्रापीच्छातो विशेषणविशेष्यभावः । कृष्णश्वेतः । श्वेतकृष्णः ॥

कुमारः श्रमणादिभिः ॥ ६५ ॥

कुमारशब्दः श्रमणादिभिः सह समस्यते षसो भवति । कुमारशब्दो मृत् । स्त्रीलिङ्गैरुत्तरपदैः स्त्रीलिङ्गः । अध्यापकादिभिरुभयथा समस्यते । कुमारी श्रमणा कुमारश्रमणा । कुमारी प्रव्रजिता कुमारप्रव्रजिता । कुमारश्च स अध्यापकश्च स कुमाराध्यापकः । कुमारा अध्यापिका कुमाराध्यापिका । श्रमणा प्रव्रजिता कुलटा गर्भिणा तापसी बन्धकी दासी एते स्त्रीलिङ्गाः । अध्यापक अभिरूपक पटु मृदु पण्डित कुशल चपल निपुण ॥

मयूरव्यंसकादयश्च ॥ ६६ ॥

मयूरव्यंसकादयश्च शब्दा गणपाठादेव निपातिताः

षसंज्ञा भवन्ति । विशिपृवंसावस्य व्यंसः । इवार्थे कः । व्यंसको मयूरो मयूरव्यंसकः । छत्रव्यंसकः । कम्बोजमुण्डः । यवनमुण्डः । एतेषु परनिपातः प्रयोजनम् । एहीडादयो ऽन्यपदार्थे । एहोडमिति यत्र कर्मणि एहि यवैरिति एहीडं यहियवं वर्तते । एहिवाणिजेति यस्यां क्रियायां सा एहिवाणिजा । प्रेहिवाणिजा । एहिस्वागता । अपेहिस्वागता । एहिद्वितीया । अपेहिद्वितीया । प्रोहकटमस्यां प्रोहकटा । प्रोहकर्दमा । उडमचूडा । आहरचेला । आहरवसना । आहरवितताभित्प्रलवणा । उद्धर उत्सृजेति यस्यां सा उद्धरोत्सृजा । उद्धमविधमा । उद्धरविसृजा । उत्पतनिपता । उत्पचनिपचा । आख्यातमाख्यातेन सिद्धं ऽप्यसातत्यार्थं वचनम् । उदक्च अवाक्च उच्चावचम । उच्चैश्च नीचैश्च उच्चनीचम् । आचितश्चोपचितश्च आचोपचम् । आचितपराचितस्य आचपराचम् । निश्चितप्रचितस्य निश्चप्रचम् । अकिञ्चनम् । स्नात्वाकालकः । पीत्वास्थिरकः । भुक्त्वासुहितः । प्रोष्यपापीयान् । उत्पत्यपाकला ज्ञाता।निपत्यरोहिणी जाता निषण्णश्यामा जाता । अपेहिप्रघसा वर्तते । इहपञ्चमी । इहद्वितीया । जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति । जहि जेाडमित्याह जहिजोडः । उज्जहिजोडः । जहिस्तम्बः । बहुलमितिकिम् । पचौदनम् । आख्यातमाख्यातेन सातत्ये । अश्नीतपिबता वर्तते । पचतभृज्जता । खादतमोदता । खादाचामाः आहारविवसा । आहारनिष्किरा । अविहितलक्षणं सविधानमिह द्रष्टव्यम् । तेन शाकप्रधानः पार्थिवः शाकपार्थिवः । कुतपसौश्रुतः । अजातौल्वलिः । घृतरौढोयाः ।

ओदनपाणिनीया इत्येवमादि सिद्धम् । चकारोऽवधारणार्थः । परमो मयूरव्यंसकः । वृत्त्यन्तरं न भवति ।

काला मेयैः ॥ ६७ ॥

कालवाचिनः शब्दा मेयैः परिच्छेद्यैः सह समस्यन्ते षसो भवति । मेयैरिति सम्बन्धात् काला मानवचना गृह्यन्ते यद्यपि मुख्यं मानत्वं व्यवहारकालस्य मासादेर्न सम्भवति तथापि वचनात् परिछेदहेतुत्वमात्रम् । साधर्म्यमुपादायोपचारात् कालः परिमाणम् । मासादयो जातादेः संबन्धिनीमादित्यगतिं परिच्छिन्दन्तीति जातस्यापि परिच्छेदहेतव उच्यन्ते । एकाश्रय इति निवृत्तम् । मासो जातस्य मासजातः । सवत्सरजातः । तासापवादोऽयम् । काला इति बहुवचननिर्देशः किमर्थः । द्वे अहनी जातस्य द्व्यन्हजातः । त्रिपदोऽपि षसो यथा स्यात् । हृदर्थद्युसमाहारे इत्यवयवषसे राजाहःसखिभ्यष्ट इति टः । एभ्योन्होन्ह इति अन्हादेशः । यदा द्वयोरन्होः समाहार इतिविग्रहस्तदा न समाहार इत्यन्हादेशप्रतिषेधः सिद्धः । द्व्यहो जातस्य द्व्यहजातः । त्र्यहजातः ।

नञ् ॥ ६८ ॥

नञ् सुपा सह समस्यते षसो भवति । अब्राह्मणः । अधर्मः । असर्वज्ञः । अगौः । नेयं पूर्वपदार्थप्रधाना वृत्तिरलिङ्गासंख्यत्वप्रसङ्गात् । किञ्च पूर्वपदप्रधानो हस उक्तः । अमक्षिकमिति । अन्यपदार्थप्राधान्ये तु अवर्षा हेमन्त इत्यत्र प्रादेशादि प्राप्नोति । अस्तूत्तरपदार्थप्रधानेयं वृत्तिः । यद्येवमगामानयेत्युक्तेऽगोमात्रस्यानयनं स्यात् । अथ स्वयमेव निवृत्तिपदार्थको गोशब्दः स नञा केवलं द्योत्यते । एवं

सति न कस्यचिदानयनं स्यात् । नायं दोषः । द्वाविह गोशब्दौ । प्रवृत्तपदार्थको निवृत्तपदार्थकश्च । सारूप्यात्तयोर्भेदापरिज्ञाने निवृत्तपदार्थकस्य द्योतनार्थं नञः प्रयोगः प्रतिषेधे सत्युत्तरपदार्थसदृशो वृत्त्यर्थो जायते । नञिवयुक्तमन्यसदृशावधिकरणे तथा ह्यर्थगतिरिति वचनात् । अन्यपदार्थे तु परत्वाद्वसो भवति । अशालिको देशः। अकारो नञोऽनित्यत्र विशेषणार्थः । वामनपुत्रादिष्वनादेशो मा भूत् ।

गुणोक्त्येषत् ॥ ६९ ॥

उच्यते इत्युक्तिः शब्दः । गुणशब्देन सह ईषच्छब्दः समस्यते षसो भवति । ईषत्कडारः । ईषत्पिङ्गलः । ईषद्विकटः । ईषदुन्नतः । ईषत्पीतः । हृदुत्पत्तिः प्रयोजनम् । गुणोक्त्येति किम् । ईषत्कारकः । ईषद्राग्र्यः । जात्येकार्थसमवायिक्रियागुणापेक्षया जातेरपि वृद्धिह्रासौ ।

ता ॥ ७० ॥

तान्तं सुबन्तेन सह षसो भवति । मोक्षमार्गः । स्वर्गसुखम् । राजपुरुषः ।

कृति ॥ ७१ ॥

कृत्प्रयोगे या ता तदन्तं सुपा सह षसो भवति । न प्रतिपदमिति प्रतिषेधं वक्ष्यति । तस्यायं पुरस्तान्निरासः । इध्मनां व्रश्चनः इध्मव्रश्चनः । पलाशशातनः । अविलवनः । स्मश्रुकर्त्तनः । करणे युट् । कर्तृकर्मणोः कृतीति ता ।

याजकादिभिः ॥ ७२ ॥

याजकादिभिश्च सह तान्तं समस्यते षसो भवति। पूर्वेण प्राप्तः तृजकाभ्यां कर्त्तरीति प्रतिषिद्धः पुनरनेन षसः। देवानां याजको देवयाजकः। साधूनां पूजकः साधुपूजकः। याजक पूजक परिवारक परिवेषक स्रापक अध्यापक उद्धर्त्तक उत्सादक होतृ भर्तृ रथगणक पत्तिगणक।

न प्रतिपदम् ॥ ७३ ॥

प्रतिपदंविहिता या ता तदन्तं न समस्यते। शेषलक्षणां तां मुक्त्वा सर्वान्या ता प्रतिपदविधानम्। सर्पिषो ज्ञानम्। पयसो ज्ञानम्। ज्ञो स्वार्थे करण इति ता। इहापि धर्मानुस्मरणम्। धर्मचिन्तनमिति। स्मर्थदयेशाङ्कर्मणि इत्यनेन शेषलक्षणा तानूच्यते। वनस्वामी। वनेश्वरो विद्यादायाद इत्येवमादिषु स्वामीश्वरादिसूत्रे चकारेण शेषलक्षणा ता समुच्चीयते।

निर्द्धारणे ॥ ७४ ॥

निर्द्धारणे या ता तदन्तं न समस्यते। जातिगुणक्रियाभिः समुदायादेकदेशस्य निष्कृष्य धारणं पृथक्करणं निर्धारणम्। क्षत्रियो मनुष्याणां शूरतमः। श्यामा नारीणां दर्शनीयतमा। कृष्णा गवां सम्पन्नक्षीरतमा। धावन्तोऽध्वगानां क्षिप्रतमाः। क्षत्रियादिशब्देन सह वृत्तिर्न भवति। यतश्च निर्द्धारणमिति चकारेण शेषलक्षणायास्तायाः समुच्चयः। प्रतिपदविधानत्वे हि पूर्वेणैव सिद्धः प्रतिषेध इतीदमनर्थकं स्यात्। इह पुरुषेश्वर इति शेषलक्षणा ता विवक्षिता न निर्द्धारणलक्षणा।

डद्गुणतृप्रार्थसत्तव्यैकद्रव्यैः ॥ ७५ ॥

डदन्त गुणार्थ तृप्तार्थ सत्संज्ञं तव्य एकद्रव्य इत्येतैः सह तान्तं न समस्यते । तस्य पूरणे डडित्यतः प्रभृति तमटवृकारेण डदिति प्रत्याहारः । चक्रधराणां पञ्चमः । तीर्थङ्कराणांषोडशः । बलदेवानां नवमः । समुदायसमुदितसम्बन्धे शेषलक्षणा ता । गुणार्थः । बलाकाया शौक्ल्यम् । काकस्य काष्ण्यम् । कण्टकस्य तैक्ष्ण्यम् । गुणगुणिसम्बन्धे ता । एङि पररूपमित्यत्र परस्य रूपं पररूपमिति वृत्तिपदं ज्ञापकं यो गुणद्वारेण पूर्वं द्रव्ये वृत्तौ भवत्यन्ते गुणमाह तेन गुणशब्देनेह प्रतिषेधः । यस्तु सर्वदा गुणवचनस्तेन वृत्तिर्भवत्येव । हस्तिरूपम् । कपिञ्जरसः । चन्दनगन्धः । अग्निस्पर्शः । गुणशब्देनेह लोकप्रसिद्धा रूपरसगन्धस्पर्शा गुणा अभिप्रेताः । ततस्तद्विशेष्यैरयं प्रतिषेधः । तेन यल्लगौरवं सूत्रलाघवं करणपाटवं वचनप्रामाण्यं गोविंशतिरित्येवमादिषु न प्रतिषेधः । वृषलस्य धार्ष्टर्यमित्यत्र वृत्तेरनभिधानम् । तृप्तार्थः । फलानां तृप्तः । सक्तूनां पूर्णः । फलानां सुहितः । सक्तूनां प्रीतः । तृप्त्यर्थे तृपसंख्यानमिति ता । सदिति सतृसानयोः संज्ञा । चोरस्य द्विषन् । कर्तृकर्मणोः कृतीति कर्मणि ता प्राप्ता नञ्झित्येत्यादिना प्रतिषिद्धः । द्विषः शतुर्वा वचनमिति ता । इह तु शेषलक्षणा ता । देवदत्तस्य कुर्वन् । देवदत्तस्य कुर्वाणः । तव्यः । देवदत्तस्य कर्तव्यम् । जिनदत्तस्य कर्तव्यम् । अत्रापि व्यस्य वा कर्तरि इति शेषलक्षणा ता । तव्येन केचिद्विकल्पमिच्छन्ति । देवदत्तकर्तव्यम् । एकं द्रव्यमस्य एकद्रव्यम् । राज्ञः पाटलिपुत्रकस्य । शुकस्य मारविदसौ आचार्यस्य श्रोदत्तस्य । पूर्व-

निपातस्यानियमः प्रसज्येत विशेषणादिसूत्रे इतिशब्दोऽस्ति तेन नीलस्योत्पलस्य नीलोत्पलस्येति । गुणगुणिसंबन्धे सविधिर्भवति। एकद्रव्येण गुणगुणिविवक्षा नास्तीति विशेषणवृत्तिरपि न भवति । झिना प्रतिषेधो वक्तव्यः । देवदत्तस्य साक्षात् । देवदत्तस्योपरि ॥

कर्मणि च ॥ ७६ ॥

चकारोऽवधारणार्थः । कर्मण्येव या ता विहिता तदन्तं सो न भवति । आश्चर्यो गवां दोह अगोपालकेन । रोचते मे ओदनस्य भोजनं देवदत्तेन । साधु खलु पयसः पानं जिनदत्तेन । युडिति नञ्भावे युट् । कर्तृकर्मणोःकृतीत्युभयत्र तायां प्राप्तायां द्विप्राप्तौ पर इति कर्मण्येव भवति । कर्तरि तु भा । कर्मण्येवेति किम् । इध्मप्रव्रश्चनः ॥

कर्तरि क्तेन ॥ ७७ ॥

कर्तरीति तायां विशेषणम् । कर्तरि या ता विहिता तदन्तं क्तान्तेन सो न भवति । अस्मिन्नास्यते स्म इदमेषामासितम् । इदमेषां यातम् । इदमेषां भुक्तम् । तयोरेव भावकर्मणोः क्ते प्राप्ते धिगत्यर्थाच्च अधिकरणे वाऽर्थाच्चेति अधिकरणे क्तः । अधिकरणस्योक्तत्वात् । इदमित्येतस्मादीप्राप्तिमिङ्कार्थे वा इति वैव भवति । कर्तृकर्मणोः कृतीति ता प्राप्ता न झित्तलोकेत्यादिना प्रतिषिद्धा क्तस्याधिकरण इत्यनेन एषामिति कर्त्तरि ता । एवं राज्ञां बुद्धः राज्ञां पूजितः मतिबुद्धिपूजार्थाचेत्यनेन वर्तमाने काले क्तो नियम्यते । स चेह कर्मणि कारके विहितः कर्तृकर्मणोः कृतीति कर्तरि ता प्राप्ता नञ्भितेत्यादिना प्रतिषिद्धा भवतीत्यनेन सूत्रेण

प्रत्यवस्थाप्यते । अथ यदा सकर्मकेभ्योऽधिकरणे क्तस्तदा कर्तृकर्मणोरनुक्तत्वात् क्तस्याधिकरण इत्यनेन या ता कर्तरि तस्या प्रतिषेधः सिद्धः कर्मणि या ता तस्याः कथं वृत्तिप्रतिषेधः । इदमोदनस्य भुक्तमिति । नैष दोषः । कर्मणि चेति वर्तते तेनह कर्त्तरि कर्मणि च ता क्तान्तेन समस्यते । इह शेषलक्षणा ता । छात्रहसितम् ।

तृजकाभ्यां योगे ॥ ७८ ॥

कर्तरि या ता तदन्तेन सो न भवति । तृचैव कर्त्तुरुक्तत्वात् । तद्योगे कर्तरि ता नास्ति । तृज्ग्रहणमुत्तरार्थम् । भवत आसिका । भवतः शायिका । भवतोऽग्रेगामिका । पर्यायार्हर्णोत्पत्तौ वुणिति भावे स्त्रीलिङ्गे वुण् । कर्तृकर्मणोः कृतीति कर्तरिता । कर्तरीत्येव । इक्षुभक्षिकां मे धारयसि । पूर्ववद्वुण् । अत्रेक्षुशब्दात् कर्मणि ता कृतीति तासः । म इति सम्प्रदानमेतत् ।

कर्तरि ॥ ७९ ॥

कर्तरि यौ तृजकौ ताभ्यां सह तान्तं न सो भवति । अपां स्रष्टा । पुरां भेत्ता । वज्रस्य भर्ता । याजकादिषु पतिपर्यायो भर्तृशब्दः । यवानां लावकः । सक्तूनां पायकः । कर्तरीति शक्यमकर्तुं तृचोऽकस्य च कर्तरि विधानात् । न त्वकस्य भावेऽपि विधानमस्ति । सत्यम् । तदयोगे कर्तरि विहितायास्तायाः पूर्वेण वृत्त्यभावः सिद्धः सामर्थ्यादिह कर्तरि विहितस्याकस्य ग्रहणम् । तदेतत्कर्तृग्रहणं ज्ञापकं पूर्वप्रतिषेधो नित्य अयमनित्यस्तेन तीर्थकर्तारमर्हन्तमित्येवमादि सिद्धम् । तृनन्तेन वा साधनं कृतेति सः ॥

क्रीडाजीविकयोर्नित्यम् ॥ ८० ॥

नेति निवृत्तम् । तृचः क्रीडाजीविकयोरसम्भवान्नानुवृत्तिः । क्रीडायां जीविकायाञ्च तान्तमकेन सह नित्यं षसो भवति । क्रीडायां । उद्दालकपुष्पभञ्जिका । भावेखुविषये वुण् । कर्तृकर्मणोः कृतीति कर्मणि ता । जीविकायां । दन्तलेखकः । नखलेखकः । अवस्करसूदकः । क्रीडायां कृतीति विकल्पः प्राप्तः । जीविकायां कर्तरीति प्रतिषेधः प्राप्तः । क्रीडायां आरम्भादेव नित्यत्वं सिद्धं नित्यग्रहणं जीविकार्थमुत्तरार्थञ्च ॥

तिकुप्रादयः ॥ ८१ ॥

तिसंज्ञा कुशब्दः प्रादयश्च समर्थेन नित्यं षसो भवति । ऊरीकृत्य । ऊरीकृतम् । पटपटाकृत्य । प्रादिसाहचर्यात् कुशब्दो झिसंज्ञो गृह्यते । कुत्सितो ब्राह्मणः कुब्राह्मणः । ईषन्मधुरं कामधुरम् । क्रियायोगे गिस्तिरिति प्रादयोऽपि क्रियायोगे तिसंज्ञा अक्रियायोगार्थं प्रादिग्रहणम् । स्वती पूजार्थकम् । शोभनः पुरुषः सुपुरुषः । अतिपुरुषः । अतिशयेन स्तुतं सुस्तुतम् । अतिक्रमेण स्तुतमतिस्तुतम् । दुः पापाद्यर्थे । पापः पुरुषो दुःपुरुषः । कृच्छ्रेण कृतं दुःकृतम् । आङीषदाद्यर्थे । ईषत्कडार आकडारः । क्रियायोगे आबद्धमाभरणम् । प्रादय एवमात्मका यत्र क्रियापदं प्रयुज्यते तत्र क्रियाविशेषमाहुः । यत्र न प्रयुज्यते तत्र ससाधनां क्रियामाहुरिति । प्रादयो गताद्यर्थे च त्रया । प्रगत आचार्यः प्राचार्यः । वृत्तिविषये प्रशब्दो गतशब्दस्यार्थं ससाधनमभिधत्ते । एवं प्रवृद्धो गुरुः प्रगुरुः । प्रपितामहः । सङ्गतार्थः समर्थः । अत्यादयः क्रान्ताद्यर्थे इपा । अति-

क्रान्तः खट्वामतिखट्वः । उत्क्रान्तो वेलामुद्वेलः । अवादयः क्रुष्टाद्यर्थे भया । अवक्रुष्टः कोकिलया अवकोकिलः । परिणद्धो वीरुद्भिः परिवीरुत् । पर्यादयो ग्लानाद्यर्थे अपा । परिग्लानोऽध्ययनाय पर्यध्ययनः । उद्युक्ता संग्रामाय उत्संग्रामः । पर्यादिराकृतिगण इत्येके । अलंकुमारिः । निरादयः क्रान्ताद्यर्थे कया । निःष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः । अपगतः शाखाया अपशाखः । लक्षणादिष्वर्थेष्वनभिधानादवृत्तिः । वृत्तं प्रति विद्योतते ।

वागमिङ् ॥ ८२ ॥

वाक्संज्ञमभिङन्तं समर्थेन नित्यं षसो भवति । कुम्भं करोतीति कुम्भकारः । सरलावः । अमिङिति किम् । एधानाहारको व्रजति । वुणुमौ क्रियायां तदर्थायामिति वुण् । अमिङिति प्रतिषेधवचनं ज्ञापकमनयोर्योगयोः सुप्सुपेति नाभिसंबध्यते । एवञ्च सत्येतल्लभ्यं तिवाकारकाणां प्राक् सुबुत्पत्तेः कृद्भिः सविधिरिति । इह माषवापिणी । व्रीहिवापिणो स्त्री । कृदन्तेन वृत्तौ मृदन्तस्येति णत्वं सिद्धम् । अन्यथा सुबुत्पत्तिः स्त्रीत्येन बाध्यते । अश्वक्रीती च प्रयोजनम् । यदि सुबुत्पत्तेः प्राक् तिवाकारकाणां कृता वृत्तिः । अदःकृत्य तमोपह राजश्रित इत्यत्र पूर्वस्य पदकार्यं न स्यात् । कायाः स्तोकादेरित्येवमादि अनुब्धिधानं चानर्थकं क्वचिदेव ङीविधिणत्वादिविषये ज्ञापकात् सिद्धिः ।

झिनाऽमैव ॥ ८३ ॥

पूर्वेण सिद्धे नियमोऽयम् । झिसंज्ञकेनामन्तेनैव वागमिङ् षसो भवति । स्वादुङ्कारं भुङ्क्ते । लवणंकारं

भुङ्क्ते । स्वाद्वर्थेषु वाक्षु स्वादुमि णमिति णम् भवति । स्वादुमिति निर्देशात्यसन्नियोगे मान्तता निपात्यते ॥ अमैवेति किम् । कालो भोक्तुम् । समयो भोक्तुम् । काल-समयवेलासु तुम्वेति तुम् । आरम्भादेव नियमः सिद्धः । ञ्निनैवेति विपरीतावधारणे व्यावर्त्यं नास्तीत्येवकारः किमर्थः । अमैव यत् सह निर्दिष्टं वाक्संज्ञं तस्य वृत्ति-र्यथा स्यात् । अमा चान्येन च यत् सहानिर्दिष्टं तस्य मा भूत् । अग्रे भोजं गच्छति । अग्रे भुक्त्वा । प्रथमम्भोजम् । पूर्वभोजम् । वाग्रेप्रथमपूर्वैइति क्त्वाणमौ विहितौ । ञ्निनेति विस्पष्टार्थम् । व्यावर्त्याभावात् ॥

वा भादि ॥ ८४ ॥

उपदंशो भायामित्यतः प्रभृति वाक्संज्ञं भादीत्यु-च्यते । वाक्संज्ञानि अमा सह वा समस्यन्ते षसो भवति । मूलकोपदंशं भुङ्क्ते । मूलकेनोपदंशं भुङ्क्ते । उपदंशो भायामिति णम् । पार्श्वोपपीडम् । पार्श्वेनोपपीडं पार्श्वे उपपीडं शेते । ईपि चोपपीडरुधकर्ष इति णम् । अमन्तेनेत्येव । पर्याप्तो भोक्तुम् । पर्याप्तिवचने अलमर्थ इति तुम् । एवकारो नानुवर्तते तेन भादिषु यदमा सह निर्दिष्टं वाक्संज्ञं यदमा चान्येन च सह निर्दिष्टं तदपि समस्यते । उच्चैःकारमाचष्टे उच्चैःकारं भाविति निष्ठोक्तौ कृञः क्त्वाणमाविति णम् ॥

क्त्वा ॥ ८५ ॥

क्त्वान्तेन सह वा भादि समस्यते षसो भवति । उच्चैःकृत्याचष्टे । उच्चैः कृत्वा । भादीत्येव । प्रदेशान्तर-

वाचो वृत्तिर्न भवति । अलं कृत्वा । खलु कृत्वा । अग्रे भुक्त्वा ॥

अन्यपदार्थेऽनेकं वसम् ॥ ८६ ॥

वानिर्दिष्टं सुब्ग्रहणमनुवर्तते । भानिर्दिष्टं निवृत्तम् । अन्यस्य पदस्यार्थे वर्तमानमनेकं सुबन्तं वसंज्ञकः सो भवति । चित्रगुः । लम्बकर्णः । दर्शनीयरूपः । अन्यग्रहणं किम् । स्वपदार्थे वसो मा भूत् । लम्बश्च स कर्णश्च स लम्बकर्णः । पदग्रहणं किम् । अन्यवाक्यार्थे मा भूत् । अर्थग्रहणं किमर्थम् । यावता शब्दे कार्यस्यासम्भवादर्थे कार्यं विज्ञास्यते । अन्यपदार्थस्य ये लिङ्गसंख्ये ते यथा स्यातामित्येवमर्थम् । बहुयवं कुलम् । बहुयवा भूमिः । बहुयवौ । बहुयवाः । वाविभक्त्यन्ते अन्यपदार्थे वृत्तिर्न भवत्यनभिधानात् । अनेकग्रहणं बहूनामपि प्रापणार्थम् । सामानाधिकरण्याभावेऽपि वसो भवति । कण्ठेकालः । उरसिलोमा । उच्चैर्मुखो देवदत्तः । अस्तिक्षीरा गौः । क्षीनामसंख्यत्वादसामानाधिकरण्यमिहाभिधानाभावान्न भवति।पञ्चभिर्भुक्तमस्यासामानाधिकरण्येऽप्यनभिधानम्। पञ्च भुक्तवन्तोऽस्य । नपा निर्देशः किमर्थः । उन्मत्तगङ्गम् । लोहितगङ्गम् । खावन्यपदार्थे इति हस एव भवति । इह वीरपुरुषको ग्राम इति परत्वाद्धसः षसस्य बाधकः । शबलीश्यामा देवदत्तेत्येवमादिषु यश्चैकाश्रय इति प्रकृतमस्ति तेन वसस्य बाधः । प्रादयो गताद्यर्थे वया इत्येवमादि वार्त्तिकवचनं प्रमाणम् । तेन निष्कौशाम्बिरित्येवमादिषु वसो न भवति । ईषदुपमानपूर्वस्य सुखं वक्तव्यम् ।

उदरे स्थितो मणिरस्य उदरेमणिः । षे कृति बहुलमिति ईषोऽनुप् । उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः । उपमानावयवत्वादुष्ट्रोऽप्युपमानम् । इह केशचूडः सुवर्णालङ्कारो देवदत्तः इति केशसम्भारे केशशब्दः । सुवर्णविकारे सुवर्णशब्दो वर्तते । सङ्गतार्थः समर्थ इति निर्देशादेवं जातीयस्य वा शुष्कं द्रवृव्यम् । प्रपतितपर्णः । प्रपर्णः । अविद्यमानभार्यः । अभार्यः ।

संख्येये संख्यया भ्यासन्नादूरसंख्यम् ॥ ८७ ॥

सख्येये या संख्या वर्तते तया भि आसन्न अदूर इत्येतानि संख्या च वसो भवति । अनन्यार्थार्थं वान्तेऽप्यन्यपदार्थे प्रापणार्थश्च । समीपे दशानामिमे उपदशाः । उपविंशाः । समीपप्राधान्ये तु हसः । आसन्ना दशानामिमे आसन्नदशाः । आसन्नविंशाः । अदूरदशाः । अदूरचत्वारिंशाः । द्वौ वा त्रयो वा इमे द्वित्राः । त्रयो वा चत्वारो वा इमे त्रिचतुराः । नक्तिसूपत्रिभ्यश्चतुर इति अस्त्यो निपात्यते । त्रिर्दश इमे त्रिदशाः । वृत्त्यैवाभ्यावृत्तेरुक्तत्वात् सुचोऽप्रयोगः । संख्यासंज्ञाविधानेऽधिकशब्दस्यापि संख्यात्वमुक्तम् । अधिका दशानामिमेऽधिकदशाः । संख्येय इति किम् । अधिका विंशतिर्गवाम् । संख्ययेति किम् । पञ्च पदार्थाः । भ्यासन्नादूरसंख्यमिति किम् । पार्थिवाः पञ्च ॥

दिग्गो ऽन्तराले ॥ ८८ ॥

दिक्शब्दाः सुबन्ता अन्तरालवचने वसंज्ञकः सो भवति । अन्तराल एव यथा स्यादिति नियमार्थ आरम्भः ।

दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं दक्षिणपूर्वा । सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भाव इति पुंवद्भावः । उत्तरपदस्य स्त्रीगोर्नीच इति प्रादेशः । अन्तरालदिशः स्त्रीत्वात् पुमषृाप् । अनेकमित्यनुवर्त्तनात् न्यक्संज्ञायां द्वयोः पर्यायेण पूर्वनिपातः । एवं दक्षिणपरा । उत्तरपरा । उत्तरपूर्वा । प्रसिद्धानां दिक्छब्दानां ग्रहणादिह न भवति । वारुण्याश्च कौबेर्याश्च दिशोरन्तरालम् ॥

तत्रेदमिति सरूपे ॥ ८८ ॥

तत्रेति ईषम्ने द्वे सरूपे इदमित्येतस्मिन्नर्थे वसो भवति । इतिकरणात् ग्रहणविशिष्टे युद्धे विवक्षा । केशेषु केशेषु च गृहीत्वा इदं युद्धं वृत्तं केशाकेशि । कचाकचि । अइञिति इच् सान्त इजिति तिष्ठग्वादौ हसंज्ञार्थं पठ्यते । अन्यस्यापि इति पूर्वपदस्य दोत्वम् । अत्र सापेक्षत्वात् पूर्वेण वृत्तिर्न प्राप्नोति । सरूपे इति किम् । केशेषु च कचेषु च गृहीत्वा इदं युद्धं वृत्तम् ।

तेन ॥ ८९ ॥

इदमिति सरूपे इति वर्तते । तेनेति भान्ते सरूपे इदमित्येतस्मिन्नर्थे वसो भवति । इतिकरणानुवृत्तेर्यत्तेनेति निर्दिष्टं प्रहरणं चेत्तद्भवति । दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं वृत्तं दण्डादण्डि । मुसलामुसलि । सरूपे इत्येव । दण्डैश्च कमण्डलुभिश्च प्रहृत्येदं युद्धं वृत्तम् । योगविभाग उत्तरार्थः ॥

सहेति तुल्ययोगे ॥ ९० ॥

तुल्ययोगः समानक्रियादियोगः । तेनेति वर्तते । सह इत्येतत् सुबन्तं तुल्ययोगे वर्तमानेन तेनेति भान्तेन सह

समस्यते वसो भवति । सह छात्रेण सच्छात्र आगतः । सशिष्यः । सपुत्रः । वा नीच इति सहशब्दस्य सादेसः । तुल्ययोग इति किम् । प्रत्यहं सह शाकेन भारं वहति रासभी । विद्यमानताऽत्र सहार्थः । आद्येनैव सिद्धे हसनिवृत्त्यर्थं कवभावार्थंच वचनम् । इतिशब्दो योगविभागार्थः । तेनातुल्ययोगेऽपि क्वचिद्वसः कश्च । तेन सकर्मकाच्चरेर्दा भवति । सपक्षको वादी ब्रूत इत्यादि सिद्धम् । अत्र हि चरेरेव देन योगो न कर्मणः । तथा वादिन एव च तेन योगो न पक्षस्य ॥

चार्थे द्वन्द्वः ॥ ९१ ॥

चकृतोऽर्थश्चार्थः । तस्मिन् वर्तमानमनेकं सुबन्तं द्वन्द्वसंज्ञं सेा भवति । चत्वारश्चार्थाः । समुच्चयोऽन्वाचय इतरेतरयोगः समाहारश्चेति । तत्रानियतक्रमयोगपद्यानां द्रव्यादिवस्तूनामेकत्राध्यारोपः समुच्चयः । यथा गामश्वं पुरुषं पशुमहरहर्नयमानो वैवस्वतो न तृप्यति । सुरया इव दुर्मदी । गुणप्रधानभावमात्रविशिष्टः समुच्चय एवान्वाचयः । यथा भिक्षामट गां चानवेति । इतरेतरयोगसमाहारावपि समुच्चयस्य भेदौ । परस्परं सापेक्षाणामवयवभेदानुगत इतरेतरयोगः । अनपेक्षिता अवयवभेदाः संहतिप्रधानाः समाहाराः । आद्ययोश्चमन्तरेणापि क्वचित् प्रयोगात् । अस्यामर्थ्यंच नास्ति सविधिः । इतरेतरयोगे । प्लक्षन्यग्रोधौ छायां कुरुतः । समाहारे प्लक्षन्यग्रोधं सिध्यति । वाक्त्वचम् । वाग्दृषदम् । छत्रोपानहम् । इह द्वात्रिंशत्तिलयस्त्रिंशद्गुणितत्येवमादिषु समाहारेऽपि लिङ्गमशिष्यं लोकाश्रयत्वा-

दिति नपुंसकत्वाभावः । द्वन्द्वप्रदेशा द्वन्द्वाच्चुदहषोरार्थ इत्येवमादयः ॥

वोक्तं न्यक् ॥ ९२ ॥

सञ्ज्ञासूत्रेषु यानिर्दिष्टं न्यक्संज्ञं भवति । तस्य प्रयोजनं पूर्वमित्यनेन पूर्वनिपातः । अधिस्त्रि । अधिकुमारि । श्रीति वोक्तम् । कृष्टश्रितः । इविति वोक्तम् । शङ्कुलाखण्डः । भेति वोक्तम् । एवं सर्वत्र बोद्धव्यम् । वसेऽनेकं सुबन्तं तस्य पूर्वनिपातानियममुत्तरत्र वक्ष्यति । इह राज्ञः पुरुषं श्रित इति यत् प्रति यदप्रधानं तत् प्रति तन्न्यक्संज्ञं भवति । कथमयं विभागो लभ्यते । न्यगितीयमन्वर्थसंज्ञा । नीचैरञ्चतीति न्यगप्रधानमित्यर्थः ॥

एकविभक्ति ॥ ९३ ॥

विभक्तिशब्दः पूर्वाचार्येष्टो निर्दिष्टः एका विभक्तिर्यस्य तन्न्यक्संज्ञं भवति । निष्कौशाम्बिः । निर्मथुरः । परमित्यनेन परनिपातार्थमेतत् । प्रादेशस्तु स्त्रीगोर्नीच इत्यत्र अन्वर्थस्य नीचः समाश्रयणात् सिद्धः ॥

परं ॥ ९४ ॥

एकविभक्ति न्यक्संज्ञं परं प्रयोक्तव्यम् । पूर्वमित्यनेन पूर्वनिपाते प्राप्ते ऽपवादः । इह धर्मं श्रितः । धर्मश्रिताय इत्येवमादिषु वोक्तमित्यनेनैव न्यक्संज्ञा भवत्यनवकाशत्वात्ततस्तदाश्रयः पूर्वनिपातः ॥

राजदन्तादौ ॥ ९५ ॥

राजदन्तादिषु न्यक् परं प्रयोक्तव्यम् । उत्तरसूत्रैः प्राप्तस्य पूर्वनिपातस्यायमपवादोऽयम् । दन्तानां राजा राज-

दन्तः । वनस्याग्रे अग्रेवणम् । गणपाठादनुप् । लिप्तवासितं नग्नमुषितमवच्छिन्नपक्वं सिक्तसमृष्टं भृष्टतुच्छितमर्पितोप्तं उप्तगाढमेतेषु पूर्वकालस्य परनिपातः । उलूखलमुसलं तन्दुलकिण्वम् । आरग्वायनिबन्धकी । चित्ररथबाह्लीकम् । अवन्त्यश्मकम् । शूद्रार्यम् । स्नातकराजानौ । विष्वक्सेनार्जुनौ । अक्षिभ्रुवम् । दारगवम् । शब्दार्थौ । धर्मार्थौ । कामार्थौ । अक्षु व्यत्ययोऽपि । अर्थशब्दौ । अर्थधर्मौ । अर्थकामौ । वैयाकरणमतम् । भोजवाजौ । गोपालधानीपूलासम् । पूलासकरण्डम् । उशीरबीजम् । सिक्थम् । शिक्षास्त्री । चित्रास्वाती । भार्यापती । जायापती । जम्पती । दम्पती । जायाशब्दस्य जम्भावो दम्भावश्च निपात्यते । पुत्रपती । पुत्रपशू । केशश्मश्रुः । शिरोबिन्दु । सर्पिर्मधुनी । मधुसर्पिषी । आद्यन्तौ । अन्तादी । गुणवृद्धी । वृद्धिगुणौ ॥

पूर्वम् ॥ ९६ ॥

न्यगिति वर्तते । न्यक्संज्ञं पूर्वं प्रयोक्तव्यम् । वाक्यवद् वृत्तावनियमो मा भूदित्यारम्भः । उक्तान्युदाहरणानि । यत्र द्वे अपि तान्ते राज्ञः पुरुषस्येति तत्र कस्य न्यक्त्वं न्यगित्यन्वर्थसंज्ञाश्रयणाद्राजशब्दस्य ॥

द्वन्द्वे सुः ॥ ९७ ॥

द्वन्द्वे सें स्वन्तं पूर्वं प्रयोक्तव्यम् । मुनिगुप्तौ । यदुगुप्तौ । अनेकप्राप्तावनियमेन मुनिपटुगुप्ताः । पटुमुनिगुप्ताः । पटुगुप्तमुनयः । न्यगित्यन्वर्थसंज्ञा । द्वन्द्वे च न कस्यचिद्प्राधान्यमित्यप्राप्ते पूर्वनिपात इदं सूत्रम् ॥

अजाद्यत् ॥ ९८ ॥

अजादि अदन्तं शब्दरूपं द्वन्द्वे से पूर्वप्रयोक्तव्यम् । इन्द्रचन्द्रौ । उष्ट्रस्वरम् । उष्ट्रशशम् । इह इन्द्राग्नी । इन्द्रवायू इति सुलक्षणात् परत्वादनेन पूर्वनिपातः । उभयत्र वायोः प्रतिषेध इति आनङ् न भवति । बहुष्वनियमेन इभरथाश्वम् । अश्वरथेभम् । तपरकरणं किम् । वृक्षाश्वौ । अश्ववृक्षौ ।

अल्पाच्तरम् ॥ ९९ ॥

अल्पाच्तरं शब्दरूपं द्वन्द्वे पूर्वं प्रयोक्तव्यम् । धवखदिरौ । धवाश्वकर्णम् । बहुष्वनियमः । वीणादुन्दुभिशङ्खाः । शङ्खदुन्दुभिवीणाः । ऋतुनक्षत्राणां समानाक्षराणामानुपूर्व्येण वक्तव्यम् । शिशिरवसन्तौ । हेमन्तशिशिरवसन्ताः । अश्विनीभरण्यः । कृत्तिकारोहिण्यः । समानाक्षराणामिति किम् । ग्रीष्मवसन्तौ । द्व्यक्षरस्य पूर्वनिपातो वक्तव्यः । कुशकाशम् । तृणकाष्ठम् । वर्णानामानुपूर्व्येण । ब्राह्मणक्षत्रियविट्शूद्राः । भ्रातुश्च ज्यायसः । युधिष्ठिरार्जुनौ । संख्याया अल्पीयसो वाचिकायाः । द्वित्राः । एकादश । नवतिशतम् । अभ्यर्हितस्य च । मातापितरौ । श्रद्धामेधे । दीक्षातपसी ।

ईड्विशेषणे वे ॥ १०० ॥

ईबन्तं विशेषणं च वसे पूर्वं प्रयोक्तव्यम् । वसे अनेकं सुबन्तं न्यक्संज्ञमित्यनियमे प्राप्ते ऽयमारम्भः । कण्ठेकालः । उरसिलोमा । उदरेमणिः । वहेगडुः । अकामेमूर्द्धमस्तकात् स्वाङ्गादित्यङ्लुप् । चित्रगुः । लम्बकर्णः । सर्वनामसंख्ययोः पूर्वनिपातो वक्तव्यः । सर्वं श्वेतमस्य

सर्वश्वेतः । सर्वगौरः । द्विशुक्लः । द्विकृष्णः । सर्वनामसंख्ययोः परस्परं वृत्तिः । वाक्ये संख्यायाः परत्वात् पूर्वनिपातः । द्वयन्यः । अन्यः । वा प्रियस्य । प्रियदधिः । दधिप्रियः । कथं गदुकण्ठः । गदुशिराः । आहिताग्न्यादिषु द्रष्टव्यः ।

तः ॥ १ ॥

तान्तं वसे पूर्वं प्रयोक्तव्यम् । कृतकटः । भिक्षितभिक्षः । अवमुक्तोऽपानत्कः । तान्तस्य विशेषणत्वेनाविवक्षितत्वात् पूर्वणं न सिध्यति । कथं क्वचिज्जातिकालसुखादिभ्यश्च तान्तस्य परप्रयोगः । सारङ्गजग्धी । पलाण्डुभक्षिती । कालात् । मासजाता । संवत्सरजाता । सुखादिभ्यश्च । सुखं जातं यस्याः सुखजाता । दुःखजाता । वाऽहिताग्न्यादिष व्यवस्थयेदं भविष्यति । प्रहरणार्थेभ्यः परे वेपौ वक्तव्ये । उद्यतोऽसिरनेन अस्युद्यतः । असिः पाणावस्य असिपाणिः । दण्डपाणिः । कथमुद्यतगदः । उद्यतासिः । इदमपि वेति सिंहावलोकनात् ॥

वा ऽहिताग्न्यादौ ॥ २ ॥

आहिताग्न्यादिषु वसे तान्तं वा पूर्वं प्रयोक्तव्यम् । आहिताग्निः । अग्न्याहितः । एवं जातपुत्रः । जातदन्तः । जातस्मश्रुः । तैलपीतः । घृतपीतः । मद्यपीतः । ऊढभार्यः अर्थगतः । आकृतिगणोऽयम् । तेनेषुधी न वक्तव्यः ॥

ये कडाराः ॥ ३ ॥

ये कडारादयो वा पूर्वं प्रयोक्तव्याः । कडारश्च स भद्रश्च स कडारभद्रः । भद्रकडारः । विशेषणस्य वोक्तं न्यक्

पूर्वनिपातः प्राप्तो विभाष्यते । कडार गडुल कूट काण खञ्ज कुण्ट खोड खलति गौर वृत्त भिक्षुक पिङ्गल तनु मट बधिर ।

उत्तरपदं द्यु ॥ ४ ॥

से यदुत्तरपदं तद्युसंज्ञं भवति । पञ्चगवधनः । द्यौ परतः हृदर्थे द्युसमाहार इति पूर्वस्य संज्ञायां टः सान्तः सिद्धः । एवं द्वे अहनो जातस्य द्व्यन्हजातः । कालामेयैरिति समुदायस्य षसंज्ञा द्यौ परतः पूर्वस्यापि षसंज्ञायां टः सान्तः

इत्यभयनन्दिविरचितायां जैनेन्द्रव्याकरणमहावृत्तौ

प्रथमस्याध्यायस्य तृतीयः पादः ॥

अनुक्ते ॥ १ ॥

अनुक्तमित्ययमधिकारः । यदित ऊर्ध्वमनुक्रमिष्याम अनुक्त इत्येवं तद्वेदितव्यम् । स्वार्थद्रव्यलिङ्गानि त्रिको मूदर्थ इति अस्मिन् दर्शने स्वार्थिकाष्टाबादयः संख्याकर्मादयो विभक्त्यर्थाः । एवं च कर्मणीवित्येवमादीनां साधने स्वार्थ इत्येतस्य च गुणप्रधानभावेनैक्यता । स्वार्थैकत्वादिविशिष्टेषु कर्मादिष्वनुक्तेष्विवादयो भवन्ति । अथवा अनुक्तकर्माद्याश्रयेष्वेकत्वादिष्विवादयो भवन्ति । इह परिसंख्यानमिति केचित् । भिक्षुकृत्सैरनुक्ते कर्मादाविति । वक्ष्यति कर्मणोप् । कटं करोति । ओदनं भुङ्क्ते । अनुक्त इति किम् । क्रियते कटः । भिक्षोक्तं कर्म । कृतः कटः । कृतोक्तं कर्म । आढिको देवदत्तः । आढं भुक्तमनेन इति वः । हृतोक्तः कर्ता । क्रीतेन क्रीतः । क्रीतादस्वार्थेसेठयाविति यः । हृतोक्तं करण-

मिति । कर्तरि करणे च भा न भवति । प्राप्तमुदकं यं ग्रामं स प्राप्तोदको ग्रामः । सेन कर्मोक्तम् । मिङ्कृद्वृत्तैरिति परिसंख्यानं किम् । कटं करोति भीष्ममुदारं दर्शनीयम् । अत्र कटशब्दादुत्पद्यमानया इपा उक्ते कर्मणि भीष्मादिभ्य इप् न स्यात् । तदेतत्परिगणनमयुक्तम् । कटोऽपि कर्म भीष्मादयोऽपि न ह्यसौ कटमात्रे सन्तोषं करोतीत्यनेकं कर्म गृह्यते । समुदायस्य चामूत्वात् प्रत्ययवयवाद्विभक्तयुत्पत्तिः । इह आसने आस्ते शयने शेते इति अन्यो ह्यधिकरणप्रत्ययः सामान्येन युटाऽभिहितो अन्यश्च विशेषरूपेण विभक्तयोच्यते इति न दोषः ॥

कर्मणीप् ॥ २ ॥

कर्मणि कारके अनुक्ते इप् विभक्तिर्भवति । कटं करोति । ग्रामं गच्छति । आदित्यं पश्यति । अविशेषेण ङाम्मृदः स्वादयो वक्ष्यन्ते । तन्नियमोऽयं कर्मादिष्वेव इँकादयो भवन्ति । इवादयो नियताः । कर्मादयस्त्वनियताः । तेषु तापि प्राप्नोति । तत इदमुच्यते ता शेष इति शेषे ता भवति नोक्ते कर्मादौ ॥

अन्तरान्तरेण योगे ॥ ३ ॥

प्रतिपदोक्तत्वादिहान्तरान्तरेणशब्दौ निसंज्ञौ ताभ्यां योगे इन्विभक्तिर्भवति । अन्तरा गन्धमादनं माल्यवन्तञ्चान्तरा कुरवः । कुरुविशेषणत्वेन तायां प्राप्तायामन्विधीयते । कुरुशब्दार्थे वर्तमानात् मृदर्थातिरेकाभावात् इन्न भवति । अन्तराशब्दो मध्यमाधेयप्रधानं ब्रूते । अन्तरेणशब्दः तच्च विनार्थं च । अन्तरेण सौमनसं विद्युत्प्रभञ्च

देवकुरवः । मोक्षमन्तरेण नात्यन्तिकं सुखम् । निसंज्ञयोर्ग्रहणादिह न भवति । अन्तरायां पुरि वसति । किं ते धात्रवाणां सालङ्कायनां चान्तरेण गतेन । योग इति किम् । अन्तरा तक्षसिलाञ्च पाटलिपुत्रञ्च घ्नस्य प्राकारः । ननु पदविधिरयं अन्तराशब्दे सामर्थ्यात् घ्नशब्दादिह न भविष्यति योगग्रहणमनर्थकम् । क्वचिदन्यैरपि योगे यथा स्यादित्येवमर्थम् । अभितःपरितःसमयानिकषाहाप्रतियोगेषूपसंख्यानम् । अभितो ग्रामम् । परितो ग्रामम् । समया ग्रामम् । निकषा ग्रामम् । हा देवदत्तम् । दृणीष्व भद्रे प्रतिभाति चेत्त्वं बुभुक्षितं न प्रतिभाति किञ्चित् । उभसर्वतसोः कार्यो धिगुपर्यादिषु त्रिषु । कृतद्वित्वेष्विषा योगस्ततोऽन्यत्रापि दृश्यते । उभयतो ग्रामम् । सर्वतो ग्रामम् । धिग्देवदत्तम् । उपर्यादिष्विति सूत्रोपलक्षणम् । सामीप्ये ऽधोध्युपरीति द्वित्वे कृते त्रयाणां ग्रहणम् । अधोऽधो ग्रामम् । उपर्युपरि ग्रामम् अध्यधि ग्रामम् । अन्यत्राऽपि दृश्यते । विना धर्मं कुतः सुखम् । अपिशब्दान्न च दृश्यते । हा तात हा पुत्र वत्सल ॥

कालाध्वन्यविच्छेदे ॥ ४ ॥

अविच्छेदो ऽत्यन्तसंयोगः । द्रव्यगुणक्रियाभिः कात्स्न्र्येन कालाध्वनोः संबन्ध इत्यर्थः । कालाध्वनोरविच्छेदे वर्तमानयोः क्षेत्रेरिव भवति । अन्यस्याभूतत्वात् कालाध्ववाचिभ्यामेव । अधिकरणविवक्षायामपीष्यते प्राप्तायां तद्विवक्षायां संबन्धलक्षणायां तायां प्राप्तायामयं विधिः । कालस्य द्रव्येण योगे । मासं गुडपूपाः । संवत्सरं क्षीरोदनम् । गुप्तेन शरदं मथुरा रमणीया ।

मासं कल्याणी काञ्ची । क्रियया । मासमधीते । संवत्सरमधीते । अध्वनो द्रव्येण योगे । क्रोशं सिकताः । योजनं बनराजिः । गुणेन । क्रोशं कुटिला नदी । योजनं दीर्घः पर्वतः । क्रियया । क्रोशमधीते । योजनमधीते । अविच्छेद इति किम् । मासस्य द्विरधीते । क्रोशस्यैकदेशे पर्वतः ॥

सिद्धौ भा ॥ ५ ॥

अविच्छेद इति वर्तते । सिद्धिः क्रियाफलनिष्पत्तिः । अविच्छेदे यौ कालाध्वानौ तद्वाचिभ्यां भा भवति सिद्धौ गम्यमानायाम् । मासेन प्राभृतमधीतम् । योजनेन प्राभृतमधीतम् । सिद्धाविति किम् । मासमधीतं प्राभृतं न चानेनावधारितम् । नात्र क्रियाफलनिष्पत्तिरस्ति पूर्वेण इवेव भवति ॥

क्रियामध्ये केपौ ॥ ६ ॥

कालाध्वनीति वर्तते । क्रिययोर्मध्ये यौ कालाध्वानौ ताभ्यां केपौ विभक्तयौ भवतः । अथ भुक्त्वा सुनिद्रयं हाद्वोक्ता ह्यहे भोक्ता । इहस्थोऽयमिष्वासः क्रोशे विध्यति लक्ष्यम् । चापाच्छरस्य निर्गमनं धानुष्कावस्थानं वा एका क्रिया द्वितीया व्यधनक्रिया तयोर्मध्ये क्रोशशब्दात्ता प्राप्ता ॥

सु पूजायां न गिति ॥ ७ ॥

सुशब्दः पूजायामर्थे गिसंज्ञस्तिसंज्ञश्च न भवति । सुस्थितं भवता । सुसिक्तं भवता । गिसंज्ञाश्रयं षत्वं न भवति । तिसंज्ञाप्रतिषेधे यद्यपि तिसंज्ञाश्रयः सविधिर्न भवति । तथापि आदिलक्षणो भविष्यति । स्वती पूजाया-

मिति वचनात् । सुसिच्य गतः । तस्मादुत्तरार्थं तिसंज्ञा-प्रतिषेधवचनम् । पूजायामिति किम् । सुषिक्तं किं तवाऽत्र ॥

अतिक्रमे चातिः ॥ ८ ॥

अतिक्रम आधिक्यम् । अतिक्रमे पूजायाञ्चातिशब्दो गितिसंज्ञो न भवति । अतिसिक्तमेव भवता । अतिस्तुतमेव भवता । गितिसंज्ञाश्रयः प्रादिलक्षणश्च सविधिर्न भवति । अतिसिक्तैव गतः । पूजायां । अतिसिक्तमतिस्तुतं भवता । स्वतो पूजायामिति प्रादिलक्षणः सविधिः । अतिसिच्य गतः । प्यस्तिवाक्सेत्क-इत्यत्र तिग्रहणमुपलक्षणं प्रादिसेऽपि प्यादेशः ॥

पदार्थसंभावनानुज्ञागर्हासमुच्चयेऽपिः ॥ ९ ॥

अप्रयुज्यमानस्य पदस्यार्थः । संभावनं सामर्थ्याविष्करणम् । अनुज्ञा अभ्युपगमः । गर्हा निन्दा । एकत्रानेकस्य नियोजनं समुच्चयः । एतेष्वर्थेष्वपिर्गितिसंज्ञो न भवति । पदार्थे । सर्पिषोऽपि स्यात् । पयसोऽपि स्यात् । बिन्दुः स्तोकं मात्रा चेत्यस्यार्थे ऽपिशब्दः । संबन्धे च ता । संभावने । अपि सिञ्चेन्मूलकसहस्रम् । अपि स्तुयाद्राजानम् । अनुज्ञायाम् । अपि सिञ्च । अपि स्तुहि । अतिसर्गे लोट् । गर्हायां धिग् ब्राह्मणमपि सिञ्चेत्पलाण्डुम् । अपि स्तुयाद्वृषलम् । अनवक्लृप्त्यमर्षयोरिति लिङ् । समुच्चयेऽपि । सिञ्च अपि स्तुहि । सिञ्च च स्तुहि चेत्यर्थः । गिसंज्ञाश्रयं षत्वादिकार्यं न भवति ॥

अधिपरी अनर्थकौ ॥ १० ॥

अनर्थकावनर्थान्तरवाचिनौ अधिपरि इत्येतौ अन

र्थकौ गितिसंज्ञौ न भवतः । कुतोऽध्यागतः । कुतः पर्यागतः । गितिसंज्ञाश्रयं सविधानं न भवति । प्रागधोस्त इति प्रयोगनियमश्च न भवति । इह च पर्यानडमिति णत्वं भवति ॥

वीप्सेत्थम्भूतलक्षणेभिनेप् ॥ ११ ॥

न गितिरिति वर्तत्त योग इति च । वीप्सा इत्थम्भूत लक्षणा इत्येतेष्वर्थेषु अभिना योगे इब्विभक्तो भवति गितिसंज्ञाप्रतिषेधश्च । वीप्सायाम् । वृक्षं वृक्षमभिसिञ्चति । इत्थम्भूते । साधुर्देवदत्तो मातरमभिस्थितः । इत्थम्भावोऽभिना गम्यते । लक्षणे । वृत्तमभिसिञ्चति । वृक्षमभिविद्योतते । गितिसंज्ञाप्रतिषेधात् षत्वं प्राग्धोस्त इति नियमश्च न भवति ॥

भागे त्वानुप्रतिपरिणा ॥ १२ ॥

भागे अर्धे वीप्सेत्थम्भूतलक्षणेषु च अनु प्रति परि इत्येतैर्योगे इब् भवति गितिसंज्ञाप्रतिषेधश्च । भागोऽत्रांशः । यदत्र मामनुस्यात् मां प्रति स्यात् मां परि स्यात् तदीयताम् । वीप्सायाम् । वृक्षं वृक्षम् । अनुसिञ्चति प्रतिसिञ्चति परिसिञ्चन्ति । इत्थम्भूते । साधुर्देवदत्तः मातरमनुस्थितः मातरं प्रति मातरं परि । लक्षणे । वृत्तमनुसिञ्चति प्रतिसिञ्चति । परिसिञ्चति । वृत्तं प्रति विद्योतते । एतेष्विति किम् । ओदनं परिषिञ्चति । अनुप्रतिपरिणेति किम् । यदत्र मामभिष्यात् । अभेर्भागे गितिसंज्ञा भवत्येव सगित्वात् सत्वात् सकर्मकत्वं कर्मणीप् षत्वं च भवति ।

हेतावनुना ॥ १३ ॥

हेतावर्थे अनुना योगे इव्विभक्तिर्भवति गितिसंज्ञाप्रतिषेधश्च । जिनस्य ज्ञानोत्पत्तिमन्वागमन्सुराः । सुराणामागमनस्य जिनज्ञानोत्पत्तिर्हेतुः। एवं शान्तिचरितपट्टकप्रसारणमनु प्रावर्षत् पर्जन्यः । यदाऽपि इत्थम्भूते लक्षणे वार्थेऽनुना योगे स्विडैवेप् तथापि येननाप्राप्तन्यायेन शेषलक्षणायास्तायाः सोऽपवादः । हेत्वर्थे तु परत्वाद्वा प्रसज्येत तद्बाधनार्थमिदम् ॥

भार्थे ॥ १४ ॥

भार्थः सहशब्दस्यार्थः । भार्थेऽनुना योगे इव् भवति गितिसंज्ञाप्रतिषेधश्च । नदीमनु वसिता सेना । नदीमनु वसिता नगरी । नद्या सह सम्बद्धेत्यर्थः। एवं पर्वतमनु वसिता सेना ॥

हीने ॥ १५ ॥

अनुनेति वर्तते । हीनार्थे द्योत्ये अनुना योगे इव् भवति गितिसंज्ञाप्रतिषेधश्च । उत्कृष्टापेक्षया हीनो भवतीति सामर्थ्यादुत्कृष्टादिप् । अनु शालिभद्रमाढ्याः । अनु समन्तभद्रं तार्किकाः ॥

उपेन ॥ १६ ॥

हीनार्थे उपेन योगे इव् भवति न गितिसंज्ञा च । उपसिंहनन्दिनं कवयः । उप सिद्धसेनं वैयाकरणाः ॥

ईबधिके ॥ १७ ॥

ईव्विभक्तो भवति अधिकार्थे द्योत्ये उपेन योगे । उप खार्यां द्रोणः । उप निष्के कार्षापणम् । यस्मादधिकं मृदार्थातिरेकात्तत ईप् ॥

ईश्वरे ऽधिना ॥ १८ ॥

ईश्वरशब्द ईश्वरेशितव्यसंबन्धमुपलक्षयति । ईश्वरे द्योत्ये अधिना योगे ईव्विभक्ती भवति न गितिसंज्ञा च । उत्तरसूत्राद्वेति विभाषावलोकते । तत ईश्वरादीशितव्याच्च पर्यायेणेप् । अधि मेधेश्वरे कुरवः । अधि कुरुषु मेधेश्वरः । इह विभक्त्यर्थे हसः कस्मान्न भवति विभक्तिशब्देन तत्र कारकं गृह्यते । ईश्वरेशितव्यसंबन्धश्चात्र न तु कारकम् ॥

वा कृञधिः ॥ १९ ॥

ईश्वर इति वर्तते । ऊधिशब्दः करोतौ धा गितिसंज्ञो भवति । तमधिकृत्य तमधिकृत्वा । ईश्वरं कृत्वेत्यर्थः । अत्र कर्मणीप् । पुनरधिग्रहणं गितिसंज्ञाप्रतिषेधार्थमेव नत्वीवर्थम् ॥

का ऽऽङा मर्यादावचने ॥ २० ॥

काविभक्ती भवति आङा योगे मर्यादावचने गितिसंज्ञाप्रतिषेधश्च । आ पाटलिपुत्रात् दृष्टो देवः । आ मथुरायाः । मर्यादायामिति सिद्धे वचनग्रहणमभिविधिसंग्रहार्थम् । आ कुमारेभ्यो यशः समन्तभद्रस्य । मर्यादावचन इति किम् । ईषदर्थे क्रियायोगे च मा भूत् । आकडारः । आवद्धमाभरणम् ॥

वर्जने ऽपपरिभ्याम् ॥ २१ ॥

विवक्षितेनासबन्धो वर्जनम् । वर्जनेऽर्थे अप परि इत्येताभ्यां योगे काविभक्ती भवति गितिसंज्ञाप्रतिषेधश्च । अप त्रिगर्तेभ्यो दृष्टो देवः । परेर्वर्जन इति वा

हेतावर्थे अनुना योगे इव्विभक्तिर्भवति गितिसंज्ञाप्रतिषेधश्च । जिनस्य ज्ञानोत्पत्तिमन्वागमन्सुराः । सुराणामागमनस्य जिनज्ञानोत्पत्तिर्हेतुः। एवं शान्तिचरितपट्टकप्रसारणमनु प्रावर्षत् पर्जन्यः । यदाऽपि इत्थम्भूते लक्षणे वार्थेऽनुना योगे स्विडैवेप् तथापि येननाप्राप्तन्यायेन शेषलक्षणायास्तायाः सोऽपवादः । हेत्वर्थे तु परत्वाद्धा प्रसज्येत तद्बाधनार्थमिदम् ॥

भार्थे ॥ १४ ॥

भार्थः सहशब्दस्यार्थः । भार्थेऽनुना योगे इव् भवति गितिसंज्ञाप्रतिषेधश्च । नदीमनु वसिता सेना । नदीमनु वसिता नगरी । नद्या सह सम्बद्धेत्यर्थः। एवं पर्वतमनु वसिता सेना ॥

हीने ॥ १५ ॥

अनुनेति वर्तते । हीनार्थे द्योत्ये अनुना योगे इव् भवति गितिसंज्ञाप्रतिषेधश्च । उत्कृष्टापेक्षया हीनो भवतीति सामर्थ्यादुत्कृष्टादिप् । अनु शालिभद्रमाढ्याः । अनु समन्तभद्रं तार्किकाः ॥

उपेन ॥ १६ ॥

हीनार्थे उपेन योगे इव् भवति न गितिसंज्ञा च । उपसिंहनन्दिनं कवयः । उप सिद्धसेनं वैयाकरणाः ॥

ईबधिके ॥ १७ ॥

ईव्विभक्तो भवति अधिकार्थे द्योत्ये उपेन योगे । उप खार्यां द्रोणः । उप निष्के कार्षापणम् । यस्मादधिकं मृदार्थातिरेकात्तत ईप् ॥

तादर्थ्येन सिद्धमिति चेत् स्थानिनो यथा स्यात् प्रयुज्यमानस्य मा भूत् इत्येवमर्थमिदम् । घ्वर्थवाच इति किम् । प्रविश पिण्डीम् । प्रविश तर्पणम् । अस्त्यत्र भक्ष्य इति च स्थानी न तु घ्वर्थवाक् । कर्मणीति किम् । एधेभ्यो व्रजति शकटेन । स्थानिन इति किम् । एधानाहर्तुं व्रजति ॥

तुमर्थाद्भावे ॥ २५ ॥

तुमा समानार्थस्तुमर्थः । तुमर्थो भावे वर्तमानो यस्मैः तदन्तान्मृद अब् भवति । क्रियातुमो क्रियायां तदर्थायामिति वर्तमाने भावे भाववाचिन इति वक्ष्यति तेषां घञादीनामिह ग्रहणम् । पाकाय व्रजति । मतये व्रजति । पुष्टये व्रजति । अत्र तदर्थायां क्रियायां तस्य विधानात् । तादर्थ्यं तेनैवोक्तमिति तादर्थ्ये अब् न प्राप्नोति । तुमर्थादिति किम् । पाकः । त्यागः । भाव इति किम् । कारको व्रजति ॥

नमःस्वस्तिस्वाहास्वधालंवषड्योगे ॥ २६ ॥

नमस स्वस्ति स्वाहा स्वधा अलं वषट् इत्यैतैर्योगे अब्विभक्ती भवति । नमो देवेभ्यः । स्वस्ति प्रजाभ्यः । आशीर्विवक्षायां कुशलार्थैर्योगे तापौ प्राप्ते ताभ्यां पूर्वनिर्णयेनायमेव नित्यो विधिः । स्वस्त्यस्तु गोभ्यः । स्वस्ति प्रजाभ्यो भूयात् । स्वाहा इन्द्राय । स्वाहा अग्नये । स्वधा पितृभ्यः । अलं मल्लो मल्लाय । अलमिति पर्याप्त्यर्थानां ग्रहणम् । तस्मै प्रभवतीति निर्देशात् । प्रभूर्मल्लो मल्लाय । समर्थो मल्लो मल्लाय । अन्यत्राऽपि कस्मान्न भवतीति । कन्यामलङ्करुते । अलं रोदनेन । वाग्विभक्तेः कार-

कविभक्तौ बलीयसीति कर्मणीप् । करणे च भा भवति । वषडग्नये । वषडिन्द्राय । योगग्रहणं किम् । नमो जिनानामायतेभ्यः । ननु ङ्याम्भ्यः स्वादयो विहिताः । तदन्तविषयोऽयं नियमः पदविधिः । ततो ऽसामर्थ्यादेव जिनशब्दान्न भविष्यति योगग्रहणमनर्थकम् । अन्यैरपि योगे यथा स्यात् इत्येवमर्थम् । हितशब्दयोगे उपसंख्यानम् ॥*॥ अरोचकिने हितम् ॥ क्रुप्त्यर्थधुप्रयोगे अव्वक्तव्या ॥ * ॥ सूत्राय प्रकल्पते यवागूः । सूत्राय संपद्यते । सूत्राय जायते । भिन्नविकारापत्तौ चेदं वक्तव्यम् । अभेदे सूत्रं संपद्यते यवागूरिति वैव भवति । विकारग्रहणं किम् । देवदत्तस्य संपद्यते यवागूः । सूत्रं संपद्यते यवाग्वाः । उत्पातेन ज्ञाप्यमाने अव्वक्तव्या ॥ * ॥

वाताय कपिला विद्युदातपायातिलोहिनी ।
पीता वर्षाय विज्ञेया दुर्भिक्षाय भवेत्सिता ॥
तेनैतत् सर्वं लब्धम् ॥

प्रकृष्यगर्हे मन्यकर्मण्यजीवे वा ॥ २७ ॥

प्रकृष्यगर्होऽतिशयतिरस्कारः । प्रकृष्यगर्हे गम्ये मन्यतेः कर्मणि जीववर्जिते वा अम्विभक्तौ भवति । न त्वा तृणं मन्ये । न त्वा तृणाय मन्ये । न त्वा बुसं मन्ये । न त्वा बुसाय मन्ये । प्रकृष्येति किम् । काष्ठं त्वां मन्ये । लोष्ठं त्वा मन्ये । न त्वा नावं मन्ये । यावत्तीर्णं नाव्यं भवति । न त्वा अन्नं मन्ये । यावद् भुक्तं श्राद्धम् । गर्ह इति किम् । इन्द्रनीलात् पद्मरागमधिकगुणं मन्ये । प्रशंसेयम् । उभयग्रहण किम् । अश्मानं हृषदं मन्ये । स्वरूपकथनमेतत् । मन्यग्रहणं किम् । न त्वा तृणं चिन्तयामि । विकरणनिर्देशः किम् । न त्वा

तृणं मन्ये । अजीव इति किम् । न त्वां श्वानं मन्ये । न त्वां शृगालं मन्ये । अगर्हवाचित्वाद् युष्मदस्मदादेरव्विभक्तौ न भवति ॥

संज्ञो भा ॥ २८ ॥

कर्मणीति वर्तते । संपूर्वस्य जानातेः कर्मणि भा भवति । मात्रा संजानीते । मातरं संजानीते । पित्रा संजानीते । पितरं संजानीते । संप्रतेरस्मृताविति दः । वेति व्यवस्थितविभाषाऽनुवर्तते । तेन दविषये भावि कल्पः । स्मृत्यर्थे मविधिः । तत्र मातुः संजानाति । मातरं संजानाति । स्मर्थदयेशाङ्कर्मणीत्यत्र ताविकल्पं वक्ष्यति । कृत्प्रयोगे परत्वात् कर्तृकर्मणोः कृतीति तैव भवति मातुः संज्ञाता ॥

कर्तृकरणे भा ॥ २९ ॥

कर्त्तरि करणे च कारके भाविभक्तौ भवति । देवदत्तेन भुक्तम् । जिनदत्तेन भुक्तम् । करणे । दात्रेण लुनाति । भेति वर्तमाने पुनर्भाग्रहणं किम् । प्रकृत्यादिभ्यो यथा स्यात् । प्रकृत्या ऽभिरूपः । प्रकृत्या दर्शनीयः । प्रायेण वैयाकरणः । काश्यपोऽस्ति गोत्रेण । समेण धावति । विषमेण धावति । द्विद्रोणेन धान्यं क्रीणाति । पञ्चकेन पशून् क्रीणाति । सहस्रेण अश्वान् क्रीणाति ॥

सहार्थेन ॥ ३० ॥

योग इति मण्डूकप्लुत्याऽनुवर्तते । सहशब्दार्थेन योगे भाविभक्तौ भवति । प्रधानस्य मृदर्थातिरेकाभावादप्रधाने भवति । पुत्रेण सहागतः । पुत्रेण सह पिङ्गलः ।

पुत्रेण सह धनवान् । अत्र प्रधानाप्रधानयोः क्रिया-गुणद्रव्यसम्बन्धे सति सहयोगः । अर्थग्रहणं किम् । पुत्रेण सार्द्धमागतः । पुत्रेण समम् । पुत्रेण साकम् । पुत्रेणामा । तस्य द्रोणस्य संग्रामः सारणेन गदेन च । युगपत् कोपकामाभ्यां मनीषिण इवाभवत् । विनाऽपि सहशब्देन तदर्थसंप्रत्ययमात्रे च भवति । अन्त्येनेताऽदिः । अन्त्येन सह आदिरित्यर्थः । योग इत्येव । शिष्येण सहोपाध्यायस्य गौः । पुत्रेण सह स्थूलो ग्रामे । उपाध्यायशब्दस्य ग्रामशब्दस्य च नास्ति सहशब्देन योगः ॥

येनाङ्गविकारेत्थम्भावौ ॥ ३१ ॥

अङ्गविकारः शरीरविकृतत्वम् । अनेन प्रकारेण भवनमित्थंभावः । क्वचिदेव छात्रादौ प्रकारे वृत्तिरित्यर्थः । येनाङ्गिनो विकार इत्थम्भावश्च लक्ष्यते ततो भाविभक्तौ भवति । अक्ष्णा काणः । पाणिना कुणिः । पादेन खञ्जः । इत्थम्भावेऽपि भवान् कमण्डलुना छात्रमद्राक्षीत् । चूलया परिव्राजकमद्राक्षीत् । सहार्थेनेत्यस्याविवक्षायामिदं द्रष्टव्यम् । अङ्गविकारेत्थम्भावाविति किम् । अक्षि काणमस्य । वृक्षं प्रति विद्योतते ॥

हेतौ ॥ ३२ ॥

हेतावित्यर्थनिर्देशः । हेतावर्थे भा च भवति तद्वाचिनः । अन्नेन वसति । धनेन कुलम् । विद्यया यशः । इह लौकिकफलसाधनयोग्यः पदार्थो हेतुर्गृह्यते । तद्योजको हेतुरित्यस्य पारिभाषिकस्य प्रयोगे सिद्धैव भा । उत्तरसूत्रे त्वविशेषेण हेतोर्ग्रहणं द्रष्टव्यम् ॥

कर्णेऽकर्त्तरि ॥ ३३ ॥

हेताविति वर्तते । कर्तृवर्जिते ऋणे हेतौ काविभक्तौ भवति । भापवादोऽयम् । शताद्बद्धः । सहस्राद्बद्धः । उत्तमर्णोऽत्र कर्ता । अकर्तरीति किम् । बद्धस्त्वया देवदत्तः । नाऽहं बध्नामि । शतं मे धारयति । शतेन बद्धः । बन्धितस्त्वया देवदत्तः । नाऽहं बन्धयामि । शतेन बन्धितः । कथं देवदत्तेन शतेन बन्धितः । एकस्य हेतुकर्तृत्वमपरस्य प्रयोज्यकर्तृत्वमित्यदोषः । केति योगविभागः । तेन हेतौ काऽपि भवति । कृतकत्वादनित्यः । अनुपलब्धेर्नास्तीति ॥

गुणे श्रीदत्तस्याऽस्त्रियाम् ॥ ३४ ॥

हेताविति वर्तते । अस्त्रीलिङ्गे गुणे हेतौ श्रीदत्तस्याचार्यस्य मतेन काविभक्तौ भवति । अन्येषां मतेन हेताविति भा । जाड्याद्बद्धः । जाड्येन बद्धः । परिख्यात्यान्मुक्तः । पारिख्यात्येन मुक्तः । गुण इति किम् । धनेन कुलम् । अस्त्रियामिति किम् । बुद्ध्या मुक्तः ॥

ता हेतौ ॥ ३५ ॥

हेताविति शब्दनिर्देशोऽयं हेत्वर्थस्य तु प्रकृतत्वात् । हेतुशब्दे प्रयुक्ते हेत्वर्था ता भवति । अन्नस्य हेतोर्वसति । अध्ययनस्य हेतोर्वसति । भिक्षाया हेतोर्वसति । हेतुशब्दोऽपि हेत्वर्थे वर्तते । तस्मादपि ता । सामानाधिकरण्याद्वा ॥

सर्वनाम्नो भा च ॥ ३६ ॥

हेतुशब्दे प्रयुक्ते सर्वनाम्नो भाविभक्तौ ता च । केन हेतुना वसति । कस्य हेतोर्वसति । येन हेतुना वसति । यस्य हेतोर्वसति । पूर्वेण तायामेव प्राप्तायामयमारम्भः ।

अथवा चकारोऽनुक्तसमुच्चयार्थः । तेन निमित्तकारणप्रयोजनहेतुषु प्रयुक्तेषु सर्वासां प्रायोदर्शनमित्येतल्लब्धम् । किं निमित्तं वसति । केन निमित्तेन वसति । कस्मै निमित्ताय वसति । कस्मान्निमित्तात् । कस्य निमित्तस्य । कस्मिन्निमित्ते वसति । एवं कारणप्रयोजनहेतुष्वुदाहार्यम् । प्रायोग्रहणादिह न भवति ॥

का ऽपादाने ॥ ३७ ॥

अपादाने कारके काविभक्ती भवति । ग्रामादागच्छति । आचार्यादधीते । रथात् पतितः । केति योगविभागादन्यत्राऽपि भवतीति । तेनेदं बहु वक्तव्यं न भवति । प्यखे कर्मणि का वक्तव्या । प्रासादमारुह्य प्रेक्ष्यते । प्रासादात् प्रेक्षते । प्रासादाच्छृणोति । अधिकरणे प्यखे का वक्तव्या । आसने उपविश्य प्रेक्षते । आसनात् प्रेक्षते । शयनात् प्रेक्षते । प्रश्नाख्यानयोश्च का वक्तव्या । किं देवदत्तो व्याकरणात् कथयति । आख्याने व्याकरणात् कथयति । यतश्चाध्वकालपरिच्छेदस्ततः का वक्तव्या । गवीधुमतः साङ्काश्यं चत्वारि योजनानि । कार्तिक्या आग्रहायणी मासे । कायुक्तात् परादध्वनः वा वेप् च वक्तव्ये । गवेधुमत साकाश्यं चत्वारि योजनानि चतुर्षु योजनेषु ॥

दिच्छब्दान्यारादितरर्तेऽञ्चूत्तराहियुक्ते ॥ ३८ ॥

दिच्छब्द अन्य आरात् इतर ऋते अञ्चु आ आहि इत्येतैर्युक्ते का विभक्ती भवति । दिक्छब्द । इयमस्याः पूर्वा । इयमस्या उत्तरा । शब्दग्रहणं किम् । दिशि दृष्टो यः शब्दो देशकालवृत्तिनापि तेन योगे यथा स्यात् । पूर्वो

ग्रामात् । उतरो ग्रामात् । पूर्वो ग्रीष्माद्वसन्तः । अन्यदित्यर्थग्रहणम् । अन्यो देवदत्तात् । व्यतिरिक्तो देवदत्तात् । भिन्नो देवदत्तात् । अर्थान्तरं देवदत्तात् जिनदत्तः । देवदत्ते मृदर्थातिरेकात् तायां प्राप्तायां का विधीयते । आरात्शब्दो झिसंज्ञकः । दूरेऽन्तिकेच वर्तते तद्योगे दूरान्तिकार्थैस्ता चेति अस्मिन् प्राप्ते काविधिः । आराद् गृहात् क्षेत्रम् । आरादेवदत्तात् पीठम् । इतरो निर्दिश्यमानप्रतियोग्यर्थः । इतरो देवदत्तात् । ऋते इति झिसञ्ज्ञं पदम् । ऋते धर्मात् । कुतः सुखम् । अञ्चधु । प्राग्ग्रामात् । प्राची दिग्रमणीया । इत्येवमाद्यर्थे आगतस्य अस्तातः अञ्चेरुदित्युप् । अस्य दिक्छब्दत्वेपि तातसर्थे त्येनेति ता प्राप्ता तदपवादोऽयम् । आ दक्षिणा ग्रामात् । उत्तरा ग्रामात् । आहि । दक्षिणाहि ग्रामात् । उत्तराहि ग्रामात् । अस्तादर्थे दक्षिणादाआहिच दूरे । उत्तराच्चेति आआहित्यौ । अत्रापि ता तसर्थेत्येनेति ता प्राप्ता । अवयवयोगे प्रतिषेधो वक्तव्यः । पूर्वच्छात्राणामामन्त्रयस्व ॥

ता ऽतसर्थे त्येन ॥ ३९ ॥

वक्ष्यति दक्षिणोत्ताराभ्यामतस् । तत्समानार्थेन त्येन युक्ते ता विभक्ती भवति । दक्षिणतो ग्रामस्य । उत्तरतो ग्रामस्य । उपरि ग्रामस्य । उपरिष्टाद् ग्रामस्य । उपर्युपरिष्टात्पश्चादिति अतसर्थे निपातितौ । पुरो ग्रामस्य । पुरस्ताद् ग्रामस्य । पूर्वाधरावराणां पुरधवोअस्तीतीति च पुरादेशः ॥

ङ्वेनेन ॥ ४० ॥

ङ्विभक्ती भवति एनेन योगे । दक्षिणेन विजयार्द्धं

वसति । दक्षिणोत्तरावरादादित्यधिकृत्य । वैनोदूरेकाया इति अस्तादर्थे एन इत्ययं त्यः । पूर्वसूत्रे नेति योगविभागादनेन योगे तापि भवति इति केचित् । दक्षिणेन ग्रामस्य । उतरेण ग्रामस्य ॥

पृथग्विनानानाभिर्भा वा ॥ ४१ ॥

पृथग्विना नाना इत्येतैर्युक्ते वा भाविभक्ती भवति। पृथग्देवदत्तेन पृथग्देवदत्तात्। विना देवदत्तेन। विना देवदत्तात् । नाना देवदत्तेन । नाना देवदत्तात् । पक्षे अन्यार्थत्वात् कापि भवति । अथ पृथगादयोऽसहायार्थे वर्तन्ते नान्यार्थे । एवं तर्ह्यधिकारात् का एषृव्या । त्रयाणां ग्रहणं पर्यायनिवृत्त्यर्थम्। हिरुग्देवदत्तस्य । करणे स्तोकाल्पकृछ्रकतिपयेभ्योऽसत्ववचनेभ्यो भाके वक्तव्ये । स्तोकेन मुक्तः । स्तोकान्मुक्तः । अल्पेन मुक्तः । अल्पान् मुक्तः । कृछ्रेण मुक्तः । कृछ्रान्मुक्तः । कतिपयेन मुक्तः । कतिपयान्मुक्तः । असत्ववचनेभ्य इति किम्। स्तोकेन विषेण हतः । नेदम् वक्तव्यम् । विवक्षातः कारकाणि भवन्ति इत्युभयं सिद्धम् । क्रियाविशेषणविवक्षायां भाके न भवतः । स्तोकं चलति । अल्पं जल्पति ॥

दूरान्तिकार्थैस्ता च ॥ ४२ ॥

केति वर्तते । दूरार्थैरन्तिकार्थैश्च ग्रामस्य युक्ते तावि-भक्ती भवति का च। दूरं ग्रामस्य । दूरं ग्रामात्। विप्रकृष्ट ग्रामस्य । विप्रकृष्टेन ग्रामात् । अन्तिकं ग्रामस्य । अन्तिकं ग्रामात् । अभ्यासं ग्रामस्य । अभ्यासं ग्रामात् ॥

तेभ्य इप् च ॥ ४३ ॥

तेभ्यो दूरान्तिकार्थेभ्य इङ्विभक्ती भवति का च। दूरं ग्रामस्य। दूराद् ग्रामस्य। विप्रकृष्टं ग्रामस्य। विप्रकृष्टाद् ग्रामस्य। अन्तिकं ग्रामस्य। अन्तिकाद् ग्रामस्य। समीपं ग्रामस्य। समीपाद् ग्रामस्य। कानुवर्तनादेव सिद्धा। चकारोऽनुक्तसमुच्चयार्थः। तेन भाषि भवति। दूरेण ग्रामस्य। अन्तिकेन ग्रामस्य। असत्ववचनेभ्य इति वक्तव्यम्। इह मा भूत्। दूरात् पथ आगतः। दूरस्य पथः शंवलम्। अन्तिका ग्रामाः। यद्यसत्ववचनेभ्य इत्युच्यते इङ्विधानमनर्थकम्। लिङ्गमशिष्यं लोकाश्रयत्वात्। नपुंसके सारम्भावेन सिद्धम्। इदं प्रयोजनं सपूर्वाया वाया इत्येष विकल्पो मा भूत्। ग्रामो दूरं त्वा पश्यति। ग्रामो दूरं मा पश्यति॥

ईवधिकरणे च ॥ ४४ ॥

ईङ्विभक्ती भवति अधिकरणे कारके दूरान्तिकार्थेभ्यश्च। कटे आस्ते। शयने शेते। दूरान्तिकार्थेभ्यः। दूरे ग्रामस्य। विप्रकृष्टे ग्रामस्य। अन्तिके ग्रामस्य। समीपे ग्रामस्य। क्तस्येन्विषयस्य कर्मणीब् वक्तव्या॥ अधीति व्याकरणे। अधीतमनेन व्याकरणमित्यस्मिन्नर्थे इषादेरितीन्। एवमाम्नाती छन्दसि। परिगणितो ज्योतिषि। निमित्तात् कर्मसंयोगे इब् वक्तव्या। चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्। केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः। नेदं बहु वक्तव्यम्। ईबिति योगविभागात् सिद्धम्॥

यद्भावाद्भावगतिः ॥ ४५ ॥

भावः क्रिया। ईविति वर्तते। यस्य भावाद्भावान्तर-

गतिर्भवति तत्र इब् भवति । गोसु दुह्यमानासु गतः । दुग्धा-स्वागतः । अत्र प्रसिद्धेन गोदोहनभावेन गमनक्रिया लक्ष्यते । एवं देवार्चनायां क्रियमाणायां गतः । कृतायामा-गतः । इह बदरमात्रेष्वाम्रेषु गतः एकेष्वागतः । सामर्थ्या-ज्जातेष्विति प्रतीयते । यद्भावादिति किम् । यो जटाभिः स भुङ्क्ते जटाद्रव्यम् । पुनर्भावग्रहणं किम् । यो भुक्त-वान् स देवदत्तः ॥

ता चानादरे ॥ ४६ ॥

अनादरो ऽवज्ञा । यद्भावाद् भावान्तरं गतिर्भवति तत्र ताविभक्ती भवति ईप् चानादरे गम्यमाने । देवदत्तस्य क्रोशतः प्राव्राजीत् । देवदत्ते क्रोशति प्राव्राजीत् । रुदतः प्राव्राजीत् । रुदति प्राव्राजीत् । अत्रावज्ञानेन क्रोशनेन प्रव्रजनभावो लक्ष्यते ॥

स्वामीश्वराधिपतिदायादसाक्षिप्रति-भूप्रसूतैश्च ॥ ४७ ॥

स्वामिन् ईश्वर अधिपति दायाद साक्षिन् प्रतिभू प्रसूत इत्येतैर्युक्ते तेपौ विभक्तयौ भवतः । गवां स्वामी । गोषु स्वामी । गवामीश्वरः । गोष्वीश्वरः । गवामधिपतिः । गोष्वधिपतिः । दायमादत्ते दायादः । प्र इतिनियमादन्य-स्मिन् गावप्राप्ते के अत एव निपातनात् कः । गवां दायादः । गवां साक्षी । गोषु साक्षी । गवां प्रतिभूः । गोषु प्रतिभूः गवां प्रसूतः । गोषु प्रसूतः चकारः किमर्थः । तेपोरनुवर्त-नार्थः । अन्यथा पूर्वत्र चानुकृष्टाया ईपोऽनुवृत्तिर्न स्यात् । उत्तरसूत्रयोरपि चकारस्येदमेव फलम् । प्रसूतयोगे ईव्रेव प्राप्ता इतरैर्योगे ता प्राप्ता ॥

कुशलायुक्तेन चासेवायाम् ॥ ४८ ॥

आसेवा मुहुर्मुहुः सेवा तात्पर्यं च । कुशल आयुक्त इत्येताभ्यां युक्ते आसेवायां गम्यमानायां तेपौ विभक्तयौ भवतः । कुशलो विद्याग्रहणस्य कुशलो विद्याग्रहणे । आयुक्तस्तपश्चरणस्य आयुक्तस्तपश्चरणे । आसेवायामिति किम् । आयुक्तो गौः शकटे । आकृष्य युक्त इत्यर्थः । अधिकरणलक्षणेयमीप् ॥

यतश्च निर्द्धारणम् ॥ ४९ ॥

जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्द्धारणम् । यतश्च निर्द्धारणं ततस्तेपौ विभक्त्यौ भवतः । मनुष्याणां क्षत्रियः शूरतमः । मनुष्येषु क्षत्रियः शूरतमः । नारीणां श्यामा दर्शनीयतमा । नारीषु श्यामा दर्शनीयतमा । अध्वगानां धावन्तः शीघ्रतमाः । अध्वगेषु धावन्तः शीघ्रतमाः । प्रपञ्चार्थमिदं समुदाये अवयवेऽन्तर्भूतः । अधिकरणविवक्षायामीप् सिद्धा अवयवसम्बन्धविवक्षायां तापि सिद्धा अतएवापादाने कापि भवति । गोभ्यः कृष्णा निर्द्धार्यते इति ॥

विभक्ते का ॥ ५० ॥

यतश्च निर्द्धारणमिति वर्तते भिन्नजातीयात् समुदायाद्गुणादिना पृथक्करणं विभक्तनिर्द्धारणं तत्र का विभक्ती भवति । पूर्वेण तेपोः प्राप्तयोरयमपवादः । माथुराः पाटलिपुत्रकेभ्य आढ्यतराः । दर्शनीयतराः । अयमस्मादधिकः अयमस्माद्विलक्षणः । इदमपि प्रपञ्चार्थम् । पाटलिपुत्रकाणामवधिभावेन बुद्धिं प्राप्तानामपादानत्वमस्ति ॥

साधुनिपुणेनाचार्यामीबप्रतेः ॥ ५१ ॥

साधु निपुण इत्येताभ्यां युक्ते अर्चायां गम्यमानायामीव्विभक्तो भवति प्रतिशब्दस्याप्रयोगे। मातरि साधुः। मातरि निपुणः। पितरि निपुणः। तापवादोऽयम्। अर्चायामिति किम्। साधुर्निपुणो वाऽभात्र्यो राज्ञः। अप्रतेरिति किम्। साधुर्देवदत्तो मातरं प्रति। प्रतिग्रहणमगतिसंज्ञानामभिपर्यतानासुपलक्षणम्। मातरमभि। मातरं परि। मातरमनु। कथमसाधुः पितरि। अनिपुणो मातरि। पूजाप्रयुक्तसाधुनिपुणप्रतिषेधोऽयम्।

प्रसितोत्सुकाभ्यां भा च ॥ ५२ ॥

प्रसित उत्सुक इत्येताभ्यां युक्ते भाविभक्तो भवति। ईप् च। केशैः प्रसितः। केशेषु प्रसितः। प्रसक्त इत्यर्थः। केशैरुत्सुकः। केशेषूत्सुकः। पक्षे भार्थमिदम्। ईवधिकरणत्वादेव सिद्धः॥

उसि भे ॥ ५३ ॥

ईवनुवर्तते भा च। उस्विषये भवाचिनि भेपौ विभक्त्यौ भवतः। भाद्युक्तः काल इत्यागतस्याणः उसभेद इत्युसि कृते यदा भवाचोशब्दः काले वर्तते तदा तस्माद्भा च ईप् च भवत इत्यर्थः। पुष्येण पायसमश्नीयात्। पुष्ये पायसमश्नीयात्। मघाभिः पललौदनम्। मघासु पललौदनम्। उसीति किम्। मघासु ग्रहः नात्र मघाशब्दः काले वर्तते। भ इति किम्। पच्चालेषु वसति। पच्चालस्यापत्यानि पच्चालाः तेषां निवासः पच्चालः। निवासार्थे आगतस्याणः जनपद उसित्युस्। इह कस्मान्न भवति। अद्य पुष्यः।

मिङैकार्थत्वात् चानुकृष्टाया ईपः कथमनुवृत्तिः ईबधिकारे सूत्रारम्भसामर्थ्यादत्राप्यधिकरणत्वादीप् सिद्धा पक्षे भार्थं वचनं यद्यधिकरणस्यापि करणविवक्षा यथा स्थाल्या पचति तदेदं प्रपञ्चार्थम् ॥

मिङैकार्थे वा प्रथमा ॥ ५४ ॥

मिङन्तेन पदेन एकार्थे वर्तमानान्मृदो वा विभक्तौ भवति । गौश्चरति । कुमारी तिष्ठति । ओदनः पच्यते । खारो मीयते । एकः । द्वौ । बहवः । इत्यत्रोक्तेष्वप्येकत्वादिषु भा भवतीत्युक्तप्रायम् । च वा ह उच्चैरित्येवमादिषु अनर्थकेषु च प्रादिषु मिङन्तेनैकार्थत्वाभावेऽपि सुपो भेरिति ज्ञापकाद्भवति । भावे वर्तमानेन मिङन्तेन स्वभावादन्येनैकार्थत्वं नास्ति । आस्यते देवदत्तेन नन्वेकत्वादिविशिष्टेषु कर्मादिषु कर्मादिविशिष्टेषु वा एकत्वादिषु इबादिनां नियमात् परिशेषात् वृक्षः प्लक्ष इत्येवमादिषु वादिषु च ङ्याम्मृद इत्यनेनैव वायाः सिद्धत्वादनर्थकमिदं नानर्थकम् । एकद्विबहुवचनानां व्यतिकरनिवृत्त्यर्थं वायास्तायाश्च विषयभेदार्थं चेदं विसर्जनीयो विभाषा सन्देहनिवृत्त्यर्थम् ॥

सम्बोधने बोध्यम् ॥ ५५ ॥

सम्बोधनमभिमुखीकरणं सम्बोधने या वा तस्या बोध्यामित्येषा संज्ञा । सम्बोधनेऽपि मिङैकार्थत्वमस्ति इति पूर्वेण वाविधानम् । हे देवदत्त आगच्छ । हे देवदत्तौ । हे देवदत्ताः । हे पचन् । हे पचमान । सम्बोधन इति शत्रशानौ बोध्यसंज्ञाप्रयोजनम् । बोध्यमसद्भदित्येवमादि ॥

एकः कि ॥ ५६ ॥

बोध्यसंज्ञायां वाचा एकवचनं किसंज्ञं भवति । हे कन्ये । हे वटो । किप्रदेशाः केरेङ इत्येवमादयः ॥

ता शेषे ॥ ५७ ॥

कर्मादिकारकाणां अविवक्षा कर्मादिभ्योऽन्यो वा मृदर्थातिरेकः स्वस्वामिसंबन्धादिः शेषः । ता विभक्ती भवति शेषे अर्थविशेषे । नटस्य शृणोति । ग्रन्थिकस्य शृणोति । स्वस्वामिसम्बन्धसमीपसमूहविकारावयवस्थानादयस्तार्थाः । राज्ञः स्वम् । मद्राणां राजा । देवदत्तस्य समीपम् । यवानां राशिः । यवानां धानाः । देवदत्तस्य हस्तः । गोः स्थानम् । शेषग्रहणं किम् । इवादयो नियताः कर्मादयस्त्वनियतास्तेभ्यस्ता मा भूत् ॥

ज्ञोस्वार्थैकरणे ॥ ५८ ॥

स्वार्थोऽवबोधनं तत्पर्युदस्यतो जानातेरस्वार्थे वर्तमानस्य करणे ताविभक्ती भवति । सर्पिषा जानीते । पयसा जानीते । सर्पिषा करणभूतेन अवेक्षते प्रवर्तते वा इत्यर्थः । ज्ञोपह्नवेधेरिति द्विविधिः करणस्य शेषत्वविवक्षायामविवक्षायां च तैव भवति । अस्वार्थ इति किम् । स्वरेण पुत्रं जानाति ॥

स्मर्थदयेशां कर्मणि ॥ ५९ ॥

शेष इति वर्तते स्मृ इत्यनेन समानार्थानां धृनां दय ईश इत्येतयोश्च कर्मणि शेषत्वेन विवक्षिते ता विभक्ती भवति । मातुः स्मरति । पितुरध्येति । सर्पिषा दयते । सर्पिष ईष्टे । कर्मणीति किम् । मातुर्गुणैः स्मरति । शेष इत्येव

मातरं स्मरति । यद्येवं नार्थोऽनेन ता शेष इत्येव सिद्धम् । लादेसेनभेति प्रतिषेधोऽपि कर्तृकर्मणोः कृतीत्येतस्याः प्राप्तेरनन्तरत्वात् नापि प्रतिपदमिति सविधिप्रतिषेधार्थं नेयं प्रतिपदविधाना ता वृत्तिरपि दृश्यते अर्थानुस्मरणं धर्मानुचिन्तनम् । एवं तर्हि कर्मणः शेषत्वेन विवक्षितत्वादकर्मकत्वोपपत्तेर्लक्ष्यलक्षणार्थाः भावे सिद्धा भवन्ति । मातुः स्मर्यते । मातुः स्मर्तव्यम् । सकर्मकविवक्षायां कर्मणि भवन्ति । माता स्मर्यते । माता स्मर्तव्या ॥

प्रतियत्ने कृञः ॥ ६० ॥

करोतेः कर्मणि ताविभक्तौ भवति प्रतियत्ने गम्यमाने । असतोऽर्थस्य प्रादुर्भावाय सतो गुणान्तराधानाय समीहा प्रतियत्नः । एधो दकस्योपस्कुरुते । काण्डं गुणस्योपस्कुरुते । गन्धनावक्षेपादिना दः । प्रतियत्न इति किम् । कटं करोति । बुद्ध्या शेष इत्येव एधो दकमुपस्कुरुते ॥

रुजर्थस्य भाववाचिनोऽज्वरिसन्तापेः ॥ ६१ ॥

रुजर्थानां धूनां भावकर्तृकाणां कर्मणि ता विभक्तौ भवति ज्वरिसन्तापी वर्जयित्वा । चोरस्य रुजति रोगः । रुजर्थस्येति किम् । एतिजीवेतिमानदः । गत्यर्थेभ्यो भाववाचिन इति किम् । श्लेष्मा मधुराशिनं रुजति । अज्वरिसन्तापेरिति किम् । आधूनं ज्वरयति ज्वरः । घटादित्वात् प्रादेशः । अत्याशिनं सन्तापयति ज्वरः । शेष इत्येव । चोरं रुजति ॥

आशिषि नाथः ॥ ६२ ॥

आशीःक्रियस्य नाथः कर्मणि ता विभक्तौ भवति । सर्पिषो नाथते । पयसो नाथते । सर्पिर्मे भूयात् इत्यर्थः ।

आशिषि नाथ इत्युपसंख्यानेन दविधिः । आशिषीति किम् । माणवकमुपनाथति अङ्ग पुत्राधीष्वेति । शेष इत्येव सर्पिर्नाथते ॥

जासनिप्रहणनाटक्राथपिषां हिंसायाम् ॥ ६३ ॥

जास निप्रहण नाट क्रथ पिष इत्येतेषां हिंसाक्रियाणां कर्मणि ता विभक्ती भवति । जस ताडन इति चौरादिकः । चोरस्योज्जासयति । वृषलस्योज्जासयति । जसु मोक्षण इत्येतस्य दैवादिकस्याहिंसार्थत्वादग्रहणम् । जास इति कृतदीत्वोच्चारणं किम् । प्रादेशे मा भूत् । दस्युमजीजसम् । निप्रहण इति निप्रयोः समुदितयोः व्यस्तयोर्विपर्यस्तयोर्ग्रहणम् । चोरस्य निप्रहन्ति । चोरस्य निहन्ति । चोरस्य प्रहन्ति । चोरस्य प्रणिहन्ति । नट अवस्यन्दने । चुरादिः चोरस्योन्नाटयति । दीत्वोच्चारणं किम् । दस्यु मेऽनीनटत् । स्रथक्रथ क्लथ हिंसार्थाः । हेतुमतीति णिच् । चोरस्योत्क्राथयति दीत्वं हि क्विन्दस्यामूचिक्रथत् । घटादित्वेऽपि निपातनाद्डुः स्रादेशबाधनार्थं च । चोरस्य पिनष्टि । वृषलस्य पिनष्टि । हिंसायामिति किम् । धानाः पिनष्टि । प्रोष इत्येव । चौरं निहन्ति । रूजर्थत्वादेतेषामपीति चेदभावकर्तृकार्थवचनं चोरस्योज्जासयति राजा ॥

व्यवहृपणोः सामर्थ्ये ॥ ६४ ॥

सामर्थ्ये समानार्थत्वं व्यवहृ पण इत्येतयोः सामर्थ्ये स्तुतिकर्मणि ता भवति क्रयविक्रये द्यूते च सामर्थ्यम् । शतस्य व्यवहरते । सहस्रस्य व्यवहरते । सहस्रस्य पणते । आयः कस्मान्न भवति गुपादिभिः साहचर्यात् भौवादिकस्य स्तुत्यर्थस्य तत्र ग्रहणम् । इह तु तौदादिकस्यानुदात्तेतः । सामर्थ्य-

इति किम् । शलाकां व्यवहरति । गणयतीत्यर्थः । देवान् पणयति । शेष इत्येव । शतं व्यवहरति । सहस्रं पणयते ॥

दिवश्च ॥ ६५ ॥

व्यवहृपणोः सामर्थ्य इति वर्तते । दिवश्च व्यवहृपणिसमानार्थस्य कर्मणि ता भवति । शतस्य दीव्यति । सहस्रस्य दीव्यति । चकारः किमर्थः सामर्थ्यानुकर्षणार्थः । ननु विकारादेव सामर्थ्यग्रहणमनुवर्तते ऽन्यथा चानुकृष्टमुत्तरत्र च वानुवर्तते वागावित्यत्र सामर्थ्यानुवृत्तिर्न स्यात् अनुक्तसमुच्चयार्थस्तर्हि क्वचिदन्यस्यापि प्रयोगे यथा स्यात् सक्तूनां पूर्णः । ओदनस्य तृप्तः सामर्थ्य इत्येव । साधून् दीव्यति ॥

वा गौ ॥ ६६ ॥

सामर्थ्य इति वर्तते । गिपूर्वस्य दिवः कर्मणि वा ता विभक्तौ भवति । शतस्य प्रदीव्यति । सहस्रस्य प्रतिदीव्यति । सहस्रं प्रदीव्यति । इयं पूर्वेण प्राप्ते विभाषा । ननु शेषविवक्षया तापि भविष्यति इति व्यर्थमिदम् । एवं तर्हि इदमेव ज्ञापकं अंगिपूर्वस्य शेषविवक्षा नास्ति इति । शतस्य दीव्यति । सामर्थ्य इत्येव । शलाकां प्रतिदीव्यति ॥

कालेऽधिकरणे सुजर्थे ॥ ६७ ॥

काले ऽधिकरणे ता विभक्तौ भवति सुजर्थे त्ये प्रयुक्ते । द्विरन्होऽधीते । त्रिरन्होधीते । पञ्चशरान् भुङ्क्ते । संख्याया ध्वभ्यावृत्तौ कृत्वसिति कृत्वस् । द्वित्रिचतुर्भ्यः सुजिति सूच् । काल इति किम् । द्विःकांसपात्र्यां भुंक्ते अधिकरण इति किम् । द्विरन्हो भुंक्ते । सुजर्थ इति किम् । अह्नि भुंक्ते । रात्रौ भुंक्ते । न त्वत्रापि द्विः त्रिर्वेति सुजर्थो गम्यते । प्रयुक्तग्रहणं

दूरादनुवर्तते तेन गम्यमाने सुजर्थे न भवति। शेष इत्येव। द्विरङ्ग्रहणं कृतीते ॥

कर्तृकर्मणोः कृति ॥ ६८ ॥

कृति प्रयुक्ते कर्तरि कर्मणि च ता विभक्ती भवति। अनुक्त इति वर्तते । भवत आस्तिका। भवतः शायिका। स्त्रीलिङ्गे भावे पर्यायार्हणोत्पत्तौ वुणिति वुण् । यवानां लावकः। ओदनस्य भोजकः। विश्वस्य ज्ञाता। तीर्थस्यकर्ता। कृतीति किम् । ओदनं पचति । ननु नञ्भिरित्यादिनाऽत्र प्रतिषेधो भविष्यति एवं तर्हि हृति मा भूत् । कृतपूर्वी कटम्। कृतं पूर्वमनेन इन् पूर्वात् सपूर्वादितीन्। पुनः कर्मग्रहणादिह शेषस्य ग्रहणं नाभिसम्बध्यते ॥

द्विप्राप्तौ परे ॥ ६९ ॥

पूर्वसूत्रविन्यासापेक्षया परशब्देन कर्माभिप्रेतम्। द्विप्राप्तौ कृति पर एव कर्मणि ता विभक्ती भवति न कर्तरि। आश्रयो गवां दोहोऽगोपालकेन। रोचते मे ओदनस्य भोजनं देवदत्तेन। साधु खलु पयसः पानं जिनदत्तेन। द्वयोः प्राप्तिर्यस्मिन् कृतीति व्यधिकरणस्य वसस्याश्रयणाद् भिन्ने कृति नियमो न भवति। आश्रयमिदमतिथीनां प्रादुर्भावः ओदनस्य च नाम पाकः। अकाकारयोः प्रयोगे नेति वक्तव्यम्। भेदिका देवदत्तस्य काष्ठानाम्। चिकीर्षा जिनदत्तस्य काव्यानाम्। अकारग्रहणेन निरनुबन्धकस्य अस्त्यादित्यस्यैव ग्रहणम्। शेषे विभाषा। अकाकारापेक्षया शेषस्य स्त्रीत्यस्य ग्रहणम् । विचित्रा सूत्रस्य कृतिराचार्यस्य

आचार्येण वा । केचिदविशेषेणेच्छन्ति । विचित्रं शब्दानुशासनमाचार्यस्य आचार्येण वा ॥

क्तस्याधिकरणे ॥ ७० ॥

अधिकरणे यः क्तस्तस्य प्रयोगे ता विभक्ती भवति । अधिकरणे नाद्यर्थाचेति अद्यर्थेभ्यो धिभ्यो गत्यर्थेभ्यश्च क्तो वक्ष्यति तस्य प्रयोगे कर्तृकर्मणोः कृतीति ता प्राप्ता नभिहितेत्यादिना प्रतिषिद्धा पुनः प्रसूयते । इदमेषामाशितम् । इदमेषां भुक्तम् । इदमेषामासितम् । इदमेषां शयितम् । इदमेषां तृप्तम् । इदमेषां पराक्रान्तम् । एषामिति कर्त्तरिता । अधिकरणस्य क्तेनोक्तत्वादिदंशब्दादीन्न भवति । अधिकरणे चेत्यत्र चकारेण यथा प्राप्तः समुच्चीयते । कर्त्तरि इहेमे आसिताः । भावे इह एभिरासितम् । शेषविवक्षायमिह एषामासितम् । एवं सर्वत्र योज्यम् ॥

भवति ॥ ७१ ॥

भवति काले विहितस्य क्तस्य प्रयोगे ता विभक्ती भवति । अयमपि प्रतिषेधापवादः । राज्ञां मतः । राज्ञां बुद्धः । सतां पूजितः । मतिबुद्धिपूजार्थाचेति सम्प्रतिकाले क्तः । शेषविवक्षायां यद्यपि ता सिद्धा तथापि कर्तृक्रियाविवक्षायां भावाधनार्थमिदम् । सम्प्रतिकाले चकारेण लब्धेषु शीलितादिषु प्रयुक्तेषु ता नेष्यते । देवदत्तेन शीलितः । कथं मयूरस्य नृत्तं छात्रस्य हसितमिति शेषविवक्षयेदम् । कर्तरि तु मयूरेण नृत्तम् । छात्रेण हसितम् ॥

न भितलोकखार्थतृनाम् ॥ ७२ ॥

भि त ल उ उक खार्थ तृन् इत्येतेषां प्रयोगे ता विभक्ती

न भवति। कर्तृकर्मणोः कृतीति तायाः प्राप्तायाः प्रतिषेधोऽयम्। भि । कटं कृत्वा । कटं कर्तुम् । तसंज्ञा । देवदत्तेन कृतम् । देवदत्तः कटं कृतवान् । ल । कटं कुर्वन् । कटं कुर्वाणः। अनूषिवान् श्रीदत्तं धान्यसिंहः । करं कारयामास धर्म दधि श्रित्तम् । सहिवहिवलियतीनामिर्यङ इत्यधिकृत्य धाञ्कसृजनितनिडपो लिड्वदित्युपसंख्यानेन शीलादिष्वर्थेषु इत्यियं त्यो भवति। कटं चिकीर्षुः। ओदनं बुभुक्षुः । कन्यामलङ्करिष्णुः । उक । आगामुको वाराणसीम् । उकप्रतिषेधे कमेरप्रतिषेधः । दास्याः कामुकः । खार्थः । सुकरः कटो भवता । सुपीतं पयो भवता । तृन्निति प्रत्याहारः शतृशानावित्यत आरभ्य तृनो नकारेण । धान्यं पवमानः। अधीयन् जैनेन्द्रम् । पूङ्यजोः शान इति शानः । धारीङः शत्रकृच्छिणीति शतृत्यः । कर्त्ता कटान् । वदिता जनापवादान् । शीलाद्यर्थे तृन्निति तृन् । द्विषः शतुर्वा वचनम् । चौरं द्विषन् । चोरस्य द्विषन् । द्विषोऽराविति शतृत्यः ॥

वर्त्स्यत्वकस्य ॥ ७३ ॥

वर्त्स्यति काले विहितस्याकस्य योगे ता विभक्तो न भवति । कटं कारको व्रजति । ओदनं भोजको गच्छति । वुरातुमौ क्रियायामिति वुण् । वर्त्स्यतीति किम् । ओदनस्य भोजकः । वर्त्स्यतीति विहितस्याकस्य ग्रहणं भवति । वर्षशतस्य पूरकः । पुत्रपौत्राणां दर्शकः ॥

आधमर्ण्ये षेनः ७४ ॥

आधमर्ण्ये वर्त्स्यति च काले विहितस्येनः प्रयोगे ता विभक्ती न भवति । शतं दायी । सहस्रं दायी । आवश्य-

काधमर्ण्येऽर्णिनिति णिन् । वर्त्स्यति । गमी ग्रामम् । आगामी नगरम् । गम्यादिर्वर्त्स्यतीति वर्त्स्यतिकाले साधुत्वम् । आधमर्ण्ये चेन इति किम् । अवश्यं कारी कटस्य । आवश्यके ऽर्थे कालसामान्ये णिन् ॥

व्यस्य वा कर्त्तरि ॥ ७५ ॥ ॥

व्यसंज्ञस्य प्रयोगे कर्तरि वा ता विभक्तो भवति । भवतः कटः कर्तव्यः । कर्तृकर्मणोः कृतीति ता प्राप्ता विभाष्यते । कर्त्तरीति किम् । गेयो माणवको गाथानाम् । भव्यगेयादिसूत्रे कर्त्तरि गेयशब्दो निपातितः । अत्र कर्मणि नित्यं ता भवति । इह कस्मात्ता न भवति कृष्या ग्रामं शाखा देवदत्तेन । नेतव्या ग्राममजा देवदत्तेन । वेति व्यवस्थितविभाषा । तेन द्विप्राप्तौ पर इत्यस्यास्ताया व्यप्रयोगे प्रतिषेध एव ॥

भा ऽतुलोपमाभ्यां तुल्यार्थैः ॥ ७६ ॥

वेति वर्तते । अतुलोपमाशब्दाभ्यां अन्यैस्तुल्यार्थैः शब्दैर्युक्ते वा भाविभक्तौ भवति । तुल्यो देवदत्तेन । तुल्यो देवदत्तस्य । पक्षे शेषलक्षणा ता । अतुलोपमाभ्यामिति किम् । नास्ति तुला देवदत्तस्य । उपमा नास्ति सनत्कुमारस्य ॥

अप् चाशिष्यायुष्यमद्रभद्रकुशलसुखहितार्थैः ॥ ७७ ॥

वेति वर्तते । वा अव्विभक्तौ भवति आशिषि गम्यमानायाम् । आयुषो निमित्तं संयोगः । निमित्तं संयोगो-

त्पादौ यो संख्यापरिमाणत्वादेरिति यः। आयुष्य भद्र भद्र कुशल सुख हित इत्येवमर्थैर्युक्ते। आयुष्यमिदमस्तु देवदत्ताय देवदत्तस्य वा। चिरमस्तु जीवितं देवदत्ताय देवदत्तस्य वा। भद्रं भवतु जिनशासनाय जिनशासनस्य वा। भद्रं देवदत्ताय देवदत्तस्य वा। कुशलं साधुभ्यः कुशलं साधूनाम्। निरामयं साधुभ्यः। निरामयं साधूनाम्। सुखं साधुभ्यः। सुखं साधूनाम्। शमस्तु साधुभ्यः। शमस्तु साधूनाम्। हितं देवदत्ताय। हितं देवदत्तस्य। पथ्यं देवदत्तस्य। तापञ्चे शेषलक्षणा ता। चकारः किमर्थः। अर्थार्थैरपि योगे यथा स्यात्। अर्थो देवदत्ताय। अर्थो देवदत्तस्य। प्रयोजनं देवदत्ताय। प्रयोजनं देवदत्तस्य। तापञ्चे वृत्तिर्न भवति अगमकत्वात्। न हि वृत्त्याऽऽशीर्गम्यते। आशिषीति किम्। आयुष्यं देवदत्तस्य। अत्र नाप्॥

प्राणितूर्यसेनाङ्गानां द्वन्द्व एकवत्॥ ७८॥

प्राण्यङ्गानां तूर्याङ्गानां सेनाङ्गानां च द्वन्द्व एकवद्भवति। एकार्थवद्भवतीति अर्थनिर्देशाद्विशेषणानामपि तद्वत्ता। पाणी च पादौ च पाणिपादम्। दन्तोष्ठम्। शिरोग्रीवम्। यदि प्राण्यङ्गं प्राणिग्रहणेन गृह्यते अप्राणिजातेरिति प्रतिषेधे प्राप्ते अथ न गृह्यते तदा अप्राणिजातेरित्येव सिद्धे व्यतिकरनिवृत्त्यर्थं वचनं प्राण्यङ्गानामन्येन द्वन्द्वो मा भूत्। तूर्यम्। मार्दङ्गिकाश्च पाणविकाश्च मार्दङ्गिकपाणविकम्। सेना। रथिकाश्च अश्वारोहाश्च रथिकाश्वारोहम्। रथिकपादातम्। सेनाङ्गेषु बहुत्वे इति तेन रथिकाश्वारोहौ। हस्त्यश्वादिषु परत्वात् पशु विभाषा। यद्यप्यभिधानवशादिह समाहारे द्वन्द्वः दधिपय-

आदिषु इतरेतरयोगे तरुमृगादिषु उभयत्र तथापि तद्विषयविभागज्ञापनार्थमिदं प्रकरणम् ॥

चरणानामनूक्तौ ॥ ७९ ॥

चरणं कठादिप्रोक्तोऽध्ययनविशेषः । तद्यदा पुरुषेष्वध्येतृषु वर्तते तदेह गृह्यते अनूक्तिरनुवादः । चरणानां द्वन्द्व एकवद्भवति अनूक्तौ । स्थेणोर्लुङन्तयोः प्रयोगे चेदमिष्यते । उदगात् कठकालापम् । प्रत्यष्ठात् कठकौथुमम् । अनूक्ताविति किम् । उदगुः कठकालापाः । प्रथमोपदेशोऽयम् । कठेन प्रोक्तमधीयते कठाः । प्रोक्तार्थे सौमकादिभ्यश्छन्दसि णिनिति णिन् । तस्य कठचरणादुवित्युप् अध्येतृविषयस्याणः उप् प्रोक्तादित्युप् । कलापिना प्रोक्तमधीयते कालापाः । प्रोक्तार्थे कलापिनोऽण् । टिलुप् । परस्याण उप्प्रोक्तादित्युप् । छन्दो ब्राह्मणानि चात्रैवेति अध्येतृविषयता ॥

अध्वर्युक्रतुरनपुंसकलिङ्गो द्वन्द्वमेकवद्भवति ॥ ८० ॥

अध्वरमिच्छन्ति अध्वर्यवो यजुर्वेदविदः । अत एव निपातनात् क्यच्यकारस्य खम् । क्यजन्तस्य उश्च त्यः । अध्वर्युक्रतुरनपुंसकलिङ्गो द्वन्द्वमेकवद्भवति । येषां क्रतूनां यजुर्वेदशाखासु लक्षणं प्रयोगश्च शिष्यते प्राधान्येन तेषामध्वर्युक्रतूनामनपुंसकलिङ्गानां द्वन्द्व एकवद्भवति इत्यर्थः । अर्कश्च अश्वमेधश्च अर्काश्वमेधम् । त्रायाह्नातिरात्रम् । पौण्डरीकातिरात्रम् । अध्वर्युक्रतुरिति किम् । पञ्चौदनदशौदनाः । इषुवज्रौ । उद्भिद्बलभिदौ । एते सामवेदविहिताः । अनविति किम् । राजसूयं च वाजपेयं च राज-

सूयवाजपेये । इह कस्मान्न भवति दर्शपौर्णमासौ । दधिपय-आदिषु द्रष्टव्यः ॥

अधीत्या ऽदूराख्यानाम् ॥ ८१ ॥

आख्या नामधेयम् । अधीत्या निमित्तभूतया अदूराख्यानां द्वन्द्व एकवद्भवति । पदमधीते पदकः । क्रममधीते-क्रमकः । पदक्रमकम् । क्रमकवार्त्तिकम् । पदाध्ययन-स्यासन्नं क्रमाध्ययनम् । अधीत्येति किम् । आढ्यदरिद्रौ । अदूराख्यानामिति किम् । याज्ञिकवैयाकरणौ । यज्ञमधीते याज्ञिकः ॥

अप्राणिजातेः ॥ ८२ ॥

अप्राणिजातिवाचिनां द्वन्द्व एकवद्भवति । आराश-स्त्रि । धानाशष्कुलि । युगवरत्रम् । अप्राणिग्रहणं किम् । गौपालिशालङ्कायनाः । गोत्रं चरणैः सहेति जातिः । जाते-रिति किम् । हिमवद्विन्ध्यौ । नन्दकपाञ्चजन्यौ । संज्ञा-शब्दा एते । नञ्सदृशसम्प्रत्ययहेतुः । तेन द्रव्यजातीनामेक-वद्भावादिह न भवति । रूपरसगन्धस्पर्शाः । गमनाग-मने । जातेरविवक्षायां न भवति । बदरामलकानि तिष्ठन्ति ॥

भिन्नलिङ्गो नदीदेशो ऽग्रामो ऽपुरम् ॥ ८३ ॥

भिन्नलिङ्गानां नदीदेशवाचिनामग्रामाणामपुराणां द्वन्द्व एकवद्भवति । नदी । उद्धश्चेरावती च उद्धचेरावति । विपाड्झतुद्रि । गङ्गाशोणम् । देशाः । कुरवश्च कुरु-क्षेत्रं च कुरुकुरुक्षेत्रम् । कुरुकुरुजाङ्गलम् । दर्वाश्च अभि-सारं च दार्वाभिसारम् । काश्मीराभिसारम् । भिन्न-लिङ्ग इति किम् । गङ्गायमुने । मद्रकेकयाः । नदीदेश

इति किम् । कुक्कुटमयूरौ । अग्राम इति किम् । जाम्बवश्च शालूकिनी च जाम्बवशालूकिन्यौ । ननु नद्यपि देश इति पृथग्ग्रहणं किमर्थम् । ज्ञापकार्थं जनपदो देशोऽभिप्रेतो न नदीपर्वतादिः । तेनेह नैकवद्भावः । कैलासश्च गन्धमादनं च कैलासगन्धमादने । अपुरमिति किम् । लोके ग्रामग्रहणेन पुरमपि गृह्यते ततोऽपुरमिति प्रतिषेधः । मथुरापाटलिपुत्रम् । अग्राम इति प्रसज्यप्रतिषेधः । तेन यत्र पुरग्रामयोर्द्वन्द्वस्तत्रापि नैकत्वम् । नासौर्यकैतवौ पुरग्रामौ ॥

क्षुद्रजीवाः ॥ ८४ ॥

इहाल्पशरीरः क्षुद्रः । क्षुद्रजीवानां द्वन्द्व एकवद्भवति । क्षुद्रजीवाश्चयो द्वन्द्व उपचारात् क्षुद्रजीवा इति निर्देशः । यूकालिक्षम् । शतस्वश्च उत्पादकाश्च शतशूत्पादकम् । दंशमशकम् । क्षुद्रजीवा अकङ्काला येषां स्वं नास्ति शोणितम् । नाञ्जलिर्यत्सहस्रेण केचिदानकुलादपि । केचित् शब्दः प्रत्येकमभिसंबध्यते । क्षुद्रजीवा इति बहुवचननिर्देशात् द्वित्वविषये नेदमिति यूकालिक्षौ । दंशमशकौ ॥

येषाञ्च द्वेषः शाश्वतिकः ॥ ८५ ॥

द्वेषोऽप्रीतिः । येषां च द्वेषः शाश्वतिकस्तद्वाचिनां द्वन्द्व एकवद्भवति । शश्वद्भवः शाश्वतिकः । कालाट्ठञिति ठञ् निपातनादिकादेशः । झेर्भमात्रे टिखमिति खं च न भवति । अहिनकुलम् । श्वावराहम् । अन्यस्यापि दीत्वम् । शाश्वतिक इति किम् । गोपालशालङ्कायनाः केन चिन्निमित्तेन कलहायन्ते । चकारोऽवधारणार्थः । अयमेव

नित्य एकवद्भावो यथा स्यात् पश्वादिविभाषा मा भूत् । अश्वमहिषम् । काकोलूकम् ।

वर्णेनार्हद्रूपायोग्यानाम् ॥ ८६ ॥

वर्णेनार्हद्रूपस्यायोग्यास्तेषां द्वन्द्व एकवद्भवति । येन रूपेणार्हन्त्यमवाप्यते । तदिह नैर्ग्रन्थ्यमर्हद्रूपमभिप्रेतम् । अतिशयोपेतस्यार्हद्रूपस्य प्रातिहार्यसमन्वितस्य बहुतरमयोग्यमिति नेह तद् गृह्यते । तक्षायस्कारम् । कुलालवरूढम् । रजकतन्तुवायम् । नन्वेतेष्वप्येकवद्भावः प्राप्नोति । चण्डालमृतपाः । न दधिपयआदिष्वन्तर्भूतो द्वन्द्वो द्रष्टव्यः । वर्णेनेति किम् । मूकबधिराः । एते करणदोषेणायोग्याः । अर्हद्रूपायोग्यानामिति किम् । ब्राह्मणक्षत्रियौ ।

गवाश्वादीनि च ॥ ८७ ॥

गवाश्वादीनि च गणपाठे द्वन्द्वरूपाणि च एकवद्भवन्ति । गवाश्वम् । गवैडकम् । गवाविकम् । अजाविकम् । पशुविभाषा प्राप्ता । कुब्जवामनम् । कुब्जकैरावतम् । पुत्रपौत्रम् । स्वचाण्डालम् । अद्वेषे स्त्रीकुमारम् । दासीमाणवकम् । शाटीपिच्छिकम् । इदं जात्यविवक्षायाम् । उष्ट्रखरम् । उष्ट्रशशम् । पशु विभाषा प्राप्ता । मूत्रशकृत् । मूत्रपुरीषम् । यकृन्मेदः । मांसशोणितम् । इमानि जात्यविवक्षायाम् । दर्भशरम् । दर्भपूतिकम् । अर्जुनपुरुषम् । तृणोपलम् । एतेषां तृणविकल्पः प्राप्तः । दासीदासम् । कुटीकुटम् । भागवती भागवतम् । एषां सरूपाणां लिङ्गमात्रकृतविशेषाणां निपातद्वन्द्वः । चकारोऽवधारणार्थः । गवाश्वादीनि पठितान्येवैकवद्भवन्ति नान्यथा गोरश्वौ गोऽश्वम् ॥

वा तरुमृगतृणधान्यव्यञ्जनपशुवयवडवपूर्वापराधरोत्तरपक्षिणः ॥ ८८ ॥

तरु-मृग-तृण-धान्य-व्यञ्जन-पशुविशेषवाचिनामश्व वडव-पूर्वापर-अधरोत्तर इत्येषां पक्षिविशेषाणां च द्वन्द्वो वा एकवद्भवति। प्लक्षन्यग्रोधम् । प्लक्षन्यग्रोधाः । आरण्या मृगाः । रुरुपृषतम् । रुरुपृषताः । कुशकाशम् । कुशकाशाः । व्रीहियवम् । व्रीहियवाः । दधिघृतम् । दधिघृते । ग्राम्याः पशवः । तृष्णिस्तभम् । तृष्णिस्तभाः । अश्ववडवम् । अश्ववडवौ । पर्यायनिवृत्त्यर्थं च अश्ववडवग्रहणम् । पूर्वापरम् । पूर्वापरे । अधरोत्तरम् । अधरोत्तरे । तित्तिरिकापिञ्जलम् । तित्तिरिकापिञ्जलाः । अत्रेषिः । सेनाङ्गफलक्षुद्रजीवतरुमृगतृणधान्यपक्षिणां प्रकृत्यर्थबहुले एकवद्भावः । तेन रथिकाश्वारोहौ बदरामलके । इदमेव ज्ञापकं अप्राणिजातेरित्यत्र न बहुवचनम् । अत एव विग्रहो ऽभिप्रेतः । यूकालिक्षे । प्लक्षन्यग्रोधौ । रुरुपृषतौ । कुशकाशौ । व्रीहियवौ । हंसचक्रवाकौ । वेति योगविभागोऽयम् । द्वन्द्वमात्रे कृतो भवेत् पूर्वो विधिस्तु नित्यार्थः तुल्यजात्यर्थ उत्तरम् । इह मा भूत् प्लक्षयवाः । हंसपृषताः ॥

विरोधि चानाश्रये ॥ ८९ ॥

वेति वर्त्तते । आश्रयो द्रव्यं विरोधो येषामस्ति तद्वाचिनामनाश्रयाभिधायिनां द्वन्द्वो भवति । विरोधीत्यामः स्वे कृते सौत्रो निर्देशः । सुखदुःखम् । सुखदुःखे । जननमरणम् । जननमरणे । शीतोष्णम् । शीतोष्णे । विरोधीति किम् । कामक्रोधौ । अनाश्रय इति किम् । सुखदुःखौ ग्रामौ ।

शीतोष्णे उदके । चकारादविरोधेऽपि । वधूवरम् । वधूवरौ । स्थावरजङ्गमम् । स्थावरजङ्गमे ।

न दधिपय आदीनि ॥ ९० ॥

दधिपय आदीनि द्वन्द्वरूपाणि नैकवद्भवन्ति । येन केनचित् प्राप्ते प्रतिषेधोऽयम् । दधिपयसी । सर्पिर्मधुनी । मधुसर्पिषी । व्यञ्जनत्वात् प्राप्तिः । ब्रह्मप्रजापती । शिववैश्रवणौ । स्कन्दविशाखौ । परिव्राजककौशिकौ । प्रवर्ग्योपसदौ । वेतिप्राप्तिः । शुक्लकृष्णौ । इध्मबर्हिषी । निपातनात् पूर्वस्य दीर्घत्वम् । योगानुवाके । दीक्षातपसी । अग्नातपसी । अध्ययनतपसी । उलूखलमूसले । आद्यावसाने । अग्नामेधे । ऋक्सामे । वाङ्मनसे । वेति योगविभागात् प्राप्तिः । चण्डालमृतपादयश्च ॥

अर्थैतावत्त्वे च ॥ ९१ ॥

एतावत्त्वमियत्ता । इत्ययवयवार्थानामेतावत्त्वे च द्वन्द्वो नैकवद्भवति । द्वादश मे मार्दङ्गिकपाणविकाः । चकारः प्रतिषेधानुकर्षणार्थः ॥

वा समीपे ॥ ९२ ॥

नेति निवृत्तम् । अर्थानामेतावत्त्वस्य समीपे वा द्वन्द्व एकवद्भवति । उपदशं दन्तोष्ठम् । उपदशा दन्तोष्ठाः । एकवद्भावपक्षे हसोऽनुप्रयुज्यते अन्यत्र वसः । हसे अन इति अः सान्तः । वसे तु डः ॥

स नपुं ॥ ९३ ॥

यस्यायमुक्त एकवद्भावः स नपुंसकं भवति । तथा चैवो-

दाहृतम् । समाहारे रसो नप् भवतीति वक्तव्यम् । पञ्चाग्नि । पञ्चवायु । अकारान्तप्रकरणे रादिति ङीविधानं ज्ञापकम् । अकारान्तोत्तरपदो रः स्त्रियां वर्तते इति । पञ्चपूली । षण्णगरी । वाबन्त इति वक्तव्यम् । पञ्चखट्वी । पञ्चखट्वम् । स्त्रीगोर्नीच इति प्रादेशः । अन्नन्तस्य नखं स्त्रियां वा वृत्तिः । पञ्चतक्षम् । पञ्चतक्षी । पात्रादिभ्यः प्रतिषेधः । पञ्चपात्रम् । त्रिभुवनम् । चतुर्युगम् । पञ्चगवम् । दशगवम् । गोरहदुपीति टः सान्तः ॥

हस्व ॥ ९४ ॥

हसंज्ञश्च नञ्भवति । अधिस्त्रि । उन्मत्तगङ्गम् । द्विमुनीदम् । प्रोनपीति प्रादेशार्थमनुप्रयोगार्थं च वचनम् । पूर्वपदार्थप्रधानस्यालिङ्गत्वं प्राप्तम् । अन्यत्राभिधेयवल्लिङ्गं प्राप्तम् । चकारोऽनुक्तसमुच्चयार्थः । तेन क्रियाविशेषणानां नपुंसकत्वं सिद्धम् । शोभनं पचति ॥

षोऽनञ्यः ॥ ९५ ॥

नञ्सं यञ्च वर्जयित्वा नञ्भवतीत्येतदधिकृतं वेदितव्यम् । ष इति पुंल्लिङ्गेन निर्देशः सौत्रः । वाच्यप्रकरणादन्यत्र कामचारो वा वक्ष्यति । सेनासुराच्छायाशालानिशा वेति । क्षत्रियसेना । क्षत्रियसेनम् । ष इति किम् । महती सेनाऽस्य महासेनः । अनञ्इति किम् । असेना । अय इति किम् । परमसेना ॥

खौ कन्योशीनरेषु ॥ ९६ ॥

खुदिषये कन्थान्तः षसो नञ्भवति उशीनरेषु चेत् सा कन्था । सौसमीनां कन्था सौसमिकन्थम् । आहरक-

न्थम् । आसमिकन्थम् । चर्मकन्थम् । एते उसीनरेषु ग्रामाः । विग्रहवाक्यं सादृश्यमात्रेण । खाविति किम् । वीरणकन्था । उसीनरेष्विति किम् । दर्भिकन्था । अन्यत्र ग्रामसञ्ज्ञेयम् ॥

उपज्ञोपक्रमं तदाद्युक्तौ ॥ ९७ ॥

उपज्ञायत इति उपज्ञा उपदेशः । उपक्रम्यत इति उपक्रमः प्रारम्भः । उपज्ञोपक्रम इत्येवमन्तः षसो नञ्भवति तयोरुपज्ञोपक्रमयोराद्युक्तौ गम्यमानायाम् । स्वायम्भुवस्योपज्ञा स्वायम्भुवोपज्ञमाकालिकाचाराध्ययनम् । देवोपज्ञमनेकशेषव्याकरणम् । कुरुराजस्योपक्रमः कुरुराजोपक्रमं दानम् । अकम्पनोपक्रमं स्वयंवरविधानम् । उपज्ञोपक्रममिति किम् । आदिदेवतपस्या तीव्रा । तदाद्युक्ताविति किम् । देवदत्तोपज्ञा । देवदत्तोपक्रमो गणिनम् । उत्तरपदस्य प्राधान्यबल्लिङ्गं ष इत्येव । सम्यगुपज्ञो भगवान् । स्वायम्भुवो यस्येदमाकालिकाचाराध्ययनं वाक्येन तदाद्युक्तौ गम्यमानायामिदम्प्रत्युदाहरणम् ।

छाया बहूनाम् ॥ ९८ ॥

बहूनां या छाया तदन्तः षसो नञ्भवति । इक्षूणां छाया इक्षुच्छायम् । सलभच्छायम् । बहूनामिति किम् । कुड्यस्य छाया कुड्यच्छायम् । कुड्यच्छाया । सेनासुरेत्यादिना विकल्पः । ष इत्येव । बहवः छाया अस्मिन्बहुच्छायो वनखण्डः ॥

सभा ऽराजामनुष्यात् ॥ ९९ ॥

अराज्ञः अमनुष्याच्च परा या सभा तदन्तः षो नञ् भवति । अराज्ञः । इनस्य सभा इनसभम् । ईश्वरस-

भम् । इन्द्रसभम् । पार्थिवसभम् । राजशब्दपर्युदासात् तत्पर्यायाणामत्र ग्रहणं न विशेषाणाम् । तेनेह न भवति । सातवाहनसभा । चन्द्रगुप्तसभा । अमनुष्यात् । रक्षसां सभा रक्षःसभम् । पिशाचसभम् । अमनुष्यशब्दस्य च रक्षःप्रभृतिष्वेव रूढत्वादिह न भवति । काष्ठसभा । पाषाणसभा । पक्वेष्टकासभा यद्येवं टगमनुष्य इत्यत्र कथम् । जायाघ्नस्तिलकः । पित्तघ्नं घृतम् । युद्ध्या बहुलमिति बहुलवचनात्तत्रान्यस्यापि ग्रहणम् । अराजा मनुष्यादिति किम् । राजसभा । देवदत्तसभा । ष इत्येव । ईश्वरा सभाऽस्य ईश्वरसभः ॥

अशाला ॥ १०० ॥

अशाला च या सभा तदन्तः षो नञ्भवति । गोपालसभम् । स्त्रीसभम् । अत्र समुदाये सभाशब्दः । अशालेति किम् । देशिकसभा ॥

सेनासुराच्छायाशालानिशा वा ॥ १०१ ॥

सेना सुरा छाया शाला निशा इत्येवमन्तः षो वा नञ्भवति । देवानां सेना देवसेनम् । देवसेना । पितृसुरम् । पितृसुरा । कुड्यच्छायम् । कुड्यच्छाया । गोशालम् । गोशाला । श्वनिशम् । श्वनिशा । चोरनिशम् । चोरनिशा । ष इत्येव । सूरसेनो राजा । अनञ्य इत्येव । असेना । परमसेना ॥

द्वन्द्वे बहुवल्लिङ्गम् ॥ १०२ ॥

द्वन्द्वे सर्वोरिव लिङ्गं भवति । इतरेतरयोगद्वन्द्वस्येह ग्रहणम् । तत्र सर्वेषामवयवानां प्राधान्यात् पर्यायेण समु-

दायलिङ्गे प्राप्ते वचनम् । कुक्कुटमयूर्यावित्रे रमणीये । मयूरीकुक्कुटावित्रौ । यथा हश्चेति नपुंसकलिङ्गातिदेशः संघातस्य भवति न चावयवस्य निवर्तकः । अधिस्त्रि । अधिकुमारीति एवमिहापि समुदाये लिङ्गातिदेशोऽनुप्रयोगार्थं क्रियमाणो नावयवस्य स्त्रीत्वस्य निवर्तकः । षसस्य द्युवल्लिङ्गातिदेशो न वक्तव्यः । विशेष्यवल्लिङ्गवचनानि भवन्ति विशेषणानामित्यनेनैव सिद्धत्वात् । ध्वर्थस्य तु विशेष्यत्वात् प्राधान्यम् । अर्द्धपिप्पली । अर्द्धकौशातकी शोभना । यत्र पूर्वपदार्थः प्रधानं तत्र पूर्ववल्लिङ्गमेव । यथा प्राप्तापन्नालम्पूर्वतिसलक्षणेषु । प्राप्ता जीविकां प्राप्तजीविकः । आपन्नजीविकः । अलं जीविकायै अलंजीविकः । निरादयः क्रान्ताद्यर्थे कथा । निष्क्रान्ता कौशाम्ब्या निष्कौशाम्बिः । हृदर्थे रसस्य अन्यपदार्थप्राधान्यादभिधेयवल्लिङ्गम् । पञ्चसु कपालेषु संस्कृतः पञ्चकपालः पुरोडासः ॥

अश्ववडवौ पूर्ववत् ॥ १०३ ॥

अश्ववडवयोरितरेतरयोगे पूर्ववल्लिङ्गं भवति । अश्वश्च वडवा च अश्ववडवौ । समुदाये लिङ्गातिदेशोऽनुप्रयोगार्थे पूर्ववल्लिङ्गनिवृत्तिर्नास्तीत्युक्तम् । कथं टापो निवृत्तिः । अश्ववडव इति निपातनात् । पूर्ववदिति किमर्थं अर्थातिशार्थम् । अश्ववडवाविति उच्यमाने वचनान्तरेन स्यात् अश्ववडवान् पश्य अश्ववडवै कृतः ।

रात्रान्हौ पुंसि ॥ १०४ ॥

रात्रअन्हशब्दौकृतसान्तौनिर्दिष्टौ एतौ पुंसि भवतः द्वयो रात्र्योः समाहारः द्विरात्रः । अहःसर्वैकदेशसंख्यात-

पुण्याच्च रात्रेरित्यः सान्तः । पूर्वमहः पूर्वाह्णः । अपराह्णः । पूर्वापरप्रथमेत्यादिना षसः । राजाहःसखिभ्यष् इति टे कृते एभ्योऽन्होन्ह इत्यन्हादेश उत्तरपदप्राधान्यात् स्त्रीनपुंसके प्राप्ते ॥

अहः ॥ १०५ ॥

अह इत्ययं च शब्दः पुंसि भवति द्व्यो रन्होः समाहारः द्व्यहः । त्र्यहः । न समाहार इत्यन्हादेशप्रतिषेधः । ठिखम् । अनुवाकादयश्चेति वक्तव्यम् । अनुवाकः सम्प्रवाकः सूक्तवाकः ॥

पुण्यसुदिनाभ्यां नप् ॥ १०६ ॥

पुण्यसुदिनाभ्यां परः अहशब्दो नञ्भवति पुण्यमहः पुण्याहम् । पुण्यग्रहणं सूत्रोपलक्षणं एकाहमिति च भवति । विशेषणसविधिः । पुण्यैकाभ्यामिति अह्नादेशप्रतिषेधः । सुदिनमहः सुदिनाहम् ॥

अपथम् ॥ १०७ ॥

अपथंशब्दो नञ्भवति । न पन्थाः अपथम् । पथो वा इति प्रतिषेधविकल्पः । ऋपूरव्धूःपथोऽनच् इति असान्तः ष इत्येव । न विद्यते पन्था अस्मिन् अपथो देशः । अपथा अटवी । ह्रिसंख्यादेरिति वक्तव्यम् । उत्पथम् । तिकुप्रादय इति षसः । त्रिपथच्चतुःपथमिति तासः ॥

पुंसि चार्द्धर्चाः ॥ १०८ ॥

अर्द्धर्चादयः शब्दाः पुंसि नपि च वेदितव्याः । अर्द्धर्चं च तत् ऋक् च सार्द्धर्चः । अर्द्धम् । गोमयकषायकार्षापणकुतपकवाटशङ्खादिपाठादवगमः कर्त्तव्यः शब्दरूपाश्रयाचेयं प्रणीतोभयलिङ्गता क्वचिदप्यर्थभेदेन शब्देषु व्यवतिष्ठते पद्मशङ्खशब्दौ निधिवचनौ पुंल्लिङ्गौ जलजे द्विलिङ्गौ

शो वा भवति। आवधिषृ। आवधिषाताम्। आवधिषत। आहत। आहसाताम्। आहसत। आङो यमहन इति दविधिः। हनः सिरिति सेः किित्वं कर्मणि। अवधि। अवधिषाताम्। अवधिषत। अिवद्भावे अघानि। अघानिषाताम्। अघानिषत।

लुङ्येत्योर्गाः ॥ ११७ ॥

लुङि परतः एत्योर्गा इत्ययमादेशो भवति। अगात्। अगाताम्। अगुः। अध्यगात्। अध्यगाताम्। अध्यगुः। स्थेणावेत्यादिना इण्वदिक इति च सेरुप् आत इति झेर्जुस् पुनर्लुङ्ग्रहणमिड्यपि नित्यार्थम्। अगायि भवता। अध्यगायि भवता। गात्रमिति गायतेः ॥

णौ गमज्ञाने ॥ ११८ ॥

णौ परत एत्योर्गमित्ययमादेशो भवत्यज्ञानेऽर्थे। गमयति। गमयतः। गमयन्ति। अनेकार्थत्वादिकोऽप्यज्ञाने वृत्तिः। अधिगमयति। अधिगमयतः। अधिगमयन्ति। उङोत इत्यैप्। जनीजृषक्नसुरञ्जोऽमन्ताश्चेति मित्वं जिनमोर्दीर्घितां प्र इति प्रादेशः। अज्ञान इति किम्। अर्थान् संप्रत्याययति।

सनि ॥ ११९ ॥

सनि च परत एत्योरज्ञानेऽर्थे गमित्ययमादेशो भवति। जिगमिषति। अधिजिगमिषति। गमेरिराम इति इट्। अज्ञान इत्येव। अर्थान् प्रतीषिषति। अच इति वर्तमाने सन्यङोरिति द्वितीयस्यैकाचो द्वित्वम्। णौगविभाग उत्तरार्थः।

इङः ॥ १२० ॥

सनि परत इङो गमित्ययमादेशो भवति । अधिजिगांसते । इङिकावधिगिं न व्यभिचरतः । इनिङ्गम्यर्षां सनीति दीत्वम्

गाङ् लिटि ॥ १२१ ॥

इङो गाङित्ययमादेशो भवति लिटि परतः । अधिजगे । अधिजगाते । अधिजगिरे । सेर्ह्यपिचेतिज्ञापकादादेशस्य ङित्वे गाङो ङित्करणं किमर्थम् । गाङ्कुटादेरङिदित्यत्र विशेषणार्थः । गायतेर्ग्रहणं मा भूत् । अगासीद्गाथकः इति ईत्वं प्रसज्येत ।

लुङ्लृङोर्वा ॥ १२२ ॥

लुङ्लङोः परत इङो वा गाङादेशो । भवति लुङि । अध्यगीष्ट । अध्यगीषाताम् । अध्यगीषत । गाङ्कुटादेरिति ङित्वं भुमास्थागेत्यादिनत्वम् । पक्षे अध्यैष्ट । अध्यैषाताम । अध्यैषत । लृङि अध्यगीष्यत । अध्यगीष्येताम् । अध्यगीष्यन्त । पक्षे अध्यैष्यत । अध्यैष्येताम् । अध्यैष्यन्त ।

णौ सन्क्ङोः ॥ १२३ ॥

णौ सनपरे कच्परे च परतः इङो वा गादेशो भवति । अध्यापयितुमिच्छति अधिजिगापयिषति । प्रकल्प्यापवादविषयं तत उत्सर्गोऽभिनिविशत इति गादेशपक्षे क्रीङ्जेर्णाविति आत्वं न भवति । अन्यत्र अध्यापिपयिषति । अच इति द्वितीयस्यैकाचो द्वित्वम् । कच्परे

अध्यजीगपत् । अन्यत्र अध्यापिपत् । माङ्योगे मा भवानध्यपिपदिति भवति । णौ कच्युङ इति प्रादेशे कृते द्वित्वं कथं ज्ञायते ओणतेः ऋदित्करणं ज्ञापकं यदि द्वित्वं प्रागेव स्यात् ओण उकारस्यानुङ्नतत्वात् प्रादेशप्रतिषेधार्थं ऋदित्करणमनर्थकं स्यात् ।

अस्तिब्रूञोर्भूवची ॥ १२४ ॥

अस्तिब्रूञित्येतयोर्यथासंख्यं भू वचि इत्येतावादेशौ भवतः । भविता । भवितुम् । भवितव्यम् । अस्तीति तिपा निर्देशः किमर्थः यस्य केवलस्य अस्तीति रूपं तस्य यथा स्यात् अनुप्रयोगस्य लिङ्परस्य मा भूत् । ईहामास । ब्रूञ् । वक्ता । वक्तुम् । वक्तव्यम् । वचेरिकार उच्चारणार्थः स्थानिवद्भावाद्दः । ऊचे ।

चक्षः ख्शाञ् ॥ १२५ ॥

चक्षः ख्शाञित्ययमादेशो भवति अगे । आख्शाता । आख्याता । ख्शो यो वा इति वा यकारादेशः । पर्याख्यानमित्यत्र यकारादेशस्यासिद्धत्वात् शकारेण व्यवहितत्वात् कृत्यच इति णत्वं न भवति । स्थानिवद्भावेन ङनुदात्तेतो द इति नित्यं दो मा भूत् इति ञि क्रियते ।

न वर्जने ॥ १२६ ॥

वर्जनेऽर्थे चक्षः ख्शाञादेशो न भवति । गां संचक्ष्व । वर्जयित्वेत्यर्थः । कण्टकाः संचक्ष्याः । नेति योगविभागादसि युचि च प्रतिषेधः । मृचक्षाः राक्षसः । विचक्षणः ।

वा लिटि ॥ १२७ ॥

लिटि परतो वा चक्षः ख्याञादेशो भवति । आचख्यौ । आचख्ये । आचचक्षे । पूर्वेण नित्ये प्राप्तेऽयमारम्भः ।

व्यजोऽघञचोः ॥ १२८ ॥

अजेर्धोः वी इत्ययमादेशो भवति अघञचोः परतः । अनुदात्तोऽयमादेशः । प्रवेता । प्रवायकः । अघञचोरिति किम् । समाजः । उदाजः । समजः । उदजः । पशुष्वजः समुदोरिति पशुविषयेऽच् अन्यत्र घञ् । अजिति सामान्यग्रहणं तेन पचादिलक्षणेऽप्यचि प्रतिषेधः । अजतीत्यजः ।

बहुलं खौ ॥ १२९ ॥

खुविषये बहुलमजेर्वीभावः । प्रवयणो दण्डः । बहुलग्रहणाच्चलादौ च विकल्पः । प्रवेता । प्राजिता । प्रवेतुम् । प्राजितुम् । प्रवयणम् । प्राजनम् । अजिरमित्यौणादिकः शब्दः समासमजनिषदित्यादिना क्यप् । अत्र बहुलवचनान्न भवत्येव ।

जिव्यराजार्षदूल्युबधिजोः ॥ १३० ॥

जिदन्तात् ण्यन्तात् राजविशेषवाचिवृद्धात् ऋष्यणन्ताच्च परयोरणिञोः यूनि उब् भवति । जितः । तिकस्यापत्य वृद्धं तैकायनिः । तैकायनेरपत्यं प्राग्दीव्यतोऽण् उपि तैकायनिः पिता तैकायनिः पुत्रः । चिदस्यापत्यं वैदः । वैदस्यापत्यं युवा इञ उपि वैदः पिता वैदः पुत्रः । रायः । कुरोरपत्यं कौरव्यः । कुर्वादेर्ण्य इति ण्यः । कौरव्यस्यापत्यं इञ उपि कौरव्यः पुत्रोऽपि । इहोब्वचनसामर्थ्यात् कौरव्यशब्दादिञ् तिकादौ पाठात् फिञपि भवति कौरव्यायणिरिति । राज्ञः । स्वफल्-

कस्यापत्यं स्वाफल्कः । कुर्वृष्यन्धकवृष्णेरित्यण् । तदन्तादिञ उपि स्वाफल्कः पिता । स्वाफल्कः पुत्रः । एवं कलिङ्गस्यापत्यं कालिङ्गः । द्व्यञ्मगधकलिङ्गसूरमसादणित्यण् तदन्तादिञ उपि कालिङ्गो युवाऽपि । इह पाञ्चालः पिता पाञ्चालः पुत्रः इति जितः इति वा राज्ञि इति वा उप् । आर्षात् । वशिष्ठस्यापत्यं कुर्वृष्यन्धकवृष्णेरित्यण् वाशिष्ठः । तदन्तादिञ उपि वाशिष्टः पुत्रोऽपि । जिण्यराजार्षादिति किम् । कुहडस्यापत्यं कौहडः शिवादिभ्योऽणित्यण् तस्याप्यपत्यं कौहडिः । यूनोति किम् । वामरथस्यापत्यं वामरथ्यः कुर्वादेर्ण्यः । तस्य शिष्या वामरथाः । वामरथ्यस्य सकलादिवदित्यतिदेशात् सकलादिभ्यो वृद्ध इति शैषिकोऽण् क्यच्च्यनेत्यादिना यखम् । अणिञोरिति किम् । दक्षस्यापत्यं दाक्षिः । दाक्षेरपत्यं दाक्षायणः ।

पैलादेः ॥ १३१ ॥

पैलादेः परस्य युवत्यस्योब् भवति । पीलाया अपत्यं पैलः । पीलाया वेत्यण् पैलस्यापत्यं यचोऽण इति फिञ् तस्योप् पैलः पुत्रोऽपि । अन्य इञन्तास्तेभ्यः परस्य फणः प्राचामिञो तौल्वलिभ्य इति प्राप्ते उपि अप्रागर्थमिदम् । पैलः । सालङ्किः । सात्यकिः पिता । सात्यकिः पुत्रः । सात्यकामिः । औदञ्चिः । वाह्वादिषु उदञ्चु शब्दः सनकारः पठ्यते औदमज्जिः । औदव्रजिः । औदमेघिः । औदशुद्धिः । दैवस्थानिः । पैंगलायनिः । राणियनिः । रौहक्षितिः । भौलिङ्गिः । राजाऽयं शाल्वावयवः । सौमिनिः । उद्वाहमानिः । औज्जिहानिः । औज्जहायिनिः द्विसंज्ञाचाणः परस्य युवत्यस्योप् । आङ्गः । द्व्यचोण इति फिञ् । तस्योप् । आकृतिग-

णोऽयम् । तेन वैविजावालिश्रौदम्बरि एतेभ्यः साल्वावयवत्वादिञ् भाडोजंघिः इत्यादि द्रष्टव्यम् ।

प्राचामिञोऽतौल्वलिभ्यः ॥ १३२ ॥

प्राचां वृद्धे य इञ् तदन्ताद्युवत्यस्येञ् भवति तौल्वलिप्रभृतीन् वर्जयित्वा । पान्नागारिः पिता । पान्नागारिः पुत्रः । मान्थरेषणिः पिता । मान्थरेषणिः पुत्रः । क्षैरकलम्भिः पिता । क्षैरकलम्भिः पुत्रः । यञिञोरित्यस्य फण इप् । प्राचामिति किम् । दाक्षिः पिता । दाक्षायणः पुत्रः । अतौल्वलिभ्य इति किम् । तौल्वलिः पिता । तौल्वलायनः पुत्रः । तौल्वलिः । धारिणिः । स्वालिंपिः । दैलीपिः । दैवोतिः । दैवमित्रिः । दैवमतिः । दैवयज्ञिः । प्रावाहणिः । माधातकिः आनुराहतिः बाह्वादिरयम् । आनुतिः आदितिः । आसुरिः । नैमषिः । आसिवन्धकिः । वैह्रिपौष्यपौ । पौष्करसादिः । अयं बाह्वादौ वैरकिः । वैलकिः । वैहतिः । वैकर्णिः । कारेणुपालिः ।

द्रेर्बहुषु तेनैवास्त्रियाम् ॥ १३३ ॥

द्रिसञ्ज्ञकस्य त्यस्य बह्वर्थेषु वर्त्तमानस्य उब् भवति तेनैव द्रिसञ्ज्ञकेन कृतं बहुत्वं भवति अस्त्रियाम् । आङ्गः । आङ्गौ । अङ्गाः । ऐक्ष्वाकः । ऐक्ष्वाकौ । इक्ष्वाकवः । अणः अत्र इचद्रिरित्यधिकारेण द्रिसञ्ज्ञा स्वार्थिकानामपि ते द्रय इति द्रिसञ्ज्ञा । लौहध्वज्यः । लौहध्वज्यौ । लोहध्वजाः । व्रैहिमत्यः । व्रैहिमत्यौ । व्रीहिमताः । पूगाञ्ज्योग्रामणीपूर्वादिति त्र्यः । द्वन्द्वेऽपि सामान्येन द्रिसञ्ज्ञा कृते बहुत्वे भवति अङ्गवङ्गसुह्माः । द्रेरिति किम् । आपगवाः । बहुष्विति किम् । आङ्गः । आङ्गौ । तेनैवेति किम् । प्रियो वाङ्ग एषामिति प्रिय-

वाङ्गाः । अत्र वृत्त्या बहुत्वं गम्यते। अतोनुवर्हत्यांतानां अन्येषां च द्वन्द्वे तेनैव कृतं न बहुत्वमित्युब् भवति । गार्ग्यवात्स्यौपगवाः । ज्ञापकादुबप्यत्र भवतीति केचित्। गर्गवत्सोपगवाः । किं ज्ञापकमिति चेत् शरद्वच्छुनकदर्भा भृगुवत्साग्रायणेष्विति वचनम् । भार्गववात्स्याग्रायणेष्विति निर्देशः स्यात् उभयथाऽपि साधुः प्रयोगः । अस्त्रियामिति किम्। आङ्गयः वाङ्गयः स्त्रियः ।

यस्कादिभ्यो वृद्धे ॥ १३४ ॥

यस्क इत्येवमादिभ्यः परस्य वृद्धत्यस्य बहुषु वर्तमानस्योब् भवति अस्त्रियां तेनैव चेत् कृतं बहुत्वम्। उभयगतिरिह शास्त्रे लौकिकमपि वृद्धं गृह्यते तेनानन्तरापत्येऽप्युब् भवति। यास्कः । यास्कौ । यस्काः । शिवादिभ्योऽणित्यागतस्याण उप् । यस्क लुह्य द्रुह्य अयस्थूण तृणकर्ण भलन्दन एतेषां शिवादिषु पाठः । कम्बलहार अहिर्योग कर्णादक पर्णादक सदामत पिण्डोजङ्घ बकरक्षोमुख जथारथ उत्कास कटुक मन्थर पुष्करसत् अस्य न गोपवनादेरिति प्रतिषेधः प्राप्तः। विषपुट उपरिमेखल पदक भटक भडिल भण्डिल एतेभ्योऽश्वादेः फञिति फञ् । कुद्रि अजवस्ति विश्रि मित्रयु एतेभ्यो गृष्ट्यादेरिति ढण्। वृद्ध इति किम्। यस्को देवता एषां यास्काः बहुष्वित्येव। यास्कौ । तेनैव चेत्येव। प्रियायास्काः। अस्त्रियामित्येव यास्क्यः ।

यञञोः ॥ १३५ ॥

यञश्च अञश्च वृद्धे बहुषु वर्त्तमानस्योब् भवति तेनैव चेद्बहुत्वमस्त्रियाम्। गर्गाः । वत्साः। अत्रः। विदाः। ऊर्वाः।

विदादिभ्योऽनृष्यानन्तर्येऽञिति अञ् । बहुष्वित्येव । गार्ग्यः । वैदः । तेनैवैत्येव । प्रियगार्ग्याः । वृत्त्या तत्र बहुत्वं गम्यते । यत्र वृत्त्यैकत्वं गम्यते यत्रा बहुत्वं तत्रापि भवति । गर्गानतिक्रान्तः अतिगर्गः । अस्त्रियामित्येव । गार्ग्यः स्त्रियः । यञ इति ङीविधिः । यस्य ङ्याश्चेत्यखम् । हलोहतोऽयमिति यकारस्य खम् । यञादीनामेकत्वाद्बहुत्वयोर्वार्ता से इति वक्तव्यम् । गार्ग्यस्य कुलं गर्गकुलम् । गार्ग्ययोः कुलं गार्ग्यकुलम् । गर्गकुलम् । वैदस्य कुलं वैदकुलम् । विदकुलम् । वैदयोः कुलं वैदकुलम् । विदकुलम् । न वक्तव्यं यदा यञादयो न श्रूयन्ते तदा मूलप्रकृतेस्तासः नियतविषयत्वात् शब्दानां तत उभयं सिध्यति ।

भृग्वत्रिकुत्सवसिष्ठगोतमाङ्गिरोभ्यः ॥ १३६ ॥

वृद्ध इति वर्तते । भृग्वादिभ्यः परस्य वृद्धस्यस्य बहुषूब्भवति । भार्गवः । भार्गवौ । भृगवः । आत्रेयः । आत्रेयौ । अत्रयः । एवं कुत्साः वसिष्ठाः गौतमाः अङ्गिरसः । अत्रिशब्दादितोनिञ इति ठण् । अन्येभ्य ऋष्यण् । बहुष्वित्येव । भार्गवः । आङ्गिरसः । तेनैवेत्येव । प्रियभार्गवाः । अस्त्रियामित्येव । भार्गव्यः स्त्रियः । वृद्ध इत्येव । भृगुर्देवता एषामिति भार्गवाः ॥

इञो बह्वृचः प्राच्यभरतेषु ॥ १३७ ॥

बह्वृचो मृदो य इञ् तस्य प्राच्यभरतेषु वृद्धे बहुषूब्भवति । पान्नागारिः । पान्नागारी । पन्नागाराः । एवं मान्थरेषणिः । मान्थरेषणी । मन्थरेषणाः । बह्वृच इति किम् । पौष्यः । प्राच्यभरतेष्विति किम् । वालाकयः । हास्तिदासयः ।

ननु भरतः प्राच्य एव तेषां पृथग्ग्रहणं किमर्थं ज्ञापकार्थं मन्यत्र प्राच्यग्रहणे भरतग्रहणं न भवतीति। तेन प्राचामित्रौ तौल्वलिभ्य इति अत्र भरतानां युवत्यस्योञ्न भवति। यौधिष्ठिरिः पिता यौधिष्ठिरायणः पुत्रः। ननु युधिष्ठिरादिभ्य इञेव नास्ति कुर्वृष्यन्धकवृष्णेरित्यणा भवितव्यम्। इह तर्हि उञ्न भवति औद्दालकिः पिता औद्दालकायनः पुत्रः। अत्र प्राचामित्रौ तौल्वलिभ्य इति युवत्यस्योप्प्रसज्येत एतद्धि प्राच्यभरतगोत्रम्।

न गोपवनादेः ॥ १३८ ॥

विदाद्यन्तर्गणो गोपवनादिः। गोपवन इत्येवमादेः परस्य वृद्धत्यस्योञ् न भवति। गोपवनस्यापत्यानि गौपवनाः। यञञोरित्युप्प्राप्तः। गोपवन शिग्रुपिण्डभाजन अश्वावृनान शम्याक श्यामाक श्यापर्ण एते गोपवनादयः। प्राग्घरितशब्दात् परत उञ्भवति। हरिताः। किंदासाः। तौल्वलिप्रभृतयोऽत्र पठ्यन्त इति केचित्। तौल्वलयः अनन्तरेण उप्प्राप्तः॥

वोपकादिभ्यः ॥ १३९ ॥

उपक इत्येवमादिभ्य उत्तरस्य वृद्धत्यस्य वा ञ्-ष्णञ्भवति। उपकस्यापत्यानि उपकाः। उपकायनाः। लमकाः। लामकायनाः। एतौ नडादी। भ्रष्टकाः। भ्राष्टकयः। कपिष्ठलाः। कापिष्ठलयः। कृष्णाजिनाः। काष्णाजिनयः। कृष्णसुन्दराः। काष्णसुन्दरयः। वेति व्यवस्थितविभाषा। तेनैषामद्वन्द्वे विकल्पः। परिशिष्टानां द्वन्द्वे चाद्वन्द्वे च। सुपिष्ट मयूरकर्ण कर्णक पर्णक पिङ्गलक जटिलक वधिरक एतेषां शिवादिषु पाठः। अनुलोमप्रतिलोम एतौ बाह्वादी।

वडारक अकडारक अभुक्तक उदक सुपर्ण्यक सुपर्चक सुधर्मक खरीजङ्घ शलाजङ्घ शलाथल पतञ्जल कमन्दक कण्ठेरणि कुषीतक कासकृत्स्न निदाघ कलशीकष्ठ दामकण्ठ कृष्णपिङ्गल जन्तुक अविरग्ध कपिञ्जलक प्रतान अनभिहित ॥

तिककितवादिभ्यो द्वन्द्वे ॥ १४० ॥

वेति नानुवर्तते । तिकादिभ्यो द्वन्द्वे वृद्धस्य बहुषूब् भवति । तैकायनयश्च कैतवायनयश्च तिककितवाः । तिकादिलक्षणस्य फिञ उप् । वांखरयश्च भाण्डीरथयश्च इञ उपि वंखरभण्डीरथाः । पाटकयश्च नारकयश्च पटकनरकाः । वाकनखयश्च श्वागुदपरिणडयश्च वकनरवाश्वगुदपरिणडाः । औञ्जयश्च काकुभाश्च ककुभशब्दः शिवादिषु विदादिषु वास्ति उञ्जककुभाः । लाङ्कयश्च शान्तमुखयश्च लङ्कशान्तमुखाः । उरसशब्दस्तिकादौ । औरसायनयश्च लाङ्कटयश्च उरसलङ्कटाः । अग्निवेशशब्दो गर्गादौ । अग्निवेशाश्च दासेरकयश्च अग्निवेशदासेरकाः । औपकायनाश्च लामकायनाश्च फण उपि उपकलमकाः । भ्राष्टकयश्च कापिष्टलयश्च भ्रष्टककपिष्टलाः । कार्ष्णाजिनयश्च कार्ष्णसौन्दरयश्च कृष्णाजिनकृष्णसुन्दराः ॥

कौण्डिन्यागस्त्ययोः कुण्डिनागस्ती ॥ १४१ ॥

कौण्डिन्य आगस्त्य इत्येतयोर्ढक्त्यस्य बहुषूष् भवति कुण्डिन अगस्ति इत्येतौ चादेशौ यथासङ्ख्यं भवतः । अगस्त्यशब्दात् ऋष्यण् । कुण्डमस्यास्तीति कुण्डिनी नाम

काचित् गर्गादौ पठ्यते । कौण्डिन्यः । कौण्डिन्यौ । कुण्डिनाः । आगस्त्यः । आगस्त्यौ । अगस्तयः । यद्यपि यञ्-ञोरिति यञ उप् सिद्धस्तथापि कुण्डिनशब्दोऽकारान्त आदेशो विधीयमानो बाधकं स्यादिति पुनर्वचनम् । अगस्तीनां छात्रा आगस्तीया इत्यत्र अगस्तिरादेशो भवति । प्राग्द्रवोविषये वृद्धे चानुवृत्ति अनुपि सति दोश्च इति छः सिद्धः । कौण्डिनाश्छात्राः ॥

सुपो धुमृदोः ॥ ४२ ॥

धुमृदोरन्तस्यावयवस्य सुप उब्भवति । पुत्रमिच्छत्यात्मनः पुत्रीयति । पटीयति । मृदः । राजपुरुषः । धर्मं श्रितो धर्मश्रितः । तदन्ता धव इति धुसंज्ञायां कृद्वत्सामृत्संज्ञायां च सुप उप् । एवं तस्मात्ततः । तस्मिन् तत्र । धुमृदोरिति किम् । वृक्षः । अत्र कृद्वत्सा इति नियमात् विभक्तया मृत्सज्ज्ञा नास्ति ॥

शपोऽदादिभ्यः ॥ १४३ ॥

अदादिभ्यो धुभ्यः परस्य शप उब्भवति । अत्ति । इन्ति । दोग्धि ॥

यङोऽचि ॥ १४४ ॥

यङ उब्भवति अचि परतः । लोलूय पोपूय मरीमृज्य इत्येतेभ्यः पचाद्यचि लोलुवः पोपुवः मरीमृजः । नधुखेग इति णवैपोः प्रतिषेधः । यङो वेत्यत्र वक्ष्यत्यविशेषेण यङ उब् भवति तेन वावदीति इत्येवमादि सिध्यति ॥

उब् जुहोत्यादिभ्यः ॥ १४५ ॥

शप इति वर्तते । जुहोत्यादिभ्यः परस्य शप उब् भवति ।

जुहोति । नेनेक्ति । बिभर्ति । उविति वर्तमाने उब्ग्रहण द्वित्वार्थम् ॥

स्थेशिपबभुभूभ्यः सेर्मे ॥ १४६ ॥

स्था इण् पिब भुसंज्ञक भू इत्येवमादिभ्यः परस्य सेर्वा-ऽऽगम उभवति मे परतः । अस्थात् । अस्थाताम् । अस्थुः । आत इति झेर्जुस् । अगात् । इणिति प्रश्लेषनिर्देशात् इकोऽपि ग्रहणम् । अध्यगात् । अपात् । पिब इति विकृतनिर्देशात् शोषणार्थस्य निवृत्तिः । प्रतिपदोक्तपरिभाषा चानित्या तेन गामादाग्रहणेष्वविशेष इतीदं लब्धम् । भु इति संज्ञानिर्देशः दाधाभ्वपिदिति । अदात् । अदाताम् । अदुः । भु इति भवतेरस्त्यादेशस्य च ग्रहणम् । अभूत् । सूभवत्योर्मिङीत्येप्रतिषेधः । म इति किम् । उपास्थिषत । उपान्मन्त्रकरणे धेरिति दविधिः । भुस्थोरिदित्याकारस्येत्वं सेः कित्वम् ॥

वा घ्राधेट्छाशासः ॥ १४७ ॥

घ्रा धेट् छा शा सा इत्येतेभ्यः परस्य सेर्वा उभवति मे परतः । अघ्रात् । अनुप्पक्षे यमरमनमातः सक्वेति सगिटौ भवतः । हल्यः सेरितीट् । इटीट इति सेः खम् । अघ्रासीत् । अच्छात् । अच्छासोत् । न्यशात् । न्यशासोत् । अमात् । असासीत् । धेटो भुसंज्ञात्वात् पूर्वेण प्राप्ते इतरेषामप्राप्ते विकल्पः । म इत्येव । अघ्रासाताम् । अघ्रासत । स्तुसुधूञ्भ्यो म इत्यधिकाराद्दे सगिटौ न भवतः ॥

तनादिभ्यस्तथासोः ॥ १४८ ॥

तनादिभ्य उत्तरस्य सेर्वा उम्भवति तथासोः परतः । थासा सहचरितो दसंज्ञष्टो गृह्यते । अतत । अतनिष्ट । उपपक्षे अनुदात्तोपदेश इत्यादिना ङखम् । अतथाः । अतनिष्ट । षण् । असात । असनिष्ट । उपपक्षे जनसनखनामित्यात्वम् । असाथाः । असनिष्टाः ॥

आमः ॥ १४९ ॥

आम उत्तरस्य संभवाल्लकारस्योव् भवति । ईहांचक्रे । लकारस्य कृत्वात् मृत्वे सति स्वाद्युत्पत्तिः । सुपो झेरिति सुप उप् । आमन्तस्य पदसंज्ञा । वा पदान्तस्येत्येतत् प्रयोजनम् ॥

सुपो भेः ॥ १५० ॥

झिसंज्ञादुत्तरस्य सुप उम्भवति । च वा अह कृत्वा कर्त्तुम् । इदमेव ज्ञापकम् । असंख्यादपि सुपो भवन्ति यदि वा कर्मणो विवेमादिषु अर्थनियमपक्षे विभक्तीनामनियतत्वात् झिसंज्ञेभ्योऽप्युत्पत्तिः ॥

हात् ॥ १५१ ॥

हसादुत्तरस्य सुप उम्भवति । अधिस्त्रि । अधिकुमारि । हसस्य झिसंज्ञा नास्तीत्युक्तं तेनायमारम्भः ॥

नातोऽम् त्वकायाः ॥ ५२ ॥

हसस्य संख्यायोगात् कर्मादियोगाच्च सर्वासां विभक्तीनां सम्भवः हादकारान्तात् रस्य सुप उन्न भवति । अमादेशस्तु भवति सुप कां विभक्तीं वर्जयित्वा । उपकुम्भं तिष्ठति । उपकुम्भं पश्य । उपकुम्भं देहि । अत

इति किम् । उपाग्नि । अकाया इति किम् । उपकुम्भादानय ॥

ईब्भयोर्विभाषा ॥ १५३ ॥

ईप् भा इत्येतयोर्विभाषा अमादेशो भवति । उपकुम्भेन कृतम् । उपकुम्भं कृतम् । उपकुम्भाभ्यां कृतम् । उपकुम्भं निधेहि । व्यवस्थितविभाषेयम् । तेन ऋछिनदीससंख्यावयवेभ्यो नित्यममादेशः । ऋडौ । सुमद्रं कृतम् । सुमगधं कृतम् । नदीसे । नदीभिश्चेति हसः । उन्मत्तगङ्गम् । द्वियमुनम् । संख्यावयवः संख्या वंश्येनेति हसः । द्विकौशलम् । त्रिकौशलम् । एकविंशति भारद्वाजम् ॥

लुटोऽन्यस्य डारौरसः ॥ १५४ ॥

लुटोऽन्यसंज्ञस्य त्रिकस्य डा रौ रस् इत्येते आदेशा भवन्ति । अर्थद्वारकमत्र यथासंख्यम् । श्रोता । श्रोतारौ । श्रोतारः । अध्येता । अध्येतारौ । अध्येतारः । डा इत्यन्तादेशः । डा आ इति श्लेषनिर्देशाद्वानेकाल सर्वादेशः । ङित्यभस्यापि ङित्करणसामर्थ्यादखम् । रौरसोः परतः रीति सखम् ॥ * ॥

इत्यभयनन्दिमुनिविरचितायां वृत्तौ प्रथमाध्यायस्य चतुर्थः पादः ॥ १ ॥

त्यः ॥ १ ॥

अधिकारेण संज्ञेयमा कृपो यदित ऊर्ध्वमनुक्रमिष्यामः अपूर्वं शब्दोपजननं प्रकृतिवाग्विशेषणविकारागमवर्जं यत् त्यसंज्ञः स वेदितव्यः । प्रकृतिर्गुपादिः । वाक्

कर्मण्यण इत्येवमादावीपा निर्दिष्टं विशेषणं दृतिनाथयोः-पशौ हृत्र इत्येवमादौ पश्वादि। विकारः सतो भावान्तरावाप्तिः। दुहो घश्चेत्येवमादिषु घकारादिः। आगमः परतश्चः। त्रपुजतुनोः षुगित्येवमादिः। युक्तिरुच्यते निमित्ति कार्यन्न निमित्तस्येति प्रकृतिवागुपाधीनामग्रहणम्। अथवा भाव्यमानविभक्तिनिर्दिष्टं सन्नादिप्रधानं भूतविभक्तीनिर्दिष्टं प्रकृत्याद्यप्रधानं प्रधाने च कार्यसम्प्रत्ययः विकारागमयोस्तु पर इत्यनेन निरासः नहि तयोः परत्वसम्भवः। वक्ष्यति तव्यानीयौ। कर्तव्यः। करणीयः। प्रतियन्ति तेनार्थमिति प्रत्ययः। पुंखौघः प्रायेणेति घः। एवं यद्यन्वर्था संज्ञा क्रियेत तदा प्रकृतेः सविभक्तिकस्य वा पदस्य त्यसंज्ञा स्यात्। त्यप्रदेशाः यत्त्येत्यदादिगुरित्येवमादयः॥

परः॥ २॥

परिभाषेयं नियमार्था। पर एव भवति धोर्मृदो वा यस्त्यसंज्ञः। कर्त्तव्यः। करणीयः। औपगवः। धोरित्येवमादौ दिग्योगलक्षणकानिर्देशेऽपि पूर्वशब्दस्याध्याहारः स्यादिति परत्वं न लभ्यते ईप्केत्यव्यवाये पूर्वपरयोरित्यत्र यदि कार्यं परमुच्यते ततानिर्दिष्टस्येति न च सनाद्यस्तानिर्दिष्टाः अथासतः प्रादुर्भावः पर उच्यते एवं सति नियमार्थमिदं त्यपरैव प्रकृतिः प्रयोक्तव्या न केवला॥

गुप्तिज्किद्भ्यः सन्॥ ३॥

त्य इति वर्तते। गुप् तिज् कित् इत्येतेभ्यः परः सन् भवति। जुगुप्सते। तितिक्षते। चिकित्सति। धुसंज्ञश्द-

नेनाविधानात् अगसंज्ञा नास्ति । तेन नेडागमः । निन्दाक्षमारोगापनयेषु यथाक्रमं सन्निष्यते । गोपननिशाननिवासादिषु न भवति । गोपनं गोःपायति । तेजनं तेजयति । निकेतनं निकेतयति । भुवादिषु पाठः किमर्थः अस्त्यादित्यकारो यथा स्यात् । जुगुप्सा । तितिक्षा । चिकित्सा । सनोऽकारोपदेशः प्रतीषिषतीत्यादौ श्रवणार्थः । एकदेशकृतं लिङ्गं समुदायविशेषणम् । अनुदात्तेत्त्वमाद्याभ्यां तेनायं दो विधीयते ॥

मान्बधदान्शान्भ्यो दीर्घश्च ॥ ४ ॥

मान् बध दान शान् इत्येतेभ्यः सन् भवति दीर्घश्च स्वेकारस्य । मीमांसते । बीभत्सते । दोदांसते । शीशांसति । शोशांसते । आद्यावनुदात्तेतौ । परौ स्वरितेतौ च । विकारेष्वपवादा उत्सर्गान्न बाधन्त इति कृतेऽकारस्य चस्य दीर्घत्वम् । अत्रापि जिज्ञासावैरूप्यार्जवनिशामनेषु यथाक्रमं सन्निष्यते । पूजाबन्धनावखण्डनतेजनेषु भवति । मानयति । बन्धयति । निशानयति । दान उत्तरत्र वेति व्यवस्थितविभाषा । तदवलोकनादयं विभागः ।

तुमीच्छायां धोर्वीप् ॥ ५ ॥

इच्छायां तुमि योधुस्तस्मात् सन् वा भवति तुमश्चोऽभवति यदा सन् । कर्तुमिच्छति चिकीर्षति । बुभूक्षते । अयं होच्छायां तुम् विहितः । हेतुफलयोरित्यधिकृत्य इच्छार्थे लिङ्लौटौ तुमेककर्तृक इतिवचनात् । इहापि सामान्यविशेषभावेन हेतुफलभावोऽस्ति । एषितुमिच्छति एषिषिषति । तुमिति किम् । इच्छायामित्युच्यमाने इच्छार्थानामिषिवाञ्छ्यादीनां ग्रहणं स्यात् । तुमग्रहणे सति इच्छायामित्येत

तुमो विशेषणम्। इच्छायामुपलक्षिते तुमीति तेन यत्र तुमो निमित्तं हेतुफलभावो नास्ति तत्र न भवति। इच्छति कटङ्करोति चैनं भिन्नकर्तृकत्वे च न भवति। इच्छति देवदत्तः कटं कुर्याज्जिनदत्तः। यत्र तुम् नास्ति तत्र च न भवति। इच्छायामिति किम्। कर्त्तुमगच्छति। अत्र तुरातुमौ क्रियायां तदर्थायामिति तुम्। धोरिति किम्। प्रकर्त्तुं प्रैच्छत् प्राचिकीर्षत्। सगेरुत्पत्तिर्मा भूत्। अगसंज्ञार्थं च धुग्रहणम्। वाग्रहणाद्वाक्यस्याऽपि साधुत्वम्। इहोपचारात् सिद्धम्। पिपतिषतीव पिपतिषति कूलम्। मुमूर्षतीव मुमूर्षति श्वा। वेति व्यवस्थितविभाषा तेनेच्छासन्नन्तात् सन्न भवति। चिकीर्षितुमिच्छति। अनिच्छासनन्ताद्भवति जुजुगुप्सिषते। मत्वर्थाच्छैषिकाच्चापि मत्वर्थः शैषिकस्तथा। सरुपस्त्यविधिर्नेष्टः सन्नन्तान्न सनिष्यते ॥

स्वेपः क्यच् ॥ ६ ॥

स्वस्य यदिवन्तं तस्मादिच्छायां वा क्यङ् भवति। आत्मनः पुत्रमिच्छति पुत्रीयति। पटीयति। ककारो नः क्य इत्यत्र सामान्यग्रहणार्थः। चकारः सामान्यग्रहणाविघातार्थः। तेन एकानुबन्धग्रहणे न ह्यनुबन्धकस्येत्ययं विघातो नास्ति। स्वग्रहणं किम्। पुत्रमिच्छति ब्रह्मचारी मरणमिच्छति दुर्जनः। अत्र परस्येति गम्यते। इविति किम्। पुत्र इच्छति। पुत्राय इच्छति। वाक्यात् कस्मान्न भवति। महान्तं पुत्रमिच्छति वाक्यस्यानिवन्तत्वात्। अवयवादसामर्थ्यान्न भवति। कर्मोक्तमत्र क्यचा तेन कर्त्तरि भावे च प्रयोगः। पुत्रीयति। पुत्रीय्यते अनेन। वेत्यनुवृत्तेर्भिन्नेभ्यो न भवति। उच्चैरिच्छति। इदमिच्छति। किमिच्छति ॥

काम्यः ॥ ७ ॥

स्वस्य यदिवन्तं तस्माद्वा काम्यो भवतीच्छायाम् । पुत्रमिच्छत्यात्मनः पुत्रकाम्यति । पटकाम्यति । ककारस्य प्रयोगार्हत्वादित्संज्ञा नास्ति । योगविभागादुत्तरत्र क्यच एवानुवृत्तिर्न काम्यस्य ॥

गौणादाचारे ॥ ८ ॥

गौणममुख्यमाचरणक्रियायामुपमानमित्यर्थः । गौणादिवन्तादाचारेऽर्थे वा क्यङ् भवति । पुत्रमिवाचरति पुत्रीयति छात्रम् । प्रावारीयति कम्बलम् । व्यवस्थितविभाषाधिकारादादपि भवति । प्रासादीयति कुड्यं ॥

कर्तुः क्यङ् सखं विभाषा ॥ ९ ॥

कर्तुर्गौणादाचारेऽर्थे वा क्यङ् भवति यद्यन्ते सकारस्तस्य च खं विभाषया । इह कर्तृग्रहणादिन्न सम्भवति सुबन्तात् क्यङ् । श्येन इव आचरति काकः श्येनायते । कुमुदं पुष्करायते । व्यवस्थितविभाषेयम् । ओजोऽप्सरसोर्नित्यं पयसस्तु विभाषया सखम् । ओजस्वीवाचरति ओजायते । वृत्तिविषये मत्वर्थीयः क्यङोक्तः । अप्सरायते । मथितं पयायते पयस्यते । असखपक्षे नः क्य इति नियमात् पदत्वाभावे रित्वादिविधिर्भवति । कर्तुरिति सखापेक्षया तयाविपरिणम्यते तेनान्त्यस्य खं इह न भवति । सारसायते । आचारे सर्वमृद्भ्यः क्विब्वा भवतीत्येके । अश्व इवाचरति अश्वति । अश्वायते ॥

भृशादेश्च्वौ हलो भुवि ॥ १० ॥

कर्त्तुरिति वर्तते। भृश इत्येवमादिभ्यः च्व्यर्थे वर्तमानेभ्यो भवत्यर्थे वा क्यङ् भवति यद्यन्ते हल् तस्य नित्यं खम्। च्विर्विकल्पेन विधीयतेऽयत्र नोत्पद्यते तत्रायं क्यङ्। अभृशो भृशो भवति भृशायते। भृश शीघ्र चपल पण्डित उत्सुक। नात्र गेर्वहिर्भावः। उन्मनस् सुमनस् दुर्मनस अभिमनस् संग्राम युद्ध इतिज्ञापकादुदादीनामडागमादिषु बहिर्भावः। रेहत् वेहत् शश्वत् नृपत् वर्चस् ओजस् अण्डर शुचिमन्द नोलमद्र फेन हरित ॥

डाज्लोहितात् क्यष् ॥ ११ ॥

डाजन्तालोहितशब्दाच्च च्व्यर्थाद्भवत्यर्थे वा क्यष् भवति। च्व्यर्थग्रहणं लोहितस्य विशेषणं न डाजन्तस्याव्यभिचारात्। पटपटायति। पटपटायते। यदा न क्यष् तदा पटपटाभवतीति प्रयोगः। अलोहितो लोहितो भवति लोहितायति। लोहितायते। एवं हि नः क्य इत्यत्र सामान्यग्रहणार्थः ककारः शोभेत यदि चर्मादिभ्योऽपि स्यात्। चर्मायति। चर्मायते। निद्रायति। निद्रायते। करुणायति। करुणायते। कृपायति। कृपायते। वृत्तिविषये मत्वर्थीयः क्यषा ऽभिहितः ॥

कष्टाय ॥ १२ ॥

क्यङ् अनुवर्तते। कष्टायेति तादर्थ्ये अप्। कष्टाय ये शब्दा वर्तन्ते तेभ्यः क्यङ् भवति। कष्टार्थादिति वक्तव्यम्। अवन्तनिर्देशः समर्थविभक्त्युपादानार्थः। अभिधानवशात् क्रमणेनार्जवे क्यङ् द्रष्टव्यः। यथा नमोवरिवश्चित्रङः क्यजित्यत्र पूजार्थनियमः। कष्टाय क्रमणे

क्रामति कष्टायते । अनार्जवं पापं करोतीत्यर्थः । सत्राय कर्मणे क्रामति सत्रायते । कत्तायते । गहनायते । अनार्जव इति किम् । अजः कष्टं क्रामति । नात्र पापं गम्यते ॥

बाष्पोष्मफेनादुद्वमे ॥ १३ ॥

इष इति वर्तते । बाष्प उष्मन् फेन इत्येतेभ्यः उद्वम इत्यर्थे क्यङ् भवति । बाष्पमुद्वमति बाष्पायते । उष्माणमुद्वमति ऊष्मायते । फेनायते ॥

रोमन्थतपःशब्दवैरकलहाभ्रकण्वमेघात् कृञि ॥ १४ ॥

रोमन्थ तपस् शब्द वैर कलह अभ्र कण्व मेघ इत्येतेभ्यः करोत्यर्थे क्यङ् भवति । रोमन्थं करोति रोमन्थायते गौः । अत्र करोतिः क्रियासामान्ये वर्तमानेऽपि अभ्यवहृत चर्वणक्रियायां गृह्यते । तेनेह न भवति । कोटको रोमन्थं वर्तयति । तपसो मच्चेति वक्तव्यम् । तपः करोति तपस्यति । तपश्चरतीत्यर्थः । शब्दं करोति शब्दायते । वैरायते । कलहायते । अभ्रायते । कण्वायते । पापं करोतीत्यर्थः । मेघायते । सुदिनदुर्दिननीहारेभ्यश्चेति वक्तव्यम् । सुदिनायते । दुर्दिनायते । नीहारायते । अट्टाट्टासोकाकोटापोटासोटाप्रुष्टाभ्योऽपीति केचित् । अटायते । अट्टायते । सीकायते । कोटायते । पोटायते । सोटायते प्रुष्टायते ॥

सुखादेः स्वभोगे ॥ १५ ॥

भोगोऽनुभवो वेदना वा । सुख इत्येवमादिभ्य इवन्ते-

भ्यः स्वभोगे क्यङ् भवति। सुखमात्मनः करोति सुखायते। सुखं भुङ्क्ते अनुभवति वेदयतीत्यनर्थान्तरम्। एवं दुःखायते। सुख दुःख तृप्त कृछ्र अलीक करुणा कृपण सोढ प्रतीप। स्वभोग इति किम्। सुखं करोति प्रसाधको देवदत्तस्य ॥

नमोवरिवश्चित्रङः क्यच् ॥ १६ ॥

कृञोति वर्तते। नमस् वरिवस् चित्रङ् इत्येतेभ्यः क्यङ् भवति करोत्यर्थे। पूजापरिचर्याश्चर्यविशेषे। नमः करोति नमस्यति देवान्। अत्र नमःशब्दस्यानर्थकत्वात्तद्योगे नाद् भवति। वरिवः करोति वरिस्यति गुरून्। चित्रङ् करोति चित्रीयते। ङित्वादः। पूजादिभ्योऽन्यत्र नमः करोतीति भवति ॥

पुच्छभाण्डचीवराण् णिङ् ॥ १७ ॥

पुच्छ भाण्ड चीवर इत्येतेभ्य इवन्तेभ्यो णिङ् भवति करोत्यर्थविशेषे। कोऽसौ विशेषः। पुच्छादुदसने पर्यसने वा उत्पुच्छयते। परिपुच्छयते। भाण्डात्सञ्चयने परिचयने। वासं भाण्डयते परिभाण्डयते। चीवरादर्जने परिधाने वा संचीवरयते भिक्षुः। णकारो णाविष्ठवन्मृद इत्यत्र सामान्यग्रहणाविघातार्थः। अर्थविशेषादन्यत्र णिजेव भवति ॥

मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् ॥ १८ ॥

मुण्ड इत्येवमादिभ्य इवन्तेभ्यो णिच् भवति करोत्यर्थे। चुरादिषु मृदो ध्वर्थ इति णिचि सिद्धे अर्थविशेषपरि-

ग्रहार्थमिदम्। च्यर्थे वायमिति केचित्। अमुण्डं मुण्डं करोति मुण्डयति। मिश्रयति। श्लक्ष्णयति। लवणयति। व्रताद्भोजने तन्निवृत्तौ च। पयो व्रतयति। पयो भुङ्क्ते इत्यर्थः। सावद्यं व्रतयति। सावद्यं न भुङ्क्ते इत्यर्थः। वस्त्रात् समाच्छादने। वस्त्रेण संच्छादयति संवस्त्रयति। हलिं गृह्णाति हलयति। कलिं गृह्णाति कलयति। हलिकल्योरकारान्तता णिचा योगे निपात्यते। यौ कच्यनङ्के सन्बदिति सन्वद्भावप्रतिषेधार्थम्। कलिं गृहीतवानचकलम्। अजहलम्। अन्यथा परत्वादपि कृते टिखं स्यात् ततः सन्वद्भावः प्रसज्येत। यथा अलीलघत् अपिपटत् इति। कृतं गृह्णाति कृतयति। तुस्तानि केशजटाः विहन्ति वितुस्तयति॥

धोर्यङ्क्रियासमभिहारे ॥ १९ ॥

पौनःपुण्यं भृशार्थो वा क्रियासमभिहारः। धोर्यङ् भवति क्रियासमभिहारे। पुनः पुनः पचति भृशं वा पापच्यते। बोभुज्यते। क्रियान्तरैरव्यवहितायाः प्रधानभूतविक्लेदनक्रियायाः पुनः पुनरारम्भः पौनःपुन्यम्। गुणभूताधिश्रयणादिक्रियाणां क्रियान्तरैरव्यवहितानां साकल्येन करणं भृशार्थता। सूचिसूत्रिमूत्र्यद्यर्त्यशूर्णोतीनां ग्रहणं नियमार्थं कर्त्तव्यम्। सोसूच्यते। सोसूत्र्यते। मोमूत्र्यते। अनेकाज्भ्य एव नान्यस्मात्। अत्यर्थं जागर्तीति। अटाट्यते। अरार्यते। एडीत्येप्। अत्यर्थमश्नुते अशाश्यते। प्रोर्णोनूयते। अट्यादिग्रहणं किमर्थमन्यस्मादजादेर्मा भूत्। भृशमीक्षते। पुनः पुनरोहते। क्रियासमभिहारे सर्वस्य द्वित्वे वेति विभाषानुवर्तते। तेन यङन्तस्य द्वित्वं न भवति। तत एव क्रियासमभिहारे यो लोट् तदन्तस्य भवति। लोलू-

यस्य लोलूयस्य इत्येवायं लोलूयते । धोरिति किम् । सगेरुत्पतिर्मा भूत् । अगसंज्ञार्थं च धुग्रहणं पेपीयते । शुभिरुचिभ्यां प्रतिषेधो वक्तव्यः । अत्यर्थं शोभते । अत्यर्थं रोचते ॥

नित्यं गतिविशेषे ॥ २० ॥

नित्यं यङ् भवति गतिविशेषे गम्यमाने । चंक्रम्यते । आवनीवच्यते । गतिविशेषो हि यङन्तवाच्यः । तेनास्वपदेनार्थमात्रकथनमिदं कुटिलं क्रमतीति । नित्यग्रहणं तु विषयनियमार्थम् । एतयोर्गतिविशेष एव गर्हे एव च यङ् यथा स्यात् क्रियासमभिहारे मा भूत् । भृशं क्रामति । भृशं लुनाति ॥

लुपसदचरजपजभदहगृदशो गर्हे ॥ २१ ॥

लुपादिभ्यो गर्हे गम्यमाने नित्यं यङ् भवति प्रत्यासत्तेर्धर्वर्थस्य गर्हा गृह्यते न साधनस्य । अनर्थकं लुम्पति लोलुप्यते । सासद्यते । चंचूर्यते । जंजप्यते । दन्दह्यते । निजेगिल्यते । दन्दश्यते । दशेः कृतनखस्य निर्देशादयङप्यपि खं भवतीति केचित् । दंदशीति । तदयुक्तं सौत्रत्वान्निर्देशस्य । गर्ह इति किम् । सुखं सीदति स्वगृहे ॥

पाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादेर्णिच् ॥ २२ ॥

पाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यश्च णिच् भवति । चुरादौ मृदो ध्वर्थ इति सिद्धेऽपि अर्थविशेषपरिग्रहार्थं पाशादेः पृथग्ग्रहणम् । पाशाद्विमोचने ।

पाशं विमोचयति विपाशयति । रूपादर्शने । रूपं दर्शयति रूपयति । वीणया उपगायति उपवीणयति । तूलैरनुकूणाति अनुतूलयति । श्लोकैरुपस्तौति उपश्लोकयति । सेनया अभियाति अभिषेणयति । लोमान्यनुमार्ष्टि अनुलोमयति । त्वचं गृह्णाति त्वचयति । त्वच इति अकारान्तनिपातनात् परेऽचः पूर्वविधावित्यस्य स्थानिवद्भावादङोत इत्यैभ्न भवति । वर्मणा सन्नह्यति संवर्मयति । वर्णान् गृह्णाति वर्णयति । चूर्णैरवकिरति अवध्वंसयति वा अवचूर्णयति । चुरादिभ्यः चोरयति । मन्त्रयते ॥

आ चार्थवेदसत्यानाम् ॥ २३ ॥

अर्थ वेद सत्य इत्येतेषां आकारश्चान्तादेशो भवति णिच्च । अर्थमाचष्टे अर्थापयति । वेदापयति । सत्यापयति ।

हेतुमति ॥ २४ ॥

हेतुस्तद्योजकः । हेतुमति ध्वर्थेऽभिधेये णिज् भवति अन्येषां दर्शनं प्रयोजकव्यापारः प्रेषणाध्येषणरूपो हेतुमान् । तस्मिन्नभिधेये णिज् भवति । कटं कारयति । ओदनं पाचयति । अत्रवाग्विसर्गो हेतुव्यापारः । क्वचित् समर्थाचरणं यथा भिक्षा वासयति । कारोषाग्निरध्यापयति । आख्यानात् कृत्तस्तदाचष्ट इति कृञ्प्रत्ययापत्तिः प्रकृतिवच्च कारकमिति । आख्यायते यत्तदाख्यातं तस्मात् कृदन्तात् आचष्ट इत्यस्मिन्नर्थे णिज् वक्तव्यः कुरुप्रकृतिप्रत्ययापत्तिः प्रकृतिवच्च कारकं भवतीति वक्तव्यम् । कंसवधमाचष्टे कंसं घातयति । बलिबन्धमाचष्टे बलिं बन्धयति । राजागमनमाचष्टे राजानमागमयति । आख्यानशब्दात्प्र-

तिषेधो वक्तव्यः। आख्यानमाचष्टे इति वाक्यमेव भवति। मृगरमणमाचष्टे मृगान् रमयति। यदा ग्रामे मृगरमणमाचष्टे तदा नेष्यते। आङ्निवृत्तिश्च कालात्यन्तसंयोगे मर्यादायां कृदन्तात् णिच् तदाचष्टे इति कृदुप्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकमिति वर्तते। आरात्रिविवासमाचष्टे रात्रिः विवासयति। चित्रीकरणे च प्राप्त्यर्थे णिच् वक्तव्यः। उज्जयिन्याः प्रस्थितो माहिष्मत्यां सूर्योद्गमनं सम्भावयति सूर्यमुद्गमयति। नक्षत्रयोगे सार्थे। पुष्येण योगं जानाति पुष्पेण योजयति। चन्द्रमसा मघाभिर्योगं जानाति मघाभिर्योजयति। नेदं बहु वक्तव्यमत्रापि कर्थाच्चद्धेतुव्यापारोऽस्ति बहुलग्रहणाद्वा सिद्धम् ।

कण्ड्वादेर्यक् ॥ २५ ॥

कण्डूञ् इत्येवमादिभ्यो यक् भवति। यकः कित्करणं एट् प्रतिषेधार्थं ज्ञापकमिह कण्ड्वादयो धवो गृह्यन्ते न मृद्रूपाणि। कण्डूञ्गृहणीङादिषु दीत्वोच्चारणं ज्ञापकं विकल्पेन धुरूपतैषामन्यथा दीरकृद्ग इति दीत्वेनाप्येतत्सिद्धयेत ः तेन मृत्पक्षे कण्डुः मन्तुः वल्गुः इत्यादिप्रयोगा ज्ञातव्याः। कण्डूयति। कण्डूयते। कण्डूतिः। मन्तूयति। कण्डूञ् मन्तु वल्गु असङ् दृगाङ् महीङ् वेटलोङ् ङकारो दविध्यर्थः। ईयस् इरस् तिरस् मगधस् कभउबस् पम्पस् नन्तस् सुख दुःख भिषज् भिष्णुज्अरच् चुरण तुरण तरल सरणसपर इषुध इषुभ गद्गद एला वेला लेट् लोट् उरस् । अकारान्तानां अनस्वम् ॥

गुपूधूपविच्छिपणिपनेरायः ॥ २६ ॥

गुपू धूप विच्छि पणि पनि इत्येतेभ्यो धुभ्य आयो भवति । गोपायति । धूपायति । विच्छेरन्तरङ्गत्वात्सुकि कृत आयः । विच्छायति । अनुदात्तेत्वं केवले चरितार्थमिति दो न भवति । गुपादिभिर्भौवादिकैः साहचर्यात्पणेर्भौवादिकस्य ग्रहणं न तौदादिकस्य शतस्य पणते व्यवहृपणेः सामर्थ्य इति कर्म्मणि ता । पनिरिहैव पणिना समानार्थः उपदिश्यते । पनायति ॥

वाऽगे ॥ २७ ॥

अगविषये गुपादिभ्यो वा आयो भवति । गोपायिता । गोप्ता । गोपायांचकार । जुगोप । गोपाया । गुप्तिः । इत्येवमादि योज्यम् ॥

कमृत्योर्णिङीयङ् ॥ २८ ॥

सूत्रत्वात्कायाः स्थाने ता कृता । कम् ऋति इत्येताभ्यां णिङ् ईयङ् इत्येतौ त्यौ भवतः । कामयते । णकारः ऐवर्थः । न कम्यमिचमामित्यत्र कमेर्मित्संज्ञाप्रतिषेधः किमर्थः इणमोर्दीर्घतामिति वा प्रादेशो मा भूदित्येवमर्थः । अकामि । कामं कामम् । वा ग इति णिङाऽनुत्पत्तौ णिज्निमित्तस्यैपः प्रादेशनिवृत्त्यर्थश्च ङकारो दविध्यर्थः । ङ्कितोत्येप्प्रतिषेधार्थं न भवति इकस्तत्रानुवृत्तेः ऋतिरिहैव घृणार्थमुपदिश्यते ऋतीयते । वाग इति च वर्तते । तेन कमिता । कामयिता । अर्तिता । ऋतीयिता ॥

तदन्ता धवः ॥ २९ ॥

येऽनुक्रान्ताः सनादयस्ते अन्ता येषां ते धुसञ्ज्ञका भवन्ति । तथा चैवोदाहृतम् । पदसंज्ञायामन्तग्रहणं निय-

मार्थमुक्तम् । अन्यत्र संज्ञाविधौ त्यग्रहणे तदन्तविधिर्नास्ति इति एष प्रतिषेधो मा भूदित्यन्तग्रहणम् ।

स्यतासी लृलुटोः ॥ ३० ॥

लृ इति लृङ्लृटोः सामान्येन ग्रहणं धोः स्यतासी इत्येतौ मध्ये त्यौ भवतः लृलुटोः परतः । शब्दापेक्षमत्र यथासंख्यम् । धोरधिकरात् पूर्वभक्तानिवृत्तिः अगासंज्ञा च भावकर्मकर्तृषु लो विहितः । तत्र यक्सपावुत्सर्गौ स्यादयस्तदपवादाः । करिष्यति । अकरिष्यत् । कर्ता । तासेरिदित्करणं किम् । हलुङब्जित्यनिदित इति नखप्रतिषेधार्थम् । हन्ता । मन्ता ॥

कास्यनेकाज्त्यात्लिट्याम् ॥ ३१ ॥

कासेरनेकाजस्त्यान्ताच्च लिटि परतः आम्भवति । कासाञ्चक्रे । अनेकाज्भ्यः चकासाञ्चक्रार । चुलुम्पाञ्चक्रार । दरिद्राञ्चक्रार । त्यान्तात् लोलूयाञ्चक्रे । कारयाञ्चक्रे । गवाञ्चक्रार । आचारार्थे सृद्भ्य इति क्विप् । अनेकाज्ग्रहणमत्यान्तार्थम् । आमिति नायमागमः । कासेर्विधानात् ॥

सरोरिजादेः ॥ ३२ ॥

सह रुणा वर्त्तते इति सरुः । सरोरिजादेर्धोः लिट्याम्भवति । ईहाञ्चक्रे । इन्दाञ्चक्रार । उपदेशावस्थायां नुम् । ऊहाञ्चक्रे । उञ्छाञ्चक्रार । उदम्भाञ्चक्रार । सरोरिति किम् । इयेष । उवोष । एपि कृते सरुरिति चेत् सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न भवति । इजादेरिति किम् । ततक्षऋच्छत्यतामिति लिद्येपवचनं ज्ञापकं ऋच्छेराम्न भवति । आनर्च्छ । आनर्च्छतुः । आनर्च्छुः,

कथं प्रोर्णुनाव । वाच्य ऊर्णोर्णुवभ्दावो यङ्सिद्धिः प्रयोजनम् । आमश्च प्रतिषेधार्थमेकाचश्चेण्निवृत्तये । प्रोर्णुनूषति । सनिग्रहइचेतिट्प्रतिषेधः ।

दयायासः ॥ ३३ ॥

दय अय आस इत्येतेभ्यश्च लिटि आम्भवति । दयाञ्चक्रे । पलायाञ्चक्रे । गेरयताविति लत्वम् । आसाञ्चक्रे ॥

वेषजागृविदात् ॥ ३४ ॥

उष जागृ विद् इत्येतेभ्यो लिटि परतो वा आम् भवति । उषाञ्चकार । उवोष । जागराञ्चकार । जजागार । विदाञ्चकार । विवेद । विदेराम्यकारान्तत्वं निपातनात् एत्र भवति । जागृसाहचर्यादादादिकस्य ग्रहणम् ॥

भीह्रीभृहुवामुज्वत् ॥ ३५ ॥

भी ह्री भृ हु इत्येतेभ्यो लिटि आम् भवति उचीव कार्यं भवत्येषामुचि कार्यं द्वित्वमित्येव तदतिदिश्यते । लिडपेक्षं द्वित्वमामा व्यवधानान्न प्राप्नोति । बिभयाञ्चकार । बिभाय । जिह्रयाञ्चकार । जिह्राय । बिभराञ्चकार । बभार । भृञ्न्त्रयाणामिति चस्येत्वम् । जुहवाञ्चकार । जुहाव ॥

लिड्वत् कृञि ॥ ३६ ॥

कृञिति प्रत्याहारेण कृभ्वस्तीनां त्रयाणां ग्रहणं मण्डूकप्लुत्या वेति विभाषापेक्षणीया तेन सम्पदो बहिर्भावः । य उक्त आम् लिड्वत्कृञ प्रयुक्ते साधुर्भवति लिड्वत् कृञोतीन्निर्देशात् आमन्तस्याव्यवहितस्य पूर्वं प्रयोगः । ईहाञ्चक्रे । आम्वत् कृञ इति दः । ईहाम्बभूव । ईहः

मास । अस्तिब्रूभ्योर्भूवचीत्यत्रोक्तमस्तेरनुप्रयोगस्य भूभावो न भवति । कृञि प्रत्याहारग्रहणसामर्थ्याद्वा ॥

विदाङ्कुर्वन्तु वा ॥ ३७ ॥

विदाङ्कुर्वन्त्विति एतद्वा निपात्यते किमत्र निपात्यते लोटि वा आम् एवभावो लोडन्तस्य करोतेरनुप्रयोगश्च निपात्यते । विदाङ्कुर्वतु । विदन्तु । सर्वेषु लोङ्चनेषु निपातनमिदं प्रायेण ल्यन्तस्य प्रयोगान्तेन निर्देशः । विदाङ्करवाणि । वेदानि । विदाङ्करवाव । वेदाव । वेदाङ्करवाम । वेदाम । विदाङ्कुरु । विद्धि । विदाङ्कुरुतम् । वित्तम् । विदाङ्कुरुत । विदाङ्करोतु । वेत्तु । विदाङ्कुरुताम् । वित्ताम् ॥

सिर्लुङि ॥ ३८ ॥

धोः सिर्भवति लुङि परतः । अकार्षीत् । अभैत्सीत् । अकृषातां रूटौ देवदत्तेन । इदित्करणं किम् । अमंस्त । अनिदित इति प्रतिषेधात् नोङः खं न भवति ॥

स्पृशमृशकृषतृपदृपो वा ॥ ३९ ॥

स्पृश मृश कृष तृप दृप इत्येतेभ्यो लुङि वा सिर्भवति । तृपिदृप्योर्पुषादिवान्नित्यमङ् प्राप्तः । अन्यत्र शल इति क्सः । अस्प्राक्षीत् । अस्पार्क्षीत् । वानुदातस्य ईङ इति वामागमः । यणादेशे कृते वदव्रजहलो इत्यैप् । पक्षे अस्पृक्षत् । अम्राक्षोत् । अमार्क्षीत् । अमृक्षत् । अक्राक्षीत् । अकृक्षत् । अत्राप्सीत् । अताप्सीत् । अतृपत् । अद्राप्सीत् । अकार्क्षीत् । अदाप्सीत् । अदृपत् ॥

इगुडः शलोऽनिटोऽदृशः क्सः ॥ ४० ॥

इगुड् शलन्तो यो धुः अनिट् तस्मादृशिवर्जितात् भृङि क्सो भवति । दिह । अधिक्षत् । दुह । अधुक्षत् । लिह अलिक्षत् । इगुडः इति किम् । दह । अधाक्षीत् । शल इति किम् । अभैत्सीत् । अनिट इति किम् । अकोक्षीत् । नेटीत्यैप्प्रतिषेधः । अदृश इति किम् । अदर्शत् । अद्राक्षीत् । वेरित इत्यङ् ।

श्लिषः ॥ ४१ ॥

अनिट इत्यधिकारात् श्लिष दाहे इत्यस्य ग्रहणं न भवति । श्लिषः क्सो भवति लुङि परतः । अश्लिक्षत् । पूर्वेण प्राप्तस्य बाधके पुषादित्वादङि प्राप्ते अयमारभ्यते । पुरस्ताऽपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरानित्यङ एव बाधा न क्सेः । आश्लेषि ॥

स्वार्थे ॥ ४२ ॥

स्वार्थः आलिङ्गनं श्लिषः स्वार्थ एव क्सो भवति । आश्लिक्षत् कन्यां देवदत्तः । स्वार्थ इति किम् । समाश्लिषत् जतु च काष्ठं च । दविषये सिखे समाश्लिष्ठस्त्वं धवखदिरेण । झलो झलीति सेः खम् ॥

णिश्रिद्रुस्रुकमेः कर्त्तरि कच् ॥ ४३ ॥

णिजन्तेभ्यः श्रि द्रु स्रु कमि इत्येतेभ्यः कर्तृवाचिनि लुङि कच्भवति । ककारः कित्कार्यार्थः । चकारः लुङि कचि धेरिति विशेषणार्थः । अचीकथत् । अपीपचत् । ओनयत्यादेः कच्प्रतिषेधो वक्तव्यः । औनयीत् । अशिश्रियत् ।

अदुद्रुवत् । कमिग्रहणं वाग इति यदा णिङ् न भवति तदा प्रयोजयति अचकमत । अकः खं यस्मिन् णाविति तत्र विग्रहात् सन्वद्भावो न भवति । णिङ्पक्षे सन्वद्भावः । अचीकमत् । आत्मकर्मणापि चङ् भवति । अचीकरत कटः स्वयमेव । णिश्रिश्रथिग्रन्थिदूङ आन्दविधौ धीनाञ्चेति ञियकोः प्रतिषेधं वक्ष्यति ।

वा धेट्श्व्योः ॥ ४४ ॥

धेट् श्वि इत्येताभ्यां वा कज्भवति कर्तरि लुङि परतः । अदधत् । द्वित्वे ऽचोत्यात्वस्य स्थानिवद्भावाद् द्वित्वं यदा सिस्तदा वा घाधेट्च्छासास इति वा सेरुप् । अधात् । अधासीत् । अनुपि यमरमनमातः क्तिच सगिटौ । अशिश्वियत् । नञौ ञिरित्यत्रेकारप्रश्लेषात् ञिप्रतिषेधः । कचा मुक्ते पक्षे जृश्विइत्यादिना विकल्पेनाङ् । अश्वत् । अश्वयीत् । ह्यक्षणेत्यादिना सावैप्प्रतिषेधः । कर्तरीत्येव । अधिषातां वत्सेन ॥

वक्त्यसुख्यातेरङ् ॥ ४५ ॥

वक्ति असु ख्याति इत्येतेभ्यो लुङि परतः अङ् भवति । इदमेव वक्तिवचनं ज्ञापकं गेपि ब्रूञो वचिरादेशो भवतीति । अवोचत् । अवोचत । अस्पद्वचोथुक्पुम्मो०च्छी-त्युमागमः । अस् । उदास्थत । उदास्थेताम् । उदास्थन्त । अगेरत्यूस्यह्योर्वचनमिति दः । मविषये पुषादित्वादेवाङ् सिद्धः । ख्यातिरिति ख्या प्रकथन इत्यस्य चक्षादेशस्य च कृतयकारस्याविशेषेण ग्रहणम् । आख्यत् । आख्यताम् । आख्यन् ॥

ह्वालिप्सिचः ॥ ४६ ॥

ह्वा लेप् सिच् इत्येतेभ्यश्चाङ् भवति लुङि परतः । आह्वत । अलिपत् । असिचत् । पृथगारम्भ उत्तरार्थः ॥

दे वा ॥ ४७ ॥

ह्वा लिप सिच् इत्येतेभ्यो लुङि दे वा अङ् भवति । आह्वत । आह्वास्त । अलिपत । अलिप्त । असिचत । असिक्त । शिलिद इति किच्चादेप्प्रतिषेधः । पूर्वेण नित्ये प्राप्ते विकल्पोऽयम् ॥

द्युत्वृप्रादिलित्सर्तिशास्त्यर्तिभ्यः ॥ ४८ ॥

द्युतादिभ्यः पुषादिभ्यः लृकारेदुभ्यः सर्तिशास्ति अर्तिशा इत्येतेभ्यश्च लुङि मे परतः अङ् भवति । वेति नानुवर्तते । द्युतादयः कॄपर्यन्ताः । व्यद्युतत् । व्यलुटत् । अश्विवतत् । द्युद्भ्योलुङाति वामम् । पुषादयः आगणपरिसमाप्तेः । अपुषत् । असुषत् । क्लृप्तः प्राप्तः । लृकारेद्भ्यः । आपत् । अगमत् । अशकत् । असरत् । असिषत् । म इति किम् । व्यद्योतिष्ट । व्यत्यपुच्छत् । अर्तेरपि दविषये मा सम्मृषातां मा सम्मृषत ।

वेरितः ॥ ४९ ॥

म इति वर्त्तते । इरशब्देतो धोर्वाङ् भवति लुङि मे परतः । अरुधत् । अरौत्सीत् । अभिदत् । अभैत्सीत् । म इत्येव । अरुद्ध । अभित्त ॥

जॄश्विस्तम्भुम्रुच्म्लुच्ग्रुच्ग्लुचः ॥ ५० ॥

वेति वर्तते । जॄ श्वि स्तम्भु म्रुच म्लुच ग्रुच् ग्लुच् इत्येतेभ्यः कर्त्तरि लुङि वाङ् भवति । जॄष् । अजरीत् । अजारोत् । अङि इसुरेवित्येप् । अश्वत् । अश्वयोत् ।

कजपि विभाषितः । अशिश्रियत् । स्तम्भुरिहैवोपदिष्टः । अस्तभत् । अस्तम्भीत् । न्यम्रुचत् । न्यम्रोचीत् । न्यम्लुचत् । अम्लोचीत् । अग्रुचत् । अग्रोचीत् । अग्लुचत् । अग्लोचीत् । अम्लुचन् ग्लुञ्चेर्नोडोग्रहणमनर्थकम् । अवक्षे विशेषाभावात् नादुग्रहणसामर्थ्यान्नखं न भवति इत्यपि न युक्तं न्यग्लुञ्चदिति लङा सिद्धति ॥

ञिस्ते पदः ॥ ५१ ॥

वेति निवृत्तमुत्तरत्र वाग्रहणात् । कर्त्तरीति वर्तते पदेर्धातुङि ते परतः ञिर्भवति । उदपादि भैक्षम् । समपादि शस्यम् । त इति किम् । उदपत्साताम् । उदपत्सत ॥

दीपजनबुधपूरितायिप्यायो वा ॥ ५२ ॥

दीपादिभ्यः लुङि ते परतः वाञिर्भवति । अदीपि । अदीपिष्ट । अजनि । अजनिष्ट । औ जनिवध्योरित्यैप्प्रतिषेधः । साहचर्यादु बुधेरनुदात्तेता ग्रहणम् । अबोधि । अबुद्ध । अपूरि । अपूरिष्ट । अतायि । अतायिष्ट । अप्यायि । अप्यायिष्ट । अयं कर्तरि विकल्पः । अन्यत्र ञिर्ङावित्यनेन नित्यो ञिः ॥

कर्मण्यात्मनि ॥ ५३ ॥

आत्मशब्देन कर्त्ताभिप्रेतः । यदा सौकर्यात् कर्म कर्तृत्वेन विवक्ष्यते तदा कर्मणि आत्मनि विहिते तशब्दे परतः वा ञिर्भवति । अकारि कटः स्वयमेव । अकृत कटः स्वयमेव । उरिति सेः किच्चम् । अलावि केदारः स्वयमेव । अलविष्ट केदारः स्वयमेव । ञिर्ङावित्यनेन नित्ये औ प्राप्ते विकल्पोऽयम् । आत्मकर्मणीति किम् । अकारि कटो देवदत्तेन ॥

दुहश्च ॥ ५४ ॥

चशब्दो विकल्पानुकर्षणार्थः । दुहेर्वा ञिर्भवति तशब्दे परत कर्मण्यात्मनि । नियमोऽयं हलन्तेषु दुहेरेव विकल्पः तेन पूर्वसूत्रे अजन्तेषु विकल्पो द्रष्टव्यः । अदोहि गौः स्वयमेव । अदुग्ध गौः स्वयमेव । वोप् दुहदिहलिहगुहो दे दन्त्य इति क्सस्योप् । आत्मकर्मणीत्येव । अदोहि गौर्गोपालकेन ।

न रुधः ॥ ५५ ॥

ञिर्भवतीति प्राप्ते प्रतिषेधोऽयम् । भावे कर्मण्यात्मनि ञिर्न भवति । अन्ववरुद्ध गौः स्वयमेव ॥

तपोऽनुतापे च ॥ ५६ ॥

तपतेरनुतापे च कर्मण्यात्मनि च ञिर्न भवति । अनुतापः पश्चात्तापः तत्र तावत् भावकर्मणोरनुपि प्रतिषेधः । अन्ववतप्त पापेन कर्मणा । कर्मण्यात्मनि । अतप्त तपः स्वयमेव साधुम् । साधुस्तावदुपवासादिलक्षणं तप-स्तप्यते । तद्यदा तीव्रत्वात् कर्तृत्वेन विवक्षितं तदाऽयं प्रयोगः ॥

यग् दुहः ॥ ५७ ॥

नेति वर्तते । दुहेः कर्मण्यात्मनि यङ् न भवति । दुग्धे गौः स्वयमेव । लुङि अदुग्ध गौः स्वयमेव ॥

नमः शप्तु ॥ ५८ ॥

नमः कर्मण्यात्मनि यङ् न भवति शप् तु भवति । नमते दण्डः स्वयमेव । अनमत दण्डः स्वयमेव । कर्ता-श्रयः शप्न स्यात् ॥

स्तोश्च ञिश्च ॥ ५९ ॥

स्तोश्च नमश्च कर्मण्यात्मनि ञिर्यग् च न भवतः। प्रास्तोषु गौः स्वयमेव। प्रस्तुते गौः स्वयमेव। लङि प्रास्तुत गौः स्वयमेव। ञिप्रतिषेधार्थं नमो ऽनुकर्षणम्। यक् तु पूर्वेणैव प्रतिषिद्धः। अनंस्त दण्डः स्वयमेव। ञियकोः प्रतिषेधे णिश्रन्थिग्रथिभ्रूणां दविधौ धीनां चोपसंख्यानं कर्तव्यम्। णिरिति हेतुमणिचोऽन्यस्य वा विशेषेण ग्रहणम्। अचीकरत कटः स्वयमेव। कारयते कटः स्वयमेव। अश्रन्थिष्ट मेखला स्वयमेव। श्रथ्नीते माला स्वयमेवा अग्रथिनष्ट मेखला स्वयमेव। ग्रथ्नीते मेखला स्वयमेव। अवोचत वाक् स्वयमेव। ब्रूते वाक् स्वयमेव। दविधौ धीनां व्यकृषत सैंधवाः स्वयमेव। व्यकुर्वत सैन्धवाः स्वयमेव। विकुर्वते सैन्धवाः स्वयमेव। ञियकोः प्रतिषेधे कथं कर्त्राश्रयाः कञादयः। नमः शप्तु इत्यतस्तुशब्दोऽनुवर्तते तेन कर्ताश्रयविकरणसिद्धिः। अत इदमपि सिद्धम्। आरोहन्ति हस्तिनं हस्तिपकाः। आरोहयते हस्ती स्वयमेव। सिच्यन्ति हस्तिनं हस्तिपकाः। सेचयते हस्ती स्वयमेव। डाविति दविधिः यदान्यत्कर्मप्रति स्वातन्त्र्येण विवक्षा तदा कर्त्राश्रया विधयो भवन्ति। आरोहयमाणो हस्ती स्थलमारोहति मनुष्यान्। यथा भिद्यमानः कुशूलः पात्राणि भिनत्ति। इह कस्मादो न भवति। स्मरति वनगुल्मस्य कोकिलः। स्मरयत्येनं वनगुल्मः स्वयमेव। कर्मस्थभावकानां कर्मस्थक्रियाणां चात्मकर्मविवक्षाकर्तृस्वभावकं बाध्या नमिति दो न भवति ॥

कुषिरञ्जेः श्यो मे वा ॥ ६० ॥

कुषिरञ्जित्येताभ्यां कर्मण्यात्मनि वा श्यो भवति मे परतः । कथं मविधिः वृद्धकुमारीवरवाक्यन्यायेन यथा बहुक्षीरघृतमोदनं मम पुत्रा भुक्षीरन्नित्यत्र वरादिलब्धिः । कुष्यति पादः स्वयमेव । रज्यति वस्त्रं स्वयमेव । यदा श्यो न भवति तदा यग्दविधी भवतः । क्रुष्यते पादः स्वयमेव । रज्यते वस्त्रं स्वयमेव । यदनुवर्तते तदपवादोयं तेन लिङ्-लिङोः स्यादिविषये च नायं विधिः ॥

तपस्तपःकर्मकस्य कर्मवत् ॥ ॥ ६१ ॥

तपतेस्तपःकर्मकस्य कर्त्ता कर्मवद्भवति । कर्मातिदेशस्य यग्दविधी प्रयोजनम् । तप्यते तपः साधुः । अर्जयतीत्यर्थः । अतप्यत तपः साधुः । अतप्त तपः साधुः । तपःकर्मकस्येति किम् । उत्तपति सुवर्णं सुवर्णकारः ॥

ञिर्ङौ ॥ ६२ ॥

मण्डूकप्लुत्या ते इति वर्तते लुङीति च ञिरित्ययं त्यो भवति ङावर्थे लुङि ते परतः । भावे आसि भवता । कर्मणि अकारि कटो भवता । अलावि केदारो भवता । पुनर्ञिग्रहणं किम् । ञिरेव यथा स्यात् । यदन्यत्प्राप्नोति तन्माभूत् । उपाश्लेषि कन्या । श्लिष इति क्सो न भवति ॥

मे यक् ॥ ६३ ॥

ङाविति वर्तते ङिवाचिनि गे यक् भवति । आख्यातपाच्यस्य भावस्यैकत्वात् अस्मद्युष्मत्सञ्ज्ञाभावाच्च अन्यसञ्ज्ञक एक एव च भवति । आस्यते भवता । सुप्यते

भवता । कर्मणि क्रियते कटः । भुज्यते ओदनः । ज्ञकारस्य दीर्घे प्राप्ते रिधञ्जिश इति रिः । कर्मसामान्यात् आत्मकर्मण्यपि यग् भवति । क्रियते कटः स्वयमेव । भिद्यते कुशूलः स्वयमेव । कथं भिद्यते कुशूलेन स्वयमेवेत्यत्र कर्त्तरि ता । अत्राकर्मकत्वविवक्षा । तेन भावे लकारः । लान्तस्येोभयविवक्षा । व्यक्तस्वार्थे स्वकर्मकविवक्षैव । भेत्तव्यं कुशूलेन स्वयमेव । भिन्नं कुशूलेन स्वयमेव । इषङ्क्षेदं कुशूलेन स्वयमेव ॥

कर्तरि शप् ॥ ६४ ॥

कर्तृवाचिनि गे परतः धोः शप्भवति । जयति । भवति । तरति । शकारः मिङ्णिङ्इति विशेषणार्थः । पकारः गोपिदिति विशेषणार्थः ॥

दिवादेः श्यः ॥ ६५ ॥

दिव इत्येवमादिभ्यः श्यो भवति गे परतः । दाव्यति । सीव्यति । हव्यभक्कुच्छुर इति उङो दीत्वम् । इमे श्यादय शपोऽपवादः ॥

वा भ्राशम्लाशभ्रमुक्रमुत्रसित्रुटिलषः ॥ ६६ ॥

भ्राश म्लाश भ्रम् क्रम् त्रसि त्रुटि लष इत्येतेभ्यो धुभ्यो वा श्यो भवति । उभयत्र विभाषेयम् । भ्राशते भ्राश्यते । म्लाशते । म्लाश्यते । भ्रमति । भ्रम्यति । श्ये भौवादिकस्याशमादित्वादीत्वं नास्ति दैवादिकस्य दीत्वम् । भ्रमति । भ्राम्यति । क्रमति । क्राम्यति । क्रमो मे इति दीत्वम् । त्रसति । त्रस्यति । त्रुटति । त्रुट्यन्ति । लषति । लष्यति । क्रमिग्रहणं न कर्तव्यम् । दिवादिपाठात् श्ये सति समि

त्यामदोदीरिति दीत्वं सिद्धम् । ष्ठिवक्लम्शचमासि पुनर्दीत्ववचनं ज्ञापकं शवपि भवतीति ॥

यसः ॥ ६७ ॥

यसु प्रयत्न इत्यस्माद्धा श्यो भवति । यसति । यस्यति ॥

समः ॥ ६८ ॥

संपूर्वाच्च यसः वा श्यो भवति । संयस्यति । संयसति । नियमेऽयं सम एव च गेर्विकल्पो नान्यस्मात् । आयस्यति । प्रयस्यति । दिवादिपाठान्नित्यः श्यः ॥

स्वादेः श्नुः ॥ ६९ ॥

षुञ् इत्येवमादिभ्यो धुभ्यः श्नुरित्ययं त्यो भवति । सुनोति । सिनोति ॥

श्रुवः शृ ॥ ७० ॥

श्रु इत्येतस्मात् श्रुर्भवति शृ इत्ययं चादेशः । श्रु इति भुवादौ स्वादौ च पठ्यते । शृणुतः । शृण्वन्ति ॥

वाऽक्षः ॥ ७१ ॥

अक्ष इत्येतस्माद्धोः वा श्नुर्भवति । अक्ष्णोति । अक्षति । भौवादिकोऽयम् ॥

तक्षः स्वार्थे ॥ ७२ ॥

स्वार्थस्तनूकरणम् । तक्षु इत्यस्मात् स्वार्थे वा श्नुर्भवति ॥ तक्ष्णोति काष्ठम् । तक्षति काष्ठम् । स्वार्थे इति किम् । सन्तक्षति वाग्भिर्दुर्जनः ॥

रुधितुदादिभ्यां श्नमशौ ॥ ७३ ॥

रुधादिभ्यस्तुदादिभ्यः श्नमशौ त्यौ भवतः। शकारः

श्नान्मखमिति विशेषणार्थः । मकारः परोऽचो मिदिति विशेषणार्थः । रुणद्धि । भिनत्ति । तुदादिभ्यः शः । तुदति । क्षिपति ॥

कृञ्तनादेरुः ॥ ७४ ॥

कृञ् इत्येतस्मात्तनादिभ्यश्च उरित्ययं त्यो भवति । करोति । कुरुतः । कुर्वन्ति ।

तनादिभ्यः । तनोति । सनोति । क्षणोति । तनादित्वादेव सिद्धे पृथक् कृञो ग्रहणं किम् । अन्यत्तनादिकार्यं करोतेर्माभूत् ।

तनादिभ्यस्तथासोरिति विभाषया सेरुम्न भवति । अकृत । अकृथाः । न चानुप्पक्षे प्राङ्नोरिति खं सम्भवति । तस्मिन् प्राप्ते उप आरम्भात्सेः श्रवणं प्रसज्येत ॥

धिन्विकृण्व्योर च ॥ ७५ ॥

धिवि प्रीणने कृवि हिंसाकरणयोः इत्येताभ्यां उरित्ययं त्यो भवति अकारश्चान्तादेशः । धिनोति । कृणोति । अतः खम् । नधुखेग इति प्रतिषेधात् परेऽचः पूर्वविधाविति स्थानिवद्भावाद्धा न भवति । सनुम्कोच्चारणं ज्ञापकं त्योत्पत्तेः प्रागेव नुम्भवतीति । तेन कुण्डा हुण्डेति सिद्धम् ॥

क्र्यादेः श्ना ॥ ७६ ॥

क्री इत्येवमादिभ्यो धुभ्यः श्ना इत्ययं त्यो भवति । क्रीणाति । प्रीणाति ॥

स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च ॥ ७७ ॥

स्तभ्वादिभ्यः श्नुर्भवति श्ना च । स्तभ्नोति । स्तभ्नाति ।

स्तुभ्नोति । स्तुभ्नाति । स्कभ्नोति । स्कभ्नाति । स्कुभ्नोति । स्कुभ्नाति । स्कुनाति । स्कुनोति । स्कुञ् क्रयादिषु पठ्यते । इतरेषामिहैवोपदेशः उदित्करणादन्यत्रापि प्रयोगः ॥

हौ हलः श्नः श्नानः ॥ ७८ ॥

हल उत्तरस्य श्ना इत्येतस्य शान इत्ययमादेशो भवति हौ परतः । अशान । पुषाण । हाविति किम् । अश्नाति । हल इति किम् । क्रीणीहि । श्न इति स्थानिनिर्देशे किमर्थः स्तम्भादीनां यदा श्नुस्तदा मा भूत् । स्तभ्नुहि । त्यान्तरं वा सर्वेभ्यः सम्भाव्यते । शानस्य शित्करणज्ञापकम् । अनित्योऽनुबन्धस्य स्थानिवद्भाव इति तेन लङादीनां भिवादिषु स्थानिवद्भावादित्वं डि च । न भवति पचमाना स्त्री । अचिनवम् । असुनवम् ॥

ईपाऽत्र वाक् ॥ ७९ ॥

धोरिति वर्तते । अत्र धोरधिकारे ईपा निर्दिष्टं वाक् संज्ञं भवति । गम्यमानक्रियापेक्षया ईपेत्यस्य करणत्वम् । वक्ष्यति कर्मण्यण् कुम्भकारः । शरलावः । मृदूपस्येयं वाक्संज्ञा तेन कतृकर्मणोः कृतीति कर्मणि ता भवति । तासाद्वाक्सः परत्वेन । अत्रग्रहणं विस्पष्टार्थम् । वागितायमन्वर्था संज्ञा । ब्रूतेऽर्थं वागिति तेनासामर्थ्ये वाक्संज्ञा नास्ति । पश्य कुम्भं करोति कटम् । मृत्पिण्डं कुम्भं करोति । महान्तं कुम्भं करोति । विशेषणानां च न भवति । हरतेर्दतिनाथयोः पशाविति पशुशब्दस्य न भवति । यत्र वाचकत्वं तत्र भवति । काशकटकारः ॥

कृदमिङ् ॥ ८० ॥

अत्र धेरधिकारे मिङ्वर्जितास्त्याः कृत्सञ्ज्ञा भवन्ति। अतऊर्ध्वं ये वक्ष्यन्ते तेषामधिकारेणेयं सञ्ज्ञा। वक्ष्यति तव्यानीयौ। कर्तव्यः। करणीयः। अत्र कृत्सञ्ज्ञाप्रयोजनम्। इत्यः। स्तुत्यः। पिति कृतीति तुक्। अमिङिति किम्। चीयात्। स्तुयात्। अकृत्यकारादीत्वं सिद्धम्॥

प्राक्तेर्दाऽसमः॥ ८१॥

स्त्रियां क्तिरिति वक्ष्यते। प्रागेतस्मादसमो यस्त्यः कृत् स वा भवतीत्येषोऽधिकारो वेदितव्यः सरूपस्त्वपवादो बाधक एवेति भावः। विक्षेपकः। विक्षेपा। विक्षिपः। इगुङ्लक्षणकविषये ण्वुतृचावपि भवतः। प्राक्तेरिति किम्। चिकीर्षा। अस्त्यादित्यकारः क्तेर्बाधकः। व्याक्रोशो। व्याकृष्टिरित्येवमादिषु यत्नो विधेयः। असम इति किम्। गोदः। कम्बलदः। आतः क इति को भवति। अणोऽपवादः। अनुबन्धापाये रूपगतं समत्वमत्रम्॥

राचोर्य्याः॥ ८२॥

प्रागिति वर्तते ण्वुतृचाविति वक्ष्यति प्रागेतस्माद्ये त्यास्ते ण्यसंज्ञा वेदितव्याः। देवदत्तस्य कर्तव्यम्। देवदत्तेन कर्तव्यम्। ण्यप्रदेशाः ण्यस्य वा कर्तरीत्येवमादयः॥

तव्यानीयौ॥ ८३॥

तव्य अनीय इत्येतौ त्यौ भवतः। कर्तव्यः। करणीयः कथं वास्तव्यः। वास्तु क्षेत्रं तस्माद्भवार्थे दिगादित्वाद्यः। एवं वस्तुनि भवो वस्तव्यः॥

योऽचोरासुयुवः ॥ ८४ ॥

य इत्ययं त्यो भवत्यजन्ताद्धोः ऋवर्णान्त आसु यु इत्येतान् वर्जयित्वा । देयम् । गेयम् । ईद्ये इति ईत्वं गागयोरिति पुनरेप् । देयमृणइति निर्देशादीत्वे गुकार्ये निवृत्ते पुनरेप् । दित्स्यं धित्स्यमित्यत्र अगे ये परतोऽतः खम् । अच इति किम् । पाक्यम् । अरासुयुव इति किम् । कार्यम् । हार्यम् । आसाव्यम् । याव्यम् ॥

पोरदुङोऽत्रपिवपिरपिलपिचमः ॥ ८५ ॥

पवर्गान्ताद्धोरदुङ य इत्ययं त्यो भवति अपिवपिरपिलपिचमीन् वर्जयित्वा । रभ्यम् । लभ्यम् । समत्वेन ण्यापवादोऽयम् । पोरिति किम् । वाच्यम् । अदुङ इति किम् । डेप्यम् । कुटादित्वादेम्न स्यात् । तपरकरणमसन्देहार्थम् । अत्रापि वपिरपिलपिचम इति किम् । आप्यम् । वाप्यम् । राप्यम् । लाप्यम् । आचाम्यम् ।

शकिसहश्च ॥ ८६ ॥

शकि सह इत्येताभ्यां यो भवति । शक्यम् । सह्यम् । चकारो ऽनुक्तसमुच्चयार्थः । तेन ससितकिचतियतियजिजनीनां संग्रहः । सस्यम् । तक्यम् । चत्यम् । यत्यम् । यज्यम् । जन्यम् । हनो वा वध इति च वक्तव्यम् । वध्यम् । घात्यम् ॥

गदमदचरयमोऽगेः ॥ ८७ ॥

गद मद चर यम इत्येतेभ्यो ऽगिपूर्वेभ्यः यस्त्यो भवति । गद्यम् । मद्यम् । चर्यम् । यम्यम् । अगेरिति किम् । निगाद्यम् । प्रमाद्यम् । अभिचार्यम् । प्रायाम्यम् । यमः

पोरदुङ इति सिद्धे नियमार्थमिदम् । अगेरेव यथा स्यात् । इतरेषामप्राप्ते विधिः । चरेराङि चागुरावितिवक्तव्यम् आचर्यं व्रतम् । अगुरावितिकिम् । आचार्यो गुरुः ॥

पण्यावद्यवर्यावह्यार्यापसर्याजर्याणि ॥ ८८ ॥

पण्य अवद्य वर्या वह्य अर्य उपसर्या अजर्य इत्येतानि शब्दरूपाणि निपात्यन्ते॥परायमितिनिपात्यते व्यवहर्तव्यं चेद्भवति पण्यः कम्बलः। पण्या गौः। पाण्यमित्यन्यत्र । अवद्यं भवति गर्ह्यं चेत्। अवद्यं द्यूतम्। अवद्यं पापम्। न उद्यते इत्यनुद्यमन्यत् । वर्येति वृङो यो भवत्यनिरोधेऽर्थे । शतेन वर्या । सहस्रेण वर्या । स्त्रीलिङ्गादन्यत्र ण्य एव भवति । वार्या ऋषयः धनसंविभागरूपोऽत्राप्यनिरोधो ऽस्ति अनिरोध इति किम्। वार्या गौः शस्येषु। वह्यमिति निपात्यते करणेऽचेद्भवति । वहति तेन वह्यं शकटम् । वाह्यमन्यत् । अर्य इति निपात्यते स्वामिनि वैश्ये च । अर्यः स्वामी । अर्यो वैश्यः । अन्यत्र ण्य एव । आर्यः साधुः । उपसर्येति निपात्यते काल्या प्रजने चेत् प्रजनो गर्भग्रहणकालः प्राप्तोऽस्याः काल्या तदस्यं प्राप्तमिति वर्तमाने कालाद्य इति यः । उपसर्या गौः । उपसर्या वडवा । उपसार्या शरदि मथुरा अन्यत्र । अजर्यमिति नञ्पूर्वाज्जृषः कर्तरि यो निपात्यते सङ्गते ऽर्थे । न जीर्यत इत्यजर्यमार्यसङ्गतम् । अजरिता कम्बल इत्यन्यत्र ॥

वदः सुपि क्यप् च ॥ ८९ ॥

अगेरिति वर्तते । वदतेः क्यब्भवति यश्च निवर्जिते सुपि वाचि । सत्यमुद्यत इति सत्योद्यम् । सत्यवद्यम् ।

मिथ्योद्यम्। मिथ्यावद्यम्। मिङितिषसः। सुपीति किम्। वाद्यम्। अगेरित्येव। अनुवाद्यम् ॥

भूयहत्ये ॥ ९० ॥

सुप्यगेरिति वर्तते। भूय हत्य इत्येते शब्दरूपे निपात्येते गिवर्जिते सुपि वाचि। देवभूयं गतः। देवत्वं गत इत्यर्थः। साधु भूयं गतः। क्यबत्र निपात्यते। दरिद्रहननं दरिद्रहत्या। चोरहत्या। हन्तेः स्त्रीलिङ्गे भावे क्यङ्निपात्यते। सुपीत्येव। भव्यम्। घातो वर्तते। अगेरित्येव प्रभव्यमुपघातः ॥

स्तुशासिगृदृजुषः क्यप् ॥ ९१ ॥

सुप्यगेरिति निवृत्तम्। सामान्येनायं विधिः। स्तुशास् इण् वृणोति दृ जुष इत्येतेभ्यः क्यप्भवति। स्तुत्यः। शिष्यः। इत्यः। आवृत्यः। आदृत्यः। पुनः क्यग्रहणं लिङ्गार्थम्। आरावश्यक इत्यस्यापि बाधनार्थम्। अवश्यस्तुत्यः। शासिदुहिगुहिभ्यो धेति वक्तव्यम्। शस्यम्। दुह्यम्। शंस्यम्। दोह्यम्। गुह्यम्। गोह्यम्। आङ्पूर्वादञ्जेः सञ्ज्ञायां क्यप् वक्तव्यः। आज्यम्। न वक्तव्यम्। पुनः क्यप्ग्रहणायोगविभागाद्भविष्यति। उपेयमिति ईङो रूपम् ॥

ऋदुङो ऽकृपिचृतेः ॥ ९२ ॥

ऋकारोङो धोः क्यप्भवति कृपिचृती वर्जयित्वा। वृत्यम्। वृद्यम्। ण्यापवादोऽयम्। अकृपिचृतेरिति किम्। कल्प्यम्। चर्त्यम्। पाणौ समवशब्दे च सृजेर्ण्यो वक्तव्यः। पाणिसर्ग्या रज्जुः। समवसर्ग्यः कटः। भृञः क्यप्भवति परस्तु विषये। भृत्याः कर्मकराः। भृत्याः शिशवः। भर्तव्या इत्यर्थः। अस्ताविति किम्। भार्या नाम क्षत्रियाः। केचित्

देवदत्तस्य भार्या। स्त्रियां समजनिषदेत्यादिना भावे क्यप्। कर्मणि चायं भार्याशब्दः। संपूर्वाद्धेति वक्तव्यम्। सम्भृत्या सम्भार्याः कर्मकराः॥

खेयराजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्या-व्यथाः॥ ९३॥

खेयादयः शब्दा निपात्यन्ते। खेयमिति खनतेर्यो-निपात्यते इकारश्चान्तादेशः। आदेये वा इत्त्वात्वं नाश-ङ्कनीयम्। निपातनादेव राजसूयमिति राजशब्दे वान्ते भा-न्ते सुनोतेः क्यप् दीत्वं च निपात्यते। राज्ञा सूयते राजा वा अस्मिन् सूयते इति राजसूयम्। सरति कर्माणि सुवतीति वा सूर्यः। सर्त्तेरुत्वं सूवतेर्वा रुडागमः क्यप्च निपात्यते मृषापूर्वस्य वदतेर्नित्यं क्यप्निपात्यते। मृषोद्यम्। रुच्य-मिति कर्त्तरि क्यप् निपात्यते। कुप्यमिति सज्ञायां गुपे-रादौ कत्वं क्यप्च निपात्यते। कुप्यं फल्गु भाण्डमित्यर्थः। गोप्यमन्यत्। कृषं पच्यन्ते स्वयमेव कृषृपच्या व्रीहयः। आत्मकर्मणि क्यप्। न व्यथतेऽसावव्यथ्यः। नञ्पूर्वा-द्व्यथतेः कर्त्तरि क्यप् निपात्यते॥

भिद्योद्धौ नदे॥ ९४॥

भिद्य उद्ध इत्येतौ निपात्येते नदेऽभिधेये। भिनत्ति कूलानि भिद्यः। उज्झत्युदकमिति उद्धः। कर्तरि कारके क्यप् उज्झेर्धत्वं च निपात्यते। नद इति किम्। भेदः। उज्झः। इगुकूलक्षणः कः पचाद्यच यथाक्रमम्॥

पुष्यसिद्धौ भे॥ ९५॥

पुष्य सिद्ध इत्येतौ शब्दौ निपात्येते भेऽभिधेये।

पुष्यन्त्यस्मिन्नर्था आरभमाणानामिति पुष्यः । सिध्यन्त्यस्मिन्नर्था इति सिद्धः । अधिकरणे क्यप्रिपात्यते नक्षत्रे वाच्ये । अन्यत्र पोषणः सेधन इति च भवति ॥

विपूयविनीयजित्या मुञ्जकल्कहलिषु ॥ ९६ ॥

विपूय विनीय जित्या इत्येते शब्दा निपात्यन्ते यथासंख्यं मुञ्ज कल्क हलि इत्येतेषु वाच्येषु । विपूयते इति विपूयो मुञ्जः । पवतेः क्यप्रिपात्यते । विपव्यमन्यत् । विनीयते ऽसौ घृतादिना त्रिफलादिकल्कः । विनेयमन्यत् । जित्यो हलिः । जेयमन्यत् ॥

पदास्वैरिबाह्यापण्येषु ग्रहः ॥ ९७ ॥

पदे अस्वैरिणि बाह्यायां पण्ये चार्थे ग्रहेर्द्वोः क्यप्भवति । प्रगृह्यते इति प्रगृह्यं पदम् । अवगृह्यम्पदम् । अस्वैरी परवशः । गृह्यका इमे । अनुकम्पायाङ्कः परतन्त्रा इत्यर्थः । बहिर्भवा बाह्या गृह्यते इति गृह्या ग्रामस्य गृह्या ग्रामगृह्या नगरगृह्या सेना । ताभ्यां बहिर्भूत्ता इत्यर्थः । स्त्रीलिङ्गादन्यत्र न भवति । पक्षे भवः पण्यः । भरतगृह्यः । भुजबलिगृह्यः तत्पण्य इत्यर्थः ॥

कृवृषिमृजां यशोभद्रस्य ॥ ९८ ॥

कार्थे ता । कृ वृषि मृज् इत्येतेभ्यः क्यप् भवति यशोभद्रस्याचार्यस्य मतेन । कृत्यम् । कार्यम् । नित्यं ण्यः प्राप्तः । वृष्यम् । वर्ष्यम् । परिमृज्यम् । परिमार्ज्यम् । ऋदुड इति नित्यं क्यप् प्राप्तः ।

युग्यं पत्रे ॥ ९९ ॥

पतति अनेनेति पत्रं वाहनं तस्मिन्नर्थे युग्यमिति निपात्यते । युज्यते इति युग्योऽश्वः । युग्यो गौः । क्यप्-कुत्वं च निपात्यते पत्रादन्यत्र योग्यमिति ॥

ण्यः ॥ १०० ॥

ण्य इत्ययं त्यो भवति धोः । अयमुत्सर्गः । अजन्ताद्यः क्यप् चास्यापवादौ । कार्यम् । हार्यम् । पाक्यम् । पाठ्यम् ॥

ओरावश्यके ॥ १०१ ॥

उवर्णान्ताद्धोर्ण्यो भवत्यावश्यके द्योत्ये । अवश्यमित्यस्य भावःआवश्यकम् । मनोज्ञादित्वाद् वुञ् । लाव्यम् । पाव्यम् । यद्यावश्यकेऽर्थे ऽवश्यलाव्यमिति कथं सविधिः । मयूरव्यंसकादित्वाद्विभाषया । आवश्यक इति किम् । लव्यम् । पठ्यम् ॥

अमावस्या वा ॥ १०२ ॥

अमावस्य इति वा प्रादेशो निपात्यते अमा वसतः सूर्याचन्द्रमसावस्यां अमावस्या । अमावास्या । अमाशब्दे सहार्थे वाचि वसेरधिकरणेऽर्थे ण्यो विभाषया उङः प्रादेशश्च निपात्यते प्रदेशेषु एकदेशविहृतस्य ग्रहणार्थम् ॥

पाप्यसान्नाय्यनिकाय्यधाय्याऽऽनाय्यप्राणाय्या मानहविर्निवाससामिधेन्यनित्या-ऽसम्मतिषु ॥ १०३ ॥

पाय्य सान्नाय्य निकाय्य धाय्य आनाय्य प्रणाय्य-इत्येते शब्दा निपात्यन्ते यथासंख्यं मान हवि निवास सामिधेनी अनित्य असम्मति इत्येतेष्वर्थेषु । पीयतेऽनेनेति

पाय्यं मानम् ! माङः करणे ण्यः । आदिपत्वञ्च निपात्यते । मानमन्यत् । सन्नीयते इति सान्नाय्यं हविः । सपूर्वान्नयतेः ण्यः । आयादेशः । गे दीत्वं च निपात्यते । सन्नेयमन्यत् । निचीयते इति निकाय्यो निवासश्चेत् । निपूर्वाच्चिञः ण्यावादेशावादिकत्वं च निपात्यते । निचेयमन्यत् । धीयते इति धाय्या सामिधेनी । दधातेर्ण्यो निपात्यते विशिष्टा ऋचः सामिधेन्यः । तत्र रूढिवशात्काचिदेवोच्यते । धेयमन्यत् । आनाय्य इति नयते राङ्पूर्वाण्ण्यायादेशौ निपात्यौ अनित्येऽर्थे आनाय्यो दक्षिणाग्निः । रूढिरेषा दक्षिणाग्निविशेषस्य । आनेयोऽन्यः । अविद्यमानसम्मतिरसम्मतिः प्रपूर्वान्नयतेर्ण्यायादेशौ निपात्यौ प्राणाय्यश्चौरः । प्रणेयोऽन्यः ॥

कुण्डपाय्यसंचाय्यपरिचाय्योपचाय्यचित्याग्निचित्याः ॥ १०४ ॥

कुण्डपाय्य सञ्चाय्य परिचाय्य उपचाय्य चित्य अग्निचित्या इत्येतानि शब्दरूपाणि निपात्यन्ते । कुण्डेन पीयते ऽस्मिन्सोम इति कुण्डपाय्यः क्रतुः । कुण्डशब्दे भान्ते ण्योऽधिकरणे निपात्यते । कुण्डपानमन्यत् । सञ्चीयते इति सञ्चाय्यः क्रतुः । सञ्चेयमन्यत् । परिचाय्योपचाय्यौ निपात्येते अग्नावभिधेये । परिचेय उपचेय इत्यन्यत् । चित्याग्निचित्याशब्दौ निपात्येते अग्नावभिधेये चीयते सौ चित्योऽग्निः । अग्निचयनमग्निचित्या । अन्त्ये स्त्रीलिङ्गे भावे क्यप्निपात्यः ॥

ण्वुदचौ ॥ १०५ ॥

ण्वु तृच् एत्येतौ त्यौ भवतः । कारकः । कर्ता भोजकः । भोक्ता ॥

नन्दिग्रहिपचिभ्यो ल्युणिन्यचः ॥ १०६ ॥

नन्द्यादिभ्यः ग्रहादिभ्यो पचादिभ्यश्च यथासंख्यं ल्यु णिन् अच् इत्येते त्या भवन्ति । नन्दयतीति नन्दनः । लकारः युवोरनाकाविति सामान्यग्रहणाविघातार्थः । नन्दि वाशिमदिनर्दिभूषिसाधिशोभिवर्द्धिभ्यो ण्यन्तेभ्यः संज्ञायां सहितपिदमिज्वलिरुचिजल्पिदपिरसिसङ्क्रन्दिसङ्घर्षिभ्यः संज्ञायामण्यन्तेभ्यः । जनार्दनः । मधुसूदनः । लवण इति निपातनाण्णत्वम् । विभीषणः । पवनः । वित्तनाशनः । कुलदमन एतावणोऽपवादौ इति नन्द्यादिः । ग्रह उत्सह उद्दास स्था उद्भास मन्त्र संमर्द निरक्षी निश्रावी निवार्य निवेशी एतेभ्यः निपूर्वेभ्यः । अयाची अव्याहारी असंव्याहारी अवादी अव्राजी अवासी एतेभ्यः प्रतिषिद्धेभ्यः । अचामचित्तकर्तृकाणां प्रतिषिद्धानामिति वर्तते । अकारी अहारी अविनायी विषयीशब्दौ देशे अद्रिभावी निपातनात्प्रविभावी भूते भवतः अपराधी उपरोधो परिभवी परिभावी इति ग्रहादिः । पच यठ वय वद चल पत तथा चरिचलिपतिवदीनामध्यात्कस्येति वक्ष्यते । नदट् प्लुट् तरट् चरट् चोरट् चेलट् हट देवट् टित्करणं स्त्रियां यर्थम् । जर मर क्षरं सेच मेष कोष दर्भ सर्प नर्त प्रण डर अणि विषयेपि श्वपच चक्रधर पचादिराकृतिगणः ॥

ज्ञाकृप्रीगुङः कः ॥ १०७ ॥

ज्ञा कृ प्री इत्येतेभ्यः इगुङश्च धोः को भवति । जानातीति ज्ञः । आकारान्तलक्षणो णः प्राप्तः । इह अर्थ जाना-

तीति अर्थज्ञः । परत्वादातः के सति नित्यः सविधिः । उत्किरतीति उत्किरः । विकिरः । प्रिणातीति प्रियः । इगुडः । विक्षिपः । विबुधः । विनृः इह काषृभेदः इति परत्वादण् ।

आतो गौ ॥ १०८ ॥

आकारान्ताङोः को भवति गौ वाचि । णापवादोऽयम् । प्रस्थः । सुग्लः । इह वडवासन्दाय इति परत्वादण् ॥

पाघ्राध्माधेट्दृशः शः ॥ १०९ ॥

गाविति वर्तते । पादिभ्यः शो भवति । पा इति साहचर्यादलाक्षणिकत्वाच्च पिबतेर्ग्रहणम् । उत्पिबः । विपिबः । उज्जिघ्रः । विजिघ्रः । संज्ञायां तु व्याघ्रैरुपमेये तद्योग इति निर्देशात् कः । व्याघ्रः । उद्धमः । विधमः । उद्धयः । विधयः । उत्पश्यः । विपश्यः । गाविति केचिदिह नाभिसम्बध्नन्ति । तेन । पश्यतीति पश्यः । जिघ्रः ॥

लिम्पविन्दधारिपारिवेदुदेजिचेतिसाति-साहिभ्यो ऽगेः ॥ ११० ॥

लिम्प विन्द धारि पारि वेदि उदेजि चेति साहि इत्येतेभ्यः अगिपूर्वेभ्यः शो भवति । लिम्पतीति लिम्पः । कथं कुड्यलेप इति मध्येऽपवादाः पूर्वान्विधीन् बाधन्ते नोत्तरानिति इगुडः कस्यायं शो बाधको नाणः । विन्दतीति विन्दः । लिम्प विन्द इति सानुषङ्गनिर्देशादन्यत्राप्ययं विधिर्भवति । संज्ञायां गावपि । निलिम्पा नाम देवाः । अरविन्दम् । गोविन्दः । इति अगुविषयेपि सः सिद्धः । धारयतीति धारयः । पारयः । वेदयः । उदेजयः । निर्देशा-

देव णिपूर्वस्य ग्रहणम् । चेतयः । सातं करोतीति णिच सातयः । साहयः । आद्याभ्यां के इतरेभ्योऽचि प्राप्ते वचनम् ॥

दाञ्धाञोर्वा ॥ १११ ॥

कार्थे नाविभक्तौ । दाञ् धाञ् इत्येताभ्यां अगिपूर्वाभ्यां वा शो भवति । ददः । दधः । दायः । धायः । अगावित्येव । प्रदः । प्रधः । अनुबन्धनिर्देशो यङ्चन्तयो शो मा भूदित्येवमर्थः ॥

ज्वलितिकसन्तारणः ॥ ११२ ॥

इति आद्यर्थे अविभक्तिकश्च निर्देशः । ज्वलादिभ्यः कस गतौ इत्येवमन्तेभ्यः वा णो भवति । ज्वालः । ज्वलः । कासः । कसः । चालः । चलः । अगावित्येव । प्रज्वालः ॥

श्यादव्यधास्वसंस्रुलिहश्लिषश्वसतीणः ॥ ११३ ॥

श्यैङ् आकारान्त व्यध आस्रु संस्रु लिह श्लिष श्वस अतीण् इत्येतेभ्यो णो भवति । वेति निवृत्तं अगावितिं च । अवश्यायः । आदिति सिद्धे पुनः श्यग्रहणं आतोगावित्यस्य बाधनार्थः । आत् । दायः । धायः । व्याधः । आस्रावः । संस्रावः । लेहः । श्लेषः । श्वासः । अवादिभ्यस्तनेरिति वक्तव्यम् । अवतनोतीत्यवतानः ॥

हसोऽवे ॥ ११४ ॥

हृ सा इत्येताभ्यां अवपूर्वाभ्यां णो भवति । अवहारः । अवसायः ॥

दुन्योरणौ ॥ ११५ ॥

दुनी इत्येताभ्यां णेा भवति । दुनेातीति दावः । नायः । अगाविति किम् । प्रदः । प्रणयः ॥

विभाषा ग्रहः ॥ ११६ ॥

ग्रहेर्विभाषया णो भवति । ग्राहः । ग्रहः । व्यवस्थितविभाषेयम् । जलचरे ग्राह एव । ज्योतिषि ग्रह एव । विभाषेति योगविभागात् भवतीति भावः ॥

गेहे कः ॥ ११७ ॥

ग्रहेर्गेहेऽभिधेये को भवति । गेहं सद्म तात्स्थ्यादारा अपि गृहं गृहाः ॥

शिल्पिनि वुः ॥ ११८ ॥

शिल्पिन्यभिधेये वु भवति धोः । नर्त्तकः । रवनकः । रजकः । रजकरजनरजसां नखं वक्ष्यति । एत एव धवः प्रयोजयन्तीति केचित् ॥

गौ ण्युथकौ ॥ ११९ ॥

गायतेर्ण्युथक इत्येतौ त्यौ भवतः । शिल्पिनीति वर्तते । गायनः । गाथकः ।

हायनः ॥ १२० ॥

हायन इति निपात्यते व्रीहिकालयोः कर्त्रोः । जहात्युदकमिति हायना नाम व्रीहयः । जहाति सहृदताः क्रियाः हायनः संवत्सरः ॥

प्रसल्वः साधुकारिणि वुन् ॥ १२१ ॥

प्र सृ ल्वृ इत्येतेभ्यः धुभ्यः साधुकारिणि कर्तरि वुन् भवति । साधु प्रवते यः स प्रवकः । एवं सरकः । लवकः । साधुकारिणीति किम् । प्रवः ॥

आशिषि ॥ १२२ ॥

आशिषि वार्थे वुन् भवति धोः । जीवतादिति य उच्यते स जीवकः । एवं नन्दकः वर्धकः ॥

इत्यभयनन्दिविरचितायां जैनेन्द्रमहावृत्तौ द्वितीयस्याध्यायस्य प्रथमः पादः ।

॥ ॐ नमः ॥

कर्मण्यण् ॥ १ ॥

कर्मणि कारके वाचि धोरणित्यर्थं त्यो भवति । कुम्भकारः । शरलावः । चर्चापारः । कुम्भादि शब्दात् कर्तृकर्मणोः कृतीति ता । वागमिडिति षसः । सीलिकामिभक्ष्याचरीक्षित्तमिभ्यो णो वक्तव्यः । धर्म्मशीलः । धर्म्मशीला । धर्म्मकामः । वायुभक्षः । धर्म्माचारः । धर्म्मापेक्षः । क्लेशक्षमः । नेदं वक्तव्यम् । घञन्तेन वसे सति सिद्धम् । धर्म्मं शीलमस्य धर्म्मशीलः । धर्म्मे कामोऽस्य धर्म्मकामः । धर्म्मं शीलयतीत्येवमादिविग्रहे अनभिधानादण् न भवति यथा आदित्यं पश्यति हिमवन्तं शृणोतीत्येवमादौ न भवति । कुम्भकारादिष्वण् घञन्तेन च वस इत्युभयं भवति ॥

ह्वावामः ॥ २ ॥

ह्वा वा मा इत्येतेभ्यश्चाण् भवति कर्मणि वाचि । के प्राप्ते इदं वचनम् । स्वर्गह्वायः । तन्तुवायः । वातिवाय त्योर्मातेश्चाकर्म्मकत्वादग्रहणम् । धान्यं मिमीते मयते वा धान्यमायः । मीनातिमिनोत्योः कप्राप्तेरभावात् पूर्वेणैवाण ॥

आतः कः ॥ ३ ॥

आकारान्तान्द्वोः कर्मणि वाचि क इत्ययं न्यो भवति । गोदः । अर्थज्ञः । पार्ष्णिप्रम् । अङ्गुलिप्रम् । ज्या वयोहानावित्यस्य ब्रह्म जिनातीति ब्रह्मज्यः । के कृते परत्वादातः रवं पश्याज्जिः । असिद्धवदत्राभादित्यात्वस्यासिद्धत्वादियादेशो न भवति । यणादेशः सिद्धः । जुहुवतुः जुहुवुरित्यत्र ह्वेञ आत्वमकृत्वा जिः क्रियते इत्यात्वं नास्तीत्युवादेशः सिद्धः । आहुः । प्रहुः । इत्याकारान्तात् आतोगाविति कः प्रागात्वम्पश्याज्जिः ॥

प्रे ॥ ४ ॥

प्रपूर्वादातः को भवति कर्मणि वाचि । तत्वप्रज्ञः । मोक्षप्रज्ञः । नियमार्थोऽयमारम्भः । प्र एव गौ नान्यस्मिन्नातः को भवति । गोसंदायः । वडवासन्दायः ॥

दाज्ञः ॥ ५ ॥

अयमपि नियमः । दा ज्ञा इत्येताभ्यामेव प्रपूर्वाभ्यां कर्मणि को भवति । धर्म्मप्रदः । धर्म्मप्रज्ञः । नियमादिह न भवति । पार्ष्णिप्रत्रायः । अङ्गुलिप्रत्रायः । कथं भाष्ये प्रयोगः अभिज्ञश्च पुनरेकत्वादीनामर्थानामिति अत्राभिधानवशादातो गाविति को भविष्यति ॥

संख्यः ॥ ६ ॥

प्र इति नियमेन निवर्तिते के पुनरारम्भः । सम्पूर्वात् ख्या इत्येतस्मात्कर्मणि वाचि को भवति । पशून् सञ्चष्टे पशुसंख्यः । अश्वसंख्यः ॥

सुपि ॥ ७ ॥

सुवन्ते वाचि धेरातः को भवति । पादैः पिबति पादपः । कच्छेन पिबति कच्छपः । द्वाभ्यां पिबति द्वीपः । समस्थः । विषमस्थः । धर्म्माय प्रददाति धर्म्मप्रदः । शास्त्रेण प्रजानाति शास्त्रप्रज्ञः । अकर्म्मण्यपि वाचि यथा स्यादिति सुग्ग्रहणम् । इह केचिदान इति नानुवर्तयन्ति । तेन मूलविभुजादिष्वभिधानवशात् कः सिद्धः । मूलान् विभुजति मूलावभुजो रथः । जलरुहम् । नखमुचानि धनूंषि । काकगुहास्तिलाः ॥

स्थः ॥ ८ ॥

सुपि वाचि तिष्ठतेः को भवति कर्त्तरि । पूर्वो योगः अनिर्दिष्टार्थत्वात् भावेऽपि यथा स्यादित्यारम्भः । आरवूनामुत्थानमारवूत्थः । सलभोत्थः । स्थास्तभोः पूर्वस्योद इति सकारस्य पूर्वस्वत्वम् ॥

दुहो घश्च ॥ ९ ॥

इतः प्रभृति कर्म्मणीति सुपीति च द्वयमनुवर्तते । कर्मणि वाचि दुहेः को भवति घकारश्चादेशः । कामन्दोग्धि कामदुघो धर्म्मः । कामदुधा धेनुः ॥

तुन्दशोकयोः परिमृजापनुदोः ॥ १० ॥

तुन्द शोक इत्येतयोः कर्म्मणोर्वाचोः परिमृज अपनुद इत्येताभ्यां को भवति । अविशेषेण सुपीत्येतेनैव के सिद्धे आलस्यसुखाहरणयोरर्थयोर्यथा स्यादित्यारम्भः । तुन्दपरिमृजः अलसश्चेत् । शोकापनुदः पुत्रो जातः । पूर्वं तिकुप्रादय इति षसः पश्चाद्वाक्सः । आलस्यसुखाहरणयोरिति किम् । तुन्दपरिमार्ज आतुरः । शोकापनोदो धर्माचार्यः ॥

गष्टक् ॥ ११ ॥

गा इत्येतस्माद्धोः कर्मणि वाचि टगित्ययं त्यो भवति वक्रगः । वक्रगी । प्रेदाङ्ग इति नियमादगिपूर्वादातः कर्मणि को विहितस्मिन्नेव विषये टक् अन्यत्राणेव भवति । वत्क-संगायः ॥

सुरासीध्वोः पिबः ॥ १२ ॥

सुरा सिधु इत्येतयोः कर्मणोः पिबतेः टग्भवति । सुरापः । सुरापी । सीधुपः । सीधुपी । अयमपि कापवादः । सुरासीध्वोरिति किम् । क्षीरं पिबतीति क्षीरपा कन्या । पिब इति विकृतनिर्देशः किम् । सुराम्पातीति सुरापा ॥

ग्रहेरः ॥ १३ ॥

ग्रहेर्धोः कर्मणि वाचि अ इत्ययं त्यो भवति । शक्ति-लाङ्गलाङ्कुशयष्टितोमरघटघटीधनुःषु वाक्षु प्रायेणाभिधा-नम् । शक्तिग्रहः । लाङ्गलग्रहः । अङ्कुशग्रहः । यष्टिग्रहः । तोमरग्रहः । घटग्रहः । घटीग्रहः । धनुग्रहः । सूत्रग्रहो भवति धारयति चेत् सूत्रग्राहोऽन्यः ॥

हृञोऽनुत्सेधे ॥ १४ ॥

उत्सेध उत्क्षेपणम् । हृञ अनुत्सेधे वर्तमानात् कर्म्मणि वाचि अत्यो भवति । अंस हरति अंसहरः । भागहरः । रिक्थहरः । अनुत्सेधे इति किम् । भारहारः । न केवलमु-क्षाये उत्क्षेपणेऽप्युत्सेध इति शब्दो वर्तते तद्यथा नाना-जातीया अनियता उत्सेधजीविन इति ॥

वयसि ॥ १५ ॥

शरीरिणां कालकृतावस्था वयः तत्र अत्यो भवति

वयसि गम्ये । अयमुत्सेधार्थ आरम्भः । कवचहरः क्षत्रिय कुमारः । अस्थिहरश्च शिशुः । दृशोरसंभाव्यमानेन वा भारोत्क्षेपणेन वयो गम्यते ॥

आङि शीले ॥ १६ ॥

शीलं स्वाभाविकी प्रकृतिः । आङि च वाचि हृञ अत्यो भवति शीले गम्यमाने । पुष्पाहरः । फलाहरः । सुखाहरः । उत्सेधानुत्सेधयोरयं विधिरिष्यते । अनुत्सेधे पूर्वेण कस्मान्न भवति शीले परत्वात्तृत्स्यात् । शील इति किम् । भारमाहरति भाराहारः ॥

अर्हः ॥ १७ ॥

अर्हतेः कर्मणि वाचि अत्यो भवति । पूजार्हा प्रतिमा ।

स्तम्बेरमकर्णेजपौ ॥ १८ ॥

स्तम्बेरम कर्णेजप इत्येतौ शब्दौ हस्तिसूचकयोरर्थयोर्निपात्येते । स्तम्बेरमो हस्ती । कर्णेजपः सूचकः । स्तम्बकर्णयोरमिजपोरिति सूत्रं कर्त्तव्यं सुपीति वर्तते । षे कृति बहुलमित्यनुपा सिद्धम् । अर्थविशेषपरिग्रहार्थं निपातनम् । इह मा भूत् । स्तम्बे तृणस्तवके रन्ता गौः । कर्णे जपिता वैद्यः ॥

शमि धोः खौ ॥ १९ ॥

शमि वाचि धोः खुविषये अत्यो भवति । शम्भवः । शंवदः । शङ्करः । धुग्रहणेऽनुवर्त्तमाने पुनर्धुग्रहणं बाधकबाधनार्थम् । शङ्करा नाम परिव्राजिका । खुविषये कृञो हेत्वदिषु परत्वाट्टो मा भूत् । खाविति किम् । शङ्करो जिनचित्या ॥

शीङो ऽधिकरणे ॥ २० ॥

शेतेरधिकरणे सुबन्ते वाचि अत्यो भवति । खे शेते खेशयः । गर्तशयः । षे कृति बहुलमिति पक्षे ऽनुप् । शीङ इति योगविभागात् पार्श्वादिषु सुबन्तेषु वाक्षु अत्यो भवति । पार्श्वाभ्यां शेते पार्श्वशयः । पृष्ठशयः । उदरशयः । उत्तानादिषु च कर्तृषु । उत्तानः शेते उत्तानशयः । अवमूर्द्धशयः । दिग्वसहपूर्वाच्च अत्यो भवति । दिग्वेन सह शेते दिग्वसहशयः । कथं गिरिशः । लोमादिपाठान्मत्वर्थीयशः । यो हि गिरौ शेते गिरिस्तस्यास्ति ॥

चरेष्टः ॥ २१ ॥

चरेर्टोरधिकरणे वाचि टो भवति । कुरुषु चरति कुरुचरः । मद्रचरः । मद्रचरी । अधिकरण इत्येव । कुरूँश्चरति कुरुचारा ॥

भिक्षासेनादाये ॥ २२ ॥

अनधिकरणार्थमेतत् । भिक्षा सेना आदाय इत्येतेषु वाक्षु चरेष्टो भवति । भिक्षाचरः । सेनाचरः । आदायशब्दः प्यान्तः । आदाय चरति आदायचरः ॥

पुरोऽग्रतोऽग्रेषु सुः ॥ २३ ॥

पुरस् अग्रतस् अग्रे इत्येतेषु सुबन्तेषु वाक्षु सरतेष्टो भवति । पुरःसरः । अग्रतस् आद्यादिभ्य उपसंख्यानमिति एवन्तात्तसिः । अग्रतःसरः । अग्रेसरः । अग्रेसरी । अनोवन्तत्वेप्येकारो निपातनात् ॥

पूर्वे कर्त्तरि ॥ २४ ॥

कर्तृग्रहणं कर्मनिवृत्त्यर्थं पूर्वशब्दे कर्तृवाचिनि सुबन्ते वाचि सरतेष्टो भवति । पूर्वः सरति पूर्वसरः ।

क्रियाया विशेषणेऽपीष्यते । पूर्वं प्रथमं सरति पूर्वसरः । कर्तरीति किम् । पूर्वं देशं सरति पूर्वसारः ॥

कृञो हेतुशीलानुलोम्येऽशब्दश्लोककलहगाथा वैरचाटुसूत्रमन्त्रपदे ॥ २५ ॥

शब्दश्लोकादिवर्जिते कर्मणि वाचि कृञः ट इत्ययं त्यो भवति हेतौ शीले आनुलोम्ये च गम्यमाने । हेतुशब्दोपादानात् इह हेतुः प्रकृष्टं कारणम् । विद्या यशस्करी । धनं कुलकरम् । शीलं स्वभावः । समासकरः । अर्थकरः । आनुलोम्यमनुकूलता । प्रेषकरः । वचनकरः । एतेष्विति किम् । कुम्भकारः । अशब्दादिष्विति किम् । शब्दकारः । श्लोककारः । सूत्रकारः । मन्त्रकारः । पदकारः ॥

दिवाविभानिशाप्रभाभास्करान्तानन्तादिनान्दालिपिलिविबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्दुनुरुषु ॥ २६ ॥

अहेत्वाद्यर्थ आरम्भः । दिवाशब्दे सुबन्ते वाचि विभादिषु कर्मसु वाक्षु करोतेषु इत्ययं त्यो भवति । दिवे सिसंज्ञं पदम् । दिवा करोतीति दिवाकरः । विभां करोतीति विभाकरः । निशाकरः । प्रभाकरः । भासनम्भाः भासं करोति भास्करः । सूत्रे भास्करान्तेति सकारस्य निपातनात् । जिह्वामूलीयविसर्जनीयौ न भवतः । कारं करोतीति कारकरः । अन्तकरः । अनन्तकरः । अन्तकरस्य नञ्से अन्येऽर्थः प्रतीयते इत्यनन्तग्रहणम् । आदिकरः । नान्दीकरः । लिपिकरः । लिविकरः । बलिकरः । भक्तिकरः । कर्तृ-

करः । चित्रकरः । क्षेत्रकरः । संख्या एकत्वद्वित्वादिका । एककरः । बहुशब्दोऽपि नानाधिकरणवाची संख्याशब्दः । बहुकरः । जंघाकरः । बाहुकरः । अहस्करः । रोसुपीति रेफः । तस्य कृकम्यादिसूत्रेण सत्वम् । धनुस्करः । अरुस्करः । सस्संघुस्थस्य इति सत्वं इणः ष इति षत्वम् ॥

कर्म्मणि भृतौ ॥ २७ ॥

कर्म्मशब्दे वाचि कृञ्ग्रहो भवति भृतौ गम्यमानायाम् । भृतिर्न्नियतं कर्म्ममूल्यम् । कर्म करोति कर्म्मकरः । भृताविति किम् । कर्म्मकारः ॥

किंयत्तद्बहुष्वः ॥ २८ ॥

किम् यद् तद् बहु इत्येतेषु वाक्षु कृञः अ इत्ययं त्यो भवति । किङ्करः । किङ्करा । यत्करः । यत्करा । तत्करः । तत्करा । चोर्ये तस्करः । बहुकरा इह बहुशब्दो वैपुल्यवाची । हेत्वादिषु ट एव भवति । किङ्कारणशीला किङ्करी ॥

सकृत्स्तम्बे वत्सव्रीह्योरिः ॥ २९ ॥

सकृत् स्तब इत्येतयोः कर्म्मणोः कृञ इरित्ययं त्यो भवति वत्सव्रीह्याः कर्त्रोः । सकृत्करिर्वत्सः । स्तंबकरिर्व्रीहिः । वत्सव्रीह्योरिति किम् । सकृत्कारः । स्तंबकारः ।

दृतिनाथयोः पशौ हृञः ॥ ३० ॥

दृति नाथ इत्येतयोर्वाचोः पशौ कर्तरि हृञ इरित्ययं त्यो भवति । दृतिहरिः । नाथहरिः पशुः । पशाविति किम् । दृतिहारः । नाथहारः ।

फलेग्रहात्मम्भरिकुक्षिम्भरयः ॥ ३१ ॥

फलेग्रहि आत्मम्भरि कुक्षिम्भरि इत्येते शब्दा निपात्यन्ते । फलानि गृह्णाति फलेग्रहिः । वाच एत्वमिश्च निपात्यते । आत्मानं बिभर्ति आत्मम्भरिः । कुक्षिम्भरिः । वाचो मन्तत्वमिश्च निपात्यते ।

एजेः खश् ॥ ३२ ॥

एजनेऽर्थेभ्यो धातुभ्यः खशित्ययं त्यो भवति कर्म्मणि वाचि । खकारः खिन्यभेरितिविशेषणार्थः । शकारो गसंज्ञार्थः । अङ्गान्येजयति अङ्गमेजयः । जनमेजयः । वाततिलसर्षेषु अजतुदजहातिभ्यः खश्वक्तव्यः । वातमजाः मृगाः । तिलन्तुदः काकः । सर्द्धजहा मृगाः ।

नासिकादौ धेट्ध्मः ॥ ३३ ॥

नासिकादिषु कर्म्मसु धेटध्मा इत्येताभ्यां खश भवति । नासिकान्धयति नासिकन्धयः । स्वरिन्धमः । नाडिन्धयः । नाडिन्धमः । मुष्टिन्धयः । मुष्टिन्धमः । घटिन्धयः । घटिन्धमः । वातन्धयः । वातन्धमः । सुनिस्तनयोर्घेट एव सुनिन्धयः । स्तनन्धयः । आदिशब्दः प्रकारवाची ।

उदि कूले रुजिवहोः ॥ ३४ ॥

उदीति कास्थाने ईप् । उत्पूर्वाभ्यां रुजिवहि इत्येताभ्यां कूले कर्म्मणि खश् । कूलमुद्रुजः । कूलमुद्वहः ।

वहाभ्रे लिहः ॥ ३५ ॥

वह अभ्र इत्येतयोः कर्म्मणोः लिहेर्द्वोः खश् भवति । वहंलिहा गौः । अभ्रंलिहः प्रासादः ।

मितनखपरिमाणे पचः ॥ ३६ ॥

मितशब्दस्य पृथग्निर्देशात् परिमाणं प्रस्थादि गृह्यते। मितनखपरिमाण इत्येतेषु कर्मसु पचेर्डोः खश् भवति। मितं पचते मितंपचा कन्या। नखम्पचा यवागूः। प्रस्थम्पचा। आढकम्पचा। द्रोणम्पचा।

विध्वरुषोस्तुदः खम् ॥ ३७ ॥

विधु अरुस् इत्येतयोः कर्मणोः तुदेर्डोः खश् भवति सकारस्य च खम्। विधुन्तुदः। अरुन्तुदः।

वीचंयमासूर्यपश्योग्रपश्यललाटन्तपरंतप द्विषन्तपेरम्मदपुरन्दरसर्वंसहाः ॥ ३८ ॥

एते शब्दा निपात्यन्ते। वाक्शब्दे कर्मणि यमेर्डो खो निपात्यन्ते व्रते। वाचं यच्छति वाचंयमस्तपस्वी। वाग्यामोऽन्यः। सूर्यं न पश्यति असूर्यपश्यं मुखम्। असूर्यपश्या राजदाराः। निपातनादसामर्थ्येऽपि नञ्सः दृशेः खश्। उग्रं पश्यति उग्रम्पश्यः। उग्रे कर्मणि दृशेः खश् निपात्यते। ललाटन्तपति ललाटन्तपो भास्वान्। खश् निपात्यः परांस्तापयति परंतपः। द्विषतस्तापयति द्विषंस्तपः परद्विषतोःकर्मणोस्तापेः खञ्निपात्यते। तकारस्य च खं खचीतिप्रादेशः। स्त्रियामनभिधानम्। द्विषतांतापः। इरयामाद्यति इरम्मदम्। खञ्निपात्यः। पुरो दारयति पुरन्दारः। खच् वाचोमन्तता च निपात्यते। सर्वं सहते इति सर्वंसहः। खश् निपात्यः। कथं पाणयो ध्मायन्ते एषु पाणिन्धमाः पन्थान इति नासिकादौ पाणिशब्दः तत्र पाणिन्धमाः पांथकाः तात्स्थ्यात्पन्थानोऽपीत्यधिकरणे खश् न वक्तव्यः

प्रियवशे वदः खच् ॥ ३९ ॥

प्रिय वश इत्येतयोः कर्म्मणोः वदतेः खजित्ययन्त्यो भवति । प्रियम्वदः । वशंवदः । खकारेऽ वागर्थम् । चकारः खचीति विशेषणार्थः । त्यान्तरकरणं किमर्थं खशि सति उत्तरत्र करोतेर्विभर्तेश्च विकरणः स्यात् । धोरेहडः प्रादेशश्च न स्यात् ।

सर्वकूलाभ्रकरीषेषु कषः ॥ ४० ॥

सर्व कुल अभ्र करीष इत्येतेषु वाक्षु कषतेः खच् भवति । सर्वंकषो विप्रः । कूलङ्कषा नदी । अभ्रङ्कषो वायुः । करीषङ्कषा वात्या । भागे दारेः खज् वक्तव्यः । भगन्दरः ।

मेघर्तिभयेषु कृञः ॥ ४१ ॥

मेघ ऋति भय इत्येतेषु कर्म्मसु करोतेः खञ् भवति । मेघङ्करः । ऋतिङ्करा । अभयाच्चेति वक्तव्यम् । अभयङ्करो जिनः । नञ्से अन्योऽर्थः प्रतीयते अणोऽपवादोऽयम् । परत्वेन हेत्वादिटस्य च बाधकः ।

क्षेमप्रियमद्रेऽण् च ॥ ४२ ॥

क्षेम प्रिय मद्र इत्येतेषु कर्म्मसु करोतेरणित्ययं त्यो भवति खच बेति सिद्धे कृत्रो हेत्वादिष्वपि टप्रतिषेधार्थमणग्रहणम् । क्षेमकरः । क्षेमङ्करः । प्रियकरः । प्रियङ्करः । मद्रकरः । मद्रङ्करः ।

आसितंभवः ॥ ४३ ॥

आसितम्भव इति निपात्यते अ सितशब्दे सुबन्ते वाचि भवतेर्भावकरणयोः खञ् निपात्यते आसित इति

कर्त्तरि क्तो दीर्त्वं चात एव निपातनात् आसितस्य भवनमासितम्भवो वर्त्तते । आसितो भवत्यनेनालमयमासितम्भव ओदनः । प्रकरणान्तरविहितोयुडपि भवति । भावे घञ् समत्वादयं बाधकः ।

भृतृवृजिधारिसहितपिदमः खौ ॥ ४४ ॥

भृ तृ वृजि धारि सहि तपि दमि इत्येतेभ्यः खुविषये खञ् भवति कर्मणि सुपि वाचि यथासम्भवमयं विधिः । विश्वम्भरा । वसुन्धरा । रथन्तरो नाम राजा । वृङावृञो पतिंवरा कन्या । अरिञ्जयः । युगं धारयति इति युगन्धरः । खचीत्युङः प्रादेशः । सकुं सहः । सकुन्तपः । दमिरन्तर्गतरायर्थः । अरिन्दमः । खाविति किम् । कुटुम्बभारः ॥

गमः ॥ ४५ ॥

खाविति वर्त्तते । सुवन्तवाचि गमेर्ढोः खञ् भवति । सुतङ्गमो नाम कश्चित् । क्वचिदखावपीष्यते । मितंगमो श्वा । अमितङ्गमा हस्तिनी । विहायसो विहादेशः खच्च वा डिद्वक्तव्यः । विहायसा गच्छति विहङ्गः । विहङ्गमः । तुरभुजयोश्च । तुरङ्गः । तुरङ्गमः । भुजङ्गः । भुजङ्गमः ॥

डः ॥ ४६ ॥

खाविति निवृतं गम इति वर्तते गमेर्डो भवति । सुवन्ते वाची अन्तादिषु वाक्षु प्रायेणाभिधानम् । अन्तगः । अत्यन्तगः । अध्वगः । दूरगः । पारगः । अनन्तगः । गुरुतल्पगः । ग्रामगः । सर्वत्र गच्छति सर्वत्रगः । पन्नं गच्छति पन्नगः । उरसः सखञ्चेति वक्तव्यम् । विहायसो विहं च । उरसा गच्छति उरगः । विहायसा

गच्छति विहगः । सुदुरोरधिकरणे डो वक्तव्यः । सुखेन गच्छति अस्मिन् सुगः । दुर्गः । निशेादिशेनिर्गेादेशे डित्यभस्याप्पि डित्करणसामर्थ्यात् टेः खम् ॥

आशिषि हनः ॥ ४७ ॥

आशिष्यर्थ हन्तेर्डो भवति कर्मणि वाचि । तिमिं हन्ति तिमिहः । शापहः ॥

अपे क्लेशतमसोः ॥ ४८ ॥

अप इति काम्याने इप् । अपपूर्वात् हन्तेः क्लेशतमसोः कर्म्मणोः वाचेाः डो भवति । अनाशीरर्थो ऽयमारम्भः । क्लेशापहः । तमोपहः ॥

कुमारशीर्षयोर्णिन् ॥ ४९ ॥

कुमार शीर्ष इत्येतयोः कर्म्मणोर्हनेर्णिन् भवति । अशीलार्थोऽयमारम्भः । कुमारघाती । शीर्षघाती । शीर्षशब्दो ऽकारान्तः शिरःपर्य्यायोऽस्ति ॥

टगमनुष्ये ॥ ५० ॥

हन इति वर्तते । हन्तेः कर्म्मणि वाचि टग् भवति अमनुष्ये कर्तरि । पित्तं हन्ति पितघ्नं घृतम् । श्लेष्मघ्नमौषधम् । जायाघ्नस्तिलकः । पतिघ्नी रेखा । अमनुष्य इति किम् । पापघातस्तपस्वी । चौरघातो हस्तीत्यत्र युडा बहुलमिति बहुलवचनादण् ॥

जायापत्योर्लक्षणे ॥ ५१ ॥

लक्षणं चिह्नं तदस्यास्तीति लक्षणः । अर्शआदिपाठादः ।

जाया पति इत्येतयोः कर्म्मणोर्हन्तेर्लक्षण वति कर्तरि टग्भवति । जायाघ्नो ब्राह्मणः । लक्षणमस्य तद्विधमस्ति पतिघ्नी कन्या ॥

शकि हस्तिकवाटे ॥ ५२ ॥

शकनं शक् शक्तिरित्यर्थः । हस्ति कवाट इति एतयोः कर्म्मणोः हन्तेष्टग् भवति शकि गम्यमानायाम् । अयं पूर्वश्च मनुष्यकर्तृकार्थ आरम्भः । हस्तिनं हन्ति हस्तिघ्नो मनुष्यः । हस्तिनं हन्तुं शक्त इत्यर्थः । कवाटघ्नो मनुष्यः । शकीति किम् । हस्तिघातो व्याधः उपायेन ॥

पाणिघताडघराजघाः ॥ ५३ ॥

एते शब्दा निपात्यन्ते । पाणिघताडघौ शिल्पिनि निपात्येते । अन्यत्र पाणिघातः ताडघातः । राजघ इत्यविशेषेण । टग्घत्वं टिखं च निपात्यम् ॥

सुभगाढ्यस्थूलपलितनग्नान्धप्रियेऽञ्चौ स्नुख्वुकञौ भुवः ॥ ५४ ॥

अच्ताविति च्यन्तप्रतिषेधात् । नञिवयुक्तन्यायेन अर्थविज्ञानम् । अच्यन्तेषु च्वर्थे वर्तमानेषु सुभगादिषु वाक्षु भवतेः स्नुख् खुकञ् इत्येतौ त्यौ भवतः । असुभगः सुभगो भवति सुभगम्भविष्णुः सुभगम्भावुकः । आढ्यम्भविष्णुः । आढ्यंभावुकः । स्थूलम्भविष्णुः । स्थूलम्भावुकः । पलितम्भविष्णुः । पलितम्भावुकः । नग्नम्भविष्णुः । नग्नम्भावुकः । अन्धम्भविष्णुः । अन्धम्भावुकः ।

प्रियम्भविष्णुः । प्रियम्भावुकः । अत्र तदन्तविधिरिष्टः । श्रीसुभगम्भविष्णु । श्रीसुभगम्भावुकः । अचाविति किम् । सुभगीभविता । आढ्यीभविता । नञ्निर्दिष्टे सदृशसंप्रत्ययादिह न भवति सुभगो भविता ॥

कृञः करणे ष्युट् ॥ ५५ ॥

कृञः करणे कारके ष्युट् भवति अच्च्यन्तेषु च्व्यर्थे वर्तमानेषु सुभगादिषु वाच्यु। असुभगं सुभगं कुर्वन्त्यनेन सुभगङ्करणम् । आढ्यङ्करणम् । स्थूलङ्करणम् । पलितङ्करणम् । नग्नङ्करणम् । अन्धङ्करणम् । प्रियङ्करणम् । सुभगङ्करणी विद्या । अच्च्यन्तेषु इत्येव । सुभगीकुर्वत्यनेन नन्वत्र ष्युटि युटि वा नास्ति विशेषः । सत्यम् । अच्च्यन्तानुवृत्तेस्तु युटोप्यत्र प्रतिषेधः । च्व्यर्थे वर्तमानेष्वित्येव । आढ्यं कुर्वन्ति तैलेन । अभ्यञ्जयतीत्यर्थः ॥

स्पृशोऽनुदके क्विः ॥ ५६ ॥

उदकवर्जिते सुपि वाचि स्पृशेर्धोः क्विर्भवति । ककारः कित्कार्यार्थः । वकारः सति साम्ये क्विपो बाधनार्थः । मन्त्रेण स्पृशति मन्त्रस्पृक् । दर्भं स्पृशति दर्भस्पृक् । व्रश्चादिसूत्रेण षत्वं जश्त्वं क्वित्यस्य कुरिति कुत्वम् । अनुदक इति किम् । उदकं स्पृशति उदकस्पर्शः ॥

ऋत्विग्दधृग्स्रग्दिगुष्णिगञ्चियुयुजिक्रुञ्चः ॥ ५७ ॥

ऋत्विक् दधृक् स्रक् दिक् उष्णिक् इत्येते क्वयन्ता निपात्यन्ते । अञ्चु युजि कुञ्चि इत्येतेभ्यस्तु क्विर्भवति । ऋतौ यजते ऋतुप्रयोजनो वा यजते ऋत्विक् । ऋतुशब्दे वाचि यजेः क्विर्निपात्यते । धृष्णोतीति दधृक् । धृषेः

क्किर्द्धित्वं च निपात्यते । स्रजन्ति तामिति स्रक् । सृजेः कर्म्मणि क्किरागमश्च निपात्यः । दिशन्ति तामिति दिक् । दिशेः कर्म्मणि क्किः । उत्स्निह्यतीति उष्णिक् । उत्पूर्वस्निहः ग्यन्तत्वं षत्वं च उष्णीषेण नह्यतीति वा उष्णिक् । षनत्वं प्रश्च । अञ्चु । प्राङ् । दध्यङ् । सवन्तमान्ते क्किर्भवति । युजेः केवलादेव क्किः । युङ् । युञ्जौ । युञ्जः । क्रुङ् । क्रुञ्चौ । क्रुञ्चः । क्रुञ्चेरपि केवलात् क्किः । नखं न भवति । स एष विशेषो निपातनैः सह निर्देशाल्लभ्यते ॥

त्यदादौ दृशीऽनालोकेटक् च ॥ ५८ ॥

त्यदादिषु वाक्षु दृशेर्धोरनालोकेऽर्थे टग् भवति क्किश्च आलोकश्चक्षुर्विषयः पर्युदस्यति । त्यादक् । त्यादृशः । दृशदृग्दक्षवताविति निर्देशात्कोऽपि भवति । त्यादृक्षः । आसर्वनाम्न इत्यात्वम् । एवं तादृक् । तादृशः । तादृक्षः । यादृक् । यादृशः । यादृक्षः । रूढिशब्दा एते टे तेष्वव-यवार्थोऽस्ति तमिव पश्यति अथवा स इव दृश्यते इति यथा कथंचिद्वाक्यम् । समानान्ययोश्चेति वक्तव्यम् । सदृशः । मदृक् । सदृक्षः । अन्यादृक् । अन्यादृशः । अन्यादृक्षः । दृशदृग्दृक्षवताविति समानस्य सभावः । अनालोक इति किम् । यं पश्यति यदृशः तदृशः ।

सत्सूद्विषदुहदुहयुजविदभिदच्छिदजिनी-राजो गावर्पि क्किप् ॥ ५९ ॥

सदादिभ्यो धुभ्यः क्किप् भवति गौ वाचि अपि शब्दात् सुवन्तेऽपि । प्रसत् । दिवि सीदतीति द्युसत् । अन्तरिक्षसत् । सूइति द्विषा सहचरितः आदादिकः ।

प्रसूते प्रसूः । अण्डं सूते अण्डसूः । शतसूः । गर्भसूः । विद्वेष्टीति विद्विट् । मित्रद्विट् । प्रद्रुह्यतीति प्रध्रुक् । मित्राय द्रुह्यति मित्रध्रुक् । प्रदोग्धि प्रधुक् । युजिह योगे युज समाधाविति चाविशेषेण ग्रहणम् । प्रयुनक्ति प्रयुक् । अश्वयुक् । युजेरार्यतस्याऽपि युज इति निपातनात् णेरुप प्रयोजयतीति प्रयुक् । अश्वान् योजयति । अश्वयुक् । विदेरविशेषेण ग्रहणम् । प्रवित् । धर्मवित् । प्रभित् । बलभित् । प्रच्छित् । रज्जुच्छित् । प्रजित् । कर्मजित् । प्रणीः । ग्रामणीः । विराजते विराट् । सम्राट् । मन्वन्क्वनिव्विचः क्वचित् । क्विबिति क्विपि सिद्धे नियोगार्थमिदम् । सुपीति वर्तमाने गिग्रहणं किमर्थम् । अन्यत्रसुद्ग्रहणे निग्रहाणां नास्तीति ज्ञापनार्थम् । तेन वदः सुपि क्यप् चेति गो क्यन्न भवति । प्रवाद्यमनुवाद्यम् ॥

अदोऽनन्ने ॥ ६० ॥

अदेर्धोः क्विप् भवति अनन्ने सुबन्ते वाचि । आममत्ति आमात् । दृत्वात् । अन्न इति किम् । अन्नादः ॥

क्रव्ये ॥ ६१ ॥

क्रव्यमाममासं क्रव्यशब्दे वाचि अदेः क्विप् भवति । क्रव्यमत्ति क्रव्यात् । पूर्वेणैव सिद्धे पुनरारम्भः असरूपस्याणो बाधकः । कथं तर्हि क्रव्यादः पृषोदरादिषु कृत्तविकृतादः क्रव्याद इति द्रष्टव्यम् ॥

मन्वन्क्वनिव्विचः क्वचित् ॥ ६२ ॥

मन् वन् क्वनिप् विच् इत्येते त्याः क्वचिद् दृश्यन्ते । गावपीत्यनुवर्तते । सुशर्म्मा सुवर्म्मा । कृदिति वचनात्

केवलादपि । दामा । पामा । वामा । हेमा । वन् । विजावा । अग्रेगावा । वना इत्यत्वम् । क्नसिप् । प्रातरित्वा । प्रातरित्वानौ । केवलादपि । कृत्वा । कृत्वानौ । वोपा । पीवा । विच् । विशतीति वेट् । रेट् । वकारः कृत्कार्य्यार्थः । इकार उच्चारणार्थः । चकारः एवर्थः जागर्ति जागः । विरित्युच्यलाने जागुरविजिणण्डित्तीति एप्प्रतिषेधः शक्येत ॥

क्विप् ॥ ६३ ॥

क्विप् धेः क्वचिद्दृश्यते गावपि गावपि उखेन स्रंशते उरवाश्रत् । वाहात् भ्रश्यति वाहभ्रट् । अनस्यापीति दीत्वम् । क्वचिदधिकारात्केवलादपि । याति याः । वाति वाः ॥

स्थः कः ॥ ६४ ॥

गावपीति वर्तते । तिष्ठतेः को भवति शन्तिष्ठति शंस्थः । सुस्थः । ननु सुपि स्थ इत्यनेनैव कः सिद्धः । न सिद्ध्यति । शमीधेः खावित्यत्र धुग्रहणस्य प्रयोजनमुक्तं समत्वेन पूर्वस्य कस्य बाधनमिति । यथा शङ्करा परिव्राजिकेत्यत्र हेत्वादिलक्षणस्य टस्य बाधात्कस्याकारस्य बाधनार्थं पुनः कविधानं स्त्रियो समत्वादस्त्रियो न बाधक इति पूर्वेण किप्सिद्धः । शंस्थाः ॥

भजो ण्विः ॥ ६५ ॥

भजतेण्विर्भवति सुपि गावपि । अर्द्दभाक् । प्रभाक् । णकार ऐवर्थः । वकारः सति साम्ये बाधार्थः । इकारः उच्चारणार्थः । समत्वेन किविचोर्बाधकोऽस्ति ण्विः ।

सुपि शीलेऽजातौ णिन् ॥ ६६ ॥

चतुष्टयी शब्दानां प्रवृत्तिरित्यस्मिन् दर्शने जाति प्रतिषेधोऽयम्। अजातिवाचिनि सुबन्ते वाचि शीले गम्यमाने धेर्णिन्भवति। सुपीति वर्त्तमाने पुनः सुपग्रहणं सुप्मात्रार्थम् । अन्यथा अजातावितिसत्ववाचिनः प्रतिषेधादन्यस्यापि सत्ववाचिनो ग्रहणं स्यात्। उष्णं भुंक्ते इत्येवंशीलः उष्णभोजी। उदासारिण्यः। ब्रह्मासारिण्यः अजातावितिकिम् । शालीन भुङ्क्ते इत्येवं शीलः शालिभोजः। साधूनामन्त्रयिता। शील इति किम्। उष्णभोजः आतुरः। क्वचिदित्यनुवृत्तेः साधुकारिण्यप्यर्थे णिन्। साधुकारी साधुदायी। ब्रह्मणि वदेः णिन् वक्तव्यः। असमस्याणो बाधकः। ब्रह्मवादिनो वदन्ति ॥

कर्त्तरी वे ॥ ६७ ॥

कर्तरि वाचि इवार्थे धेर्णिन् भवति। उपमानभूते कर्तरीत्यर्थः। जात्यर्थं शीलार्थं चेदम्। उष्ट्र इव क्रोशते उष्ट्रक्रोशी। ध्वांक्षरवी। खरनादी। सिंहनदी। वृत्येवार्थस्योक्तत्वादिवशब्दस्याप्रयोगः। कर्त्तरीति किम्। तिलानिव भुक्ते क्रोद्रवान्। इव इति किम्। उष्ट्रः क्रोशति ॥

व्रते ॥ ६८ ॥

सुबन्ते वाचि धेर्णिन् भवति। समुदायेन व्रतं गम्यते। शास्त्रपूर्वको नियमो व्रतम्। पार्श्वशायी। स्थण्डिलशायी। वृक्षमूलवासी। श्राद्धं न भुंक्ते व्रतमस्या अश्राद्धभोजी। अलवणभोजी। सापेक्षस्याप्यस्य नञो वृत्तिर्व्याख्याता। व्रत इति किम्। स्थण्डिले शेते कामचारेण ॥

प्राग्रोऽभीक्ष्ण्ये ॥ ६९ ॥

सुवन्ते वाचि धोराभीक्ष्णे गम्ये प्रायो णिन् भवति। शीलं गुणान्तरे द्वेषः। तत्तन्मुहुर्मुहुः सेवनमाभीक्ष्ण्यम्। कषायपायिणो गांधारयः। सौवीरपायिणो इपिलाः। तक्रपायिणो अन्ध्राः। क्षीरपायिण उशीनराः। मृदन्तं तुम्बिभक्ताविति। णत्वं प्रायोग्रहणादिह न भवति। कुल्माषखादाश्चोलाः॥

मनः॥ ७०॥

मन्यतेः सुपि वाचि णिन् भवति। अशीलाद्यर्थमेतत्। शोभनं मन्यते परं शोभनमानी दर्शनीयमानी। मन इति स्यविकरणस्य ग्रहणं व्याख्यानात्। उत्तरत्र खशि विशेषो भविष्यति॥

खश्चात्मनः॥ ७१॥

आत्मनो यत्सुवन्तं तस्मिन् वाचि मन्यतेः खश भवति णिश्च। शोभनमात्मानं मन्यते शोभनंमन्यः। शोभनमानी पण्डितमानी॥

भूते॥ ७२॥

भूत इत्यधिकारो वेदितव्यः। धोरिति वर्तते। अर्थवशाद्भूते ध्वर्थे वक्ष्यमाणा विधयो भवन्तीत्यर्थः। वक्ष्यति दृशेः क्विनप्। मेरुं दृष्टवान् मेरुदृश्वा। भूत इति किम्। मेरुं द्रक्ष्यति। न च भूतशब्दस्येतरेतराश्रयत्वेनासिद्धिः, अनादित्वाच्छब्दव्यवहारस्य। भूत इति निसंज्ञको वा शब्दः। इयन्त इति संख्यानं निसज्ञानां न विद्यते। प्रयोजनवशादेते निपात्यन्ते पदे पदे॥ १॥

करणे यजः ॥ ७३ ॥

णिन्निति वर्त्तते । करणे सुबन्ते वाचि यजेर्द्धौ; भूते णिन् भवति । अग्निष्टोमेन यजते अग्निष्टोमयाजी । वाजपेययाजी । विशेषणस्य करणत्वं यजनसामान्यं यजेरर्थः ॥

कर्म्मणि हनः ॥ ७४ ॥

कर्म्मणि वाचि हन्ते र्णिन् भवति भूते । पितृव्यं हतवान् पितृव्यघाती । मातुलघाती । कुत्साविशेष इति वक्तव्यमिह मा भूत् । देवदत्तं हतवान् देवदत्तघातः ॥

ब्रह्मभ्रूणवृत्रेषु क्विप् ॥ ७५ ॥

ब्रह्म भ्रूण वृत्र इत्येतेषु कर्म्मसु हन्तेः क्विप् भवति । ब्रह्माणं हतवान् । ब्रह्महा । भ्रूणहा । वृत्रहा । सामान्येन क्विपि सिद्धे नियमार्थमिदम् । ब्रह्मादिष्वेव कर्मसु हन्तेः क्विन्नान्यस्मिन् । मित्रं हतवान् मित्रघातः । उभयथा नियमश्चायम् । ब्रह्मादिषु कर्म्मसु भूते क्विवेव नान्यस्त्यः । उभयथा शिष्यैः प्रतिपन्नत्वात् उभयथा नियमो लभ्यते । कथं मधुहा चिन्त्यमेतत् । हन इत्येव । ब्रह्माणं कृतवान् । भूत इत्येव । ब्रह्मणं हन्ति हनिष्यति वा ॥

सुकर्म्मापमन्त्रपुण्ये कृञः ॥ ७६ ॥

क्विविति वर्तते । सुशब्दे वाचि कर्म्मादिषु च करोतेः क्विप् भवति भूते । सुष्ठु कृतवान् सुकृत् । कर्मकृत् । पापकृत् । पुण्यकृत् । एषोऽप्युभयथा नियमः । स्वादिष्वेव वाक्षु कृञः क्विप् भवति नान्यस्मिन् । सूत्रं कृतवान् सूत्र-

कारः । स्वादिषु च भूते क्विबेव नान्यस्त्यः । कृञ इति किम् । पापं चितवान् । भूत इत्येव । कर्म करोतीति कर्म्मकारः । स्वादिष्वेव भूते क्विप्भवतीति नायमिह नियम इत्येके । तेन भाष्यकृत् शास्त्रकृत् तीर्थकृदित्येवमादि सिडम् । वर्तमानकालविवक्षा वा तेनानियमः ॥

सोमे सुञः ॥ ७७ ॥

सोमे कर्म्मणि सुनोतेः क्विप्भवति भूते । सोमं सुतवान् सोमसुत् । सोमसुतौ । सोमसुतः । एषोऽप्युभयथा नियमः । सोम एव वाचि सुनोतेः क्विन्नान्यस्मिन् । सुरां सुतवान् सुरासावः । सोमे वाचि भूते क्विबेव नान्यस्त्यः । सुञ इति किम् । सोमं कृतवान् । भूत इत्येव । सोमं सुनोति सोमसावः ॥

अग्नौ चेः ॥ ७८ ॥

अग्नौ कर्म्मणि चिनोतेः क्विर्भवति भूते । अग्निं चितवान् अग्निचित् । अग्निचितौ । अग्निचितः । अयमप्युभयथा नियमः अग्नावेव वाचि नान्यस्मिन् । कुड्यं चितवान् कुड्यचायः । अग्नौ वाचि भूते क्विबेव नान्यस्त्यः । चेरिति किम् । अग्निं कृतवान् । भूत इत्येव । अग्निं चिनोति अग्निचायः ॥

कर्म्मण्यण्याख्यायाम् ॥ ७९ ॥

कर्मणीति प्रकृतं वर्त्तते । कर्म्मणि वाचि चिनोतेः कर्म्मणि कारके क्विप्भवति समुदायेन चेदन्याख्या गम्यते । श्येन इव चितः श्येनचित् । काक इव चितः काकचित् ।

रथचक्रचित् । आख्या ग्रहणं किमर्थं रूढेः परिग्रहार्थम् । अग्न्यर्थ इष्टकाचयः इयेनचिदुच्यते ॥

कर्म्मण्योन्विक्रियः ॥ ८० ॥

वाचि इन्नित्ययं त्यो भवति । विपूर्वात् क्रीणातेः । कर्मणीति वर्तमाने पुनः कर्मग्रहणमभिधेयनिवृत्त्यर्थम् । कर्मणि वाचि कर्त्तरि कारके यथा स्यात् । तैलं विक्रीतवान् तैलविक्रयी । घृतविक्रयी । कृत्सायामिति वक्तव्यम् । इह न भवति । धान्यविक्रायः ॥

दृशेः क्वनिप् ॥ ८१ ॥

भूते कर्मणीति च वर्त्तते । कर्मणि वाचि दृशेर्द्वोः क्वनिप्भवति । मेरुं दृष्टवान् मेरुदृश्वा । विश्वदृश्वा । पित्करणमुत्तरार्थम् । सामान्येन क्वनि प्रे सिद्धे पुनर्वचनं भूते मन्वन्विचां निवर्तकम् ॥

राज्ञि युधि कृञः ॥ ८२ ॥

राजशब्दे कर्मणि युधिकृञ् इत्येताभ्यां क्वनिप्भवति। युधिरन्तर्भावितण्यर्थः सकर्मकः । राजयुध्वा । राजकृत्वा अयमपि योगः मन्वन्विचां निवृत्त्यर्थः । कर्मणीत्येव । राज्ञा युद्धवान् ॥

सहे ॥ ८३ ॥

सहशब्दे वाचि युधिकृञित्येताभ्यां क्वनि भवति भूते । सह युद्धवान् सहयुध्वा । सहकृत्वा । वानीच इत्यत्र न्यगवयवस्य वसस्य ग्रहणात् सहशब्दस्य सभावो न भवति । योगविभागो यथासंख्यनिवृत्त्यर्थः ॥

जनेर्डः ॥ ८४ ॥

सुपि शील इत्यतः सुपीति संबध्यते । जनेर्डीः सुपि वाचि ङ इत्ययं स्थो भवति । उपसरे जातः उपसरजः । मण्डुरायां जातः मण्डुरजः । स्वेघायोः क्वचित् रवौ चेति प्रादेशः । बलभीजः । कायामजातावभिधानम् । जाड्याज्जातं जाड्यजन्दुःखम् । सन्तोषजं सुखम् । सङ्कल्पजः कामः । बुद्धिजः संस्कारः । अजाताविति किम् । मृगाजातः । हस्तिनो जातः । गौ वाचि खुविषये प्रजाताः प्रजाः अनौ कर्मणि वाच्यभिधानम् । पुमांसमनुजातः पुमनुजः । स्त्रयनुजः । अन्यस्मिन्नपि वाचि दृश्यते कारकान्तरेऽपि । किञ्जातो नङ्किञ्जः । अलं जातेन अलञ्जः । द्विर्जातो द्विजः । न जातः अजः । कायामजाताविति युक्तं जातावपि दृश्यते ब्राह्मणजः पशुघधः । क्षत्रियजं युद्धम् । गौ वाचि खाविति युक्तः अश्वावपि दृश्यते । अधिजातः । अधिजः । अभिजः । परिजः । अनौ कर्मणीत्युक्तम् । अकर्मण्यपि दृश्यते । अनुजातः अनुजः । यद्यपि विशेषेण सुपीत्युच्यते इहापि प्राप्नोति सर्वाङ्गपरिपूर्णो जातः ग्रहस्थो जातः अनभिधानान्न भवति । युङ्गा बहुलमिति बहुलवचनात् । कर्मणि कारके अन्यस्मादपि भवति परिखाता परिखा । पुंसा अनुजातः पुंसानुप्रकरणे पुंसानुजो जनुषान्ध इत्यत्रानुर्घत्यब्वते ॥

तः ॥ ८५ ॥

तसंज्ञस्त्यो भवति धोर्भूते । इह वाग्विशेषपरिग्रहो नास्ति कृतम् । कृतवान् । भुक्तम् । भुक्तवान् । क्तक्तवतो-

भाविनोः तसंज्ञाश्रिता तेन संज्ञया त्यधिधाने इतरेतराश्रयं नास्ति। आदिकर्मण्यपि कथं चित् भूतत्वमस्ति। प्रकृतः कटं देवदत्तः। प्रकृतवान् कटं देवदत्तः॥

सुयजोर्वनिप्॥ ८६॥

सुपीति निवृत्तम्। सु यजि इत्येताभ्यां वनिप् भवति भूते। सुतवान्। सुत्वा। इष्टवानिति यज्वा॥

जृषोऽतृ॥ ८७॥

जीर्यतेरतृ इत्ययं त्यो भवति भूते। जरन्। जरन्तौ। जरन्तः। क्तक्तवतोरसमत्वादबाधकोऽयम्॥

वस्सदिणो वसुर्लिण्मम्॥ ८८॥

वस् सद् इण् इत्येतेभ्यः भूते वसुर्भवति लिड्वन्मसंज्ञश्च। अनूषिवान् श्रीदतं धान्यसिंहः। उपसेदिवान् उपाध्यायं शिष्यः। ईयिवान् उपेयिवान् उपाध्यायं शिष्यः। इणं क्रादिनियमादिटि द्वित्वम्। धरूपस्य यणोत्योरिति यणादेशः। चस्य कितोणो दीरिति दीत्वम्। अथ क्रादिनियमलक्षणस्येटः वसीतिप्रतिषेधः कस्मान्न भवति उत्तरत्र स्तुवोनिडित्यनिट्वचनं ज्ञापकं वसीतिप्रतिषेधो न भवति। उदात्तस्य वासप्रतिषेधः लिड्वदतिदेशाद्द्वित्वम्। न श्रितलोकेत्यादिना कर्म्मणि ताप्रतिषेधकश्च भवति। मसंज्ञायाः किं प्रयोजनं कर्म्मव्यतिहारे मा भूत्। व्यत्यषे जनपद इति प्राक्तेर्वासम इति लुडादयोपि भवन्ति। अन्ववात्सीत्। अन्ववसत्। अनूवास। उपासदत्। उपासीदत्। उपससाद। उपागात्। उपैत्। उपेयाय। कसुकानौ लिडादेशौ सर्वधुभ्य इत्येके। कसुर्लोमसिति

मसंज्ञकः । कानस्य इडानं द इति संज्ञा । भावकर्म्मकर्तृषु च सम्भवः । लिडादेशत्वादेव कित्त्वे सिद्धे स्फातार्थं कित्करणमनयोः । अञ्जेः अञ्जितवान् । खञ्जेः सस्वञ्जान इति कित्वान्नखं सिद्धम् । ऋकारान्तस्य एप्रतिषेधार्थं च कित्करणं तितीर्वानः । ऋच्छतृनामित्येन्न भवति । कर्मणि ततिराणः । ऋतइङोरिति इत्वस्य द्वित्वे चीति स्थानिवद्भाव तृहति द्वित्वं । र इति अत्वम् । तैरेवाचार्यैः वस्वेकाजाद्घसामिङिति वसौनरतः । एकाचामाकारातानां घसेश्चेति विहितमेविचान् । पविवान् । जक्षिवान् । इह कस्मान्न भवति बिभिद्वान् चिच्छिद्वान् हलाध्येक्षिघते इत्यनन एत्वचरवयोर्वासौ य एकाच् तत्रैवेट् भवति यद्येवं यथिवानित्यत्रापि इटि चात् स्वमिति स्व एकात्वमस्तीति आदृग्रहणमनर्थकं नियमार्थमेतत् यथा मिणि मित्तमेकाच्त्वं तेषामाकारान्तानामेव इद्भवति नान्येषां च खन्वानिति । अत्रापीटि कृते उङ खे क्रियमाणे एकाच्सम्भवोऽस्ति अत एव नियमात् घसेरित्यप्राप्ते ग्रहणम् । तथा वा दृशिगमहनषिदविशाम् । ददृशिवान् । ददृश्वान् । जग्मिवान् । जगन्वान् जघ्निवान् । जघन्वान् । मो नः स्वोरिति मकारस्य नत्वम् । दृशेरनेकाच्त्वात् गमहनोरातइति नियमात् इड्यप्राप्ते विभाषा वासौ परतौ वदेः शव्विकरणस्य ग्रहणम् । विविदिवान् । विविद्वान् । ज्ञानार्थस्य ग्रहणे तेर्यस्य वेति प्रतिषेधः स्यात् । विविशिवान् । विविश्वान् ॥

श्रुवोऽनिट् ॥ ८९ ॥

श्रु इत्येतस्माद्वसुर्भवत्यनिट् । उपशुश्रुवान् श्रीदत्तं घान्यसिंहः । असमत्वाण्णडादयोपि उपाश्रृणोत् । उपशुश्राव ॥

अनाश्वान्नूचानौ ॥ ९० ॥

अनाश्वान अनूचान इत्येतौ शब्दौ निपात्येते । नञ्पूर्वादश्नातेः वसुर्लिड्वदिडभावश्च निपात्यते । अनाश्वांस्तपश्चकार । असमत्वात् नाश्नात् नाश इत्यपि भवति । वचेरनुपूर्वात् कर्तरि कानो निपात्यते । अनूचानो व्रतोपपन्नः । असमत्वात् अनूक्तवान् अन्ववोचत् अनूवाच इति च भवति ॥

लुङ् ॥ ९१ ॥

लुङ् इत्ययं त्यो भवति भूते धोः । अकार्षीत् अहार्षीत् । क्व भवानुषितः । अमुत्रावात्समिति । अत्र भूतमात्रस्वबत्त्यैवात्त एवमिति लङ् न भवति ॥

अनद्यतने लङ् ॥ ९२ ॥

भूत इति वर्तते । अविद्यमानाद्यतने भूते धोर्लङ् भवति । अतीतायां रात्रेः आ पश्चिमयामात् आगामिन्याश्च रात्रेराप्रथमयामात् अद्यतनकालः । तत्प्रतिषेधादनद्यतनः । अकरोत् । अहरत् । अनद्यतनभूतविवक्षायां समत्वाल्लुङो बाधको लङ् । अनद्यतन इति वचनिर्देशाद्यत्राद्यतनगन्धोऽप्यस्ति तत्र लङ् न भवति । अद्य ह्यश्वाभुक्तमहि यदिवसः अद्यतनेप्यद्यतनो नास्तीति लज्बाप्नोति नायं दोषः । विशेषाद्यतने सामान्याद्यतनस्य विद्यमानत्वात् ।

मिङैकार्थत्वात् चानुकृष्टया ईपः कथमनुवृत्तिः ईबधिकारे सूत्रारम्भसामर्थ्यादत्राप्यधिकरणत्वादीप् सिद्धा पक्षे भार्थं वचनं यद्यधिकरणस्यापि करणविवक्षा यथा स्थाल्या पचति तदेदं प्रपञ्चार्थम् ॥

मिङैकार्थे वा प्रथमा ॥ ५४ ॥

मिङन्तेन पदेन एकार्थे वर्तमानान्मृदो वा विभक्तौ भवति । गौश्चरति । कुमारी तिष्ठति । ओदनः पच्यते । खारो मीयते । एकः । द्वौ । बहवः । इत्यत्रोक्तेष्वप्येकत्वादिषु भा भवतीत्युक्तप्रायम् । च वा ह उच्चैरित्येवमादिषु अनर्थकेषु च प्रादिषु मिङन्तेनैकार्थः वाभावेऽपि सुपो भेरिति ज्ञापकाद्भवति । भावे वर्तमानेन मिङन्तेन स्वभावादन्येनैकार्थत्वं नास्ति । आस्यते देवदत्तेन नन्वेकत्वादिविशिष्टेषु कर्मादिषु कर्मादिविशिष्टेषु वा एकत्वादिषु इवादिनां नियमात् परिशेषात् वृक्षः प्लक्ष इत्येवमादिषु वादिषु च ङ्याम्मृद इत्यनेनैव वायाः सिद्धत्वादनर्थकमिदं नानर्थकम् । एकद्विबहुवचनानां व्यतिकरनिवृत्त्यर्थं वायास्तायाश्च विषयभेदार्थं चेदं विसर्जनीयो विभाषा सन्देहनिवृत्त्यर्थम् ॥

सम्बोधने बोध्यम् ॥ ५५ ॥

सम्बोधनमभिमुखीकरणं सम्बोधने या वा तस्या बोध्यमित्येषा संज्ञा । सम्बोधनेऽपि मिङैकार्थत्वमस्ति इति पूर्वेण वाविधानम् । हे देवदत्त आगच्छ । हे देवदत्तौ । हे देवदत्ताः । हे पचन् । हे पचमान । सम्बोधन इति शत्रशानौ बोध्यसंज्ञाप्रयोजनम् । बोध्यमसद्वदित्येवमादि ॥

परोक्षे लिट् ॥ १५ ॥

भुते अनद्यतने इति च वर्तते । परावृत्तोऽक्षेभ्यः परोक्षः इन्द्रियागोचर इत्यर्थः । परोक्षशब्दस्य चेदमेव निपातनम् । भूतानद्यतनपरोक्षेऽर्थे लिट् भवति । यद्यपि सर्वोऽर्थः साध्यत्वेनानुमेयत्वेन वा परोक्षस्तथापि यत्राश्रयद्वारेण प्रत्यक्षाभिमानो नास्ति लोकस्य स परोक्ष उक्तः । पपाच । चकार । आत्मनानुष्ठिता हि क्रिया सर्वस्य प्रत्यात्मं प्रत्यक्षेति सुप्तमत्तमस्मदः प्रयोगः । सुप्तोऽहं किल विललाप मत्तोऽहं किल जघान । अत्यन्तापह्नवे लिट् वक्तव्यः । नाहं कलिङ्गं जगाम । कलिङ्गगमनस्य प्रत्यक्षत्वाल्लिडप्राप्तः ॥

ह शश्वतोर्लङ् च ॥ ९६ ॥

ह शश्वदित्येतयोर्वाचोर्लङ् भवति लिट् च भूतानद्यतनपरोक्षे । इति हाकरोत् । इति ह चकार । शश्वदकरोत् । शश्वचकार ॥

प्रश्ने चान्तर्युगे ॥ ९७ ॥

प्रष्टव्य इति प्रश्नः । पञ्चवर्षं युगम् । युगाभ्यन्तरे प्रश्ने भूतानद्यतने परोक्षे लङ्लिटौ भवतः । चकारः किमर्थः पूर्वसूत्रे चानुकृष्टस्य लिटोऽनुकर्षणार्थः । किमगच्छस्त्वं पाटलिपुत्रम् । अददादसौ दानम् । ददावसौ दानम् । प्रश्न इति किम् । देवदत्तो जगाम । अन्तर्युग इति किम् । अहं त्वां पृच्छामि । जघान कंसं किल वासुदेवः ॥

पुरि लुङ् वा ॥ ९८ ॥

पुराशब्दो भूतानद्यतने वर्त्तते न भूतमात्रे। पुराशब्दे वाचि भूतानद्यतने वा लुङ् भवति पक्षे यथाप्राप्तं च। अवात्सुरिह पुरा छात्राः। अवसन्निह पुरा छात्राः। परोक्षविवक्षायां लिडपि भवति। ऊषुरिह पुरा छात्राः ॥

लट् ॥ ९९ ॥

वेति निवृत्तम्। लड् भवति पुराशब्दे वाचि भूतानद्यतने। वसन्तीह पुरा छात्राः। योगविभाग उत्तरत्र लट एवानुवर्तनार्थः ॥

स्मे ॥ १०० ॥

स्मशब्दोऽप्यनद्यतने परोक्षे च वर्तते न भूतमात्रे। स्मशब्दे वाचि अनद्यतने लट् भवति। इति स्मोपाध्यायः कथयति। स्वयं प्रभार्थं युध्यन्ते स्म विद्याधराः। लट्लिटोरपवादोऽयम्। स्मपुराशब्दयोर्युगपत्प्रयोगे परत्वात् स्मलक्षणो लट्। सुलोचनार्थं पुरा युध्यन्ते स्म पार्थिवाः। हशश्वल्लक्षणादपि विधिः परत्वेन स्मलक्षणः। इतिहाधीयते स्म। शश्वदधीयते स्म। तथा हशश्वल्लक्षणात् परत्वेन पुरालक्षणो विधिः। इति ह पुरा अध्यगीषत। शश्वत्पुराऽध्यगीषत। ननौ पृषृप्रतिवचने भूतमात्रे लट् वक्तव्यः। अकार्षीः कटं देवदत्त ननु करोमि भोः। तथा नशब्दे नुशब्दे च वाचि पृषृप्रतिवचने भूते वा लट् वक्तव्यः। अकार्षीः कटं देवदत्त न करोमि भोः नाकार्षं भोः। अहं नु करोमि अहं न्वकार्षम्। नेदं द्वयं वक्तव्यम्। पूर्वत्र

क्रियाया आपरिसमाप्तेर्वर्तमानत्वमुत्तरत्रासमाप्तिः समाप्तिश्च क्रियाया विवक्षिता ॥

सम्प्रति ॥ १०१ ॥

ध्वर्थे लट् भवति आरम्भात्प्रभृत्या उपरमाद्वर्तमानः कालः सम्प्रति इत्युच्यते । उक्तं च आरम्भाय प्रसृता यस्मिन् काले भवन्ति कर्त्तारः कार्यस्यानिष्टातस्तन्मध्यं कालमिच्छन्ति । तरति । नयति । याति ॥

तस्य शतृशानाववैकार्थे ॥ १०२ ॥

तस्य सम्प्रतिकाले विहितस्य लटः स्थाने शतृ शान इत्येतावादेशौ भवतः न चेद्वान्तेन एकार्थ्यं भवति। पचन्तं पश्य । पचता कृतम् । पचमानेन कृतम् । तस्य ग्रहणं किम् । असम्प्रतिकाले विहितस्य लटः स्थाने मा भूत् । उष्यते इह पुरा छात्रैः । अधीयते स्म नटैः । अवैकार्थ इति किम् । पचति देवदत्तः । अत्र तस्य शतृशानाविति योग विभागः कर्त्तव्यः । न वा साकाङ्क्ष इत्यतो मण्डूकप्लुत्या नवाग्रहणं चाभिसम्बन्धनीयम् । ततो नेत्यनेन इतिशब्दयोगे प्रतिषेध एव भवति । वर्षतीति धावति । हन्तीति पलायते । वेति व्यवस्थितविभाषा । तेन इतिवादिभिर्योगेर्थाभिन्नाधिकरणेषु च हृत्सु नित्यो विधिः। कुर्वती भक्तिः। कुर्वद्भक्तिः । कौर्वतः । पाचमानः । भक्तिशब्दः स्त्रियादौ पठ्यते तेन पुंवद्यजातीयदेशीय इति पुंवद्भावः । समानाधिकरणेषु हृत्सु विकल्पः । कुर्वत्तरः । कुर्वद्रूपः । कुर्वाणरूपः । करोतितराम् । करोतिरूपम् । तस्मात् घुत्ययोरुपसंख्यानं

न कर्तव्यम् । पुनरवैकार्थ इति द्वितीयो योगः । अत्रापि नवेत्यधिकारात् क्वचिद्वा तेन सामानाधिकरण्येपि शतृशानौ भवतः । सन् घटः । अस्ति घटः । विद्यते घटः । जक्षतु जुहोति वा देवदत्तः । अधीयानो मुनिः । अधीते मुनिः । व्यवस्थितविभाषाबलात् माङ्याक्रोशे लुङपि । मा पचत् । मा पचमानः । मा पाक्षीत् ॥

संबोधने ॥ १०३ ॥

सम्बोधनमभिमुखीकरणम् । तद्विषये लटः शतृशानौ भवतः वैकार्थत्वे नित्यार्थमिदम् । हे पचमान । उभयोर्घोत्यं सम्बोधनमिति वाविभक्त्यपि भवति ॥

लक्षणहेत्वोः क्रियायाः ॥ १०४ ॥

लक्षणं ज्ञापकं चिन्हं हेतुर्जनकः लक्षणं च । या क्रिया क्रियाया हेतुश्च या क्रिया तत्र वर्तमानाद्धोः परस्य लटः शतृशानौ भवतः । शयाना भुञ्जते यवनाः । तिष्टन्तोऽनुशासति गणकाः । व्यभिचार्यपि लक्षणं दृश्यते यथा यत्रासौ काकस्तद्देवदत्तगृहमिति । अन्यथैव स्यात् शयाना वर्द्धते दूर्वा । आसीनं वर्द्धते विसम् । हेतौ । अधीयान आस्ते । अर्जयन् वसति । नवेत्यत्र वृतेरिह न भवति । वर्षतीति धावति । हन्तीति पलायते । लक्षणहेत्वोरिति किम् । पचति । जल्पति । क्रियाया इति किम् । यो वेपते सोऽश्वत्थः । यद्गुप्लवते तल्लघु । द्रव्यस्य गुणस्य च लक्षणे न भवतः । इह शास्त्रे अन्यत्र हेतुग्रहणे कारणग्रहणमिति लक्षणग्रहणे च ज्ञापकग्रहणमिति अन्यतरनिर्देशेनोभय-

प्रतिपत्तेर्द्वयोरुपादानं द्वन्द्वेषु अल्पाच्तरमिति पूर्वनिपात-व्यभिचारार्थं च ॥

तौ सत् ॥ १०५ ॥

तौ शतृशानौ सत्संज्ञौ भवतः । शतृशानयोः प्रकृतत्वात् तौग्रहणं शतृशानरूपपरिग्रहार्थम् । तेन लृङादेशयोरपि सत्संज्ञा सिद्धा । देवदत्तस्य कुर्वत् करिष्यत् । उदुग्रहणेत्यादिना तासप्रतिषेधः ।

पूङ्यजोः शानः ॥ १०६ ॥

सम्प्रतीति वर्तते । पूङ् यज् इत्येताभ्यां शानस्त्यो भवति अलादेशोऽयं कर्त्तर्येव भवति सभाग्भ्योऽपि धुभ्यो विधास्यते । सोमं पवमानः । यजमानः । न शितादिसूत्रे शतृ इत्यतः प्रभृति आतृनो नकारात् तृन्निति प्रत्याहार उक्तः । तेन कर्म्मणि तात्प्रतिषेधः ॥

वयःशक्तिशीले ॥ १०७ ॥

वयस् शक्ति शील इत्येतेषु गम्यमानेषु धोः शानो भवति । शरीरावस्था वयः । कतीह शिखण्डं वहमानाः । कतीह कवचं पर्य्यस्यमानाः । शक्तिः सामर्थ्यम् । कतीह भटं निघ्नानाः । कतीह भुञ्जानाः । शीलं गुणान्तरद्वेषः । कतीह मण्डयमानाः । कतीह मुण्डयमानाः ॥

धारीङः शत्रकृच्छ्रिणि ॥ १०८ ॥

अकृच्छ्रमनायासो य अस्ति सोऽकृच्छ्री । धारि इङ इत्येताभ्यां शतृत्यो भवति अकृच्छ्रिणि कर्त्तरि । धारयन्

धर्म्मशास्त्रम् । अधीयन् जैनेन्द्रम् । अकृच्छ्रिणीति किम् । कृच्छ्रेण धारयति । कृच्छ्रेणाधीते ॥

द्विषोऽरौ ॥ १०९ ॥

द्विषः शतृत्यो भवत्यरौ कर्तरि । चौरस्य द्विषन् चौरं द्विषन् । द्विषः शतुर्वावचनमिति कर्मणि वा ता । अराविति किम् । द्वेष्टि पतिं भार्या । असमा एते त्या लटं न बाधन्ते ॥

सुञो यज्ञसंयोगे ॥ ११० ॥

संयुज्यते इति संयोगः संयुक्त इत्यर्थः । सुनोतेर्यज्ञसंयोगे कर्तरि शतृत्यो भवति । सर्वे सुन्वन्तः । यज्ञस्वामिन इत्यर्थः । यज्ञसंयोग इति किम् । सुनोति सुराम् ॥

प्रशंसेऽर्हः ॥ १११ ॥

अर्हतेः प्रशंसेऽर्थे शतृत्यो भवति । अर्हन्निह भवान् । पूजाम् । अर्हन्निह भवान् विद्याम् । प्रशंस इति किम् । अर्हति चोरो बधम् ॥

आक्रेः शीलधर्मसाधुत्वे ॥ ११२ ॥

आङभिविधौ द्रष्टव्यः । वक्ष्यति ग्रावस्तुवः क्विप् । आ एतस्मात् क्विप्संशब्दनात् यानित ऊर्ङ्ग वक्ष्यामः शीलधर्म्मसाधुत्वेषु वेदितव्याः । शीलं व्याख्यातम् । धर्म आचारः । ध्वर्थस्य साधुकरणं साधुत्वम् ॥

तन् ॥ ११३ ॥

तृन्नित्यर्थं त्यो भवति सर्वधुभ्यः शीलादिषु । शीले कर्ता कटान् । वदिता जनापवादान् । धर्म्मे मण्डयितारः स्राविष्टायना भवन्ति । वधूमूढं अपहर्तारः आहरका भवन्ति । श्राद्धे सिद्धे साधुत्वे कर्ताविकटः गताखेलः गमेरुकञ्वक्तव्यते अधिकारातृन्नपि भवति ॥

अलङ्कृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्य-पत्रपवृतवृधसहचर इष्णुः ॥ ११४ ॥

अलङ्कृञित्येवमादिभ्य इष्णुर्भवति शीलादिष । अलङ्करिष्णुः । मण्डनार्थे पूर्वविप्रतिषेधेन युचोऽयं बाधकः । निराकरिष्णुः । प्रजनिष्णुः । उत्पचिष्णुः । उत्पतिष्णुः । उन्मदिष्णुः । रोचिष्णुः । अपत्रपिष्णुः । वर्तिष्णुः । वर्धिष्णुः । सहिष्णुः । चरिष्णुः ॥

ग्लाभूजिस्थः क्नुः ॥ ११५ ॥

ग्ला भू जि स्था इत्येतेभ्यो धुभ्यः क्नुर्भवति शीलादिषु । ग्लास्नुः । भूष्णुः । जिष्णुः । स्थास्नुः । स्थोर्मित्वान्न स्थईकारः । ज्जितोरीत्वस्य शासनात् एवभावस्त्रिषु स्मार्यः । स्फुकोनिङ्भङ्गकेरितोः ॥

त्रसिगृधिधृषिक्षिपः क्नुः ॥ ११६ ॥

त्रसि गृधि धृषि क्षिप इत्येतेभ्यः क्नुर्भवति शीलादिषु । त्रस्नुः । गृध्नुः । धृष्णुः । क्षिप्नुः । ध्युङ एप्प्रतिषधार्थं कित्करणमिदं ज्ञापकं त्यादिहलापेक्षया रुसंज्ञायामपि ध्युङ एप् भवतीति । वेत्ता । बोद्धा ॥

शमित्यामदेर्घिणिन् ॥ ११७ ॥

इति आद्यर्थे आङभिविधौ शमादिभ्य आ मदेर्घिनिण् भवति । अष्टौ च शमादयः । शमी । तमी । दमी । श्रमी । भ्रमी । क्षमी । क्लमी । प्रमादी । उन्मादी । उडोत इत्यैप्राप्तः न सेटखामोवसिकमिचम इति प्रतिषिद्धः । मदेस्तु भवति । घकारः उत्तरत्र कुत्वार्थः । इकारः उच्चारणार्थः । अन्ये उकारमितं कुर्वन्ति तेषामिह शमिनितरा इति ङगितश्चेति वा प्रादेशः प्राप्नोति । आमदेरिति किम् यसिता ॥

दुहानुरुधदुषद्विषद्रुहयुजत्यजरजभुजाभ्या हनः ॥ ११८ ॥

दुहादिभ्यो घिनिण भवति शीलादिषु । दोही । अनुरोधी । दोषी । द्वेषी । द्रोही । योगी । त्यागी । रज इति सूत्रे निपातनान्नखम् । रागी । भोगी । अभ्याघाती । अकर्मकाणामिति वक्तव्यमिह मा भूत् । गां दोग्धा । शत्रूनभ्याहन्ता ॥

परेः सृदेविच्छिपरटवददहमुहः ॥ ११९ ॥

परिपूर्वेभ्यः सृप्रभृतिभ्यो धुभ्यः घिनिराभवति । परिसारी । देव देवन इत्यस्य परिदेवी । च्छिपेरविशेषेण ग्रहणम् । परिक्षेपी । परिपाटी । परिवादी । परिदाही । परिमोही ॥

वौ कषविचलसकत्थस्नम्भः ॥ १२० ॥

विपूर्वेभ्यः कषादिभ्यो धुभ्यः घिनिण भवति । विकाषी । विवेकी । विलासी । विकत्थी । विस्रम्भी ॥

अपे च लषः ॥ १२१ ॥

अपे च वौ च वाचि लषेर्घिनिण् भवति । अपलाषी । विलाषी ॥

चरेः ॥ १२२ ॥

अप इति वर्तते । अपपूर्वाच्चरेः घिनिण् भवति । अपचारो ॥

अतेः ॥ १२३ ॥

अतिपूर्वाच्चरेर्घिनिण् भवति । अतिचारी ॥

समि पृचिसृजिज्वरः ॥ १२४ ॥

सम्पूर्वेभ्यः पृचि सृजि ज्वरि इत्येतेभ्यो घिनिण भवति । सम्पर्की । संसर्गी । संज्वरी । अकर्मकाणामित्येव । संपृणक्ति साकम् ॥

आङि यमियसिक्रीडिमुषः ॥ १२५ ॥

आङ्पूर्वेभ्यः यमि यसि क्रीडि मुषि इत्येतेभ्यो घिनिण भवति । आयामी । तासावनिड्भावादैप्रतिषेधो न भवति । आयासी । आक्रीडो । आमोषी ॥

प्रे लपसृद्रुमथवदवसः ॥ १२६ ॥

प्रशब्दे वाचि लप सृ द्रु मथ वद वस इत्येतेभ्यो घिनिण् भवति । प्रलापी । प्रसारी । प्रद्रावी । प्रमाथी । प्रवादी । वसेर उम्विकरणस्य प्रवासी ॥

निन्दहिंसक्लिशखादविनाशव्याभाषा-सूयो वुञ् ॥ १२७ ॥

निन्दादिभ्यो वुञ् भवति शीलादिषु । निन्दकः क्लिशेरविशेषेण ग्रहणे युचोपि बाधा । क्लेशकः । खादकः । विनाशेर्ण्यन्तस्य विनाशकः । असूय इति कंडवादिर्यगन्त असूयकः । एवुना सिद्धे वुञ्ग्रहणं ज्ञापकमन्येभ्यः शीलादिषु एवादयो न भवन्तीति ॥

परौ वादिक्षिपरटः ॥ १२८ ॥

परिपूर्वेभ्यः वादि क्षिप रट् इत्येतेभ्यो वुञ् भवति । परिवादकः । परिक्षेपकः । परिराटकः ॥

देविक्रुशो गौ ॥ १२९ ॥

देवि क्रुश इत्येताभ्यां गौ वाचि वुञ् भवति । देवीति देवतेण्यन्तस्य । परिदेवकः । आदेवकः । परिक्रोशकः । आक्रोशकः । गाविति किम् । देवयिता ॥

रुचलार्थाद्युर्युच् ॥ १३० ॥

रौत्यर्थेभ्यश्चलत्यर्थेभ्यश्च धिसंज्ञकेभ्यः युच भवति । रवणः । शब्दनः । कथनः । चलत्यर्थेभ्यः । चलनः । चोपनः । कम्पनः । धेरिति किम् । पठिता शास्त्रम् ॥

अनुदात्तेतो ऽयसूददीपदीक्ष्नो हलादेः ॥ १३१

अनुदात्तेतो हलादेर्धोर्युच् भवति यकारान्तसूददीपदीक्ष्न इत्येतान्वर्जयित्वा । द्योतनः । रोटनः । अनुदात्तेत इति किम् । यष्टा । अयसूददीपदीक्ष्न इति किम् । क्रूयिता । क्ष्मायिता । सूदेः सकर्म्मकस्यापि सूदिता । कथं मधुसूदनः । नन्द्यादिपाठाण्युः । दीपिता । दीपेर्विशेषेण रो विधास्यते युचः प्राप्तिर्नास्ति । इदं प्रतिषेधवचनं ज्ञापकं

शीलादिकेषु असमविधिर्न भवतीत्यनित्यमेतत् । तेन कमनः । कम्रः । कम्पनः । कम्प्रः । विकत्थी विकत्थनः इति ष भवति । दात्रिता । हलादेरिति किम् । एव इत्येवं शील राविता । आदिग्रहणं हला तदन्तविधिर्मा भूत् इह न स्यात् । जुगुप्सनः । मीमांसनः । धेरेव । वसिता वस्त्रम् ॥

सृजुज्वलगृधशुचलषपतपदः ॥ १३२ ॥

सृप्रभृतिभ्यो युच् भवति । शरणः । जवणः । ज्वलनः । गर्द्धनः । शोचनः । लषनः । पतनः । पदनः । चल्यर्थानां पदेश्च ग्रहणं सकर्म्मकार्थम् । पदिग्रहणं ज्ञापनार्थमित्यन्ये शीलादिकेषु चासमविधिर्न भवति इति पदेरुक्त्र विशेषविहितेन सामान्यविहितस्य युचो बाधितत्वात् पुनरनेन प्रत्यापतिः ॥

क्रुधमण्डार्थात् ॥ १३३ ॥

क्रुध्यर्थेभ्यः मण्डार्थेभ्यश्च धुभ्यः युच् भवति । क्रोधनः । कोपनः । रोषणः । मण्डार्थेभ्यः । मण्डनः । रचनः । भूषणः ॥

क्रमिद्रमो यङः ॥ १३४ ॥

क्रमिदमिभ्यां यङन्ताभ्यां युच् भवति । चङ्क्रमणः । दन्द्रमणः ॥

यजिजपिवददशामूकः ॥ १३५ ॥

यङ इति वर्तते । यज्यादिभ्यो यङन्तेभ्यः ऊको भवति । याययूकः । जञ्जपूकः । दन्दशूकः । वावदूकः ।

जपिदंशिभ्यां लुपसदचरजपजभदहग्रदसोगर्हइति षञ्ज-
षजभदहदशभञ्जपसामितिचस्यनुगमः ॥

जागुः ॥ १३६ ॥

जागुरूको भवति । जागरूकः ॥

लषपतपदस्थाभूवृषहनशृकमगम उकञ् ॥ १३७ ॥

लषादिभ्यः उकञ् भवति । अपलाषुकं नीचसङ्ग-
तम् । अपेचलष इति वचनात् घिनिणपि भवति । प्रपा
तुका गर्भाः । उपपादुकाः देवाः । उपस्थायुको गुरून् ।
प्रभावुकः । प्रवर्षुकः । आघातुकः । शृणेते शारुकः ।
कामुका वन्यस्य स्त्रियो भवन्ति । भप्भतेत्यादिना
कर्म्मणि ताया प्रतिषेधे प्राप्ते उकप्रतिषेधः इत्युक्तः ।
आगामुकः स्वगृहम् ॥

जल्पभिक्षकुट्टलुण्टवृङष्टाकः ॥ १३८ ॥

जल्पादिभ्यो धुभ्यष्टाको भवति । जल्पाकः । जल्पा-
की । अकर्म्मकविवक्षायां रुचलार्थाद्धेर्युजिति युच् प्राप्तः ।
भिक्षाकः । अनुदाततेो युच् प्राप्तः । कुट्टाकः । लुण्टाकः ।
वराकः ॥

प्रे सृजोरिन् ॥ १३९ ॥

प्रपूर्वाभ्यां सृजुभ्यां इन् भवति । प्रसवी । प्रजवी ॥

परिभूजिदक्षिविश्रीणवमाभ्यथाभ्यमः ॥ १४० ॥

इन्निति वर्तते । परिभू जि दक्षि विश्रा इण वम
अभ्यथ अभ्यम इत्येतेभ्य इन् भवति । परिभावि । जयी ।

आदरो । क्षयी । विश्रयी । अत्ययी । वमी । अव्यथी । अभ्यमी ॥

स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुः ॥ १४१ ॥

स्पृहिप्रभृतिभ्यो धुभ्यः आलुर्भवति । स्पृहयालुः गृहयालुः । पतयालुः । एते चुरादिष्वदन्ताः । दयालुः निद्रालुः । तन्द्रालुः । तन्निति निपातनमाळुविषये न भवति । श्रद्धालुः ॥ इह शीङ ग्रहणं कर्त्तव्यम् । शयालुः ॥

दाधेट्सिशदसदो रुः ॥ १४२ ॥

दा धेट् सि शद सद इत्येभ्यो रुर्भवति । दा इत्य विशेषेण ग्रहणम् । दारुः । धारुः वत्सोमातरम् । नशितेत्यत्र उकारप्रश्लेषात् तदन्तविधिना तायाः प्रतिषेधः सेरुः । शद्रुः । सद्रुः । यत्वात्मकर्मणिघतेदीरु काष्ठं तद्रुणादिषु द्रष्टव्यम् ।

सृघस्यदः क्मरः ॥ १५३ ॥

सृमरः । घस्मरः । अघ्मरः । अनैनैवादेः घस्भावो निपात्यते ॥

भञ्जभासमिदो घुरः ॥ १४४ ॥

भञ्जादिभ्यो घुरो भवति । भञ्जेरात्मकर्म्मण्यभिधानं भङ्गुरं काष्ठम् । भासुरं ज्योतिः । मेदुरं मुखम् ॥

विद्विच्छिदः कुरः ॥ १४५ ॥

विद् भिद् छिद् इत्येतेभ्यः कुरो भवति । विदुरः

इति ज्ञानार्थस्यैव । भिच्छिदेरात्मकर्म्मणि कुर इष्यते भिदुरं काष्ठम् । छेदुरा रज्जुः ॥

सृजीरानशः क्करप् ॥ १४६ ॥

सृ जि इण् नश् इत्येतेभ्यः क्करप् भवति । सृत्वरः । जित्वरः । इत्वरः । नश्वरः । नश्वरी ॥

गत्वरः ॥ १४७ ॥

गत्वर इति निपात्यते गमेः क्करप् मकारस्य खं निपात्यते । गत्वरः । गत्वरी ॥

नमिकम्पिस्म्यजस्कमहिंसदीपो रः ॥ १४८ ॥

नमि कम्पि स्मि अजस कम हिंस दीप इत्येतेभ्यो रो भवति । नमेरात्मकर्म्मण्यपि । नम्रं काष्ठम् । नम्रो देवदत्तः । कम्प्रा शाखा । स्मेरं मुखम् । जस्यतेर्नञपूर्वात् अजस्रं ज्ञानं भावयामः । कम्रा युवतिः । हिंस्रः पापमेति । दीप्रो मणिः । कम्पश्च रापवर्थत्वात् कमदीप्योरनुदातेत्वात् युच् प्राप्तः ॥

सनाशंसभिक्ष उः ॥ १४९ ॥

सन्नन्त आशंस भिक्ष इत्येतेभ्य उत्यो भवति । चिकीर्षुः । जिहीर्षुः । आङ शसि इच्छायामित्यस्य आशंसुः । भिक्षुः ॥

विन्दिच्छू ॥ १५० ॥

बिन्दु इच्छु इत्येतौ शब्दौ निपात्येते । वेत्तेरुकारः नुमागमश्च निपात्यते विन्दुः । इच्छतीत्येवंशील इच्छुः । उश्छत्वं च निपात्यते ॥

स्वपितृषोर्नजिङ् ॥ १५१ ॥

स्वपितृषिभ्यां नजिङ् भवति शीलादिषु। स्वप्नक्। स्वप्नजौ। तृष्णक्। तृष्णजौ ॥

शृवन्द्योरारुः ॥ १५२ ॥

शृ वन्दि इत्येताभ्यां आरु इत्ययं त्यो भवति। शरारुः। वन्दारुः जिनान् ॥

भियः क्रुक्लुकौ ॥ १५३ ॥

बिभेतेः क्रु क्लुक इत्येतौ भवतः। भीरुः। भीलुकः। क्रुकोपि वक्तव्यम्। भीरुकः ॥

स्थेशभासपिसकसो वरः ॥ १५४ ॥

स्था ईश भास पिस कस इत्येतेभ्यो वरो भवति। स्थावरः। ईश्वरः। भास्वरः। पेस्वरः। कस्वरः ॥

यो यङः १५५ ॥

यातेर्यङन्ताद्वरो भवति। यायावरः। वरे अतः खंतस्य यखविधिं प्रति न स्थानिवद्भाव इति बलिव्योखमिति यखम्। यखे कृते अतः खस्य स्थानिवद्भावादिटि चात्खमिति आत्खं प्राप्तम्। वरे पूर्वादेशस्य न स्थानिवद्भाव इति न भवति। शीलादिप्रकरणे धात्कृस्तृजनिनभिभ्य इर्लिट् वक्तव्यः। धानशीलो दधिः। करणशीलः चक्रिः। सरणशीलः सस्रिः। जननशीलः जज्ञिः। नमनशीलः नेमिः। हल्मध्ये लिघतः इति एत्वचखे ॥

ग्रावस्तुवः क्विप् ॥ १५६ ॥

ग्रावपूर्वात् स्तौतेः क्विप् भवति शीलादिषु । ग्रावानं स्तौतीत्येवंशीलः ग्रावस्तुत् । शीलादिषु वा समविधिर्ग्रा-स्तौति सामान्यलक्षणः क्विप् न प्राप्नोति पुनर्विधीयते ॥

अन्येन्योऽपि ॥ १५७ ॥

अन्येभ्योऽपि धुभ्यः शीलादिषु क्विप् भवति । अपि ग्रहणं विकल्पार्थम् । अन्येभ्योपि धुभ्यः शीलादिष्वपि भवत्यशीलादिष्वपि तत्राभिधानवशात् । भ्राजभासधुर्वद्युतेर्जिपृजुभ्यः शीलादिषु क्विप् भवति । अन्येभ्योऽन्यत्र । विभ्रन्नजशीले विभ्राट् । विभ्राजौ । भाः । भासौ । धूर्वाणः शीलः । धूः धुरौ । विद्युत् । विद्युतौ । ऊर्क् ऊर्जौ । पूः । पुरौ । जूः । जुवौ । जुवः । क्विकपिवचिप्रच्छाय तितुकटप्रजुश्रीणां दीरजिश्चेति दीत्वम् । अन्येभ्यो शीलादिषु । पक् । यचौ । भित् । भिदौ । छित् । छिदौ । वाक् । प्रच्छेः प्राट् । आयतस्तूः । कटप्रूः ॥

भुवः रव्वन्तरे ॥ १५८ ॥

भवते क्विप् भवति रवावन्तरे च गम्यमाने । मित्रभूः । मित्रभुवौ । मित्रभुवः । अन्तरे । प्रतिभूः । प्रतिभुवौ । प्रतिभुवः । पूर्वेणैव सिद्धे नियमार्थमेतत् रवन्तरयोरेव भुवः शीलादिषु नान्यत्र । भविता । भावुकः ॥

विप्रसमोऽखौ डुः ॥ १५९ ॥

शीलादिष्विति निहतम् । सम्प्रतीत्यनुवर्तते एव । विप्रसंपूर्वाद्भोर्भुवो डुर्भवति अखौ । विभुः । प्रभुः । शम्भुः । अखाविति किम् । विभुर्नाम कश्चित् । डुप्रकरणे मितद्रु-प्रभृतीनामुपसंख्यानम् । मितं द्रवति मितद्रुः । शम्भुः ॥

दाम्नीशसयुयुजस्तुतुदसिसिचमिह पतदशनहः करणे त्रट् ॥ १६० ॥

दाप् लवन इत्येवमादिभ्यः करणे कारके त्रट् भवति । दान्ति तेन दात्रम् । नेत्रम् । शस्त्रम् । योत्रम् । योक्त्रम् । स्तोत्रम् । तोत्रम् । सेत्रम् । सेक्त्रम् । मेद्रम् । पत्रम् । दंष्ट्रा । अजादिषु पाठाद्रप् । नखौ । दंशेः कृत-नखस्यनिर्देशो ज्ञापकः क्वचिदन्यत्रापि नखम् । दशनः ।

धात्रपोत्रे ॥ १६१ ॥

धात्रपोत्रइत्येते शब्दरूपे निपात्येते । धेटः कर्म्मणि त्रट् निपात्यते । धयंति तामिति धात्री । पोत्रमिति पुनातेः पवतेर्वा करणे त्रट् निपात्यते । हलस्य सूकरस्य वा मुखं चेद्भवति हलस्य पोत्रम् । सूकरस्य पोत्रम् ।

लूधूसूखनर्तिसहचर इत्रः ॥ १६२ ॥

करण इति वर्तते । ल्वादिभ्यो धुभ्यः करणे इत्रो भवति । लुनाति तेन लवित्रम् । धुवति तेन धवित्रम् । सुवति तेन सवित्रम् । खनित्रम् । अरित्रम् । सहित्रम् । चरित्रम् ।

पुवः खौ ॥ १६३ ॥

करण इति वर्तते । पवतेः पुनातेर्वा करणे इत्रो भवति खुविषये । पूयतेऽनेन पवित्रम् । पवित्रा नाम नदी ।

कर्तरि चर्षिदेवतयोः ॥ १६४ ॥

पुव इत्रो भवति कर्तरि करणे च कारके । ऋषि-देवतयोरभिधेययोर्भिन्नयोगनिर्दिष्टत्वाद्यथासंख्यं न भवति

पूयतेऽनेन पुनाति वा पवित्रो ऽयमृषिः । देवतायां पवित्रोऽर्हन् स मा पुनातु ।

क्तीतः क्तः १ १६५ ॥

संप्रतीति वर्तते क्रिञ्शब्देतो धोः संप्रति क्तो भवति। क्रिमिदा मिन्नः । क्रिधुषा । धृष्टः । क्रिक्ष्विदा । क्ष्विण्णः ।

मतिबुद्धिपूजार्थाच्च ॥ १३६ ॥

मतिरनुमतिः । बुद्धिर्ज्ञानम् । पूजा अर्चा । मत्यर्थेभ्यः पूजार्थेभ्यश्च धुभ्यः संप्रति क्तो भवति । राज्ञां मतः । राज्ञामिष्टः । राज्ञां बुद्धः । राज्ञां ज्ञातः । राज्ञां पूजितः । राज्ञामर्चितः । क्तयोगे कर्तरि ता प्राप्ता नद्रितेत्यादिना प्रतिषिद्धा भवतीत्यनेन पुनर्विधीयते। चकारोऽनुक्तसमुच्चयार्थः ।

शीलितो रक्षितः क्षांतः आक्रुष्टो जुष्ट इत्यपि ।
रूष्टश्च रूषितश्चोभौ अभिव्याहृत इत्यपि ॥
हृष्टतुष्टौ तथा कान्तः दयितोन्यः संयतोद्यतौ ।
कष्टभविष्यतीत्याहुरमृताः पूर्वकस्मृताः ॥

अमृतशब्दः संप्रति बबहुत्वनिर्देशात् । सुप्तः शयितः स्थितः आसित इत्येवमादयोऽपि संप्रति वेदितव्याः ।

उणादयो बहुलम् ॥ १६७ ॥

पूवः स्वावित्यतो मण्डूकप्लुत्या स्वाविति वर्तते उण् इत्येवमादयस्त्याः संप्रति ध्वर्थे बहुलं भवन्ति । खुविषय क्वचित्यसंज्ञा भवति । कृवापाजिमिस्वदिसाध्यशूभ्य उण् । कारुः । वायुः । पायुः । जायुः । मायुः । स्वादुः । साधुः । आशुः क्वचित्यसंज्ञा न भवति । कृधूभ्य-

क्सरः । कुसरः । धूसरः त्यसंज्ञाविरहात्यादेशयोरिति षत्वं न भवति । इह च शंखः शंठः इति इरा न भवति । क्वचिदुभयथा । नृदवदिहनिकमिकासिभ्यः सः । वसम् । तर्सम् । एषम्प्रति त्यसंज्ञा षत्वं प्रति नास्ति । इह च षण्ड इति प्रकृतिकार्यं ध्वादिसत्वं न भवति । उक्तं च ।

क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव ।

विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥ १ ॥

तथा अनुक्ताभ्योपि प्रकृतिभ्यस्त्या भवन्ति । अण्डः जृकृसृभृडः जरण्डः । करण्डः । सरण्डः । वरण्डः । आडिईतेरपीष्यते एरण्डः । अनुक्ता अपि त्या भवन्ति झफिडः ऋफण्डः इत्येवमादिषु । तथा संप्रतिकाले उणादयो विहिताः क्वचिद्भूतेऽपि दृश्यन्ते कर्षतेऽसौ कर्षिः । ततेऽसौ तन्तिः । भस्मितं भस्म । चरितं चर्म्म । वृत्तं तदिति वर्त्म । तदुक्तं बाहुलकं प्रकृतेस्तनुदृष्टेः प्रायसमुच्चयनादपि तेषां कार्यसशेषविधश्च तदुक्तं नैगमरूढभवं हि सुसाधु जात्यपेक्षयैकत्वं तनुदृष्टेरिति प्यखेकर्म्मणि का तनुदृष्टिं वीक्ष्य तनुदृष्टेः प्रकृतेस्तनोर्गुणस्य दर्शनादित्यर्थः । तद्बाहुलकमुक्तम् । एवं हि नैगमाः गौरित्येवमादयः रूढिभवाः पलाश इत्येवमादयः शब्दा सुसाधवो भवन्ति ।

इत्यभयनन्दिविरचितायां जैनेन्द्रमहावृत्तौ द्वितीयस्याध्यायस्य द्वितीयः पादः समाप्तः ॥ * ॥

ॐनमः ॥

गम्यादिर्वर्त्स्यति ॥ १ ॥

उणादयो अन्यत्र च ये साधिता गम्यादयः शब्दास्ते च वर्त्स्यति काले साधवो भवन्ति वर्त्स्यतीत्यनागतस्य कालस्य सामान्येन ग्रहणं संप्रत्ययादिकाले तेषां साधुत्वव्यवच्छेदार्थ आरम्भः । गमिष्यति गमी ग्रामम् । आगमिष्यति आगमी नगरम् । आधमर्ण्ये चेन इति कर्म्मणि तायाः प्रतिषेधात् कर्म्मण्यावीति इवेव भवति । एवं भविष्यति भावी । प्रस्थास्यते प्रस्थायी । प्रतिभोत्स्यते प्रतिबोधी । प्रतियोज्यते प्रतियोगो । प्रयास्यति प्रयायी । गमेरिन्निति इन् । स एव आङि णिदिति णिन् । भुवश्चेति भवतेरपि णिन् । अन्येभ्यः सुपि शीले जातौ णिनिति णिन् । कथं स्वागमो ग्रामं अनद्यतने लुडिति लुङ्प्राप्तेः तदसद्यतो वर्त्स्यतीत्यनेन सामान्यशब्देनानद्यतनविशेषाप्यगृहीतो यथा गौरित्यनेन खण्डमुण्डोपि अतो वर्त्स्यतीत्यविशेषणवृत्तावप्यर्थकरणादेर्विशेषप्रतिपत्तिः । अथवा अनद्यतने लुडित्यत्र गम्यादिर्वर्त्स्यतीत्येतदनुवर्तिष्यते तेनानद्यतनविषयेपि गम्यादयः सिद्धा भवन्ति असमाद्वा अनद्यतने भवन्ति । लुङ्लृटावपि भवतो गमिष्यति गन्तेति ॥

पुरायावतोर्लट् ॥ २ ॥

पुरा च यावच्च पुरायावतौ तयोः पुरायावच्छब्दयोर्योगेवर्त्स्यतिधोर्लट भवति । पुरा भुङ्क्ते । यावदधीते । भविष्यदनद्यतने लृटोऽयमपवादो लट् । लङपि लृडपवादः तत्रापवादयोः स्पर्द्धे परत्वाल्लुट् प्राप्तः पूर्वनिर्णयेन लट्

भवति । श्वः पुरा ऽधीते । श्वो यावदधीते । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं न तु लाक्षणिकस्येत्यभिधानात् । तेनेह न भवति । यावद्दास्यति तावद्भोक्ष्यते महत्या पुरो जेष्यति ॥

वा कदाकर्ह्योः ॥ ३ ॥

कदा कर्हि इत्येतयोर्वा चोर्वर्त्स्यतिधोर्वा लट् भवति । कदा भुङ्क्ते । कदा भोक्ष्यते । कदा भोक्ता । कर्हि भोक्ष्यते । कर्हि भोक्ता ॥

किंवृत्ते लिप्सायाम् ॥ ४ ॥

किमो वर्तनं किंवृत्तं तस्मिन् वाचि लिप्सायां गम्यमानायां वर्त्स्यति वा लट् भवति । लुटि लृटि च प्राप्ते अयमारम्भः । लब्धुमिच्छा लिप्सा प्रार्थनाभिलाषः । को भवद्भ्यो भिक्षां ददाति । को भवद्भ्यो भिक्षां दास्यति । को भवद्भ्यो भिक्षां दाता । इह कस्मान्न भवति । कदा भोजयिष्यसि भोजयितासि वा । किमो हि विभक्त्यन्तस्य डतरडतमान्तस्य च वर्तनं किंवृत्तमिति वैयाकरणानामभिप्रायः । तच्चेह नास्ति ततोत्र लटोभावात् लङ्लुटावेव भवतः । लिप्सायामिति किम् । कः पाटलिपुत्रं यास्यति ।

लिप्स्यसिद्धौ ॥ ५ ॥

वर्त्स्यतीत्यनुवर्तते लिप्सति हि लिप्स्यो दाता ओदनादिश्च तत्र दातरि तासो लिप्स्यस्य सिद्धिः लिप्स्य सिद्धिःयाचकेन हि यो लिप्स्यते दाता तस्य सिद्धौ स्वर्गादिफलप्राप्तौ ओदनादौ तु भासः । याचकेन हि यो लिप्स्यते ओदनादिना करणभूतेन सिद्धिः दातुः स्वर्गादिफलप्राप्तिः तस्यां गम्यमानायां वर्त्स्यति वा

लट् भवति । यो भवद्भ्यो भिक्षां ददाति दाता वा स स्वर्गलोकं गच्छति गमिष्यति गन्ता वा । दानाद्दातुस्स्वर्गसिद्धिं ब्रुवाणो दातारमेवमुत्साहयति । ननु चात्र उभयत्रापि लिप्सायां गम्यमानत्वात् किंवृत्ते लिप्सायामित्येव लट्विकल्पसिद्धेर्व्यर्थोऽयमारम्भः । न व्यर्थः किंवृत्तार्थत्वादेतदारम्भस्य । पूर्वेण हि किंवृत्ते वाचि लट्विकल्पो विहितः ।

लोडर्थलक्षणे ॥ ६ ॥

वत्स्यतीति वेति च वर्तते । लोडर्थः प्रैषादिः स लक्ष्यते अनेन लोडर्थलक्षणं तस्मिन् लोडर्थलक्षणे ध्वर्थे वर्तमानात् धोर्वत्स्यति वा लट् भवति उपाध्यायश्चेदागमिष्यति । उपाध्यायश्चेदागन्ता । अथ त्वं तर्कमधीष्व अथ गणितमधीष्व। अत्रोपाध्यायागमनेन प्रैषो लक्ष्यते ।

लिङ् चोर्द्ध्वमौहूर्तिके ॥ ७ ॥

वेति वर्तते । लोडर्थलक्षण इति । ऊर्द्ध्वं मुहूर्ताद्भव काल ऊर्द्ध्वमौहूर्तिकः निपातनात्सविधिरुत्तरपदस्यैप् ऊर्द्ध्वमौहूर्तिके वत्स्यति काले लोडर्थलक्षणे वर्तमानाद्धोर्लिङ् भवति लट् वा । ऊर्द्ध्वं मुहूर्तादुपाध्यायश्चेदागच्छेत् उपाध्यायश्चेदागच्छति उपाध्यायश्चेदागमिष्यति उपाध्यायश्चेदागन्ता अथ त्वं तर्कमधीष्व अथ त्वं गणितमधीष्व ।

वुरातुमौ क्रियायां तदर्थायाम् ॥ ८ ॥

वत्स्यतीत्येव वर्तते । यस्माद्धोः त्र्योत्पत्तिः प्रार्थ्यते तद्वाच्यक्रिया तच्छब्देनाभिप्रेता सा क्रिया अर्थः

प्रयोजनं यस्या व्रजनादिक्रियायाः सा तदर्था तस्यां वाचि वर्त्स्यति काले वुरातुमौ भवतः। कारको व्रजति। कर्तुं व्रजति। भोजको व्रजति। भोक्तुं व्रजति। क्रियायामिति किम्। भिक्षिष्ये इत्यस्य जटाः। अध्येष्ये इत्यस्य कमण्डलुः। द्रव्यमत्र तदर्थम्। तदर्थायामिति किम्। धावतस्ते पतिष्यति दण्डः। नात्र धावनं दण्डपतनार्थम्। ननु सामान्यविहितेन एवुना सिद्धं किमर्थं वुण्विधीयते ञिकृते भान्तो भवतीति भिन्नविषयत्वात्तुमपि न बाधकः क्रियायां तदर्थायां वाचि तृड् वक्ष्यते स बाधकः स्यात् वासमविधिना ण्वुर्भविष्यतीति चेत् एवं तर्हि नियमार्थं वुण्वचनं वर्त्स्यति क्रियायां तदर्थायां वाचि वुणेव यथा स्यात् तृजादयो मा भूवन् इति कर्ता व्रजति विकिरो व्रजति इत्येवमादि न भवति ॥

भाववाचिनः ॥ ९ ॥

भाववाचिनो घञादयः ते वर्त्स्यति काले क्रियायां तदर्थायां वाचि भवन्ति। यद्यपि सामान्येन विहिता घञादयस्तथापि वुराग्रहणं ज्ञापकमुक्तं सामान्यविहितास्त्याः वर्त्स्यति काले क्रियायां तदर्थायां न भवन्तीति तुमा च बाध्येरन्। तेनायं यत्नः। पाकाय व्रजति। मतये व्रजति। पुष्टये व्रजति। तुमर्थाद् भाव इत्यप्। भाव इति किम्। षणे न। वाचि ग्रहणं किमर्थम्। यकाभ्यः प्रकृतिभ्यो येन विशेषणेन त्या विहितास्ताभ्यः प्रकृतिभ्यो तेन विशेषणेन क्रियायां तदर्थायां वाचि यथा स्युरित्येवमर्थम् ॥

कर्म्मणि चाण् ॥ १० ॥

कर्म्मणि वाचि तदर्थायां च क्रियायामण् भवति । पूर्वेण वुएप्राप्तः । वाऽसमविधिश्च नास्तीत्युक्तम् एन् स्यात् तेनायमारम्भः । कुम्भकारो व्रजति । काण्डलावो व्रजति । वाचि ग्रहणानुवृत्तेः यथाविहितमण् भवति इति कर्म्मण्येव वाचि भविष्यति । कर्म्मग्रहणं किमर्थम् अपवादविषयेऽपि यथा स्यादित्येवमर्थः । गोदायो व्रजति । तुषपायी व्रजति । क्रियायां तदर्थायामनुवर्तते । चकारः किमर्थः केवले कर्म्मणि केवलायां च क्रियायां वाचि मा भूत् । प्रत्येकमीषा निर्देशात् वाक्सः ।

लृट् ॥ ११ ॥

लृट् भवति क्रियायां तदर्थायां वाचि । करिष्यामीति व्रजति । उदाहरणे इति शब्दः हेतुहेतुमद्भावद्योतनार्थः ।

शेषे ॥ १२ ॥

उक्तादन्यः शेषः शुद्धं वर्त्स्यत् कालमात्रं शेषे वर्त्स्यति लृट् भवति । करिष्यति । हरिष्यति ॥

विभाषा लृटः सत् ॥ १३ ॥

वर्त्स्यति लृट् तस्य स्थाने सत्संज्ञौ शतृशानौ विभाषया भवतः। पक्ष्यन्तं पश्य । पक्ष्यमानं पश्य । पक्ष्यता कृतम् हेपक्ष्यन् । हे पक्ष्यमाण । अर्जयिष्यति वसति । अध्येष्यमाण आस्ते । देवदतः पश्यति पक्ष्यति वा पक्ष्यमाणः पक्ष्यते वा । व्यवस्थितविभाषेयम् । तेन इवादिभिर्यौंगे सम्बोधने लक्षणहेतोः क्रियायां वर्त्यत्र नित्यो विधिः। वातैकार्थत्वे विकल्पः । इतिशब्दयोगे तु न भवति ।

करिष्यामीति व्रजति । हरिष्यामीति व्रजति । लट्ग्रहणं किम् । त्यान्तरत्वं मा विज्ञायि ।

अनद्यतने लुट् ॥ १४ ॥

वर्त्स्यतीति वर्तते । वर्त्स्यत्यनद्यतने ध्वर्थे वर्तमानाद्धोर्लुट् भवति । श्वः कर्ता । श्वोऽध्येता । अनद्यतन इति वर्तमानिर्देशाद्य श्वो भौक्ष्यामहे इत्यत्र न भवति । विभाषानुवर्तनात् परिदेवने लृटविषयेपि लुट भवति । इयन्तु कदा गन्ता एवं निदधती पादौ । अयं तु कदाध्येता एवमनभियुक्तः ॥

पदरुजविशस्पृशो घञ् ॥ १५ ॥

पद रुज विश स्पृश इत्येतेभ्यो घञ् भवति । पद्यतेऽसौ पादः । एवुतृचोरयमपवादो न पचाद्यचः सुम्मिङंतं पदमिति पदनिर्देशात् । रुजत्यसौ रोगः । विशत्यसौ वेशः । इगुङ्लक्षणस्यापवादः । स्पृश उपतापेऽभिधानम् । स्पृशतीति स्पर्शो रोगः । उपतापादत्यत्र स्प्रष्टा स्पर्शकः ॥

सृ स्थिरे ॥ १६ ॥

सरतेः स्थिरे कर्तरि घञ् भवति । कालान्तरं सरतीति सारः । मधुकसारः । विभाषानुवर्तनात् स्थिरव्याधिमत्स्यबलेष्वभिधानम् । अतिसारो व्याधिः । विसारो मत्स्यः । सारो बलम् । एतेष्विति किम् । सर्ता । सारकः ॥

भावे ॥ १७ ॥

भावे धोर्घञ् भवति । भाव इति क्रियासामान्यं ध्वर्थः तद्यद्यपि पूर्वापरिभूतमपरिनिष्पन्नमलिङ्गसंख्यं प्रकृत्यैवोच्यते तथापि यस्तत्रास्सिडताधर्म्मः स लिङ्गसंख्यावानिति तत्र घञादयः । पाकः । त्यागः । रागः ॥

अकर्तरि ॥ १८ ॥

कर्तुरन्यस्मिन् कारके घञ् भवति । नज्युक्तमिव युक्तं वा यत्कार्यं संप्रतीयते तुल्याधिकरणे ऽन्यस्मिन् लोके ऽप्यर्थगतिस्तथा प्रास्यन्ति तं प्रासः । प्रसीव्यंति तं प्रसेवः । आहरन्ति तस्मादाहारः । संज्ञायामसंज्ञायामपि दृश्यते । को भवता दायो दत्तः । कों भवता लाभो लाब्धः । कर्तव्यः कटः । कृतः कटः इत्येवमादिषु अनभिधानात् भवति ।

परिमाणाख्यायां सर्वेभ्यः ॥ १९ ॥

आख्याग्रहणात्परिमाणमिह संख्यादिके गृह्यते । परिमाणस्याख्यायां गम्यमानायां सर्वेभ्यो घञ् भवति । एकस्तण्डुलनिचायः । एकस्तण्डुलावचायः । द्वौ केदार लावौ । वीजकारौ स्तृग्रहवृद्दृगमोर्जिति अचि प्राप्ते इदम् । परिमाणाख्यायामिति किम् । निश्चयः । सर्वग्रहणं बाधकबाधनार्थम् । एकस्तृणविघासः । अन्यथा पुरस्तादपवादो ऽयमिति अनन्तरमेवाचं बाध्येत न व्यवहितं नौ णश्चेति णम् । घञि घस्लृभावः सिडः । इहाकर्तरीत्येवाभिसंबध्यते । स्त्रीलिङ्गे भावे घञ् भवेत् । एका तिलोच्छ्रितिः । द्वे श्रुती । सर्वग्रहणं बाधकबाधनार्थमुक्तंक्तरबाध्येत ॥

इङः ॥ २० ॥

इत उत्तरं भावे अकर्तरीति च वर्तते । इङश्च धोर्घञ् भवति । अधीयते इत्यध्यायः । उपेत्याधीयतेऽस्मादित्युपाध्यायः । अपादाने यो घञ् तदन्ताड्डा ङीर्वक्तव्यः । उपाध्यायी । उपाध्याया । दृङकुमारीवरवाक्यन्यायेनास्मिन्विषये क्तिमपि घञ् बाधते । श्रृणातेर्वायुवर्णयोर्घञ् वक्तव्यः । शारो वायुः । शारो वर्णः ॥

गौ रुवः ॥ २१ ॥

गिसंज्ञे वाचि रौतेर्घञ् भवति । विरावः । संरावः । अचोऽपवादोऽयम् । गाविति किम् । रवः ॥

समि युद्रुदुवः ॥ २२ ॥

संपूर्वेभ्यः युद्रु दु इत्येतेभ्यो घञ् भवति । संयावः । संद्रावः । संदावः । समीति किम् । यवः ॥

यज्ञे स्तुवः ॥ २३ ॥

समीति वर्तते । सम्पूर्वात् स्तौतेर्घञ् भवति यज्ञविषये । समेत्य स्तुवन्ति अस्मिन्निति संस्तावः छन्दोगानम् । यज्ञ इति किम् । सतां संस्तवः ॥

श्रिणीभुवोऽगौ ॥ २४ ॥

अगिपूर्वेभ्यः श्रि णी भू इत्येतेभ्यः घञ् भवति । श्रायः । नायः । भावः । अगाविति किम् । प्रश्रयः । प्रणयः । प्रभवः । कथं प्रभावो धर्मस्य । प्रकृष्टो भावः प्रभावः इति प्रादिसः । कथं षाड्गुण्यस्य यथावत्प्रयोगो यथावत्प्रयोगोनयः पुंस्त्वौघः । प्रायेणेति करणे घो द्रष्टव्यः ॥

नियोऽवोदोः ॥ २५ ॥

अव उद् इत्येतयोर्वाचोर्नयतेर्घञ् भवति । अवनायः । उन्नायः । कथमुन्नयः । शब्दानां पूर्ववत्करणे घो विधेयः ॥

निरभ्योः पूल्वोः ॥ २३ ॥

निस् अभि इत्येवंपूर्वाभ्यां पू लू इत्येताभ्यां यथासंख्यं घञ् भवति । पू इति सामान्येन ग्रहणम् । निष्पावः । अभिलावः । निरभ्योरिति किम् । पवः । लवः ॥

उन्न्योर्ग्रः ॥ २७ ॥

उद नि इत्येवंपूर्वात् गृ इत्येतस्मात् घञ् भवति । गृइति सामान्येन ग्रहणम् । उद्गारः । निगारः ॥

कॄ धान्ये ॥ २८ ॥

उन्योरिति वर्त्तते । कॄ इत्येतस्माद्धीः उद्निपूर्वात् घञ् भवति धान्यविषये । उत्कारो धान्यस्य । निकारो धान्यस्य । धान्य इति किम् । पुष्पोत्करः । पुष्पनिकरः ॥

प्रे द्रुस्तुस्रुवः ॥ २९ ॥

प्रशब्दे वाचि द्रु स्तु स्रु इत्येतेभ्यो घञ् भवति । प्रद्रावः । प्रस्तावः । प्रस्रावः । प्र इति किम् । द्रवः ॥

स्तोऽयज्ञे ॥ ३० ॥

प्र इति वर्तते । प्रपूर्वात् स्तृइत्येतस्मात् घञ् भवति अयज्ञविषये । शंखप्रस्तारः । मणिप्रस्तारः । ऋकारान्तत्वादभिप्राप्ते इदम् । अयज्ञ इति किम् । बर्हिष्प्रस्तरः । इट्द्रवेत्यप्युम्मुहुस इति सम्बध्यते ॥

प्रथने वावशब्दे ॥ ३१ ॥

प्रथनं विस्तीर्णता विपूर्वात्स्तृ इत्येतस्मात् घञ् भवति अशब्दविषये प्रथने। पटस्य विस्तारः । गृहस्य विस्तारः । प्रथन इति किम् । तृणविस्तरः । अशब्द इति किम् । वाक्यविस्तरः ॥

च्छन्दः खौ ॥ ३२ ॥

छन्दः पद्ये वर्णविन्यासः । छन्दःसंज्ञायां च विपूर्वात् स्तृणातेः घञ् भवति । विस्तारः पंक्तिछन्दः । विस्तारः बृहतिछन्दः । षत्वप्रकरणे विस्तार इति निपातनादेव सिद्धे छन्दःसंज्ञाज्ञापनार्थमिदम् ॥

क्षुश्रुवः ॥ ३३ ॥

वाविति वर्तते । क्षु श्रु इत्येताभ्यां विपूर्वाभ्याँ घञ् भवति। विक्षावः। विश्रावः। वावित्येव । क्षवः । श्रवः ।

उदि ग्रहः ॥ ३४ ॥

उत्पूर्वाद् ग्रहेर्घञ् भवति । उद्ग्राहः । अचोऽप वादोऽयम् ॥

समि मुष्टौ ॥ ३५ ॥

संपूर्वाद् ग्रहेर्घञ् भवति मुष्टिविषये । शाकमुष्ट्यादौ परिमाणवचनेः मुष्टिशब्दः । तत्र परिमाणाख्यायामित्येव सिद्धं ततोन्यदुदाहरणम् । अहो मल्लस्य संग्राहः । अहो मौष्टिकस्य संग्राहः । मुष्टेर्दार्ढ्यमित्यर्थः । मुष्टाविति किम् । संग्रहः शास्त्रस्य ॥

न्यायपरिणायपर्य्यायः ॥ ३३ ॥

न्यायादयः शब्दाः निपात्यन्ते । निपूर्वादिणः अभ्रेषे घञ् निपात्यते । अभ्रेषो युक्तकरणमकुत्सा वा । एषोऽत्र न्यायः । अभ्रेष इति किम् । न्ययं गतश्चौरः । परिपूर्वात् नयतेर्द्यूतविषये घञ् निपात्यते । परिणायेनसारान् हन्ति । द्यूतविषयादन्यत्र परिणयः । परिपूर्वादिणः अनुपात्यये गम्यमाने घञ् निपात्यते । अनुपात्ययः क्रमप्राप्तस्यानतिवृत्तिः । तव पर्यायो भोक्तुम् । अनुपात्यय इति किम् । स्वाध्यायकालस्य पर्य्ययः । अतिक्रम इत्यर्थः ॥

व्युपे शीङोन्त्ये ॥ ३७ ॥

अन्त इति पूर्वसूत्रे विन्यासापेक्षया पर्यायो ऽभिप्रेतः वि उप इत्येतयोर्वाचोः शीङः घञ् भवति पर्याये गम्ये । तवविशायो मम विशायः । तव राजोपशायः । राजानमुपशाययितुमवसर इत्यर्थः । अन्त इति किम् । विशयः । उपशयः ॥

हस्तादाने चेरस्तेये ॥ ३८ ॥

हस्तादाने गम्यमाने चिनोतेर्घञ् भवति न चेत्स्तेय भवति । पुष्पप्रचायः । फलप्रचायः । हस्तादानशब्देन निकटस्य गुञ्छादेर्ग्रहणं लक्ष्यते । हस्तादान इति किम् । पुष्पप्रचयः । अस्तेय इति किम् । पुष्पप्रचयं करोति चौर्येण ॥

निवासचितिशरीरोपसमाधाने चः कः ॥ ३९ ॥

चेरिति वर्तते । निवास चिति शरीर उपसमाधान इत्येतेष्वर्थेषु चिनोतेर्घञ् भवति चकारस्य च ककारः । निवासे । साधुनिकायः । उत्कृष्टनिकायः । अधिकरणे घञ् । चीयतेऽसौ चितिः । यज्ञे अग्निविशेषः । अकायमग्निं चिन्वीत । शरीरे । चीयते इति कायः । उपसमाधानमुपर्य्युपरि राशीकरणम् । महान् गोमयनिकायः । उपर्य्युपरीति विशेषणादिह न भवति । महान् काष्ठनिचयः । एतेष्विति किम् । चेयः ॥

सङ्घेऽनूर्द्धे ॥ ४० ॥

संघः प्राणिविशेषसमुदायः । अनूर्द्ध्वे संघे वाच्ये चिनोतेर्घञ् भवति चकारस्य च कत्वम् । निचीयते इति निकायः । पण्डितनिकायः । प्राणिविशेषस्य ग्रहणादिह न भवति । काष्टचयः । पदसमुच्चयः । विशेषग्रहणं किम् । प्राणिसमुच्चयः । सामान्येन समुदायोऽयम् । अनूर्द्ध्वे इति किम् । उपर्य्युपरि सूकरनिचयः ।

आक्रोशे वन्योर्ग्रहः ॥ ४१ ॥

आक्रोशः शपनम् । अव नि इत्येतयोर्वाचोर्ग्रहेर्घञ् भवति आक्रोशे गम्ये । अवग्राहो ह ते वृषल भूयात् । निग्राहो ह ते वृषल भूयात् । आक्रोश इति किम् । अवग्रहः पदस्य । निग्रहो दुष्टस्य ॥

प्रे लिप्सायाम् ॥ ४२ ॥

प्रशब्दे वाचि लिप्सायां गम्यमानायां ग्रहेर्घञ् भवति । प्रग्राहेण चरति भिक्षुः । पात्रं प्रगृह्य अन्नं लिप्सु-

भ्रमतीत्यर्थः । लिप्सायामिति किम् । प्रग्रहो देवदत्तस्य राज्ञा ॥

परौ यज्ञे ॥ ४३ ॥

परिपूर्वाद्ग्रहेर्घञ् भवति यज्ञविषये । उत्तरः परिग्राहः । यज्ञ इति किम् । परिग्रहो देवदत्तस्य ।

नौ वृधान्ये ॥ ४४ ॥

निशब्दे वाचि वृ इत्येतस्मात् घञ् भवति धान्यविशेषे वाच्ये । वृ इति वृङ्वृञोर्ग्रहणम् । नीवारा नाम व्रीहयो भवन्ति । धान्य इति किम् । निवृत इति निवरा कन्या ॥

उदि प्लुद्रुस्रोतिश्रिञः ॥ ४५ ॥

उत्पूर्वेभ्यः प्लु द्रु स्रो इति श्रिञ् इत्येतेभ्यः घञ् भवति । उत्प्लावः । उद्द्रावः । उच्छ्रायः ॥

वाङि रूप्लुवोः ॥ ४६ ॥

आङ्पूर्वाभ्यां रु प्लु इत्येताभ्यां वा घञ् भवति । आराङः । आरवः । गौरुव इति नित्यं घञ् प्राप्तः । आप्लावः । आप्लवः ॥

ग्रहो ऽवे वर्षप्रतिबन्धे ॥ ४७ ॥

वेति वर्त्तते । अवशब्दे वाचि ग्रहेर्वा घञ् भवति वर्षप्रतिबन्धे वाच्ये । अवग्राहो देवस्य । अवग्रहो देवस्य । वर्षप्रतिबन्ध इति किम् । अवग्रहः पदस्य ॥

प्रे वणिजाम् ॥ ४८ ॥

वेति वर्तते । प्रशब्दे वाचि ग्रहेर्वा घञ् भवति समुदायेनाभिधेयं वणिजां सम्बन्धि चेद्भवति । तुला-

प्रग्राहेण चरति । तुलाप्रग्रहेण चरति । तुलासूत्र गृहीत्वा वणिक् चेष्टते इत्यर्थः । वणिजामिति किम् । प्रग्रहो देवदत्तस्य ॥

रश्मौ ॥ ४९ ॥

प्र इति वेति च वर्तते । इह रश्मिशब्देन अश्वादिसंयमनरज्जुरेव गृह्यते । प्रशब्दे वाचि ग्रहेर्वा घञ् भवति समुदायेन रश्मावभिधेयायाम् । प्रगृह्यते इति प्रग्राहः ॥

आच्छादने वृञः ॥ ५० ॥

वेति वर्तते प्र इति च । प्रपूर्वाद्वृणोतेर्वा घञ् भवति आच्छादनविशेषे वाच्ये । प्रवृणोति तं प्रावारः । प्रवरः । आच्छादन इति किम् प्रवरः ॥

परौ भुवोऽवज्ञाने ॥ ५१ ॥

वेति वर्तते । अवज्ञानमवक्षेपः । परिपूर्वाद्भू इत्येतस्माद्वा घञ् भवति अवज्ञाने वाच्ये। परिभावः । परिभवः । अवज्ञान इति किम् । सर्वतो भवः परिभवः ॥

ग्वृग्रहवृद्रुगमोऽच् ॥ ५२ ॥

भावे अकर्तरीत्येवानुवर्तते । इवर्णान्तात् उवर्णान्तात् ऋवर्णान्तात् ग्रह वृ द्रु गमि इत्येतेभ्यः वाजित्ययंत्यो भवति । घञोऽपवादोऽयम् । चयः । जयः । यवः । रवः । लवः । करः । गरः । शरः । ग्रहः । वरः । आदरः । गमः । चकारः व्यञोघञचोरित्यत्र विशेषणार्थः । अजिवधौ भयादीनामुपसंख्यानं नपुंसके क्तादिनिवृत्त्यर्थम् । भयम् । वर्षम् । रणविशिभ्यामजवक्तव्यः । रणः । वशः । घञर्थे कविधानं स्थास्नापाठयधिहनियुध्यर्थं कर्तव्यम् । प्रतिष्ठतेऽस्मिन् प्रस्थः । प्रस्नात्यस्मिन् प्रस्नः । प्रपिबन्त्यस्यां प्रपा । आविध्यन्त्यनेन आविधम् ।

हन्यते तेनास्मिन्वा विघनः । आयुध्यन्त्यनेनेति आयुधम् ॥

गावदः ॥ ५३ ॥

गिपूर्वाद् अदेरच् भवति । प्रादनं प्रघसः । विघसः । संघसः । घसॢलुङ्घञ्सनक्ष्विति अदेर्घस्लादेशः । गाविति किम् । घासः । अस्मिन् प्रकरणे यत्रेपा गिर्निर्दिश्यते तत्र गिलक्षणः प्रादिलक्षणो वा सविधिः ॥

नौ णश्च ॥ ५४ ॥

निपूर्वाददेर्णौ भवति अच् च । न्यादः । निघसः ॥

पणः परिमाणे ॥ ५५ ॥

पणेर्घञि णे वा नास्ति विशेषः इत्यारंभसामर्थ्यादच एवानुवृत्तिः । पणः परिमाणे गम्यमाने अज् भवति । पण्यत इति पणः मूलकपणः । शाकपणः ।

पशुष्वजः समुदोः ॥ ५६ ॥

समुदौ इत्येतयोर्वाचोरजेर्ङीरज् भवति पशुविषये । समजः पशूनां समुदाय इत्यर्थः । उदजः । पशुनामुच्चालनमित्यर्थः । पशुष्विति किम् । समाजः साधूनाम् । उदाजः शकुनीनाम् । ष्वितिते । निट् कुत्वं विधेयते अजेस्तु वीभावेन भवितव्यमिति असत्वादविशेषणां नास्तीति कुत्वं न भवति ।

ग्लहोऽक्षे ॥ ५७ ॥

ग्लह ग्रहणे इत्यस्मादज् भवति अक्षविषये । अक्षेषु ग्लहः । अक्ष इति किम् । ग्लाहः ।

प्रजने सुः ॥ ५८ ॥

प्रजनो गर्भाधानम् । प्रजनविषये सु इत्येतस्मादज् भवति गवामुपसरः । गर्भाधानाय स्त्रीगवीषु वृषाणामुपसरण-

मित्यर्थः । एवं पशूनामुपसरः । प्रजन इति किम् । उपसारो भृत्यै राज्ञाम् ।

ह्वो जिश्च न्यभ्युपविषु ॥ ५८ ॥

नि अभि उप वि इत्येतेषु वाक्षु ह्वयतेर्जिर्भवत्यच्च । निह्वः । अभिह्वः । उपह्वः । विह्वः । हुराद्देशो वक्तव्य इति चेत् इह निजोह्वः इति युङ्वनस्य स चरूय प्रसज्येत । एतेष्विति किम् । सह्वाय ॥

आङ्याजौ ॥ ६७ ॥

आजिः सग्रामः । आङ्पूर्वात् ह्वयते आजावभिधेयायां जिर्भवत्यच्च । आह्वयन्तेऽस्मिन्निति आह्वः । आजाविति किम् । आह्वायः ॥

निपानमाहावः ॥ ६१ ॥

निपिबन्त्यस्मिन्निति निपानं जलस्थानम् । आहावः इति निपात्यते निपातनाच्चुत्वम् । आङ्पूर्वस्य ह्वयतेरधिकरणे घञ् निपात्यते । आह्वयन्तेऽस्मिन्निति आहावः शकुनीनाम् निपानमिति किम् । आह्वः ।

भावेऽगौ ॥ ६२ ॥

अगिपूर्वस्य ह्वयतेर्भावे जिर्भवत्यच्च । ह्वानं ह्वः । अगाविति किम् । आह्वायो वर्तते । कर्तरीत्यस्यानुपवेशो मा भूदिति पुनर्भावग्रहणम् ।

हनश्च वधः ॥ ६३ ॥

हन्तेरगिपूर्वस्य भावे वधादेशो भवत्यच्च । हनन वधः । चकारो घञ्समुच्चयार्थः । घातो वर्तते ।

व्यधमदजपोऽगौ ॥ ६४ ॥

अगाविति वर्तमाने पुनरगिग्रहण भावनिवृत्यर्थं । तेन भावे अकर्तरीति द्वय संबध्यते । अगिपूर्वेभ्यः ठयध मद जप, इत्येतेभ्यः अज् भवति । ठयधः । मदः । जपः । अगाविति किम् । प्रठयाधः । उन्मादः । उपजापः ।

स्वनहसोर्वा ॥ ६५ ॥

अगाविति वर्तते । अगिपूर्वाभ्यां स्वन हस इत्येताभ्यामज् भवति वा । स्वनः । स्वानः । हासः । हसः । अगावित्येव । प्रस्वानः । प्रहासः ।

यमः सन्निव्युपे च ॥ ६६ ॥

यमेर्धोः सम् नि वि उप इत्येतेषु वाक्षु अगौ च अज् भवति । वेति वर्तते । सयमः । सयामः । नियमः । नियामः । वियमः । वियामः । उपयमः । उपयामः । अगौ यमः । यामः ।

नौ गदनदपठस्वनः ॥ ६७ ॥

वेति वर्तते । निपूर्वेभ्यः गद नद पठ स्वन इत्येतेभ्यो वा अज् भवति । निगदः । निगादः । ननादः । ननदः । निपठः । निपाठः । निस्वनः । निस्वानः ।

क्वणो वीणायां च ॥ ६८ ॥

नौ वा अगाविति त्रयं वर्तते । क्वणेर्धोः निपूर्वादगिपूर्वाच्च अवीणायां वीणायां च विषये अज् भवति । निक्वणः । निक्वाणः । अगौ क्वणः । क्वाणः । वीणाग्रहण गावपि प्रापणार्थम् । कल्याण प्रक्वणा वीणा । कल्याणप्रक्वाणा वीणा । एतेष्विति किम् । अतिक्वाणः ॥

घनान्तर्घणप्रघणप्रघाणोद्घनापघनायोघनविघनद्रुघ-

णस्तम्बघनस्तम्बघनपरिघोपघनसंघोद्घ-
निघप्रमदसम्मदाः ॥ ६८ ॥

घनादयः शब्दा निपात्यन्ते । हन्तेरच् घनभावश्च मूर्तावभिधेयायां निपात्यते। मूर्तिः काठिन्यम् । अभ्रघनः । दधिघन. । कर्म्मणि घन दधीति भवति । अन्तःशब्दपूर्वस्य हन्तेरधिकरणे घनभावोच्च निपात्यते देशाभिधाने । अन्तर्हन्यतेस्मिन्निति अन्तर्घणो बाहीकेषु देशविशेषः । केचिन्नकारं पठन्ति अन्तर्घातोऽन्यः । प्रपूर्वस्य हन्तेः अचि घञि च घनभावो निपात्यते अगारैकदेशेऽभिधेये । प्रघणः । प्रघाणः । गृहद्वारदेश इत्यर्थः । प्रघातोऽन्यः । उत्पूर्वस्य हन्तेरधिकरणे घनभावोऽच्च निपात्यते अत्याधान चेद्भवति । अत्याधीयतेऽस्मिन्नित्याधानम् । यत्र काष्ठानि लोहानि चाहन्यन्ते तदुच्यते ।

ऊर्द्ध्वं हन्यते ऽस्मिनुद्घनः । उद्घातोऽन्यः । अपघन इति निपात्यते अङ्गं चेद्भवति । अपघातोऽन्यः । अयोघनः । द्रुघण स्तम्बघनः स्तम्बघनः परिघ इत्येते करणे कारके अजन्ता निपात्यन्ते द्रुघणे केचिन्नकार पठन्ति । स्तम्बघने कमात्र निपात्यते । परिपूर्वस्य हन्तेर्घभावश्च निपात्यः । उपपूर्वात् हन्तेराश्रये ऽभिधेये को निपात्यते गुरूपघनः पर्वतोपघनः । उपघातोऽन्यः । सम्पूर्वस्य हन्तेर्घभावोऽच्च निपात्यते गणश्चेद्भवति गणः प्राणिसमुदाय एव पशूनां संघः । अन्यत्र संघातः । उत्पूर्वस्य हन्तेर्घादेशोऽच्च निपात्यते प्रशंसायाम् । उद्घो मनुष्यः । उद्घातोऽन्यः । निघ इति निपात्यते निर्विमितेर्थे समतादारोहपरिणाहाभ्यां मितन्तुल्यन्निमितं निघाः शालयः । निघातोऽन्य. । प्रमदसंमदौ हर्षेऽभिधेये । अन्यत्र प्रमादः सम्मदः ।

ड्वितः क्त्रिः ॥ ७० ॥

डुशब्देतो धोः क्त्रिप्रत्यो भवति । भावे अकर्तरीति वर्तते । डुपचष् पक्त्रिमम् । गावादिभ्यः क्त्रिरिति इभः । क्त्रयन्तस्य केवलस्य प्रयोगो नास्तीत्यस्वपदेनार्थकथनं पाकेन निर्वृत्तमिति । एवं टुवप् वप्त्रिमम् । टुयाच याचित्रिमम् ॥

द्वितोऽथुः ॥ ७१ ॥

टुशब्देतो धोरथुस्त्यो भवति । टुवेपृ वेपथुः । टुओश्विश्वयथु । टुक्षु । क्षथुः ॥

यजयाचयतविच्छप्रच्छरक्षस्वपो नङ् ॥ ७२ ॥

यजादिभ्यो नङ् भवति भावे अकर्तरीति वर्तते । यज्ञः । क्तोश्चुनाश्चुरिति चुत्वम् । याज्ञा लिगं लोकवशात् । यज्ञ. : विश्नः । नङो ङित्करणमेप्प्रतिषेधार्थं ज्ञापकं प्रागेव तुकः छोशूठ चेति शत्वम् । प्रश्नः । प्रश्नेचांतर्युगइति निर्देशाद्भिन्न भवति । रश्णः । ष्टुनाष्टुरिति टुत्वम् । स्वप्नः ॥

गौ भो किः ॥ ७३ ॥

गौ वाचि भुसंज्ञकेभ्यो धुभ्यः किर्भवति भावे अकर्तरीति वर्तते। प्रादीयते अस्मात् प्रादिः । निधीयते ऽसौ निधिः । संधानं संधिः ।

कर्म्मण्यधिकरणे ॥ ७४ ॥

कर्म्मणि वाचि अधिकरणे कारके भुसंज्ञकेभ्यः किर्भवति । जलं धीयते अस्मिन् जलधिः । वालधिः । अधिकरणग्रहण कारकान्तरनिवृत्यर्थम् ।

स्त्रियां क्तिः ॥ ७५ ॥

भावे अकर्तरीति वर्तते । स्त्रीलिगे धोः क्तिर्भवति । घ-

ञचोरपवादोऽयम् । कृति. । सृष्टिः । सपतिः । सपदादिभ्यः क्तिबपि वक्तव्यः । संपत् । विपत् । ग्लाज्यादिभ्यो तिः स्त्रियां वक्तव्यः । ग्लानिः हानिः । ऋकारांतत्वादिभ्यः क्तिस्तद्वत्वतीति वक्तव्यम् । कीर्णिः । गीर्णिः । लूतिः । पूतिः । इत ऊत्तर स्त्रियामित्यधिकारः ।

कर्म्मव्यतिहारे ञः ॥ ७६ ॥

इह कर्म्मव्यतिहारः क्रियाव्यतिहारः गृह्यते घोरधिकारात् । कर्म्मव्यतिहारे गम्यमाने घोर्ञ इत्ययं त्यो भवति स्त्रियाम् । परस्परस्य व्याक्रोशनं व्याक्रोशी जा स्त्रियामिति । स्वार्थिकोण् । कृद्ग्रहणे गिकारकपूर्वस्यापीति सतिकाद्भवति एवं व्यावलेखी व्यावहारी वर्तते । स्त्रियामित्येव । व्यतिपाको वर्तते । मध्येऽपवादाः पूर्वान् विधीन्बाधन्ते नोत्तरान् इति स्त्रियांक्तिरित्यस्यैव बाधको न सरोर्हलइति अत्यस्य । व्यतीक्षा व्यतीहा वर्तते ॥ कथं व्याक्युक्षी । युद्यावहुलमिति बहुलवचनात् व्याक्रुष्टिरित्येवमादिषु क्तिरपि ।

णेः ॥ ७७ ॥

णयन्ताच्च कर्म्मव्यतिहारे ञो भवति । अस्य बाधके युचि प्राप्तेऽयमारम्भः । व्यावचोरी व्यावचर्ची वर्तते ॥

यूतिजूतिसातिहेतिकीर्तयः ॥ ७८ ॥

यूत्यादयः शब्दा निपात्यंते । यौतिजवत्योर्दीर्घत्वं निपात्यते । यूतिः । जूतिः । स्यते सुनोतेर्वा सातिः । इत्वाभावः आत्वं च निपात्यते । हिनोतेर्हन्तेर्वा हेतिः । कीर्तयतेः युचि प्राप्ते कीर्तिः ॥

स्थागापापचो भावे ॥ ७९ ॥

स्था गा पा पच् इत्येतेभ्य. स्त्रीलिंगे भावे क्तिर्भवति भाव-ग्रहणमकर्तरीत्यस्य निरासार्थंसम् । प्रस्थितिः । सस्थितिः । गइ-त्यविशेषेण ग्रहणम् । उपगीतिः । उद्गीतिः । पिबतेः प्रपीतिः । निपीतिः । पक्तिः । आतो गाविति षितः इति च अङ् प्राप्तः तद्बाधनार्थमिदम् । गणे ठयवस्थायामसञ्ज्ञायामिति निर्देशाद-ङपि भवति । संस्था । अयजीषिस्तुभ्यः स्त्रियां करणे युद्बाधनार्थं क्तिर्वक्तव्यः । अूयतेऽनयेति श्रुतिः । इष्टिः । इष्टः । स्तुतिः ॥

व्रजयजः क्यप् ॥ ८० ॥

भाव इति वर्तते । व्रज यज इत्येताभ्यां स्त्रीलिंगे भावे क्यप् । व्रज्या । इज्या । पित्करणमुत्तरार्थम् ॥

समजनिषदनिपदमनविदषुशीङ्भृञिणः खौ ॥ ८१ ॥

भाव एवेति निवृत्तम् । द्वयमनुवर्तते । समजादिभ्यः स्त्रिया क्यप् भवति खुविषये । समजन्ति तस्यां समज्या । क्यपि वीभावः कस्मान्न भवति । बहुलंखाविति तत्रापेक्ष्यते । निषीदन्ति अस्या निषद्या । निपद्यते अस्यां निपद्या । केचित्पदिस्थाने पति पठति । मन्यते अनया मन्या । विद्यते अनया विद्या । सुनोति तस्यां सुत्या । शेते अस्यां शय्या । भरणं भृत्या । भाव एवाभिधानं करणे वा । इत्या । कथ भार्या कर्म्मणि भवि-ष्यति । अथवातज्याश्चार्हइत्येवमादिषु विशेषेण विधानात् । असंज्ञानामिपेस्त्रीत्या न बाधकाः मतिबुद्धिपूजार्थाभ्यश्च कर्म्मणि भतौ रजःकृष्यासुतिपर्षदो वल इति ज्ञापकात् क्वचित्क्तिरपि भवति । मतिः । वित्तिः । आसुतिः । भृतिः ॥

कृञः श्च च ॥ ८२ ॥

करोतेः स्त्रियां श्नो भवति क्यप् च । यदा भावकर्म्मणो-

शस्तदा मध्ये यक् रिग्यग्लिङ्क्षुङिति रिगादेशः यदापादानादित्रिवक्षा तदा यगनास्ति रिगादेशेयदेशौ । क्रिया । कृत्या । गरस्येपिविकृतेरिति ज्ञापकात् क्तिरपि भवति । कृतिः ॥

इच्छा ॥ ८३ ॥

इच्छेति निपात्यते । इष इच्छायामित्यस्माद्भावे शः यगभावश्च निपात्यते । क्तेरपवादोऽयम् । परिचर्यापरिसर्या मृगयाणां निपातनं वक्तव्यम् । परिपूर्वाच्चरेः शः सरतेरेप् च निपात्यते । मृगयतेः शप् शो यगभावश्च निपात्यते । जागर्तेरशौ वक्तव्यौ । जागरा । जागर्या । शे यक् । जागुरचिजिणञ्जिनतीति एप् ।

अस्त्यात् ॥ ८४ ॥

अ इत्ययं त्यो भवति तेभ्यो धुभ्यः स्त्रियाम् । चिकीर्षा । लोलूया । अटाट्या । पुत्रीया । पुत्रकाम्या । कण्डूया ॥

सरोर्हलः ॥ ८५ ॥

सरुर्हलन्तो यो धुः ततः स्त्रियामस्त्यो भवति । कुण्डा । चुण्डा । मेधा । ईहा । पर्याप्तिवचनेऽलमर्थे इतिनिर्देशात् ये सेटस्तेषामिह ग्रहणम् । तेनेह न भवति । आप्तिः । दीप्तिः । राद्धिः । अस्तिः । प्रध्वस्तिः । प्रशस्तिः । प्रशंसायां रूप इतिनिर्देशात् । शसेरत्योऽपि भवति । सरोरिति किम् । निपठितिः । हलइत्येव । नीतिः ॥

षिद्भिदादिभ्योऽङ् ॥ ८६ ॥

षिद्भ्यो धुभ्यः भिदादिषु च गणपठितेषु याः प्रकृतयस्ताभ्यश्चाङ् भवति स्त्रियाम् । जृष् । जरा । त्रपूष् । त्रपा । घटादयः षितः । घटा । व्यथा । युङ्व्या बहुलमिति बहुलवचनात् लठिधर्लभेति च भवति । भिदादिभ्यः खल्वपि । भिदा विदारणे

क्षित्तिरन्या । क्षिदा द्वैधीकरणे । क्षित्तिरन्या । विदा विचारणे । वित्तिरन्या । क्षिपा प्रेरणे क्षिप्तिरन्या । गुहा गिर्य्यौषध्योः । गूढिरन्या । क्रुहा । नद्याम् । कुहना अन्या । आरा शस्त्र्याम् । आर्तिरन्या । तारा ज्योतिषि । तार्णिरन्या । एपि कृते दीत्वमनयोर्निपातनात् । वपा मेदोविशेषे । उप्तिरन्या । वश्या शरीरगतस्नेहे उष्टिरन्या । सृजा शरीरसंस्कारे । सृष्टिरन्या । धारा वर्षप्रपाते । धृतिरन्या । निपातनादात्वम् । क्रपेर्जिश्च । कृपा । गोधा । हारा । रेखा । लेखा । निपातनादेव् । चूडा । वीडा ॥

चिन्तिपूजिकथिकुम्भिचर्चः ॥ ८७ ॥

चिन्त्यादिभ्यो धुभ्यः स्त्रियामङ् भवति । युचोऽपवादोऽयम् । चिन्ता । पूजा । कथा । कुम्भा । चर्चा ॥

आतो गौ ॥ ८८ ॥

आकारान्तेभ्यो धुभ्यः गौवाचि अङ् भवति । क्तेरपवादः । प्रदा । प्रधा । प्रपिबन्त्यस्यां प्रपा । पिबतेर्भावे क्तिर्विहितः । प्रज्ञाश्रद्धाचेवृत्तिभ्यो णः तिरोन्तर्द्धौविति प्रयोगात् अदन्तरोर्णिवद्वृत्तिः । श्रद्धा । अन्तर्धा ॥

रायासश्रान्यघट्टिविन्दिविदो युच् ॥ ८९ ॥

रयन्तेभ्यः आस अन्थ घट्ट वन्द् विद् इत्येतेभ्यो धुभ्यः स्त्रियां युच् भवति । रयन्तात् अस्त्यादिति इतरेभ्यः सरोर्हल इत्यकारः प्राप्तः विदे क्तिः प्राप्तः । कारणा । गणना । कामना । आसना । अन्थना । घट्टना । वन्दना । वेदना । वेदना अनुभयेवेदनाद्रइष्टव्या । इषेऽनिच्छायां युज् वक्तव्यः । अन्वेषणा । परेर्वा । पर्येषणा । परीष्टिः । युड्व्या बहुलमिति वा भविष्यति । व्यानां स्त्रीत्याः प्रबाधका इत्युक्तम् । तेन आस्था उपास्था ॥

खौ विभाषा वुण् ॥ ८० ॥

खुविषये विभाष्या वुण् भवति धोः। क्यादीनामपवादाः प्रस्कन्दिका । प्रच्छर्दिका । प्रवाहिका । विचर्चिका । एता रोगसञ्ज्ञाः। उद्दालकपुष्पभञ्जिका। वारणपुष्पप्रचायिका। अभ्योषखादिका। शालभञ्जिका । एताः क्रीडासञ्ज्ञकाः। कृल्लक्षणा कर्मणि ता । क्रीडाजीविकयोर्नित्यमितिनित्यः सविधिः । उद्दालकपुष्पाणि भज्यन्ते यस्यां क्रीडायां इत्येवमादिरस्वपद्-विग्रहो बोद्धव्यः । विभाषा ग्रहणादिह न भवति शीर्षर्तिः शीर्षाभिनम्रिः । शिरोर्तिः धावृत्ति रोरित्यै । वा भवितव्यमिति चेन्न अर्द हिंसायामित्यस्य प्रयोगः चन्दनतक्षक्रीडेव विभाषाग्रहणात् ध्वर्थनिर्देशे ऽपि वुण् भवति । आसिका शायिका वर्तते ।

वेञ्च प्रश्नाख्या ॥ ८१ ॥

प्रश्ने आख्याने च गम्यमाने धोरिञ् भवति वुराच वा। कां त्व कार्ष्मिकार्षीः काङ्कारिकां वा । वचनाद्यथाप्राप्त च भवति। कां क्रियां कां कृत्यां कां कृतिम्। आख्याने सर्वां कारिमकार्षं सर्वां करिकां सर्वां क्रियां सर्वां कृत्यां सर्वां कृतिम् । कां त्व गणिमजीगणः कां गणिकां कां गणाम्। सर्वां गणिमयां गणिना । सर्वां गणिका सर्वां गणना। कां त्व पाठिमपाठीः कां पाठिकां कां पठितिम्। सर्वां मया पाठिः पठिता सर्वां पाठिका सर्वां पठितिः। प्रश्नाख्यान इति किम्। कृतिः ।

पर्यायार्हर्होत्पत्तौ वुण् ॥ ८२ ॥

पर्याय अर्ह ऋण उत्पत्ति इत्येतेष्वर्थेषु गम्यमानेषु धोर्वुण् भवति स्त्रियाम्। पर्यायेऽनुक्रमः तस्मिन् भवतः शायिका । भवनोऽग्रगामिका । कर्तृकर्मणोः कृतीति कर्तरि ता। तृजकाभ्यामिति तासप्रतिषेधः । अर्हणमर्हः योग्यता तत्र अर्हति

भवानिक्षुभक्षिकाम् । ओदनभोजिकाम् । पयःपायिकाम् । तृजकाभ्यामित्यत्र कर्तरीत्यनुवर्तनात् कर्मणि या ता तत्र कृतीत्यनेन तासः । ऋणं यत्परस्य धार्य्यते तत्र इक्षुभक्षिकां मे धारयसि ओदनभोजिकां पयःपायिकाम् । उत्पत्तौ । इक्षुभक्षिका मे उदपादि । ओदनभोजिका । पयःपायिका । विभाषानुवर्तनात् क्वचिन्न भवति । घटचिकीर्षा मे उदपादि । ओदनबुभुक्षा मे उदपादि ।

आक्रोशे नञ्यनिः ॥ ८३ ॥

आक्रोशे गम्यमाने नञि वाचि धोरनित्यो भवति । क्यादीनामपवादः । अकरणिस्ते वृषल भूयात् । अप्रयाणिस्ते वृषल भूयात् । आक्रोश इति किम् । अकृतिस्तस्य पटस्य । नञीति किम् । मृतिस्ते वृषल भूयात् ।

युड्ठया बहुलम् ॥ ८४ ॥

भावे अकर्तरि स्त्रियामिति च निवृत्तम् । युड्व्यसंज्ञाश्च बहुलं भवन्ति । भावकरणाधिकरणेषु युड् विहितोऽन्यत्रापि भवति । निरदन्ति तदिति निरदनम् । अवसेचनम् । अवश्रावणम् । राज्ञा भुज्यन्ते राजभोजनाः शालयः । क्षत्रियपान मधु । राजाच्छादनानि वस्त्राणि । प्रयतति तस्मात् प्रयतनम् । प्रस्कन्दनम् । प्रच्छर्दनम् । भावकर्मणोर्व्या उक्ताः ततोऽन्यत्रापि भवन्ति तेन स्नानीयं चूर्णम् । दीयते ऽस्मै दानीयोऽतिथिः । ज्ञानमावृणोति आव्रियते वानेन ज्ञानावरणीयम् । दर्शनावरणीयम् । वेदनीयम् । मोहनीयम् । बहुलवचनादन्येपि कृतः उक्तादन्यत्र भवन्ति । गले चोप्यते गलचोपकः । पादाभ्यां ह्रियते पादहारकः ।

नप् भावे क्तः ॥ ८५ ॥

नबिति ङिच्च कृत्वा निर्देशः । नपि नपुंसकलिङ्गे भावे क्तो भवति । घञपवादः । हसितं छात्रस्य शोभनं जल्पितं आसितम् । शयितम् । नपुंसकलिङ्गभावे क्तादिनिवृत्त्यर्थकभयादीनामज् वक्तव्य इत्युक्तम् । तेन भय वर्षमित्यादौ क्तो न भवति । येषां घञजन्तानां नपुंसकत्वमिष्टं तेऽट्टचर्चादिषु द्रष्टव्याः ।

ञिन्नभिविधौ ॥ ८६ ॥

नपुंभावे इति वर्तते । अभिविधिः क्रियागुणाभ्यां कार्त्स्न्येन व्याप्तिः । नपि भावे धोर्ञिन् भवति अभिविधौ गम्यमाने । क्त्स्नयमपवादः । साकल्येन सामार्जिनं सांराविनं साद्भाविणं वर्तते । ञिनेरिति स्वार्थिकोऽण् नेापुंसेतृतीटिख प्राप्त प्राप्तोन पत्येणीन इति न भवति मध्येऽपवादोयं गुटं न बाधते संकुटनं समार्जनम् । अभिविधाविति किम् । संरावः ।

युट् ॥ ८७ ॥

नपुंभाव इति वर्तते । नपुंभावे युड् भवति धोः । हसनं छात्रस्य शोभनं जल्पनं आसनं शयनम् ।

कर्मणि यत्स्पर्शात्कर्त्रङ्गसुखम् ॥ ८८ ॥

युट्नब्भाव इति च वर्तते । येन सत्स्पर्शात् कर्त्रङ्गस्य सुखं भवति तस्मिन् कर्मणि वाचि नपुंसकलिंगे भावे युट् भवति । ओदनभोजनं सुखम् । पयःपानम् । चन्दनानुलेपनम् । पूर्वेण सिद्धेपि नित्यसविध्यर्थं आरम्भः । कर्मणीति किम् । तूलिकाया उत्थानम् । युडत्र पूर्वेण सिद्धः । सविधिस्तु न भवति । यत्स्पर्शादिति किम् । अग्निकुण्डस्योपासनं सुखम् । युट् पूर्वेण । पारिक्षः सविधिः । कर्तरीति किम् । गुरोः स्नापन सुखम् । नात्र स्नापयतेः कर्तुः शरीरसुखं किं तर्हि गुरोः कर्मणः । अङ्गग्रहण किम् । पुत्रस्य परिष्वञ्जनं सुखम् । नान-

समिदम् । अन्यथा परपुत्रपरिष्वङ्गनेपि स्यात् । सुखमिति किम् । कटकानां मर्दनम् ।

करणाधिकरणयोः ॥ ९९ ॥

करणेऽधिकरणे च कारकेऽभिधेये युट् भवति । घञाद्यपवादः । करणे इध्मप्रश्चनः । पलाशशातनः । असिलवनः । कर्मणि ता । कृतीति तासः । अधिकरणे गोदोहनी । शक्रधानी । तिलपीडनी । परत्वात् त्त्यादिक स्त्रीत्यं बाधते ।

पुंखौ घः प्रायेण ॥ १०० ॥

करणाधिकरणयोरिति वर्तते पुंल्लिंगसंज्ञायां गम्यमानायां घो भवति प्रायेण । घकारः वादेर्घः इत्यत्र विशेषणार्थः । प्रच्छदः । उरच्छदः । प्लवः आखनः । अधिकरणे । एत्य कुर्वन्त्यस्मिन्नाकरः । आलवः । आपवः । पुंग्रहणं किम् । प्रधानम् । विचवनी । नपुंसकलिंगा स्त्रीलिंगा चेयं संज्ञा । खाविति किम् । हरणो दण्डः । प्रायेणेति किम् । क्वचिन्न भवति । प्रसाधनः । दोहनः ।

हलसोर्वे घञ् ॥ १०१ ॥

हल इत्येताभ्यां अवशब्दे वाचि घञ् भवति करणाधिकरणयोः पुंखौ । अवहारः । अवतारः । कथमसंज्ञायामवतारो नद्या इति चिन्त्यमेतत् ।

हलः ॥ १०२ ॥

हलन्ताद्धोर्घञ् भवति करणाधिकरणयोः पुंखौ । घापवादोऽयम् । वेदः नेगः वेशः गधः संगः विषंगः । तैलोदकम् । घृतोदकम् । नात्यत्र घञि घे वा विशेषः । इमानि तर्ह्युदाहरणानि । खेलः नामार्गः अपामार्गः प्रासादः आखानः । प्रायेणेति अनुवर्तनात् हलन्तेभ्यः केभ्यश्चित् घञ् न भवति घ एव भवति । अधिकरणे कषः निकषः निगसः गोचरः आपणः करणे सचर-

बहु व्रत. इह व्यञ्जन्त्यस्मिन्निति व्यञ्जः । बहुलवचनाद्जेर्वी-भावो न भवति । इह उदकोदञ्चनः । दोहनः प्रमाथन इति घघञौ न भवतः । आखनः आखानः इत्यत्रोभयं भवति ।

संहारोद्यावनायावहारावायाः ॥ १०३ ॥

संहारादयः शब्दा घञ निपात्यन्ते पुंखौ । अहलन्त-त्वात् पूर्वेणाप्राप्तिः । संहरति तेन सहार. । करणेऽधिकरणे वा उद्यावः आनयन्ति तेन आनायो नालं चेत् । अवहरन्ति तेन अवहारः । एत्य तस्मिन् वयन्ति आवायः अध्यायानुवाकयोर्वोप् आधारोधिकरण इति ज्ञापकात् उञ्छादिषु न्यायशब्दस्य निर्देशात् अधीयते अनेनाध्यायः । आधीयते अस्मिन् आधारः । नीयतेऽनेन न्यायः एतेऽपि शब्दा. साधवः ।

स्वीषद्दुसि कृच्छ्राकृच्छ्रे खः ॥ १०४ ॥

सु ईषत् दुस् इत्येतेषु वाक्षु कृच्छ्रे अकृच्छ्रे वार्थे खो भवति धोः । कृच्छ्राकृच्छ्रग्रहणं स्वादिविशेषणम् । सुकरः कटो भवता ईषत्करः कटो भवता । दुष्करः कटो भवता । तयोर्यत्कखा-र्थाइति कर्म्मणि खः । नञिते त्यादिना ताप्रतिषेधः । झित्वात्पू-र्वपदस्य मुन्न भवति । कृच्छ्राकृच्छ्र इति किम् । ईषत्कार्यः । मना-क्कार्य इत्यर्थः ।

कर्तृकर्म्मणोर्भूकृभ्याम् ॥ १०५ ॥

स्वीषदुस कृच्छ्राकृच्छ्रे ख इति वर्तते कृञ्ग्रहणसामर्थ्यात् कर्तृकर्म्मग्रहण वाग्विशेषणं कर्तृकर्म्मणि च वाचि भू कृञ् इत्येताभ्यां यथासंख्य खो भवति सु ईषत् दुस् इत्येतेषु वाक्षु कृच्छ्रे अकृच्छ्रे चार्थे । त्यस्य खित्करणमुमर्थेनिति पूर्वे कर्तृकर्म्मभ्यां योगः पश्चात्स्वादिभिः प्रायेणेत्यनुवर्तनात् कर्तृकर्म्मणो-र्भूकृञर्थयोर्ग्रहणम् । अनाढ्येन सुखमाढ्येन भूयते स्वाढ्यंभव

भवता । ईषदाढ्यभव भवता । सुखमनाढ्यमाढ्यङ्क्रियते स्वाढ्यंकरो देवदत्तो भवता । ईषदाढ्यकरः । दुराढ्यङ्करः । सूत्रन्यासेपरत्वात्कर्तृकर्मणोः वाक्यं कृत्वा पश्चात्पूर्वस्य क्रियतेऽव्यार्थयोरिति किम् । स्वाढ्येन भूयते । स्वाढ्येन क्रियते । यदा करोति विकारार्थः तदा सुकटंकराणि वीरणानि । यदा निष्पत्तिवचना तदा सुकरः कटो वीरणैरिति ।

युज्जातः ॥ १०६ ॥

स्वीषद्दुसि कृच्छ्राकृच्छ्र इति वर्तते आकारान्तेभ्यो धुभ्यो युज् भवति स्वादिषु कृच्छ्राकृच्छ्रार्थेषु वाक्षु । सुपान पयो भवता । ईषत्पानम् । दुष्पानम् । सुग्लानम् । ईषद्ग्लाम् । सुग्लानम् । ईषद्ग्लानम् । दुग्लानम् । खापवादोयम् । प्रायेणेति वर्तते । तेन दुःशब्दे वाचि शासियुधिदृशिधृषिमृषिभ्यः युज् भवति । दु शासनः । दुर्योधनः । दुर्दर्शनः । दुर्धर्षणः । दुर्मर्षणः । सुदर्शनादिषु वसो द्रष्टव्यः ।

भवद्भूता तत्सामीप्ये ॥ १०७ ॥

भवच्छब्दो वर्तमानपर्यायः समीपमेव सामीप्यं भवतीव त्यविधिर्भवति वा तत्समीपे भूते भविष्यति च ध्वर्थे वर्तमानाद्धोः । संप्रतीत्यारभ्य आ पादपरिसमाप्तेर्विहितास्त्या अतिदिश्यन्ते । कदा देवदत्त आगतोऽसि । एष आगच्छामि । आगच्छन्तमेव मां विद्धि । एष आगामुकोस्मि । वावचनाद्यथाप्राप्तम् । एष आगतोस्मि कदा देवदत्त गमिष्यसि । एष गच्छामि । गच्छन्तमेव मां विद्धि । गन्तारमेव मां विद्धि । पक्षे एष गमिष्यामि एषोस्मि गन्ता । वत्करणं किमर्थम् । प्रकृतिविशेषादिपरिग्रहार्थम् । तत्सामीप्यग्रहणं व्यवहितानत्यार्थम् । कदा ग्राममगच्छत् । श्वः करिष्यति इह मा भूत् । नन्वत्र लुटा भवितव्यं कथ लृट् । पदसंस्कारवेलायां श्वःप्रभृतिपदानामसंनि-

धानादि दोषः ।

भूतवच्चाशंसायाम् ॥ १०८ ॥

आशंसनमाशंसा भविष्यत्कालविषया तस्यां गम्यमानायां भूतवत्त्ययविधिर्भवति भवद्वच्च वा । भूतग्रहणेन भूतसामान्ये विहितस्य त्ययस्य परिग्रहः । उपाध्यायश्चेदागमिष्यति उपाध्यायश्चेदागमत् उपाध्यायश्चेदागतः तदा तर्कमधीमहे अध्येष्यामहे अध्यगीष्महि एषोधीस्तर्कः । आशंसायामिति किम् । उपाध्याय आगमिष्यति ।

क्षिप्रवचने लट् ॥ १०९ ॥

आशंसायामिति वर्तते । क्षिप्रार्थे शब्दे वाचि लृट् भवत्याशंसायां गम्यमानायाम् । भूतवच्चेत्यस्यापवादः । उपाध्यायश्चेदागमिष्यति क्षिप्रमध्येष्यामहे शीघ्रमध्येष्यामहे । नेति वक्तव्ये लट्ग्रहणं लुट्विषयेपि यथा स्यात् इत्येवमर्थम् । श्वःक्षिप्रमध्येष्यामहे ।

लिङाशंसोक्तौ ॥ ११० ॥

आशंसा उच्यते येन शब्देन तस्मिन् वाचि लिङ् भवत्याशंसायां गम्यमानायाम् । अयमपि भूतवच्चेत्यस्यापवादः । उपाध्यायश्चेदागच्छेत् आशंसे युक्तो अधीयीय । अवकल्पये युक्तोऽधीयीय । परत्वाल्लृटो बाधकोऽयम् । आशंसे क्षिप्रमधीयीय ॥

न लङ्लुट् सामीप्याद्युच्छित्त्योः ॥ १११ ॥

सामीप्यं तुल्यजातीयेनाव्यवधानम् । अद्युच्छित्तिः क्रियाप्रबन्धः । लङ्लुटौ न भवतः सामीप्याद्युच्छित्त्योः गम्यमानयोः । अनद्यतनविहितयोर्लङ्लुटोरयं प्रतिषेधः । सामीप्ये । येयं पौर्णमास्यतिक्रान्ता एतस्यां देवानपूपुजामः । अतिथीनबू-

भुजामः । श्रेयसावास्यागामिनी एतस्यां देवान् पूजयिष्यामः अतिथीन् भोजयिष्यामः । अव्युत्थितौ यावज्जीवीत् भृश. मन्नमदात् यावज्जीविष्यति भृशमन्नं दास्यति ॥

वत्स्यत्यवरेऽवधेः ॥ ११२ ॥

यद्यपि लङ्लुडिति प्रकृतं तथापीह वत्स्यद्ग्रहणाल्लुट एव प्रतिषेधः वत्स्यतिकाले अवरस्मिन् भागे लुरान भवति । असामीप्याव्युच्छित्यर्थोऽयमारंभ. । कालविभाग उत्तरत्र वक्ष्यते । देशविभागे अयं प्रतिषेधः । योऽयमध्वा गन्तव्य आ चित्रकूटात् तस्य यदवरं मथुरायाः तत्र द्विरोदनं भोक्ष्यामहे द्विःसक्तून्पास्यामः । वत्स्यतीति किम् । योऽयमध्वा गतः आ चित्रकूटात् तस्य यदवरं मथुरायां तत्र युक्ता द्विरध्यैमहि । अवर इति किम् । योऽयमध्वा गन्तव्य आ चित्रकूटात् तस्य यत्परं मथुरायास्तत्र युक्ता द्विरध्येतास्महे । अवधेरिति किम् । योऽयमध्वा गन्तव्यो निरवधिकः तस्य यदवरं मथुरायाः तत्र युक्ता द्विरध्येतास्महे ।

कालविभागेऽनहोरात्राणाम् ॥ ११३ ॥

वत्स्यत्यवरेऽवधेरिति वर्तते । वत्स्यति काले अवरस्मिन्कालविभागेऽहोरात्रसंबंधविवर्जिते लुरान भवति । पूर्वेण प्रतिषेधे सिद्धेऽप्यहोरात्रसंबंधिविभागप्रतिषेधार्थं वचनम् । कालविभागग्रहणमिहार्थमुत्तरार्थं च । योयं संवत्सर आगामी तस्य यदवरमाग्रहायण्यास्तत्रार्हत्पूजां करिष्यामहे अतिथिभ्यो दानं दास्यामहे । वत्स्यतीत्येव । योयं संवत्सरोतीतस्तस्य यदवरमाग्रहायण्याः तत्र युक्ता द्विरध्यैमहि । अवर इति किम् । वा पर इति वक्ष्यति । अवधेरित्येव । योयं निरवधिकः काल आगामी तस्य यदवरमाग्रहायण्याः तत्र युक्ता द्विरध्येतास्महे ।

अनहोरात्राणामिति किम् । योऽयं त्रिंशद्रात्र आगामी तस्य योवरः पञ्चदशरात्रस्तत्र युक्ता द्विरभ्येतास्महे । योयं त्रिंशद्रात्र आगामी तस्य योऽवरः अर्द्धमासः तत्र द्विरभ्येतास्महे । योयं मास आगामी तस्य योवरः पञ्चदशरात्रः तत्र द्विरभ्येतास्महे । प्रसज्य इतिप्रतिषे .रात् त्रिविधमुदाहरणम् ।

वा परे ॥ ११४ ॥

कालविभाग इति वर्तते । परस्मिन्नवधेः कालविभागे वत्स्यर्तिं वा लुरान भवति न चेदहोरात्राणां विभागः । योयं संवत्सरः आगामी तस्य यत्परमाग्रहायण्याः तत्र द्विरभ्येष्यामहे अभ्येतास्महे वा । सामीप्याव्युच्छित्तिविवक्षायामपि परत्वादयं विकल्पः । अनहोरात्राणामित्येव । योयं त्रिंशद्रात्र आगामी तस्य यः परः पंचदशरात्रः तत्र द्विरभ्येतास्महे । सामीप्याव्युच्छित्योर्लुटः प्रतिषेध एव । वत्स्यतीत्येव । योऽयं संवत्सरोऽतीतः तस्य यत्परमाग्रहायरायाः तत्र द्विरभ्यैमहि । अवधेरित्येव । योयं निरवधिः काल आगामी तस्य यत्परमाग्रहायरायाः तत्र द्विरभ्येतास्महे । कालविभाग इत्येव । योऽयमध्वा गन्तव्यः आ चित्रकूटात् तस्य यत्परं मथुरायास्तत्र द्विरभ्येतास्महे सर्वत्र लुड् भवति नचेदव्युच्छित्तिविवक्षा ।

लिङ्हेतौ लृङ् क्रियाऽवृतौ ॥११५॥

वत्स्यतीति वर्तते हेतुर्निमित्तं लिङ्हेतौ वत्स्यति काले लृङ् भवति क्रियाया अवृत्तौ सत्याम् । हेतुफलयोर्लिङित्येवमादि लिङ्निमित्तं वक्ष्यति । अतिथींश्चेद्लिप्स्यत भृशमन्नमदास्यत् अत्रान्नदानं फलं तद्धेतुभूतोऽतिथिलाभः तदनभिनिर्वृतिं प्रमाणादवगम्येदं वाक्यं प्रयुक्तम् । एवमुपाध्यायं चेदुपाशिष्यत शास्त्रांतमगमिष्यत् । अभोक्ष्यत भवान् दृष्ट्वा यदि मत्स-

नीये भाक्ष्यिति । इह दक्षिणो न चेद्यास्यत् न पर्य्यभविष्यदिति यानमनिष्पन्नं पर्याभवनं तु निष्पन्नमिति कथमवृत्तिः क्रियायाः । एवं तर्हि प्रत्यासत्तेः हेतुभूतायोः क्रियायाः अवृत्ताविति द्रष्टव्यम् क्रियायाः अवृत्तावपि शक्तिरूपेण क्रियामध्यारोप्य कर्तृत्वेनाभिसंबंधः क्रियते यथा भूतभविष्यत्कालविषयायाः कर्तृत्वेनाभिसंबंधः ।

भूते ॥ ११६ ॥

भूते च काले लिङ्हेतौ क्रियाया अवृत्तौ सत्यां लृङ् भवति । उताप्योः पृष्टोक्तौ लिङ्ङित्यतः प्रभृति कालसामान्ये यल्लिङ्निमित्तं विधानं तत्रानेन भूते लृङ् ततः पूर्वं तु वाशेषादित्येनैव विकल्पः सिद्धः । दृष्टो मया भवतः पुत्रोऽन्नार्थी चङ्क्रम्यमाणः इतरश्चातिथ्यर्थी यदि तेन भविष्यत उताभोक्ष्यत । अप्यभोक्ष्या अन्येन पथा सगतः नापि भुक्तवान् इदं सर्वं प्रतिवचनम् ।

वाऽशेषात् ॥ ११७ ॥

वक्ष्यति शेषे यदौ लृडिति आ एतस्मात्सूत्रावधेः यदित ऊर्ध्वमनुक्रमिष्यामः भूते काले लिङ्हेतौ क्रियाया अवृत्तौ लृङ्वा भवतीत्येतदधिकृतं वेदितव्यम् । परस्तु लृङो विधिर्भित्य इति तत्रैवोदाहरिष्यामः ।

लङ् गर्हेऽपिजात्वोः ॥ ११८ ॥

अपि जातु इत्येतयोर्वाचोः लङ् भवति गर्हे गम्यमाने । अयं कालसामान्ये विहितो लट्कालविशेषे विहितान् लकारान् परत्वाद्बाधते । अपि तत्र भवान् प्राणिनो हन्ति । जातु तत्र भवान् प्राणिनो हन्ति गर्हामहे । अन्यार्थमेतत् । लिङ्हेत्वभावात् भूते क्रियावृत्तौ लङ् न भवति ।

वा कथमि लिङ् च॥ ११९ ॥

गर्हे इति वर्तते । कथ शब्दे वाचि लिङ् भवति लङ्वा । कथ नाम तत्र भवान् मांसं भक्षयेत् । मांसं भक्षयति । गर्हानहे । अन्याय्यमेतत् । वाग्रहणाद्यथाप्राप्तम् । अबभक्षत् । अभक्षयत् भक्षयाञ्चकार । भक्षयिष्यति । भक्षयिता । अत्र लिङ्हेतुरस्तीति भूते क्रियावृत्तौ वा लृङ् भवति अभक्षयिष्यत् । वत्स्यति नित्यं लृङ् ।

किंवृत्ते लिङ्लृटौ ॥ १२० ॥

गर्हे इति वर्तते वेति नाधिकृतं वित्त्यन्तस्य इत्तरडतमान्तस्य च किमो वर्तनं किंवृत्तम् । किंवृत्ते वाचि गर्हे गम्यमाने लिङ्लृटौ भवतः । सर्वलकाराणामयमपवादः । किं तत्र भवान् अनृतं ब्रूयात् अनृतं वक्ष्यति । लिङ्हेतुरस्तीति भूते वा लृङ् भवति वत्स्यति तु नित्यः ।

अनवक्लृप्त्यमर्षे ॥ १२१ ॥

गर्हे इति निवृत्तम् । लिङ्लृटाविति वर्तते । अनवक्लृप्त्यर्थे अवमर्षे च गम्यमाने लिङ्लृट् इत्येतौ त्यौ भवतः । अयमपि सर्वलकाराणामपवादः । अनवक्लृप्तौ नावकल्पयामि न सम्भावयामि न वा अदृधे कि तत्र भवानदत्तं गृह्णीयात् सदत्तं ग्रहीष्यत्यमर्षे धिङ् मिथ्यानैतदरत्यमर्षो मे किं तत्र भवानदत्तं गृह्णीयात् अदत्तं ग्रहीष्यति । किंवृतेरकिंवृते च वाचि सामान्येनायं विधिः । लिङ्हेतुरस्तीति भूते क्रियावृत्तौ वा लृङ् । वत्स्यति तु नित्यः ।

किंकिलास्त्यर्थे लृट् ॥ १२२ ॥

अनवक्लृप्त्यमर्ष इति वर्तते । किंकिलशब्दे अस्त्यर्थेषु च शब्देषु वाक्षु अनवक्लृप्त्यमर्षयो. लृट् भवति । लिङोऽपवादः । नावकल्पयामि किकिल तत्र भवान् परदारान् प्रकरिष्यते । गंध-

नादिसूत्रेणान्याये दः । अस्त्यर्थं अस्तिभवतिविद्यतयः । अस्ति-नाम भवति नाम विद्यते नाम तत्र भवान् परदारान् प्रकरिष्यते ।

जातुयद्यदायदौ लिङ् ॥ १२३ ॥

अनवक्लृप्त्यमर्ष इति वर्तते । जातुयद्यदायदीत्येतेषु वाक्षु अनवक्लृप्त्यमर्षयोर्लिङ् भवति । लृटोऽपवादः । नावकल्पयामि जातु तत्र भवान् सुरां पिबेत् । यत्तत्र भवान् सुरां पिबेत् यदा तत्र भवान् सुरां पिबेत् यदि तत्र भवान् सुरां पिबेत् न मृष्यामि जातु तत्र भवान् सुरां पिबेत् इत्येवमादि योज्यम् । लिङ्हेतुरस्तीति भूते वा लृङ् वत्स्यति तु नित्यः ।

यच्चयत्रयोः ॥ १२४ ॥

अनवक्लृप्त्यमर्ष इति वर्तते । यच्च यत्र इत्येतयोर्वाचो-अनवक्लृप्त्यमर्षयोर्लिङ् भवति । लृटोऽपवादः । उत्तरार्थो योगः विभागः । न संभावयामि यच्च तत्र भवान् परिवादं कथयेत् । यत्र तत्र भवान् परिवादं कथयेत् । न मृष्यामि यच्च तत्र भवान् परिवादं कथयेत् । यत्र तत्र भवान् परिवादं कथयेत् । क्रियाअवृतौ भूतें वा लृङ् । वत्स्यति तु नित्यः ।

गर्हे ॥ १२५ ॥

अनवक्लृप्त्यमर्ष इति निवृत्तम् । अर्थान्तरोपादानात् । यच्च यत्र इत्येतयोर्वाचोः गर्हे गम्यमाने लिङ् भवति । सर्वलकाराणामपवादः । यच्च तत्र भवान् भस्यानाक्रोशेत विद्वानवृद्धः सन्नुत्कृष्टः गर्हामहे । अन्याय्यमेतत् । लिङ्हेतुरस्तीति यथासंभवं लृङ् वेदितव्यः ।

चित्रार्थे ॥ १२६ ॥

चित्रशब्दस्यार्थे गम्यमाने यच्चयत्रयोर्वाचोर्लिङ् भवति । सर्वलकारापवादः । यच्च तत्र भवान् लोभं कुर्यात् यत्र तत्र भवान् लोभं कुर्यात् विद्वान् वृद्धः सन्नुत्कृष्टः चित्रमाश्चर्यमद्भुतं विस्मयमित्येषामन्यतमप्रयोगः । लिङ्हेतुरस्तीति भूते क्रियावृतौ वा वत्स्यति तु नित्यः ।

शेषेऽयदौ लट् ॥ १२७ ॥

यच्चयत्राभ्यामन्यश्चित्रार्थः शेषः । शेषे चित्रार्थे गम्यमाने लृड्भवति यदिशब्दश्चेद्वाङ् भवति । अयमपि सर्वलकारापवादः । चित्रमाश्चर्य्यमद्भूत विस्मयनित्यमन्यो नाम पुस्तकं वाचयिष्यति मूको नाम जैनेद्रमध्येष्यते । लिङ्हेत्वभावात् लृङ् वा न भवति । अयदाविति किम् । आश्चर्यं यदि स भुंजीत अत्रानवक्लृप्तिश्चित्रार्थश्च प्रतीयते जातुयद्यदायदौ लिडिति लिङ्भूते बाशेषादिति लृङधिकारो निवृत्तः ।

उताप्योः पृष्टोक्तौ लिङ् ॥ १२८ ॥

उत अपि इत्येतयोर्वाचोः पृष्टस्योक्तौ गम्यमानायां लिङ् भवति । सर्वलकारापवादः । किमकार्षीः कटं देवदत्त इति पृष्टः प्रत्याह उत कुर्यात् । अपि कुर्यात् कटं कृतवानित्यर्थः । इतः प्रभृति यत्र लिङ्हेतुरस्ति तत्र वत्स्यति भूते च नित्यो लृङ् उताकरिष्यत् । अप्याकरिष्यत् । पृष्टोक्ताविति किम् । उत दण्डः पतिष्यति । अपि धास्यति द्वारम् । अत्र प्रश्नोघट्टनं च प्रतीयते ।

इच्छोद्बोधेऽकच्चिति ॥ १२९ ॥

इच्छोद्बोधः स्वाभिप्रायनिवेदनम् । इच्छोद्बोधे गम्यमाने

लिङ् भवति कच्चिच्छब्दाप्रयोगे । सर्वलकारापवादः । कामो मे अधीयीत भवान् । अभिलाषो मे इच्छा मे भुंजीत भवान् । अकच्चितीति किम् । कच्चिज्जीवति मे माता । कच्चिज्जीवति मे पिता माहाबिद् त्वां पृच्छामि कच्चिज्जीवति पार्वती ।

संभावनेऽलमि स्थानिनि ॥ १३० ॥

लिङिति वर्तते । संभावनं क्रियायां सामर्थ्यश्रद्धा । अलंशब्दश्चेह पर्याप्तिवचनः । यस्य यत्रार्थो गम्यते न चासौ प्रयुज्यते स तत्र स्थानीशब्दः । अलमर्थविशिष्टे संभावने लिङ् भवति अलंशब्दे स्थानिनि । सर्वलकारापवादः । शक्यसंभावने अपि हस्तिनं हन्यात् । अपि स्तुयाद्राजानम् । अशक्यसंभावने अपि पर्वतं शिरसा भिन्द्यात् । अपि स्वारीयंकं भुञ्जीत । अपि समुद्रं दोर्भ्यां तरेत् । अलमिति किम् । निर्देशस्थायी मे देवदत्तो मन्ये गमिष्यति ग्राम अत्राहमिति । स्थानिनीति किम् । वसनि तेत् सुराष्ट्रेषु वन्दिष्यते अलमूर्जतम् । क्रियाश्रवतौ वत्स्यति भूते लृङ् भवति ।

तद्वाचि धौ वाऽयदि ॥ १३१ ॥

अलमीति वर्तते तच्छब्देन संभावनं परामृश्यते अलमर्थविशिष्टे सम्भावनवाचिनि धौ साधि वा लिङ् भवति । तच्छब्दाप्रयोगे पूर्वेण नित्यो लिङ् ।

हेतुफलयोर्लिङ् ॥ १३२ ॥

हेतुः कारणं फलं कार्यं हेतौ तत्काले च ध्वर्थे वर्तमानाद्धोः लिङ् भवति । अतिथींश्चेल्लभेत भृशमन्नं ददीत यदि गुरु पुंजां कुर्वीत स्वर्गमारोहेत् । वेत्यनुवर्तनात्पक्षे लृट् । अतिथींश्चेल्लप्स्यते भृशमन्नं दास्यते । लिङिति वर्तमाने पुनर्लिङ्ग्रहणं वत्स्यति यथा स्यादिह मा भूत् । वर्षतीति धावति । हन्तीति

पलायते । क्रियावृत्तौ वर्त्स्यति भूते च नित्यो लृङ् ।

इच्छार्थे लिङ्लोटौ ॥ १३३ ॥

इच्छार्थे धौ वाचि लिङ्लोटौ त्यौ भवतः । सर्वलकारापवादौ । वेति व्यवस्थितविभाषानुवर्तते । तेन कामप्रकाशने इदं विधानम् । इच्छामि भुञ्जीत भवान् । भुङ्क्तां भवान् । प्रार्थये अधीयीत भवान् । अधीतां भवान् । कामप्रकाशन इति किम् । इह मा भूत् इच्छन् करोति । नात्र प्रयोक्तुः कामप्रवेदनम् । उताप्योः पृष्टोक्तावित्यत आरभ्य यत्र केवलो लिङ्हेतुः शिष्यते तत्र क्रियावृत्तौ लृङ् नान्यत्रेति केचित् ।

तुमेककर्तृके ॥ १३५ ॥

इच्छार्थे एककर्तृके धौ वाचि तुम्भवति यस्मात्तुम् विधीयते प्रत्यासत्तेः तदपेक्षयैककर्तृकत्वम् । लिङ्लोटोरपवादोऽयम् । इच्छति भोक्तुम् । वाञ्छति कर्तुम् । कामयते कर्तुम् । एककर्तृक इति किम् । देवदत्तं भुञ्जानमिच्छति परः । इह कस्मान्न भवति । इच्छति कटं करोति चैनम् । नात्र करोतिं प्रतीच्छतेः सामर्थ्यं किन्तु कटं प्रति तेनान्वर्थं वाक्यसंज्ञाविरहात्तुम् न भवति ।

लिङ् ॥ १३६ ॥

इच्छार्थे एककर्तृके धौ वाचि तुम् भवति । पूर्वं तुना लिङ्लोटौ बाधितौ पुनर्लिङ्प्रसवार्थमेतत् । योगविभाग उत्तरार्थः । अधीयीयेति इच्छति । भुञ्जीयेति वाञ्छति । इति शब्दः क्रियाशब्दसंबन्धद्योतनार्थः ।

तेभ्यो भवति वा ॥ १३७ ॥

तेभ्य इच्छार्थेभ्यो धुभ्यः भवति काले वा लिङ् भवति । इच्छेत् । इच्छति । कामयेत । कामयते । उश्यात् । वष्टि ।

विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थने लिङ् ॥१३८॥

विधिराज्ञापनम् । निमन्त्रणं नियमेन करणम् । यदकरणे प्रत्यवाय इत्यर्थः । आमन्त्रणं स्वेच्छया करणम् । अधीष्टः सत्कारपूर्विका व्यापारणा । संप्रश्नः संप्रधारणा । प्रार्थनं याच्ञा । विध्यादिष्वर्थेषु लिङ् भवति । सर्वत्यापवादः । विध्यादिविशिष्टेषु कर्त्रादिषु त्यार्थेषु लिङ् भवति इत्यर्थः । कटं भवान् कुर्यात् । प्राणिनो भवान्न हिंस्यात् । निमन्त्रणे संध्यासु भवान् आवश्यकं कुर्यात् । आचारं भवानधीयीत । आमन्त्रणे इह भवानासीत इह भवान् शयीत । अधीष्टे अधीच्छामो भवान् व्रतं रक्षेत् । तत्वं भवान् गृह्णीयात् । संप्रश्ने किन्नु खलु भोः जैनेन्द्रमधीयीय । प्रार्थने भवति मे प्रार्थना व्याकरणमधीयीय तर्कशास्त्रमधीयीय । यदि विध्यादिषु प्रकृत्युपाधिषु लिङ् विधीयेत । इह विद्ध्यात् निमन्त्रयेत आमन्त्रयेत अधीच्छेत् । प्रकृत्येवं विध्यादयो विधीयन्ते इति लिङ् प्राप्नोति तस्माद्विध्यादयः कर्तृकर्मभावानां विशेषणानि तद्भावादिह लिङ् न भवति विद्धति निमन्त्रयते आमन्त्रयते अधीच्छति अत्र क्रियाया अवृत्तौ परत्वाल्लटा लृङ् बाध्यते ।

लोट् ॥ १३९ ॥

लोट् भवति विध्यादिविशिष्टेषु कर्त्रादिषु च विधौ । ग्रामं भवान्नागच्छतु । प्राणिनो भवान्न हिनस्तु । निमन्त्रणे संध्यासु भवानावश्यकं करोतु । आचारमधीताम् । आमंत्रणे । इह भवानास्ताम् । इह शेताम् । अधीष्टे अधीच्छामो भवान् व्रतं रक्षतु । तत्वं भवान् गृह्णातु । संप्रश्ने किन्नु खलु भो काव्यमध्येयै । प्रार्थने भवति मे प्रार्थना धर्मशास्त्रमध्येयै । योगविभाग उत्तरार्थः ।

प्रैषातिसर्गप्राप्तकाले व्याश्च ॥ १४० ॥

प्रेषणं प्रैषः । अतिसर्गः कामचारानुज्ञा । प्राप्तकाल प्राप्तकालता विशिष्टस्य कालस्यावसर इत्यर्थः । प्रैषादिष्व र्थेषु कर्त्रादिविशेषणत्वेन गम्यमानेषु व्यसंज्ञकास्त्या भवन्ति लोट् च । भवता खलु दानं दातव्य दानीयं देयम् । भवानिह प्रेषितः । भवानतिसृष्टः । भवतो हि प्राप्तः कालः । यद्यपि व्यसंज्ञा सामान्येन भावकर्मणोर्विहितास्तथापि सर्वापवादेषु लोटा बाध्येरन्निति पुनर्विधीयन्ते ।

लिङ् चोर्ध्वमौहूर्तिके ॥ १४१ ॥

प्रेषादयोऽनुवर्तन्ते । ऊर्ध्वं मुहूर्तादूर्ध्वः ऊर्ध्वमौहूर्तिकः । निपातात्स्वविधिरुत्तरपदस्य वैप् । ऊर्ध्वमौहूर्तिकेर्थे वर्तमानाद्धोः प्रैषादौ गम्यमाने लिङ् भवति चकाराद्धाश्च । उपरि मुहूर्तस्य भवान् खलु दानं दद्यात् । भवता खलु दानं दातव्यं दानीयं देयम् । केचिच्चकारेण यथाप्राप्तं समुच्चिन्वन्ति । तेषां लोडपि भवति । भवान् खलु दानं ददातु । भवान् हि प्रेषितः । भवानतिसृष्टः । भवतो हि प्राप्तः कालः ।

स्मे लोट् ॥ १४२ ॥

प्रेषादयो ऽनुवर्तन्ते । ऊर्ध्वमौहूर्तिक इति च स्मशब्दे वाचि प्रैषादिषु गम्यमानेषु ऊर्ध्वं मौहूर्तिकेर्थे लोड् भवति । व्यानां लिङश्चापवादः । ऊर्ध्वं मुहूर्तादूर्ध्वान् दान ददातु स्म । भवान् हि प्रेषितः । भवानतिसृष्टः । भवतो हि प्राप्तः कालः ।

अधीष्टे ॥ १४३ ॥

ऊर्ध्वमौहूर्तिक इति निवृत्तम् । अधीष्टे गम्यमाने

स्मशब्दे वाचि लोड्भवति लिङो बाधकः । अंग स्म राजन् दानं देहि व्रतं रक्ष ।

कालसमयवेलासु तुम् वा ॥ १४४ ॥

काल समय वेला इत्येतेषु वाक्षु धोः तुम् भवति वा । कालो भोक्तुम् । समयो भोक्तुम् । वेला भोक्तुम् वा । वावचनाद्यथाप्राप्तं च भवति । कालो भोक्तव्यस्य । प्रैषादिग्रहणमनुवर्तते । तेनेह न भवति । कालः पचति भूतानि कालः संहरति प्रजाः । कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ।

लिङ् यदि ॥ १४५ ॥

यच्छब्दप्रयोगे कालादिषु वाक्षु धोर्लिङ् भवति । तुमोऽपवादः । कालो यत्प्रजां कुर्वीत भवान् । समयो यद्भुञ्जीत भवान् । वेला यच्छयीत भवान् । केचिद्वेत्यनुवर्तयन्ति तेषां यथाप्राप्तमपि ।

तृच्याशचार्हे ॥ १४६ ॥

अर्हतीत्यर्हः । अर्हे कर्तरि गम्यमाने तृच्याशच भवन्ति लिङ् च । भवान् खलु कन्यायाः वोढा । भवता कन्या वोढव्या वहनीया वाह्या । भवान् खलु कन्यां वहेत् भवान् योग्यइत्यर्थः । अर्हेऽर्थे लिङा विधीयमानेन तृचो व्यानां च बाधा मा भूत् इति पुनर्विधानम् ।

आवश्यकाधमर्ण्ययोर्णिन् ॥ १४७ ॥

अवश्य भाव आवश्यकम् । मनोज्ञादिपाठाद्वुञ् । अधमं ऋणमस्य अधमर्णः तद्भाव आधमर्ण्यम् । आवश्यकाधमर्ण्य विशिष्टे ण्यार्थे कर्तरि णिन् भवति । अवश्यंहारी । मयूरव्यंसकादित्वात्समासविधिः । शतंदायी । सहस्रंदायी । निष्कदायी आधमर्ण्येवेन इति कर्मणि तायाः प्रतिषेधः ।

ण्याः ॥ १४८ ॥

आवश्यकाधमर्ण्ययोरिति वर्तते । आवश्यकाधमर्ण्ययोर्ण्यासंज्ञा भवन्ति । सर्वत्यापवादेन णिना ण्यसंज्ञा बाधिता इति पुनर्विधीयन्ते । भवता खलु अवश्यं धर्मः कर्तव्यः । करणीयः । कृत्यः । कार्यः । आधमर्ण्ये भवता खलु निष्को दातव्यः । देयः । योगविभाग उत्तरार्थः ।

शकि लिङ् च ॥ १४९ ॥

शक्नोतीत्यर्थनिर्देशः । शक्नोत्यर्थविशिष्टे ण्यर्थे लिङ् भवति चकाराद् ण्याश्च । भवता खलु विद्या अध्येतव्या । अध्ययनीया अध्येया । भवान् खलु विद्यामधीयीत । भवान् हि समर्थः लिङ् सर्वापवाद इति ण्यानामनुकर्षणं क्रियते । यदि शकीति प्रकृत्यर्थविशेषणम् । शक्नुयादित्यत्र लिङ् प्राप्नोति प्रकृत्यैवाभिहितत्वात् । शक्यर्थस्यानेन दोषः सामान्यविशेषभावेन भेदाभ्युपगमात् । यथा एषितुमिच्छति एषिषिषति ।

आशिषि लिङ्लोटौ ॥ १५० ॥

इष्टस्याशंसनमाशीः । अत एव निपातनादिह इकारः । आशीर्विशिष्टेर्थे वर्तमानाद्धोः लिङ्लोटौ भवतः । चिरं जीव्यात् । जीव्यास्ताम् । जीव्यासुः । जीवतु । आशिषीति किम् । जीवति यदि पथ्याशी ।

क्तिच्क्तौ खौ ॥ १५१ ॥

आशिषीति वर्तते । आशिष्यर्थे क्तिक्तौ ण्यौ भवतः खुविषये । चकारः न क्तिचि दीर्घश्चेति विशेषणार्थः । तनुतात् तन्तिः । तनुतात् सातिः । भवताद्भूतिः । कृतः क्तिचा विशेषविहितेन बाध्येरन्निति पुनर्विधीयन्ते । देवा एनं देयासुरिति देवदत्तः । देवा एनं श्रुण्वन्तु देवश्रुतः ।

माङि लुङ् ॥ १५२ ॥

माङि वाचि लुङ् भवति । सर्वलकारापवादः । मा कार्षीदधर्मम् । मा हार्षीत्परस्वम् । ङकारः प्रतिषेधवाचिनो माशब्दस्य ग्रहणं यथा स्यादित्येवमर्थः ।

सस्मे लङ् च ॥ १५३ ॥

सह स्मशब्देन वर्तते सस्मः । तस्मिन् माङि वाचि लङ् भवति लुङ् च । मा स्म क्रुध्यत् । मा स्म हरत् । म स्म हार्षीत् ।

इत्यभयनन्दिविरचितायां जैनेंद्रमहावृत्तौ द्वितीयाध्यायस्य तृतीयः पादः समाप्तः



॥ ॐनमः ॥

धुयोगे त्याः ॥ १ ॥

धुशब्देन ध्वर्थोत्र निर्दिष्टः । अभिधेये अभिधानस्योपचारात् । धूनां योगे सति अयथाकालोक्ता अपि त्याः साधवो भवन्ति । विश्वदृश्वा अस्य पुत्रो जनिता । कृतः कृतः स्वो भाविता । भाविकृत्यमासीत् विश्वदृश्वेति भूतकालः जनितेत्यनेन भविष्यत्कालेन साधुर्भवति । इहोपसर्जनभूतं सुवन्तं प्रधानभूतस्य तिङन्तस्य कालमनुवर्तते धोरितिवर्तमाने पुनर्धुग्रहणं अस्तिभूजनिपरिग्रहार्थम् । त्य इति वर्तमाने पुनस्त्यग्रहणं त्यमात्रपरिग्रहार्थम् । गोमान् भवितेति मत्वन्तस्य वर्तमानकालस्य अयथाकालत्येन साधुत्वम् ।

क्रियासमभिहारे लोट् तस्य हिस्वौ वा तध्वमोः ॥ २

क्रियासमभिहारविशिष्टे ध्वर्थे वर्तमानाद्धोर्लोट् भवति सर्वलकारापवादः । तस्य लोटः हि स्व इत्येतावादेशौ भवतः तध्वमोस्तु वा भवति । क्रियासमभिहारे लोडिति योगविभागः कर्तव्यः । ततस्तस्य हिस्वौ भवतः । किमेवं सति लब्धम् । अन्यत्र यौ लोडादेशौ हिस्वौ प्रसिद्धौ ताविह भवतः तेन सविधिदविधिव्यतिकरो न भवति । वातध्वमो रित्यत्र ध्वमा सहनिर्देशात्तशब्दस्य थादेशस्य वहोर्ग्रहणम् । लुनीहि लुनीही इत्येवाहं लुनामि । आवां लुनीवः । लुनीहि लुनीहि इत्येव त्वं लुनासि युवां लुनीथ । यूयं लुनीथ । तशब्दस्य तु वा भवति लुनीत लुनीत इत्येव यूयं लुनीथ । लुनीहि लुनीहि इत्येवायं लुनाति । लुनीतः । इमे लुनन्ति । भूते लुनीहि लुनीहि इत्येवाहमलाविषम् । आवामलाविष्व । वयमलाविष्म । एवं युष्मदन्ययोरपि । वत्स्यति लुनी

हिलुनोहीत्येव लविष्यामि । आवां लविष्यावः । वयं लविष्यामः । एवं युष्मदन्ययोरपि । अधीष्व अधीष्व इत्येवाहमधीये आवामधीवहे । वयमधीमहे । एवं युष्मदन्ययोरपि योज्यम् । ध्वमस्तु पक्षे श्रवणम् । अधीध्वमधीध्वमित्येवं यूयमधीध्वे । भूते अधीष्व अधीष्व इत्येवाहमध्यगीषि आवामध्यगीष्वहि । वयमध्यगीष्महि । एवं सर्वत्र । वत्स्यति अधीष्व इत्येवाहमध्येष्ये । आवामध्येष्यावहे । वयमध्येष्यामहे । एवं युष्मदन्ययोरपि । एवं शेषेष्वपि लकारेषु योज्यम् । द्वित्वमपेक्ष्य लोट् क्रियासमभिहारस्य द्योतकः योग इति वर्तते प्रत्यासत्तेर्यत एव लोट् विधीयते तस्यैवानुप्रयोगः कालात्मनादाद्येकत्वादीनामभिव्यक्तये क्रियते ।

प्रचये वा ॥ ३ ॥

प्रचयः समुच्चयः । स चैकस्मिन् द्विप्रभृतेरध्यावायः । प्रचये उपाधौ वा लोट् भवति तस्य हिस्वावादेशौ भवतः तध्वमोस्तु वा । अयं सर्वलकारप्राप्तौ विकल्पः । कर्मप्रचयो ग्रामम्ट । नगरम्ट गरिम्टइत्येवाहम्टामि आवाम्टावः । वयम्टामः । ग्राममट नगरमट गिरिमटइत्येव त्वम्टसि । युवाम्टथः । यूयम्टथ । तशब्दस्य तु वा ग्राममटत नगरमटत गिरिमटत इत्येव यूयमटथ । ग्राममट नगरमट गिरिमट इत्येवायम्टति इमौ अटतः । इमे अटन्ति । वावचनात् ग्राममटामि नगरमटामि गिरिमटामि इत्येवाहमटामि । आवाम्टावः । वयम्टामः । एवं युष्मदन्ययोरपि । एवं भूते वत्स्यति सर्वलकारेषु योज्यम् । दृभाम्यः जैनेन्द्रमधीष्व तर्कमधीष्व गणितमधीष्व इत्येवाहमधीये आवामधीवहे वयमधीमहे । जैनेन्द्रमधीष्व तर्कमधीष्व गणितमधीष्व इत्येव त्वमधीषे युवामधीयाथे यूयमधीध्वे । ध्वमस्तु वा जैनेन्द्रमधीध्व तर्कमधीध्वं गणितमधीध्वं इत्येव

यूयमधीध्वे । जैनेन्द्रमधीध्व तर्कमधीध्व गणितमधीध्व इत्येवायमधीते इमौ अधीयाते इमे अधीयन्ते। वावचनात् जैनेद्रमधीये गणितमधीये तर्कमधीये इत्येवाहमधीये । आवामधीवहे । वयमधीमहे । एवं भूते वर्त्स्यति सर्वलकारेषु योज्यम् । कर्तृसमुच्चये देवदत्तोऽद्धि जिनदत्तोऽद्धि गुरुदत्तोऽद्धि इत्येव वयमोदनमद्मः । देवदत्तोऽद्धि जिनदत्तोऽद्धि गुरुदत्तोऽद्धि इत्येव यूयमोदनमत्थ । देवदत्तोऽद्धि जिनदत्तो ऽद्धि गुरुदतोऽद्धि इत्येव इमे ओदनमदन्ति । कर्तृसमुच्चये द्विर्वचनं बहुवचनं वा भवति एकस्य समुच्चयाभावात् । क्रियासमुच्चये ओदनं भुङ्क्ष्व सक्तून् पिब धानाः खाद इत्येवाहमभ्यवहरामि आवामभ्यवहरावः वयमभ्यवहरामः । बहूनां क्रियाणां समुच्चये सामान्याप्रयोगोऽभिधानबशात् । एवं शंकरसमुच्चयोऽप्यूह्यः ।

निषेधेऽलंखल्वोः त्का ॥ ४ ॥

वेति वर्तते । अलं खलु इत्येतयोर्निषेधवाचिनोर्वाचोः धोः त्कात्त्यो भवति। अलं कृत्वा । अलं बाले रुदित्वा । क्त्वानामेवेति नियमात् वाक्सो न भवति । निषेध इति किम् । अलंकारः । अलंखल्वोरिति किम् । मा कार्षीः । वेत्येव । अलं रोदनेन । प्रकृत्यादिभ्य उपसंख्यानमिति भा ॥

माङो व्यतिहारे ॥ ५ ॥

माङो व्यतिहारेर्थे त्का भवति वा परकालत्वादप्राप्तः त्का विधीयते । अपमित्य याचते । अपमित्य हरति । वेर्मेङ इतीत्वम् । वेत्यधिकारात् याचित्वा अपमयते । हृत्वा अपमयते । मेङः कृतात्वस्य निर्देशो ज्ञापकः । नानुबन्धकृतं हलन्तत्वम् ।

परावरयोगे ॥ ६ ॥

पराबराभ्यां योगे गम्यमाने धोःत्का भवति वेति वर्तते ।

संबन्धिशब्दत्वात् परेण पूर्वस्य योगे अप्राप्ये नदीं पर्वतः । परया नद्या युक्तः पर्वतः प्रतीयते । अवरेण योगे परस्य त्का । अतिक्रम्य पर्वतं नदी । अवरपर्वतयोगविशिष्टा परा नदी प्रतीयते । वावचनाल्लडादयो भवन्ति । न प्राप्नोति नदीं पर्वतः । अतिक्रामति पर्वतं नदी ॥

परकालैककर्तृकात् ॥ ७ ॥

परः कालो यस्य सेयं परकाला क्रिया तया एककर्त्ता यस्य सामर्थ्यात् पूर्वकालक्रियाभिधायिनः स तथोक्तः । तस्माद्धोः त्का भवति । स्नात्वा भुङ्क्ते । स्नात्वा भुत्का व्रजति । एककर्तृकादिति किम् । भुक्तवति देवदत्ते गच्छति जिनदत्तः । परकालग्रहणं किम् । सामर्थ्यात् पूर्वकालक्रियाऽभिधायिनो यथा स्यादिह मा भूत् । भुङ्क्ते च पिबति च आस्ते च जल्पति च इहापि कथंचित् पूर्वकालत्वविवक्षास्ति । व्यादाय स्वपिति । संमील्य हसति । इति वेत्यधिकरात् । भुङ्क्ते शेते च ।

णम् चाभीक्ष्ण्ये ॥ ८ ॥

परकालैककर्तृकादिति वर्तते । मुहुर्मुहुर्वृत्तिराभीक्ष्ण्यम् । एतच्च प्रकृत्यर्थविशेषणम् । परकालैककर्तृकात् णमित्ययं त्येो भवति त्कात्यश्च । आभीक्ष्ण्ये भोजंभोज व्रजति । भुत्का भुत्का व्रजति । पायं पायं गच्छति । पीत्वा पीत्वा गच्छति । त्काणमौ द्वित्वमपेक्ष्याभीक्ष्ण्यं द्योतयतः । पूर्वेण त्कात्ये सिद्धे णमर्थं वचनम् । इह वेतिनिवृत्तम् । उत्तरत्र वाग्रहणात् ।

न यदनाकांक्षे ८ ॥

यद्यदे वाचि त्काणमौ न भवतः अनाकाङ्क्षे सति वाक्ये अनन्तरव्यवहितभेदाभावात् पूर्वसूत्रविहितो अनन्तरश्च त्का निषिध्यते णम् च । यदयं भुङ्क्ते ततो गच्छति । यदयं

शेते ततोऽधीते । अनाकाङ्क्ष इति किम् । यदयं भुक्त्वा व्रजति । अधीत एव ततः परम् । अत्र पूर्वोत्तरक्रियाभ्यां व्यतिरिक्तमध्ययनं काङ्क्षते ।

वाग्रेप्रथमपूर्वे ॥ १० ॥

आभीक्ष्ण्य इति निवृत्तम् । परकालैककर्तृकादित्यनेन त्कात्ये प्राप्ते विभाषेयम् । अग्रे प्रथम पूर्व इत्येतेषु वाक्षु त्कारणौ वा भवतः । अग्रेभोजं ततो ददाति । अग्रे भुक्त्वा ततो ददाति । प्रथमंभोजं ततो ददाति । प्रथमं भुक्त्वा ततो ददाति । पूर्वं भोजं ततो ददाति । पूर्वं भुक्त्वा ततो ददाति । क्त्वानामेवेत्यत्र एवकारोपादानात् केवलेनैवामा विहितेन वाक्सो भवति नान्यसहितेन । वावचनाल्लडादयोऽपि भवन्ति । अग्रे भुङ्क्ते ततो ददाति । प्रथमं भुङ्क्ते ततो ददाति । पूर्वं भुङ्क्ते ततो ददाति ।

कर्म्यण्याक्रोशे कृञः खमुञ् ११ ॥

कर्मणि वाचि आक्रोशे गम्यमाने कृञः खमुञ् भवति । चोरोसीत्येवमाक्रोशति चोरङ्कारमाक्रोशति । दस्युङ्कारमाक्रोशति । त्कापवादोऽयम् । आक्रोश इति किम् । चोरं कृत्वा गच्छति । नात्राक्रोशसंपादनार्थं चोरग्रहणम् ।

स्वादुमि णम् ॥ १२ ॥

स्वादुमीत्यर्थनिर्देशः । स्वाद्वर्थेषु वाक्षु कृञो णम् भवति । परकालैककर्तृकादिति वर्तते । स्वादुङ्कारं भुङ्क्ते । संपन्नकारं भुङ्क्ते । लवणंकारं भुङ्क्ते । स्वादुमीति णमसन्नियोगे मकारान्तता निपात्यते । खमुञि प्रकृते स्विदृत्यफेर्नुमच इति मुमा सिद्धमिति चेत् च्व्यन्तविवक्षायां अफेरिति प्रतिषेधः प्रसज्येत । खमुञ्येव मान्तनिपातनं कर्तव्यमिति चेत्

न चेष्यन्तार्थमेव तत्संभाव्येत णमि पुनर्निपातनं ङीनिवृत्त्यर्थं घोर्दीत्वनिवृत्त्यर्थं च । स्वादीकृत्वा यवागूं भुङ्क्ते । स्वादुं कारं भुङ्क्ते । च्वि विवक्षायामस्वादुं स्वादुं कृत्वा भुङ्क्ते स्वादुंकार भुङ्क्ते । च्वाविति दीत्वं प्रसज्येत । उत्तरार्थं च इह णमुग्रहणम् विभाषाधिकारात् ण्वकापि भवति । ण्वकादय आतुमो विधीयमानाः भावे भवन्ति । ननु स्वादुंकारं भुङ्क्ते देवदत्त इति णमा कर्तुरनुक्तत्वात् कर्तरि ता प्राप्ता नक्षितेत्यादिना ताः कर्तरि न भवति

अन्ययैवंकथमित्थंस्वनर्थात् ॥ १३ ॥

अन्यथा एवं कथं इत्येतेषु वाक्षु धुभ्यो णम् भवति अनर्थात् । येन विनापि यदर्थः प्रतीयते स तत्र प्रयुज्यमानोऽनर्थकः शब्दः तथाहि यावानेवार्थोऽन्यथा भुङ्क्ते इति तावानेव कृञ्प्रयोगेऽपि अन्यथाकारं भुङ्क्ते । एवंकारं भुङ्क्ते । कथंकारं भुङ्क्ते । अनर्थादिति किम् । अन्यथा कृत्वा शिरो भुङ्क्ते ।

यथातथयोरसूयाप्रत्युक्तौ ॥ १४ ॥

कृञोऽनर्थादिति वर्तते । यथातथाइत्येतयोर्वाचोः कृञोऽनर्थात् णम् भवति असूयाकृतायां प्रत्युक्तौ गम्यमानायाम् । कथं कृत्वा भवान् भुङ्क्ते इत्येवं पृष्टोऽसूयकः तं प्रत्याह यथाकारमहं भोक्ष्ये तथाकारमहं भोक्ष्ये किं तवानेन । अनर्थादिति किम् । यथाकृत्वाहं बलिं भोक्ष्ये किं तवानेन । असूयाप्रत्युक्ताविति किम् । यथाकृत्वाहं भोक्ष्ये तथाकृत्वाह भोक्ष्ये यदा द्रष्टव्यं भवता

कर्मण्यशेषे दृशिविदः ॥ १५ ॥

अशेषः कः साकल्यम् । इदं कर्मणो विशेषणं अशेषविशिष्टे कर्मणि वाचि दृशिविदोर्ण्वार्णम् भवति । साधुदर्शं प्रणमति

सर्वं साधुं प्रणमतीत्यर्थः । अतिथिवेदं भोजयति । यं यं विन्दति विन्ते वा तं सर्वं भोजयतीत्यर्थः । अशेष इति किम् । अतिथिं दृष्ट्वा भोजयति ।

यावति विन्दजीवः ॥ १६ ॥

यावच्छब्दे वाचि विन्दतिजीवत्योर्णम् भवति । यत्र पूर्वकालत्व संभवति तत्र क्त्वापवादः । यत्र न संभवति तत्रापूर्व एव विधिः । धुयोग इति वर्तते । यावद्वेदं भुङ्क्ते । यावल्लभते तावद्भुङ्क्ते इत्यर्थः । यावज्जीवमधीते । यावज्जीवति तावदधीते इत्यर्थः ।

चर्मोदरयोः पूरेः ॥ १७ ॥

कर्मणीति वर्तते । चर्म उदर इत्येतयोः कर्मणोर्वाचोः पूरयतेर्णम् भवति । चर्मपूरं शेते । उदरपूरं भुङ्क्ते ।

वर्षप्रमाणे ॥ १८ ॥

कर्मणीति वर्तते । कर्मणि वाचि पूरयतेः णम् भवति समुदायेन वर्षप्रमाणे गम्यमाने । गोष्पदपूरं वृष्टो देवः । शीतापूरंवृष्टो देवः । कथं गोष्पदप्रं वृष्टो देवः प्रातेरातः के कृते क्रियाविशेषणत्वेन नपुंसकलिंगं एतस्य कन्तस्यैव विभक्त्यं-तस्य ध्यादिषु च प्रयोगः साधुः । गोष्पदप्रेण गोष्पदप्री भवति गोष्पदप्रतरम् गोष्पदपूरं वृष्टो देवः इत्येवमादावुभयथा प्रयोग इष्यते णमन्तस्य घञन्तस्य च क्रियाविशेषणभावेन प्लुतिविभक्त्यन्तरे च विशेषः णमन्तस्यहि देश्यादिषु गोष्पदपूरं भवति गोष्पदपूरदेश्यम् गोष्पदपूरदेशीयं गोष्पदपूरंकल्पं गोष्पदपूरंतराम् । घञन्तस्य गोष्पदपूरीभवति गोष्पदपूरदेश्यं गोष्पदपूरदेशीयम् गोष्पदपूरकल्पम् । गोष्पदपूरतराम् ।

चेलेषु क्रोपेः ॥ १९ ॥

कर्मणीति वर्तते । चेलार्थेषु कर्मसु वाक्षुक्रोपयतेर्णम् भवति वर्षप्रमाणे गम्ये । चेलक्रोपं वृष्टो देवः । एवं वस्त्रक्रोपं वसनक्रोपम् ।

शुष्कचूर्णभक्षेषु पिषः ॥ २० ॥

कर्मणीति वर्तते । शुष्क चूर्ण भक्ष इत्येतेषु कर्मसु वाक्षु पिषेर्द्वोर्णम् भवति । शुष्कपेषं पिनष्टि तगरम् । शुष्कं पिनष्टीत्यर्थः । एवं चूर्णपेषं पिनष्टि । भक्षपेषं पिनष्टि । घञि सति क्रियाविशेषणे शुष्कस्य पेषं पिनष्टि इत्येवमादयः प्रयोगाः साधवः । इतः प्रभृति उपदंशो भायामित्यतः प्राक् यत एव धोर्णम् भवति तस्यैवानुप्रयोगोऽपि भवत्यभिधानवशात् ।

जीवाकृते ग्रहिकृञः ॥ २१ ॥

कर्मणीति वर्तते । जीव अकृत इत्येतयोः कर्मवाचिनोर्वोचोर्यथासंख्यं ग्रहि कृञ् इत्येताभ्यां णम् भवति । जीवग्राहं गृहीतः । अकृतकारं करोति

निमूले कषः ॥ २२ ॥

कर्मणीति वर्तते । निमूले कर्मणि वाचि कषेर्णम् भवति । निमूलकाषं कषति । घञि सति क्रियाविशेषणे निमूलस्य काषं कषति इत्यपि भवति ।

समूले हनश्च ॥ २३ ॥

कर्मणीति वर्तते । समूले कर्मणि वाचि हन्तेः कषेश्च णम् भवति । समूलघातं हन्ति । समूलकाषं कषति ।

करणे ॥ २४ ॥

हन इति वर्तते । करणे वाचि हन्तेर्णम् भवति । पाणिघातं कुड्यं हन्ति । पाणिना हन्तीत्यर्थः । पादघातं शिलां हन्ति यदा हिंसार्थो हन्तेर्विवक्षितः तदा हिंसार्थादेककर्मकादिति

णमपि ईळ्यधिं पूर्वविप्रतिषेधेन बाधित्वा अयमेव णम् । अभिघातं हंति चौरान् को ऽत्र विशेषः अनेन नित्यः स्वविधिः तस्यैव घोरनुप्रयोगश्च भवति ।

हस्ते वर्तिग्रहः ॥ २५ ॥

करण इति वर्तते हस्त इति अर्थनिर्देशः । हस्तवाचिनि करणे वाचि वर्तयतिगृह्णातिभ्यां णम् भवति । हस्तवर्तं वर्तयति हस्तेन वर्तयति इत्यर्थः । एवं पाणिवर्तम् । करवर्तम् । हस्तग्राहं गृह्णाति । हस्तेन गृह्णातीत्यर्थः । एवं पाणिग्राहं करग्राहम् ।

स्वेषु पुषः ॥ २६ ॥

करण इति वर्तते स्व इति स्वरूपस्य तद्विशेषाणां च ग्रहणम् । बहुत्वनिर्देशात् । स्ववाचिकरणवाचिनि पुषेर्द्वौर्णम् भवति । आत्मात्मीयज्ञातिधनानि स्वशब्देनेष्यन्ते । स्वपोषं पुष्टः । विद्यापोषं गोपोषं मातृपोषं पितृपोषं रैपोष पुष्णाति । सर्वत्र घञन्तेन णमन्तस्यार्थकथनं द्रष्टव्यम् । स्वेन पोषं पुष्टं इति स एव पुषिः कालसाधनभेदादन्यत्व गतः पुषिणा युज्यते यथा एषितुमिच्छति एषिषिषति इषिरिषिणा युज्यते ।

स्नेहने पिषः ॥ २७ ॥

करण इति वर्तते । स्निह्यतेऽनेनेति स्नेहनं स्नेहनवाचिनि करणे वाचि पिषेर्द्वौर्णम् भवति । घृतपेषं पिनष्टि । घृतेन पिनष्टीत्यर्थः । एवं तैलपेषम् । उदपेषम् । पेषमीत्युदकस्योदादेशः ।

बन्धोऽधिकरणे ॥ २८ ॥

अधिकरणे वाचि बध्नातेर्णम् भवति । चक्रबन्धं बद्धः । चक्रे बद्ध इत्यर्थः । एवं चारकबन्धम् । दृष्टिबन्धम् । गुप्तिबन्धम् । वध्यमानाधारे वाचि णम् भवति न बन्धाधारे । हस्ते बध्नातीति वेत्यधिकाराद्वा न भवति ।

खौ ॥ २८

खुविषये च बभ्रातेर्णम् भवति । चण्डालिकाबन्धं बंद्धुः । अट्टालिकाबन्धं बद्धुः । महिषिकाबन्धं मयूरिकाबन्धं क्रौञ्चबन्धं बद्धुः । णमन्ताः बन्धविशेषाणां संज्ञा एताः अर्थप्रदर्शन तु यथाकथं चित्करणेन वाचा अन्यथा वा दर्शनीयम् । अन्ये तु व्याचक्षते खुभूतो यो बन्धः तस्मिन् करणवाचिनि वाचि बभ्रातेर्णम् भवति ।

कर्त्रीजीवपुरुषयोर्नशिवहोः ॥ ३० ॥

जीव पुरुष इत्येतयोः कर्तृवाचिनोर्वाचोर्यथाक्रमं नशिवहिभ्यां णम् भवति । जीवनाशं नश्यति । जीवो नश्यतीत्यर्थः । पुरुषवाहं वहति । पुरुषो भूत्वा वहतीत्यर्थः । कर्त्रीरिति किम् । जीवेन नष्टपुरुषं वहन्ति । अत्र करणं कर्म च वाक् ।

उद्ध्वे शुषिपूरोः ॥ ३१ ॥

कर्त्रोरिति वर्तते । उद्ध्वंशब्दे कर्तृवाचिनि वाचि शुषिपूरि इत्येताभ्यां णम् भवति । उद्ध्वंशोषं शुष्कः । उद्ध्वंः इत्यर्थः । उर्द्धपूरं पूर्यते उर्ध्व पूर्यत इत्यर्थः ।

कर्मणि चेवे ॥ ३२ ॥

शब्दे कार्यस्यासंभवादिवार्थ उपमानं गृह्यते । इवशब्दार्थे वर्तमाने कर्मणि कर्तरि भूवादिधोर्णम् भवति कर्मणि । घृतनिधायं निहितः । घृतमिव निहित इत्यर्थः । एजं जीवितरक्षं रक्षितः । कर्तरि अक्रूरनाशं नष्टः । अक्रूर इव नष्ट इत्यर्थः । एवमजकनाशं नष्टः । चूडकनाशं नष्टः । पिषादिषु यथाविध्यनुप्रयोगो न वक्तव्यः । धुयोग इति वर्तते तत्र प्रत्यासत्तेरभिधानवशाद्वा घृत एव धोर्णम् तस्यैवानुप्रयोगः ।

उपदंशो भायाम् ॥ ३३

उपपूर्वाद्दंशेर्भान्ते वाचि णम् भवति धुयोग इति च

वर्तते । एककर्तृकादिति च पूर्वकालत्वं सम्भवतः संबन्धनीयम् । मूलकोपदंशं भुङ्क्ते । मूलकेनोपदंशं भुङ्क्ते । वा भादीतिविभाषया वाक्सः । इत ऊर्ध्वं यानि वाक्संज्ञकानि वक्ष्यन्ते तानि भादिग्रहणेन गृह्यन्ते सर्वत्रास्मिन् प्रकरणे वेत्यनुवर्तते तेन त्कापि भवति । मूलकेनोपदंश्य भुङ्क्ते । कर्मणः साधकतमत्वविवक्षायां भा भवति । अथवा उपदंशिगुणस्य भुञ्जेरेतत्करणम् ।

हिंस्यर्थादेककर्मकात् ॥ ३४ ॥

भायामिति वर्तते । हिंसार्थेभ्यो धुभ्योऽनुप्रयोगेणैककर्मकेभ्यः भांते वाचि णम् भवति । दण्डाघातं गाः सादयति । दण्डेनाघातम् । करणे इत्यनेन हन्तेर्घः पूर्वनिर्णयेन णम् विदितस्तस्यैवानुप्रयोगो द्रष्टव्यः । हन्तेरन्यदपीहोदाहरणम् । दण्डाताडं गाः कालयति । दण्डेनाताडम् । खड्गप्रहारं शत्रुन् विजयते । खड्गेन प्रहारम् । एककर्मकादिति किम् । दण्डेनाहत्य भूमिं गोपालको गाः सादयति ।

ईषि चोपपीडरुधकर्षः ॥ ३५ ॥

व्रजोपरोधम् । व्रजे उपरोधम् । व्रजेनोपरोधम् । उपाण्युपकर्षं धानाः पिनष्टि । पाणावुपकर्षम् । पाणिनोपकर्षम् ।

प्रमाणासत्त्योः ॥ ३६ ॥

ईषि भायां चेति वर्तते । प्रमाणमायाममानम् । आसत्तिः सन्निकर्षः । इबन्ते भान्ते वाचि धोर्णम् भवति प्रमाणासत्त्योर्गम्यमानयोः । ह्रस्वङ्गुलोत्कर्षं गडिका च्छिनत्ति । त्र्यङ्गुलोत्कर्षम् । त्र्यङ्गुलेनोत्कर्षम् । आसत्तौ केशग्राहं युध्यन्ते । केशेषु ग्राहं केशैर्ग्राहं सन्निकृष्टं युध्यन्ते इत्यर्थः । एवं अस्यपनोदं युध्यते असिष्वपनोदम् । असिभिरपनोदम् । हस्तग्राहम् । हस्तेषु ग्राहम् । हस्तैर्ग्राहम् ।

ह्वर्यपादाने ॥ ३७ ॥

त्वरणं त्वरा त्वरीति सौत्रमाख्यम् । त्वरायां गम्यमानायां अपादाने वाचि घोर्णम् भवति । शय्योत्थायं धावति । शय्याया उत्थाय । मुखप्रक्षालनाद्यवश्यकार्यं कृत्वा त्वरत इत्यर्थः । एवं स्तनरंध्रापकर्षं पयः पिबति । स्तनरंध्रादपकर्षम् । खाट्टापकर्षं मयूरान् भक्षयति । भाण्ट्टादपकर्षम् । वेत्यनुवर्तनात् शय्याया उत्थाय धावति । त्वरीति किम् । आसनादुत्थाय गच्छति ।

हृपि ॥ २८ ॥

त्वरीति वर्तते । हृवन्ते वाचि त्वरायां गम्यमानायां घोर्णम् भवति । यष्टिग्राहं युध्यन्ते । यष्टिं ग्राहम् त्वरया युद्धप्रहरणमनपेक्ष्य यष्टिमादाय युध्यते इत्यर्थः । एवं पटापकर्षं धावति पटमपकर्षम् । त्वरीत्येव खड्गं गृहीत्वा युध्यन्ते ।

स्वाङ्गे ध्रुवे ॥ ३९ ॥

हृपीति वर्तते । यस्मिन्विनष्टेऽपि प्राणिनां मरणं न भवति तद्ध्रुवं स्वाङ्गम् । तस्मिन्निवन्ते वाचि घोर्णम् भवति । अक्षिनिकोचं जल्पति । आक्षणीनिकोचम् । भ्रूक्षेपं जल्पति । भ्रुवं क्षेपम् अंगुलिनिकोटं जल्पति । अंगुलिं निकोटं जल्पति । ध्रुव इति किम् । शिर उत्क्षिप्य जल्पति । अद्रव्यं मूर्तिमत्स्वांगं प्राणिस्थमविकारजम् । अतत्स्थं तत्र दृष्टं च तेन चेत्तत्तथा युतम् । आद्यैश्चतुर्भिर्विशेषणैर्लालाबुद्धिफलशेफादिरहितप्राणिस्थं वस्तु स्वांगमुक्तम् । अतत्स्थं तत्रदृष्टं चेत्यनेन भूमिपतितकेशादिपरिग्रहः । तेन चेत्तत्तथायुतमित्यनेन काष्ठादिप्रतिमायां स्थितं पाण्यादि संगृहीतम् ।

सक्लेदे ॥ ४० ॥

इपीति वर्तते स्वांग इति वा । सह क्लेशेन दुःखेन वर्त्तते इति सक्लेशं क्लिश्यमानमित्यर्थः । इबन्ते सक्लेशे स्वाङ्गे वाचि धोर्णम् भवति । ध्रुवार्थोऽयमारम्भः । उरःप्रतिपेषं युध्यन्ते । उरांसि प्रतिपेषम् । उरांसि पीडयतो युध्यन्ते इत्यर्थः । एवं शिरःप्रतिपेषम् । शिरांसि प्रतिपेषम् ।

विशिपतिपदिस्कंदो व्याप्यासेव्ययोः ॥ ४१ ॥

इपीति वर्तते । विश्यादिभिः कात्स्न्येन व्यापनीय द्रव्यं व्याप्यम् । क्रियारूपं तात्पर्येण आसेवनीयमासेव्यम् । क्रियाधारभूतमुपचारात् द्रव्यमप्यासेव्यम् । विशि पति पदि स्कन्द इत्येतेभ्यो धुभ्यः व्याप्ये आसेव्ये च वाचि णम् भवति । गेहानुप्रवेशमास्ते । कृत्या व्यापनस्यासेवनस्य वाक्यत्वात् द्वित्वं न भवति । वाक्यपक्षे व्याप्यमानस्य द्रव्यस्य द्वित्वम् । आसेव्यविवक्षायां तु मुख्यस्यासेव्यस्य क्रियारूपस्य द्वित्वम् । गेहंगेहमनुप्रवेशमास्ते । गेहमनुप्रवेशमनुप्रवेशमास्ते । गेहानुप्रपातमास्ते । गेहंगेहमनुप्रपातम् । गेहमनुप्रपातमनुप्रपातमास्ते । गेहमनुप्रपादमास्ते । गेहंगेहमनुप्रपादम् । गेहमनुप्रपादमनुप्रपादम् । गेहावस्कन्दमास्ते । गेहंगेहमवस्कंदम् । गेहमवस्कंदमवस्कंदम् । वेत्यधिकारात् गेहंगेहमनुप्रविश्य गेहमनुप्रविश्यानुप्रविश्यास्ते । वीप्सायामाभीक्ष्ण्ये च द्वित्वम् । व्याप्यासेव्ययोरिति किम् । गेहमनुप्रविश्य भुङ्क्ते । णम् चाभीक्ष्ण इति यद्यप्यासेव्ये णम् सिद्धः । तथापि वाक्यविकल्पार्थमिदम् ।

तृष्यस्वोः क्रियान्तरे काले ॥ ४२ ॥

इपीति वर्तते । इबन्ते कालवाचिनि वाचि तृषि अस्वि इत्येताभ्यां णम् भवति क्रियान्तरार्थे यद्यनुप्रयुज्यमानक्रियापेक्षया क्रियांतरे वृत्तिरित्यर्थः । दुग्धहापतर्षं गाः पाययति ।

द्व्यहमपतर्षम् । त्र्यहापतर्षम् । त्र्यहमपतर्षम् । द्व्यहात्यास गाः पाययति । द्व्यहमत्यासम् । त्र्यहमत्यासम् । कालाध्वन्यविच्छेद इतीप् । तृष्यस्वेरिति किम् । द्व्यहमुपोष्य भुङ्क्ते । क्रियांतर इति किम् । अहरत्यस्य गतः । अत्रास्यतिर्न क्रियान्तरे वर्तते किंतु रानावेव । काल इति किम् । पञ्च पूलान् अत्यस्य तिलान् भक्षयति ।

नाम्न्यादिशिग्रहः ॥ ४३ ॥

इपीति वर्तते । इबन्ते नामशब्दे वाचि आदिशिग्रहिभ्यां णम् भवति । नामादेशमाचष्टे । नामान्यादेशम् । नामग्राहमाकारयति । नामानि ग्राहम् ।

भावनिष्ठोक्तौ कृञः ट्काणमौ ॥ ४४ ॥

क्विसंज्ञके वाचि अनिष्ठोक्तौ गम्यमानायां कृञः ट्काणमौ भवतः । वेत्यधिकारात् ट्काट्ये सिद्धे पुनः ट्काग्रहण ट्क इत्यनेन वृत्तिविकल्पार्थम् । आदीति तत्र वर्तते तेनोत्सर्गो ट्काट्ये सविकल्पो न स्यात् । ब्राह्मण पुत्रस्ते जातः किं तर्हि वृषल नीचैःकृत्याचष्टे । नीचैः कृत्वा । नीचैःकारम् । उच्चैर्नाम प्रियमाख्येयम् । नीचैराख्यायमानमनिष्ठ भवति । ब्राह्मण कन्या ते गर्भिणी । तर्हि वृषल उच्चैःकृत्याचष्टे । उच्चैःकृत्वा-उच्चैःकारम् । कन्यागर्भः उच्चैराख्येयमानोऽनिष्टः । अनिष्टोक्ताविति किम् । उच्चैःकृत्याचष्टे पुत्रस्ते जात ।

तिरश्चयपवर्गे ॥ ४५ ॥

अपवर्गः समाप्तिः तिर्यच्छब्दे वाचि अपवर्गे गम्यमाने कृञः ट्काणमौ भवतः । तिर्यक्कृत्य गतः । तिर्यक्कृत्वा । तिर्यक्कारम् । समाप्य गत इत्यर्थः । अपवर्ग इति किम् । तिर्यक् कृत्वा काष्ठं गतः । तिरश्चीति तिर्य्यक्शब्दानुकरणनिर्देशः । प्रकृतिवदनुकरणं भवतीति रूपसिद्धिः ।

स्वङ्गेतस्त्ये कृभुवः ॥ ४६ ॥

तस्त्येो यस्मात्तत्तथोक्तम् । तस्त्ये स्वाङ्गे वाचि कृ भू इत्येताभ्यां त्कारणौ भवतः । भिन्नयोगनिर्दिष्टत्वाद्यथासंख्यमत्र न भवति । सुखतःकृत्य गतः । सुखतः कृत्वा । सुखतःकारम् । पृष्ठतःकृत्य पृष्ठतः कृत्वा । पृष्ठतःकारम् । सुखतोभूय । सुखतोभूत्वा । सुखतोभावम् । पृष्ठतोभूय । पृष्ठतोभूत्वा । पृष्ठतोभावम् । अपादानेदीयरुहोरिति आदिभ्य उपसंख्यानमिति वा तसिः । स्वाङ्ग इति किम् । सर्वतःकृत्वो । तस्त्यग्रहणं किम् । सुख्वीकृत्य गतः । त्यग्रहणं किम् । सुख्ये तस्यति सुख्यतः असुखतसं सुखतसं कृत्वा सुखतःकृत्य ।

नाधार्थत्ये च्व्यर्थे ॥ ४७ ॥

नार्थो धार्थश्च त्यो यस्मात्स तथोक्तः । नार्थत्ये धार्थत्ये च शब्दे च्व्यर्थे वाचि कृभू इत्येताभ्यां त्कारणौ भवतः विनाकृत्य गतः । विनाकृत्वा । विनाकारम् । विनाभूय । विना भूत्वा । विनाभावम् । अनाना नाना कृत्य गतः । नानाकृत्वा । नाना कारम् । नानाभूय । नानाभूत्वा । नाना भावम् विनञ्भ्यां नानाञौ नसह इति नानाञौ भवतः । धार्थत्ये अद्विधा द्विधा कृत्य गतः । द्विधाकृत्वा । द्विधाकारम् । द्विधाभूय । द्विधाभूत्वा । द्विधाभावम् । अद्वैधं द्वैधं कृत्य गतः । द्वैधं कृत्वा । द्वैधंकारम् । द्वैध भूय । द्वैधं भूत्वा । द्वैधं भावम् । अद्वेधा द्वेधा कृत्यगतः । द्वेधाकृत्वा । द्वेधाकारम् । द्वेधाभूय । द्वेधाभूत्वा । द्वेधाभावम् । संख्यायाविधार्थेधा । द्वित्रेमञ् । एकधा । एकध्यंविधातंअर्थग्रहणं स्वरूपमात्रनिरासार्थम् । त्यग्रहणं किम् । नाधार्थे वाचीत्युच्यमाने इहापि स्यात् । अहिरुक् हिरुक्कृत्वा पृथक्कृत्वा च्विर्विकल्पेन विधास्यते ।

ऽव्ययार्थमात्रमत्र विवक्षितं न च्विः । अर्थे इतिकिम् । नाना कृत्वा काष्ठानि गतः ।

तूष्णीमि भुवः ॥ ४८ ॥

तूष्णीम्शब्दे वाचि भूवृत्येतस्मात् त्कारणौ भवतः । तूष्णींभूयास्ते । तूष्णींभूत्वा । तूष्णींभावः ।

अन्वच्यानुलोम्ये ॥ ४९ ॥

आनुलोम्यमनुकूलता । अन्वच्छब्दे वाचि आनुलोम्ये गम्यमाने भुवः त्कारणौ भवतः । अन्वग्भूत्वा । अन्वग्भावम् । आनुलोम्य इति किम् । अन्वग्भूत्वा आस्ते । पश्चाद्भूत्वेत्यर्थः । अन्वचीति निर्देशः प्रकृतिवदनुकरणमिति न्यायात् ।

शकवृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थे तुम् ॥ ५० ॥

शकादिषु अस्त्यर्थेषु च धुषु वाक्षु धोस्तुम् भवति । शक्नोति भोक्तुम् । वृष्णोति भोक्तुम् । जानाति भोक्तुम् । ग्लायति भोक्तुम् । घटते भोक्तुम् । आरभते भोक्तुम् । लभते भोक्तुम् । प्रक्रमते भोक्तुम् । सहते भोक्तुम् । अर्हति भोक्तुम् । अस्त्यर्थेषु अस्ति भोक्तुम् । भवति भोक्तुम् । विद्यते भोक्तुम् । क्रियायां तदर्थायां वाचि तुम् विहितः अतदर्थायामपि यथा स्यादित्यारम्भः ।

पर्याप्तिवचनेऽलमर्थे ॥ ५१ ॥

पर्याप्तिः प्रभूतत्वं सामर्थ्यंच अलमर्थेन विशेष्यमाणत्वात्सामर्थ्यमेवावतिष्ठते । पर्याप्तिवचनेष्वलमर्थेविशिष्टे वाक्षु धोस्तुम् भवति । पर्याप्तो भोक्तुम् । समर्थो भोक्तुम् । प्रभुर्भोक्तुम् । अलं भोक्तुम् । पारयति भोक्तुम् । इदमप्यस्योदाहरणं युक्तम् । पुनरिदं विचारयितुं वाभादीति वसो न भवति ।

अमैवेति तत्र वर्तते । पर्याप्तिवचन इति किम् । अलङ्करुते कन्याम् । अलं रुदित्वा । समर्थेष्विति वक्तव्ये गुरुकरण किम् । सामर्थ्यमात्रे मा भूत् । शक्त्या भुङ्क्ते । बलेन भुङ्क्ते । असमर्थे इति किम् । पर्याप्तं भुङ्क्ते । प्रभूतं भुङ्क्ते । अन्यूनं भुङ्क्ते । पूर्वसूत्रे शक्तिः सौकर्ये वर्तते नात्रसमर्थे ।

कर्तरि कृत् ॥ ५२ ॥

कर्तरि कारके कृत्संज्ञास्त्या भवन्ति । अनिर्दिष्टार्थास्त्याः स्वार्थे भावे प्राप्ताः । कारकः । कर्ता । ये कृतः कर्तरि नेष्टाः तेषां करणाधिकरणयोर्युडित्येवमादिरपवाद उक्तः ।

भव्यगेयप्रवचनीयोपस्थानीयजन्याल्पाठ्या-पात्या वा ॥ ५३ ॥

भव्य इत्येवमादयः शब्दाः कर्तरि वा निपात्यन्ते । तयोर्व्यक्तखार्थाइत्यस्मिन् प्राप्ते पक्षे कर्तरि विधानम् । भवत्यसौ भव्यः । भव्यमनेनेति वा । गेयो माणवकः षडङ्गस्य । गेयो माणवकेन षडङ्गः । प्रवचनीयो गुरुः शास्त्रस्य । प्रवचनीयं शास्त्रं गुरुणा । उपस्थानीयः शिष्यो गुरोः । उपस्थानीयो गुरुः शिष्येण । जायते असौ जन्यः । जन्यमनेन । जनिवध्योरित्यैप् प्रतिषेधः । अथवा शकिसहश्चेति चकारेण अनेर्यः । आप्नुवतेऽसौ आप्नाव्यः । आप्नाव्यमनेन । आपततीत्यापात्यः । आपात्यमनेन ।

लः कर्मणि च भावे चाधेः ॥ ५४ ॥

ल इति लडादीनां नवानामुत्सृष्टानुबन्धनां सामान्येन ग्रहणं जसा च निर्देशः । लकाराः सकर्मकेभ्यो धुभ्यः कर्मणि कर्तरि च कारके भवन्ति भावे कर्तरि च धिसंज्ञेभ्यः । कर्मणि । क्रियते कटः । गम्यते ग्रामः । कर्तरि करोति कटम् ।

गच्छति ग्रामम् । घेर्भावे । आस्यते भवता । सुप्यते । कर्तरि आस्ते भवान् । स्वपिति भवान् । लौडीचेति वक्तव्ये प्रपञ्चेन निर्देशः किमर्थः सकर्मकेभ्यो लो भावे मा भूवन् ।

तयोर्व्यक्तखार्थः ॥ ५५ ॥

तयोर्भावकर्मणोः व्यसंज्ञाश्च क्तश्चखार्थाश्च भवन्ति । कर्तरि कृदित्यस्यायमपवादः । कर्मणि कर्तव्यः कटो भवता । भोक्तव्यः ओदनो भवता । भावे आसितव्यं भवता । शयितव्यं भवता । क्तः कर्मणि कृतः कटो भवता । सुकरः कटो भवता । सुपानं पयो भवता । दुःपानं पयो भवता । भावे स्वासं भवता । दुरासं भवता । सुग्लानं भवता । दुग्लानं भवता । आत्मकर्मविवक्षायां व्यक्तखार्थप्रयोगविषये सकर्मकाऽप्यविवक्षितकर्मकत्वेनाकर्मकात्तः । तेन भावे व्यादयः । भेक्तव्यं कुसूलेन स्वयमेव । भावकर्मग्रहणे तु वर्तमाने तयोरिति ग्रहणं यथाविधिप्रतिपादनार्थं सकर्मकेभ्यः कर्मणि अकर्मकेभ्यो भावे इति ।

कर्तरि चारम्भे क्तः ॥ ५६ ॥

आरम्भः आद्यः क्रियाक्षणः आरम्भे यो धुर्वर्तते तस्माद्यः क्तः स कर्तरि भवति यथाप्राप्तं च भावकर्मणोः । प्रकृतो भवान् कटम् । प्रकृतः कटो भवता । प्रकृतं भवता । प्रभुक्तो भवानोदनम् । प्रभुक्तः ओदनो भवता । प्रभुक्तं भवता । धिग्भवस्तु धिगत्यर्थाच्चेति वक्ष्यति । आद्यक्रियाक्षणकाले । कटो नाभिनिर्वृतः तस्योपचारात् भूतकालेन प्रकृतशब्देन सामानाधिकरण्यम् ।

श्लिषशीङ्स्थासवसजनरुहजृषश्च ॥ ५७ ॥

श्लिषादिभ्यः कर्तरि क्तो भवति यथाप्राप्तं च भावकर्मणोः ।

धिगत्यर्थाश्चेतिसिद्धे इह सकर्मकार्थमुपादानम् । इदमेव ज्ञापकम् । अकर्मका अपि भवन्ति । आश्लिष्टःकन्यां देवदत्तः । आश्लिष्टा कन्या देवदत्तेन । आश्लिष्टं देवदत्तस्य । अतिशयितो गुरुं भवान् । अतिशयितो भवता गुरुः । अतिशयितं भवतः । उपस्थितो गुरुं भवान् । उपस्थितो भवता गुरुः । उपस्थित भवतः । उपासितो गुरुं भवान् । उपासितो भवता गुरुः । उपासित भवतः । अनूषितो गुरुं भवान् । अनूषितो भवता गुरुः । अनूषितं भवतः । अनुज्ञातो माणवको माणविकाम् । अनुज्ञाता माणविका माणवकेण । अनुज्ञातं माणवकस्य । आरूढो वृक्षं देवदत्तः । आरूढो वृक्षो देवदत्तेन । आरुढं देवदत्तस्य । अनुजीर्णो वृषलीं देवदत्तः । अनुजीर्णा वृषली देवदत्तेन । अनुजीर्णं देवदत्तस्य । रुहेरगत्यर्थत्वादन्यदपि गत्यर्थकार्यं न भवति । आरोहयति वृक्षं देवदत्तेन । कर्मसञ्ज्ञा न भवति ।

धिगत्यर्थाश्च ॥ ५८ ॥

धिसंज्ञेभ्यः गत्यर्थेभ्यश्च धुभ्यः क्तस्थयः कर्तरि भवति यथाप्राप्तं च । आसितो भवान् । आसितं भवता । शयितो भवान् । शयितं भवता । गत्यर्थेभ्यः गतो भवान् ग्रामम् । गतो भवता ग्रामः । गतं भवता । यातो भवान् । यातो भवता ग्रामः । यात भवता । कालभावाध्वभिः कर्मभिः सकर्मकवद्भवति ॥ वत्करणात् स्वाश्रयमपि भवति । अतस्त्रैरूप्यम् । सुप्तो भवान् मासम् । सुप्तो भवता मासः । सुप्त भवता मासम् । ओदनपाक सुप्तो भवान् । ओदनपाकः सुप्तो भवता । ओदनपाकं सुप्तं भवता । क्रोशं सुप्तो भवान् । क्रोशः सुप्तो भवता । क्रोशं सुप्त भवता ।

अधिकरणे चाद्यर्थाच्च ॥ ५८ ॥

क्त इति वर्तते अद्यर्था अभ्यवहारार्थाः । अद्यर्थेभ्यो धिगत्यर्थेभ्यश्च क्तोऽधिकरणे भवति कर्तरि वाकर्मणि । यथाप्राप्तं च कर्तृकर्मभावेषु अद्यर्थेभ्यः अधिकरणकर्मभावेषु क्तः अधिकरणे अस्मिन्निमे भुञ्जते स्म इदमेषां भुक्तम् । इदमेषां पीतम् । क्तस्याधिकरण इति कर्तरि ता । कर्मणि एभिर्भुक्त ओदनः । एभिः पीतं मधु । भावे भुक्त एभिः । पीतमेभिः । धिग्भ्यः अधिकरणकर्तृभावेषु क्तः अधिकरणे इदमेषामासितम् । आसितो भवान् । आसित भवता । गत्यर्थेभ्य अधिकरणकर्तृकर्मभावेषु क्तः अधिकरणे इदमेषां यातम् । यातो देवदत्तो ग्रामम् । यातो देवदत्तेन ग्रामः । यातं देवदत्तेन । इह विभुक्ताः भ्रातरः पीता गावः इति मत्वर्थीयोऽकारः ।

दासगोघ्नौ संप्रदाने ॥ ६० ॥

दासगोघ्न इत्येतौ शब्दौ निपात्येते संप्रदाने कारके दासन्ति तस्मै दासः । गां हन्ति अस्मै आगताय गोघ्नोऽतिथिः । टगत्र निपात्यः । स्त्रियां गोघ्नी देवदत्ता ।

भीमादयोऽपादाने ॥ ६१ ॥

भीमादयः शब्दाः अपादाने कारके ज्ञातव्याः । भीमादयः शब्दा अन्यत्र साधिताः कारकनियमार्थमिह तेषां पाठः । बिभेत्यस्मादिति भीमः । भीष्मः । भयानकः । वरुः । प्रस्कन्दनम् । प्रयतनम् । समुद्रवन्त्यस्मात् समुद्रः । अवः । अवृक् । भृष्टिः । रक्षा । शंकसंति तस्मात् शंकसुकः । खलिनः ।

उणादयोऽन्यत्राभ्याम् ॥ ६२ ॥

उणादयस्त्या आभ्यां संप्रदानापादानाभ्यामन्येषु कारकेषु भवन्ति । करोतीति कारुः । वृश्चति तं वृक्षः । कर्षितो

ऽमौ कषिः । ततोऽसौ तन्तुः । वृत्तं तत्र वर्त्म । चरितं तत्रेति चर्म । भसितं तत्रेति भस्म । ऋचन्ति तया ऋक् ।

लस्य ॥ ६३ ॥

अकार उच्चारणार्थः । लस्येत्ययमधिकारः । यदित ऊर्ध्वमनुक्रमिष्यामः लस्य स्थाने तद्वेदितव्यम् । नव लकाराः पञ्च टितश्चत्वारो ङितः लट् लिट् लुट् लृट् लोट् लङ् लिङ् लुङ् लृङ् एषामनुबन्धापायेन लकारमात्रं स्थानित्वेनाधिक्रियते । त्य इति वर्तते । धोरिति च । धोर्विहितस्य त्यस्य लकारस्य ग्रहणात् लभते चूडाल इत्येवमादि परिहृतम् ।

मिब्वस्मस्सिप्यस्थतिप्तस्झोड्वहिमहियासाथांध्वंतातांझङ् ॥ ६४ ॥

लस्य स्थाने मिबादयः आदेशा भवन्ति । पकारः गोऽपिदिति विशेषणार्थः । इटट्कारोरलञ्फोट इति विशेषणार्थः । झडो ङकारः प्रत्याहारार्थः । पचामि । पचावः । पचामः । पचसि । पचथः । पचथ । पचति । पचतः । पचन्ति । टितां दविषये आदेशान्तराणि वक्ष्यन्ते । लिटो मानां णलादयः आदेशाः वक्ष्यन्ते । लुट् पक्तास्मि । पक्तास्वः । पक्तास्मः । इत्येवमादि ज्ञेयम् । लृट् पक्ष्यामि । पक्ष्यावः । पक्ष्यामः । लोट आदेशाः वक्ष्यन्ते ङितां लकाराणां सविषये च इह तानुदाहरिष्यामः । लङ् । अपचे । अपचावहि । अपचामहि । वक्ष्यते लिङ । लुङ् । अपक्षि । अपक्ष्वहि । अपक्ष्महि । लृङ् । अपक्ष्ये । अपक्ष्यावहि । अपक्ष्यामहि ।

टिट्टेरे ॥ ६५ ॥

टितां लकाराणां ये दास्तेषां टेरेत्वं भवति । यत्र एक एवाच् तत्र व्यपदेशिवद्भावाददन्तत्वमुक्तम् । यत्र च तदादिरन्ये

नास्ति तत्रापि व्यपदेशिवद्भावात्तदादित्वम् । पचे । पचावहे । पचामहे । थासःसे इति वक्ष्यति। पचसे । पचेथे । पचध्वे । पचते । पचेते । पचन्ते । लिट् । पेचे । पेचिवहे । पेचिमहे । लुट् । पक्ताहे । पक्तास्वहे । पक्तास्महे । लृट् । पक्ष्ये । पक्ष्यावहे । पक्ष्यामहे । लोटो वक्ष्यति प्रकृतानां सिङां दस्य टेरेत्वम् । तेनेह न भवति पचान इति ।

थासः से ॥ ६५ ॥

टिद्ग्रहणमनुवर्तते । टितो लकारस्य थासः स इत्ययमादेशो भवति । पचसे । पेचिषे पक्तासे । पक्ष्यसे । एशिरेसेविधानेषु किं स्यादेत्वे प्रयोजनम् । आदेशे तु कृते मा भूत् ज्ञापकं भवितादिषु ।

लिटस्तझयोरेशिरेच् ॥ ६६ ॥

लिटादेशयोस्त झ इत्येतयोः एश् इरे इत्येतावादेशौ भवतः । शकारः सर्वादेशार्थः परस्यादिर्मा भूत् । पेचे । पेचिरे । नेमे । नेमिरे ।

मानां णल्वमथाथुसणलतुसुसः ॥ ६७ ॥

लिट इति वर्तते । लिटो माना स्थाने यथासंख्यं णलादयो नव आदेशा भवन्ति । णकारः ऐवर्थः । लकारः सर्वादेशार्थः । ञ इति द्वयोरकारयोः प्रश्लेषनिर्देशः सर्वादेशार्थः । अत्यस्याकारस्याकारवचने प्रयोजनाभावात् सर्वादेश इति चेत् समसंख्यत्वं प्रयोजनं संमाठ्येत । अथवा थेारिति कानिर्देशात् परस्यादेः थकारस्याकारः । पपाच । पेचिव पेचिम । पपक्थ । पेचिथ । पेचथुः । पेच । पपाथ । पेचतुः । पेचुः । थेचोपदेशः इत्यादिना वेट् । सेटीति एत्वं च । वमयोः क्र्यादितिनियमादिट् ।

विदो लटो वा ॥ ६८ ॥

मानाभिति वर्तते । वेत्तेरुत्तरेषां लटो मानां स्थाने वा णलादयो भवन्ति । वेद । विद्व । विद्म । वेत्थ । विदथुः । विद । वेद । विदतुः । विदुः । न च भवन्ति । वेद्मि । विद्वः । विद्मः । वेत्सि । वित्थः । वित्थ । वेत्ति । वित्तः । विदन्ति । विदेरिति कानिर्देशात् ज्ञानार्थस्य ग्रहण लाभार्थस्य शेन व्यवधानात् ।

ब्रुव आहश्च ॥ ६९ ॥

मानामिति वर्तते । लटो वेति वर्तते । ब्रुव उत्तरस्य लटो मानां वा णलादयो भवन्ति । तत्सन्नियोगे ब्रुव आहादेशः । अकार उच्चारणार्थः । तथास्मद इत्युत्तरत्र प्रतिषेधात् अत्र पञ्च ग्रहणम् । आत्थ । आहथुः । आह । आहतुः । आहुः । सिपस्थे कृते आहस्थ इति हकारस्य थकारः । खरीति चर्त्वम् । यद्यत्र स्थानिवद्भावात् ब्रुव ईडिति ईट् स्यात् झलादिप्रकरणे आहस्थ इति वचनमनर्थकं स्यात् । न च भवति । ब्रवीषि । ब्रूथः । ब्रवीति । ब्रूतः । ब्रुवन्ति ।

न यास्मदः ॥ ७० ॥

ब्रूञः परस्य थस्यास्मदश्च पूर्वोक्ता आदेशा न भवन्ति । ब्रूथ । ब्रवीमि । ब्रूवः । ब्रूमः ।

लोटो लङ्वत् ॥ ७१ ॥

लोटो लङ इव कार्यं भवति । लोडादेशानां लङादेशानामिव कार्यमतिदिश्यते इत्यर्थः । पचाव । पचाम । ङितः सखं सिद्धम् । पचतम् । पचत । पचताम् मिप्यस्थतसोमृतंतामेतेत सिद्धम् । एरुरिति उकारः पुरस्तादपवादन्यायेन एर्मेइति इखमेव बाधते न जुसादेशम् । एवं च यथा अदुः अधुरिति

भवति तथा यान्तु पान्तु इत्यत्रापि जुसादेशः प्राप्नोति नैष दोषः वक्ष्यते आत लङो वेत्यत्र लङ् ग्रहणस्य प्रयोजनं लङ्वत् यो लङ् तस्य जुस् भवति अतिदेशेन यो लङ् तस्य मा भूत् लङ्वदिति तांताद्वत् तेनाडागमो न भवति ।

एकः ॥ ७२ ॥

लोट इति वर्तते । मानामिति च । लोटो मानामिकारस्य चकारादेशो भवति । इखस्यापवादः । पचतु । पचन्तु । करोतु । कुर्वन्तु । मिप्सिपोरादेशान्तरमुत्वस्य बाधकं वक्ष्यते ।

सेर्ह्यपिच्च ॥ ७३ ॥

लोट इति वर्तते । सेर्हिरादेशो भवति अपिच्च । लुनीहि । आप्नुहि । राध्नुहि ।

मेर्निः ॥ ७४ ॥

लोटो मेर्निरित्ययमादेशो भवति । पचानि । करवाणि ।

आमेतः ॥ ७५ ॥

लोट इति वर्तते । लोडादेशस्य एकारः तस्य आमित्ययमादेशो भवति । निर्दिश्यमानस्यादेशो भवति । पचेथाम् । पचताम् । पचेताम् । पचन्ताम् ।

स्वोवामौ ॥ ७६ ॥

लोट इति वर्तते एत इति च । सकारवकाराभ्यां परस्य एत अम् इत्येतावादेशौ भवतः । पचस्व । पचध्वम् । वयस्व । वयध्वम् ।

पिच्चाडस्मदः ॥ ७७ ॥

लोट इति वर्तते । लोटोऽस्मदः आडागमो भवति

पिच्च । करवाणि । करवाव । करवाम । करवै । करवावहै । करवामहै ।

एत ऐ ॥ ७८ ॥

लोटोऽस्मद इति वर्तते । लोटोऽस्मदः एकारस्यैकारादेशो भवति । निर्दिश्यमानस्यादेशोऽयमामोपवादः । करवै । करवावहै । करवामहै । चिनवै । चिनवावहै । चिनवामहै ।

ङितः सखम् ॥ ७९ ॥

अस्मद इत्येव । ङितो लकारस्य योऽस्मत्तस्य सखं भवति । लङ् । अपचाव । अपचाम । लिङ् । पचेव । लुङ् । अपाक्ष्व । अपाक्ष्म । लृङ् । अपक्ष्याव । अपक्ष्याम ।

एर्मे ॥ ८० ॥

ङित इति वर्तते ङिल्लकारसम्बन्धिन इकारस्य खं भवति मविषये । लङ् । अपचः । अपचत् । अपचन् । लिङ् । पचेरन् । पचेत् । लुङ् । अपाक्षीः । अपाक्षीत् । लृङ् । अपक्ष्यः । अपक्ष्यत । अपक्ष्यन् । मइति किम् । अपचावहि । अपचामहि ।

मिप्थस्थतसोऽम्तंतताम् ॥ ८१ ॥

ङितां लकाराणां मिप् थस् थ तस् इत्येतेषां यथासंख्यं अम् तं त ताम् इत्येते आदेशा भवन्ति । अपचम् । अपचतम् । अपचत । अपचताम् । लिङ् । पचेयम् । पचेतम् । पचेत । पचेताम् । लुङ् । अपाक्षम् । अपाक्तम् । अपाक्त । अपाक्ताम् । वदव्रजेत्यादिनेप् । झलो झलीति सखम् । लृङ् अपक्ष्यम् । अपक्ष्यतम् अपक्ष्यत । अपक्ष्यताम् ।

लिङः सीयुट् ॥ ८२ ॥

लिङादेशानां सीयुडागमो भवति । मेयासुटो विधानाद्दे सीयुट् द्रष्टव्यः । टकारः टिदादिरिति विशेषणार्थः । उकार

उच्चारणार्थः । पचेय । पचेवहि । पचेमहि । पचेथाः । पचेयाथाम् । पचेध्वम् । पचेत । पचेयाताम् । पचेरन् । रुदादेर्ग इति वर्तमाने लिङोऽनन्त्यसखमिति सीयुट्सकारस्य सुट्तथोरिति सुट्सकारस्य च खम् । आशिषि लिङ् । पक्षीय । पक्षीवहि । पक्षीमहि । पक्षीष्ठाः । पक्षीयास्थाम् । पक्षीध्वम् । पक्षीष्ट । पक्षीयास्ताम् । पक्षीरन् ।

यासुण् भो ङित् ॥ ८३ ॥

लिङ इति वर्तते । लिङो भविषयस्य यासुडागमो भवति ङिच्च । सीयुटो ऽपवादोऽयम् । अत्र किदाशिषीति वचनात् विध्यादिलक्षणस्य लिङ इहोदाहरणम् । कुर्याम् । कुर्याव । कुर्याम । कुर्याः । कुर्यातम् । कुर्यात । कुर्यात् । कुर्यास्ताम् । कुर्युः । कृञो ये च इति विकरणस्य खम् । झेर्जुसीति जुस् उसीति पररूपम् । स्थानिवद्भावादेव लिङादेशस्य ङित्वे सिद्धे यासुटो ङिद्वचनं ज्ञापकं लकाराश्रयमादेशानां ङित्वं टित्वं च न भवति तेन अचिनवमित्येप् सिद्धः । पचमाना स्त्री टित इति ङीत्यो न भवति ।

किदाशिषि ॥ ८४ ॥

आशिषि लिङो यासुट् किद्भवति । ङित्वे प्राप्ते कित्वं विधीयते । ज्यर्थं जागर्तेरेवर्थं च । उच्यासम् । उच्यास्व । उच्यास्म । उच्याः । उच्यास्तम् । उच्यास्त । उच्यात् । उच्यास्ताम् । उच्यासुः । जागर्यासम् । जागर्यास्व । जागर्यास्म । जागुरविशिणलिङतीत्येम् ।

रन्नज्झेटः ॥ ८५ ॥

लिङादेशयोर्द्वं इट् इत्येतयोर्यथासंख्यं रन् अत इत्येतावादेशौ भवतः । पचेरन् । पक्षीरन् । झोन्तइत्यस्यायमपवादोऽयम् । पक्षीय । क्षीयाशीः प्रैषेषुमिङाकांक्षमित्येवमादिना प्राप्तस्य पस्य निवृत्त्यर्थं तपरकरणम् ।

सुट् तयोः ॥ ८६ ॥

लिङो यौ तकारयकारौ तयोः सुडागमो भवति । अग्विषये लिङ् प्रयोजयति । गे सखेन भवितव्यम् । पक्षीष्टाः । पक्षीयास्थाम् । पक्षीष्ट । पक्षीयास्ताम् ।

झेर्जुस् ॥ ८७ ॥

लिङादेशस्य झेर्जुसित्ययमादेशो भवति । अन्तादेशापवादः । कुर्युः । क्रियासुः । निर्दिश्यमानस्यादेशो न यासुटः ।

थवित्सेः ॥ ८८ ॥

थसंज्ञकवेत्तिसि इत्येतेभ्यः परस्य झेर्जुसादेशो भवति । ङित इति वर्तते । तत्र लिङ आदेश उक्तः । लृङः स्येन व्यवधानमस्ति लुङोपि सेरिति भविष्यति पारिशेष्यात्थविट्ग्रहणं लङर्थम् । अबिभरुः । अजागरुः । उसीत्येप् । विदेः । अविदुः । अकार्षुः । अहार्षुः ।

आतः ॥ ८९ ॥

सेरिति वर्तते । आकारान्ता त्सेः परस्य झेर्जुस् भवति । श्रुतिकृतं झेरातः परत्वं सेरुपि कृते त्याश्रयलक्षणेन सेः परत्वं अत उभयगतमानन्तर्यं झेरस्ति । अस्थुः । अगुः । अयुः । अदुः । अधुः । त्याश्रयलक्षणेन झेरिति पूर्वमेव सिद्धे नियमार्थमेतत् । अत एव सेरुपि कृते नान्यस्मात् अभूवन्निति ।

लङो वा ॥ ९० ॥

आत इति वर्तते । आकारान्तात्परस्य लङादेशस्य झेर्वा जुस् भवति । अयः । अयान् । अधुः । अधान् । ननु लङ् ग्रहणमनर्थकम् । ङित इति वर्तते । पारिशेष्यात् लङ एव संप्रत्ययः नानर्थकम् इह लङेव यो लङ् तस्य झेर्जुस् भवति ।

अतिदेशे मा भूत् । यान्तु । वान्तु । यवित्सेरित्यनेनापि मुख्यस्य लङो ग्रहणादिह न भवति । बिभ्यतु । जाग्रतु । विदन्तु ।

द्विषः ॥ ८१ ॥

लङो वेति वर्तते । द्विषः परस्य लङो झेर्वा जुस् भवति । अद्विषुः । अद्विषन् । अनिगन्तत्वाज्जुसीत्येप्न भवति ।

मिङ्शिद्भ्यः ॥ ८२ ॥

मिङ् शितश्च त्या धोर्विहिताः गसंज्ञा भवन्ति । भूयते । नयति । रोदिति । शित् । पचमानः । गसंज्ञाश्रयो विकरण एप् भवति ।

शेषोऽग एव ॥ ८३ ॥

मिङ्शिद्भ्यामन्यः शेषः । धोरित्येवं विहितस्य शेषः अगसंज्ञ एव भवति । लविता । लवितुम् । लवितव्यम् । अगसंज्ञाकार्यमिडागम एप् च । धोरिति विशेषणं किम् । जुगुप्सते । श्रीकाम्यति । लूभ्याम् । अग्नित्वम् । एवकार उत्तरार्थः । अगप्रदेशाः । बलाद्यगस्येटगागयोरित्येवमादयः ।

लिट् ॥ ८४ ॥

एवशब्दोऽनुवर्तते । लिडादेशो मिङ् अगसंज्ञ एव भवति । पेचिथ । शेकिथ । वोपदेशइत्यादिनेट् । सेटीत्येवच खम् । गसंज्ञासमावेशनिवृत्त्यर्थमेवकारोऽभिसंबध्यते । तेरिम इत्यत्र गसंज्ञायामसत्यां तदाश्रयः शप् न भवति ।

लिङाशिषि ॥ ८५ ॥

एवेति वर्तते । आशिषि यो लिङ् तदादेशश्चागसंज्ञ एव भवति । भावे जागरिषीष्ट । कर्मणि लविषीष्ट । अगसंज्ञायां

गास्रयं लिङोनन्त्यसखमिति सखं न भवति । एवकाराधिकारात् गसंज्ञासमावेशो न भवति । यदि स्याद्यक् प्रसज्येत । आशिषीति किम् । जागृयात् । जागृयाताम् । जागृयुः ।

इत्यभयनन्दिविरचितायां जैनेन्द्रमहावृत्तौ
द्वितीयस्याध्यायस्य चतुर्थः पादः समाप्तः ।
समाप्तश्च द्वितीयोऽध्यायः ।



यत्किञ्चिद्वाङ्मयं लोके सान्वयं संप्रतीयते ।
तत् सर्वं धातुभिर्व्याप्तं शरीरमिव धातुभिः ।

जैनेन्द्रव्याकरणम् ।

ङ्याम्मृदः ॥ १ ॥

ङी इति स्वरूपग्रहणम् । आबिति टाप्ङापोः सामान्येन ग्रहणम् । मृदितिसंज्ञानिर्देशः अधुमृत कृत्हृत्सा: इति यदितऊर्ध्वमनुक्रमिष्यामः आ कपो विधानात् ङ्यन्तादाबन्तान्मृद्रूपाच्च तद्भवतीत्येवं वेदितव्यम् । ननु वक्ष्यमानास्त्याः पर इति नियमेन परे प्रयुज्यन्ते घेाः परत्वञ्च तव्यादिभिराक्रान्तम् । सिङन्तं च क्रियावाचि सुबन्तमपि पद क्रियासापेक्ष क्रियात्वभूतमित्यतः पारिशेष्यात् ङ्याम्मृद एव भविष्यन्ति एवं तर्हि वाक्यान्मा भूवन् वृद्धस्य उपगोरपत्यमिति गुपदभसंज्ञाश्च प्रयोजनम् । द्रुद्रुकारद्रुयजादिग्रहणानि च ङ्याम्मृदः विशेषणानि न समर्थविभक्त्यन्तस्येति अधिकारः क्रियते । दुइति मृद्रूपम् । दु ज्ञानामपत्यमित्यत्र मृद्रूपापेक्षया वावृद्धादारिति दुलक्षण. फिञ् न भवति अदुलक्षण एव फिरदोरिति फिर्भवति । दत्तानामपत्यमिति मृद्रूपापेक्षया अदन्तलक्षणः इञ् भवति । घटेन तरतीत्यत्र मृदपेक्षया नौद्व्यचष्टइति "द्व्यज् लक्षणष्ठः सिद्धः" वाचा तरतीत्यत्र न भवति । मृद्ग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति सिद्धे ङ्याब्ग्रहणं किम् । कालितरा । मालितरा । एनिका । हरणिका । परमपि हृत बाधित्वा स्त्रीत्येा यथा स्यात् अथ घरूपकल्पचेलड्ब्रुवगोत्रमतहते प्रोऽनेकाचः करण इति प्रादेशवचनसामर्थ्यादेतल्लभ्यते एव तर्हि मृद्ग्रहणे लिङ्गविशिष्टस्यापि परिभाषेयमित्येति ज्ञाप्यते तेन गेामतीति उगिल्लक्षणेा नुन्न भवति । युवतीं पश्येति जिन्न भवति । सख्यौ । सख्यः । इति च णिन्न भवति । हेभवति भगवति अघवति इत्यत्र भवद्भगवदघवतोवारिःकावचरिस्यादि

त्येष विधिर्न्न भवति । इह त्यग्रहणं न कर्तव्यम् । कथं युवतितरवामोरुतरा । हृदंतत्वाद्युवतिशब्दस्य मृत्संज्ञा वामोरुशब्दस्यापि मृदमृदोरेकादेशो मृद्ग्रहणेन गृह्यते । अजादिषु हलन्तादाप विधास्यति डापि च टिखेन भवितव्यमिति एकादेशो नास्ति तस्मात् ङ्याप्ग्रहणं कर्तव्यम् ।

स्वौजसमौट्छष्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङसोसाम्ङ्योंस्सुप् ॥ २ ॥

ङ्याम्मृदः स्वादयो भवन्ति । उत्साराद्यनुबन्धनाशः अनेन विहितानां स्वादीनां कर्मणीवित्येवमादिना विभक्तिनियमसाधने स्वार्थ इति वचननियमश्च ज्ञातव्यः । ङ्यन्तात्तु कुमारी । कुमार्यौ । कुमार्यः । कुमारीम् । कुमार्यौ । कुमारीः । कुमार्या । कुमारीभ्याम् । कुमारीभिः । कुमार्यै । कुमारीभ्याम् । कुमारीभ्यः : कुमार्याः । कुमारीभ्याम् । कुमारीभ्यः । कुमार्याः । कुमार्यीः । कुमारीणाम् । कुमार्याम् । कुमार्योः । कुमारीषु । आबन्तात् । माला । माले । मालाः । मालां । माले । मालाः । मालया । मालाभ्याम् । मालाभ्यः । मालायै । मालाभ्याम् । मालाभ्यः । मालायाः । मालाभ्याम् । मालाभ्यः । मालायाः । मालयोः । मालानाम् । मालायाम् । मालयोः । मालासु । एवमावंतात् । दामबहुराजादयो नेयाः । मृदः दृषद् । दृषदौ । दृषदः । दृषदम् । दृषदौ । दृषदः । दृषदा । दृषद्भ्याम् । दृषद्भिः । दृषदे । दृषद्भ्याम् । दृषद्भ्यः । दृषदः । दृषद्भ्याम् । दृषद्भ्यः । दृषदः । दृषदोः । दृषदाम् । दृषदि । दृषदोः । दृषत्सु ।

स्त्रियाम् ॥ ३ ॥

स्त्रियामिति प्रकृतिविशेषणम् । यदित ऊर्द्ध्वमनुक्रमिष्यामः स्त्रिया वर्तमानान्मृदः स्वार्थे तद्वेदितव्यम् यदि स्त्रियाम-

भिधेयायामिति स्यात् द्विबहून स्यातां । कुमार्यौ कुमार्य इति एकत्वात् स्त्रीत्वस्य अनेकत्योत्पत्तिश्च न स्यात् । कालितरा । भावप्रधानत्वात् स्त्रियामितिनिर्देशस्य कुमारी देवदत्तेति सामानाधिकरण्यं च न स्यात् । अथापि स्त्रीसमानाधिकरणान्मृद इत्यभ्युपगम्येत एवमपि भूतमियं नारी । कारणमियं कन्या । आवपनमियमुस्तिकेति भूतशब्दादिषु स्त्रीत्याः प्रसज्येरन् तस्मात् स्त्रियां वर्तमानान् मृद इत्येवाधिकृतम् । वक्ष्यति अजा । देवदत्ता । स्त्रियामिति किम् । अजो देवदत्तः । शब्दजनितप्रत्ययवर्गाः स्त्रीत्वादय इहाभिप्रेताः न वस्तुवर्गाः अव्याप्तेः शब्दो हि श्रोत्रपथं गतो लिङ्गसंख्यावन्तं स्वप्रत्ययं जनयति स प्रत्ययः । खट्वादिषु रसादिषु अभावादिषु च शब्देषु संभवति ।

अजाद्यतष्टाप् ॥ ४ ॥

अजादिभ्यः अकारान्तेभ्यश्च मृदः स्त्रियां वर्तमानेभ्यष्टावित्ययं त्यो भवति । पकारः टाप्डापोः सामान्यग्रहणार्थः । टकारः सामान्यग्रहणाविघातार्थः अन्यथा एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्येति विघातः स्यात् । बाधकबाधनार्थमनकारान्तार्थं च अजादिग्रहणम् । अजा । एडका । अश्वा । चटका । मूषिका । जातेरयोदुष्टत्यस्यापवादः । बाला । होढा । पाका । वत्सा । मन्दा । विलाता । वयस्यनंत्यदृत्यस्य प्राप्तिः । पूर्वापहाणा । अपरापहाणा । टिल्लक्षणस्यापवादः । निपातनाराणत्वम् । संभस्त्राजिनसणपिंडेभ्यःफलादाप् । संफला । भस्त्राफला अजिनफला । सणफला । पिंडफला । सत्प्राक्काण्डप्रान्तशतैकेभ्यः पुष्पादाप् । सत्पुष्पा । प्राक्पुष्पा । काण्डपुष्पा प्रांतपुष्पा । शतपुष्पा । एकपुष्पा । पाककर्णपर्णपुष्पफलमूलबालधोरित्पस्यापवादः । शूद्राच्चामहत्पूर्वात् जाति-

श्चेत् । शूद्रा नाम जातिः । अमहत्पूर्वादिति किम् । महा-शूद्री आभीरजातिरियम् । अनहत्पूर्वादिति शब्दपरस्य महतः आत्वं न भवति । जातिरिति किम् । शूद्रस्य भार्या शूद्री । पुयोगादीकारः । अमहत्पूर्वादिति प्रतिषेधवचन ज्ञापकं भव। त्यत्र प्रकरणे तदन्तविधिरिति तेन महाजा । धीवरमतिक्रान्ता अतिधीवरी । अतिभवती । अतिमहतीति सिद्धम् । क्रुञ्चा । उष्णहा । देवविशा । हलंतादाप् । ज्येष्ठा । कनिष्ठा । मध्यमा । पुंयोगलक्षणा प्राप्तिः । कोकिला जातिः । मूलांताच्च टाप् । अमूला । षकाराद्यजः टाप् । शार्कराक्ष्य । पौतिमाष्या । गौकक्ष्या । अतः खल्वपि स्वट्वा । देवदत्ता । तपरकरणं किम् । क्षीरपाः स्त्री ।

आवद्यात् ॥ ५ ॥

आवत्यशब्दादाप् भवति । अवटस्यापत्यं स्त्री आव-द्या । यञ इति ङीविधिरपवादः । पुरस्तादपवादोयं फटो न बाधकः । आवत्यायनी ।

उगिदचां सर्वनामस्थाने धातोः ॥ ६ ॥

उक् इत् यस्य त्यस्य मृदो वर्णस्य वा तदंतात् ऋकारान्तेभ्यो नकारान्तेभ्यश्च मृदः स्त्रियां वर्तमानेभ्यः ङीत्येो भवति । ङकारः हल्ङ्यापइत्यत्र विशेषणार्थः । गोमती । तत्रभवती । पचन्ती । उगिदितियदीदं त्यग्रहणमेव स्यात् त्यग्रहणे यस्मात् तदादेरिति इह न स्यात् । अतिभवती । निगोमती । अथ मृद्विशेषणमेव स्यात् मृद्ग्रहणेन तदन्तविधिरिति तथापीह न स्यात् । अतिमहतीति । तस्मान्नेदं त्यग्रहणमेव नापि मृद्ग्र-हणमेव अपि त्वेकदेशग्रहणमिदम् । उक् इत् यस्यैकदेशस्य तदन्तान्मृद् इति स चैकदेशः त्येोमृद् वर्णश्च संभवति । त्यः श्रेय-सीत्यादि । मृद् तत्र भवतीत्यादि । वर्ण पुमासमतिक्रान्त

अतिपुंसीति । पुनातेर्मुन्सुकौ मूस्विति सकारो वर्णः उगित् यद्यागमेषु वर्णो उगिदिति ङीविधिर्विधीयते तुक्यपि प्राप्नोति अग्निवित्कन्येति । उभयोरुकारयोर्ग्रहणसामर्थ्यादिहैव भवति नान्यत्र । अञ्चतेरुपसंख्यानं नियमार्थं कर्तव्यम् । प्राची । प्रतीची । उदीची । धोरुतः नान्यस्मात् । उखास्रत्कन्या । ऋकारान्तात् कर्त्री । हर्त्री । नकारान्तात् । दण्डिनी । छत्रिणी ।

वनोहसोऽ रश्च ॥ ७ ॥

वन इति वनः क्वनिपश्च ग्रहणम् । अहसन्ताद्यो विहितो वन् तदन्तात् स्त्रियां वर्तमानान्मृदः रेफश्चान्तादेशो भवति ङीश्च । पूर्वेण सिद्धे रेफार्थमिदम् । धयतिपिबतिभ्यां क्वनिप् । धीवरी । पीवरी मेरुद्रुश्वरी । कथं शर्वरी शृणातेरजन्तात् वन् कथमवावरी अत्रओर्णतेरगविषये आत्वे कृते वन् । अनीच इत्यत्र वक्ष्यति । पूर्वो विधिर्नीचोरपि भवति । बहुधीवरी । अतिधीवरी । अथवा अमहत्पूर्वादित्यत्र तदन्तविधिर्ज्ञापितः । अहस इति किम् । सहयुद्धा स्त्री राज्ञियुधिकृञः सह इति क्वनिप् । सन्नियोगशिष्टानामन्यतराभावे उभयोरप्यभाव इति रेफादेशाभावे पूर्वेणाप्यत्र ङीत्यो न भवति । एवमर्थश्चकारः क्रियते ॥

नेलस्वस्रादेः ॥ ८ ॥

स्त्रियामिति वर्तते । इल्संज्ञकेभ्यः स्वस्रादिभ्यश्च मृद्भ्यः स्त्रियां यदुक्तम् तन्न भवति । पञ्च कुमार्यः । सप्त रोहिण्यः । अथात्रानेन ङीप्रतिषेधे कृते नखे सति अत इति टाप् कस्मान्न भवति । कथमयम् सुब्विधिस्तत्र टापः पकारेण सुपो ग्रहणात् । यद्येव बहुचर्मिकेत्यत्र नखस्यासिद्धत्वात् त्यस्थे क्वनीति कात्पूर्वस्यात इत्वम् । एवं तर्हि इहोभौ ङीटापौ प्रतिषिध्येते । उक्तं च इल्संज्ञानामंते नष्टे टाबुत्पत्तिः कस्मान्न

स्यात् प्रत्याहारादापा सिद्धम् । दोषस्तित्वत्वे तस्मान्नोभौ स्वस्रादिभ्यः स्वसा । दुहिता । स्वसृदुहितृननांङ्यातृमातृतिस्रचतस्र ।

मनोऽडाप् च ॥ ९ ॥

ङी इति वर्तते । नेतिच । मनन्तान्मृदः स्त्रियां वर्तमानाड्डाप् भवति ङीप्रतिषेधश्च । डकारः टिखार्थः । पकारः सामान्यग्रहणार्थः । पामे । पामाः पामानौ । पामानः । अनिनस्मनग्रहणेष्वर्थवता चानर्थकेन च तदन्तविधिः । सीमे । सीमानौ । सुप्रथिमे । सुप्रथिमानौ । अतिमहिमे । अतिमहिमानौ ।

अनश्च बात् ॥ १० ॥

अन्नन्तात् वसात् स्त्रियां वर्तमानात् डाप् भवति ङीप्रतिषेधश्च । चकारो ङीप्रतिषेधानुकर्षणार्थः । अर्थवतोऽनर्थकस्य चानेग्रहणम् अनुङ्ववतो वसस्येहोदाहरणम् । उङ्ववत त्रैरूप्यं वक्ष्यति । सुपर्वे । सुपर्वाः । सुपर्वाणौ । सुपर्वाणः । नकारान्तत्वाद्ङीप्रसज्येत । वादिति किम् । अतिक्रान्ता पर्वाणि अतिपर्वणी ।

वोङ्वे ॥ ११ ॥

अन्नन्ताङ्वसात् उङःखे वर्तमानात् डाम्ङीप्रतिषेधौ वा भवतः । वावचनाद्यथाप्राप्तः । नकारान्ताङ्गोविधिः वनोहसोरश्चेत्यभ्यनुज्ञायते बहुराजे । बहुराजाः । बहुराजानौ । बहुराजानः । बहुराज्यौ । बहुराज्यः । बहुतक्षे । बहुतक्षाः । बहुतक्षाणौ । बहुतक्षाणः । बहुतक्ष्णौ । बहुतक्ष्णः । बहुधीवेख, बहुधी वा । बहुधीवानौ । बहुधीवानः । बहुधीवर्यौ । बहुधीवर्यः । उङ्व इति किम् । सुपर्वा । सुपर्वाणौ । पूर्वेण द्वैरूप्यम् । अन इत्येव ।

सुमत्स्या नदी ।

ङीखौ ।

खविषये । अन्नतात् वसात् ङी भवति । अधीराज्ञी नाम ग्रामः । पुनर्ङीग्रहण नित्यार्थम् ।

ऊधसः ॥ १३ ॥

वादिति वर्तते । ऊधःशब्दान्ताद्वसात् ङी भवति । कुंडमिवोधो यस्याः कुडोध्नी । द्वेऊधसी यस्या द्व्यूध्नी । निर्गतमूधोऽस्या निरूध्नी । ऊधसोनङिति अनङ्सान्तः बोङ्खइति त्रैरूप्य प्राप्तम् । स्त्रियामेवानङ्सान्त इत्येव इह मा भूत् । महोधाः । पर्जन्यः । वादित्येव प्राप्ता ऊधः प्राप्तोधा गौः । इषा च प्राप्तापन्न इति षसः । तत्रैव पूर्ववक्ष्यिम व्याख्यातम् ॥

दामहायनात्संख्यादेः ॥ १४ ॥

संख्यादेर्वसात् दामान्तात् हायनांताच्च ङी भवति । द्विदाम्नी । त्रिदाम्नी । बोङ्ख इति त्रैरूप्य । प्राप्तम् । हायनाद्व्यसि स्मृतः द्विहायनी । त्रिहायणी । चतुर्हायणी वत्सा । त्रिचतुर्भ्यां हायनस्य णत्वमपि वयसीष्यते तेनेह ङीविधिर्णत्वं च न भवति । द्विहायना । त्रिहायना । चतुर्हायना शाला । संख्यादेरिति किम् । उद्दामा वडवा । बोङ्खइत्यनेन त्रैरूप्य भवति ।

पादो वा ॥ १५ ॥

पादशब्दान्तान्मृदः स्त्रियां वर्तमानाद्वा ङी भवति । द्विपात् । द्विपदी । त्रिपात् । त्रिपदी । संख्यादेरिति पादशब्दस्य खम् । पादयतें क्विबन्तस्य प्रयोगो नास्ति ।

टाबृचि ॥ १६ ॥

पाद इति वर्तते पादशब्दान्तान् मृदः टाब् भवति ऋच्यभिधेयायाम् । द्विपदा ऋक् । त्रिपदा ऋक् । ऋचीति किम् । द्विपदीदेवदत्ता ।

अनीचः ॥ १७ ॥

न्यग्ग्रहदीर्घाप्रधानवचनः नञ्पूर्वः यदित ऊर्ध्वमनुक्रमिष्यामः अनीच इत्येव तद्वेदितव्यम् । नीचो ङ्यादयो न भवन्तीत्यर्थः । वक्ष्यति टिड्ढाणञिति । कुरुचरी । भद्रचरी । जातेरयोङः । कुक्कुटी । शूकरी । अनीच इति किम् । बहुकुरुचरा । बहुकुक्कुटा मथुरा । ननु पूर्वत्र समुदायः स्त्रियां वर्तते नावयवः अवयव एव च टित्त्व समुदायः । द्वितीयेऽपि विशेन समुदायो जातिवाची किं त्ववयवः तत्कथं प्राप्तिः इदमेव ज्ञापकं भवत्यत्र प्रकरणे तदन्तविधिरिति तथाहि प्रधानभूतेन तन्दन्तविधिः कुम्भकारी देवदत्त कुक्कुटी यद्येवं पूर्वमेवेदं सूत्रं वक्तव्यम् । इह करणात् पूर्वोक्तविधिर्नीचोपि भवतीति ज्ञाप्यते बहुधीवरी बहुपोवरीति ।

टिड्ढाणञ्ठण्ठञ्क्वरपः ॥ १८ ॥

अत इति वर्तते । टित् ढ अण् अञ् ठण् ठञ् क्वरप् इत्येवमन्तेभ्यः स्त्रियां ङी भवति । टापोपवादः । अनीच इत्यधिकारात् प्रधानेन तन्दन्तविधिरुक्तः । कुरुचरी । भद्रचरी । कृद्ग्रहणेति कारकपूर्वस्यापि ग्रहणं न मन्तव्यम् । इह कृदकृतोर्ग्रहणात् । ढ । गौरर्णयी । वैनतेयी । शिलाया ढ इत्यस्य निरनुबन्धकस्य स्त्रियामभिधानं नास्ति । अण् । कुम्भकारी । कुपगवी । कथं चुराशीला चौरी । तपःशीला तापसी । णेऽप्यणकृतं भवतीति वक्ष्यति । अञ् औत्सी । वैदी । ठण् । तात्त्विकी । रौचनिकी । ठञ् । पारायणं वर्तयति पारायणिकी । प्राग्वतेष्ठञ् । क्वरप् । इत्वरी । नश्वरी । अनीच इत्येव । बहुकुरुचरा । ख्युट्प्रभृतीनां द्व्यनुबन्धकत्वेऽपि टित्करणसामर्थ्यात् ग्रहणम् ।

लकाराणां स्थानिवद्भावाट्टित्वं ङित्वं च न भवतीत्युक्तम् । पचमाना स्त्री । अविनवंत्यसाहचर्यादागमस्य न ग्रहणम् । लिखिता विद्योति ।

यञः ॥ १९ ॥

यञन्तान्मृदः स्त्रियां ङी भवति । गार्गी । वात्सी । हलोहतोऽद्यामिति यकारस्य खम् । द्वीपादनुसमुद्रेऽयञिति अयञ् । द्व्यनुबन्धकः तस्येहाग्रहणम् । द्वीपे भवा द्वैप्या । योगविभाग उत्तरार्थः ।

फट् ॥ २० ॥

यञ इति वर्तते । यञन्तान्मृदः स्त्रियां फडित्ययं त्यो भवति । टकारो ङ्यर्थः । अथ गार्गायण इति स्थिते फटोहत्सञ्ज्ञाविरहात् कृदुपधृत्सा इति मृत्संज्ञा नास्ति । कथं ङीविधिः । टित्करणसामर्थ्यात् भविष्यति गार्ग्यायणी । वात्स्यायनी । आवट्यायनी । वचनात्पूर्वोऽपि विधिर्भवति । गार्गी । वात्सी ।

लोहितादिसकलान्तात् ॥ २१ ॥

यञ इति वर्तते । लोहितादिर्गर्गादिष्वन्तर्गणः । लोहितादिभ्यः सकलशब्दपर्यन्तेभ्यः यञन्तेभ्यः स्त्रियां फट् त्यो भवति । पुनरारम्भो नित्यार्थः । तेन फडेव भवति यञः इत्यनेन ङीः प्राप्तो निवर्त्यते । लौहित्यायनी । सांशित्यायनी । बाभ्रव्यायनी । सौक्षव्यायणी । सांचव्यायणी । लांतव्यायणी । जैगीषव्यायणी । मानव्यायनी । मांतव्यायनी । मनायीशब्दस्य पाठसामर्थ्यात् स्यहत्यटे इति पुंवद्भावो न भवति । मानव्यायनी । काठ्यव्यायनी । रौढ्यायणी । तारुण्यायणी । तालुक्यायणी । तारुण्यायनी । बातरुण्यायनी । आंगिरसेतु वतरुडीत्येव भवति । काप्यायनी । कात्यायनी । साकल्यायनी ।

कौरव्यासुरिमाण्डूकात् ॥ २२ ॥

कौरव्य आसुरि माण्डूक इत्येतेभ्यः फट् भवति । कौरव्यायणी । टाप्प्राप्तः । अआसुरीति प्रश्लेषनिर्देशात् अकारश्चान्तादेशः आयनादेशो नस्वेकोदीत्वार्थः । अकृत्वाद्यस्य ङ्यांचेति इरवं प्राप्नोति । आसुरायणी । इतोमनुष्यजातेरिति ङीत्यः प्राप्तः । माण्डूकस्यापत्यं स्त्री माण्डूकायनी । फट् माण्डूकादित्यण् । ङी प्रसज्येत तस्येदमित्यणि विवक्षिते कौरवीति भवति । शैषिकार्थविवक्षायां इञश्चेत्यणि प्राप्ते दोश्छ इष्यते । आसुरिणा प्रोक्ता आसुरीया शिक्षा ।

गौरादेः ॥ २३ ॥

गौरादिभ्यः स्त्रियां ङी भवति । गौरी । वर्णत्वे बहुलं ङीप्राप्तेः संज्ञायामप्राप्तेः । गौर मत्स्य मनुष्य शृङ्ग गवय हय मुकय ऋष्य अयो ङ इति ङीप्रतिषेधः प्राप्तः । शृङ्गाट्टाप् प्राप्तः । एवमुत्तरत्राप्यूह्यम् । पुट पद द्रुण द्रोण हरिण कर कर्ण अरीहण वरट उणक आमलक कुवल वदर बित्त विंव कक्क तर्क्कार सर्क्कार सष्कख सवल सुषव पांडसौकेषांचित् सालंद गडुल पडुश भ्राटक आनन्द स्पाट सष्कुल सूर्य्य गूष मूष धातक सल्लक मालक मालत साल्वक वेतस वृत अनस उमा भङ्ग मह मठ वेद स्वन् भक्षण् अनडुही अनड्वाही एषणात्करणे कारके देह मेधीकाकादनगवादनादयः यान मेध गौतम आयस्थूण भौरिक भौजिकि भौलिगि श्रौद्गाहमानि आलम्बि आयामक आलम्बि आपाच्यांङ्क ऊपस्तश्च आरट टोट नट मूलाट आसूरण अधिका प्रत्यवारोहिन् आग्रहायण अग्रहायनस्यस्वार्थे अण् णत्व च निपात्यते। सेवनी सुमंगला संज्ञायां सुन्दर पंडल मंदर मदुल पेट पिट पिंड ऊर्द गूर्द सूर्द्द केषांचित् रेफा-

त्परो मकारः हार्दं भाडा लोहांड कदर कंदर कदल कंदल तरुण तलुन सौधर्म्म रोहिणी रेवती च नक्षत्रे विकल निष्कल पुष्कल कटाच्छोण्याम् । पिप्पल्यादयश्च पिप्पली हरीतकी कोशातकी समी करीरी पृथिवी कोष्ट मातामह पितामही एही पर्येही अस्मरध्यात्युट् प्राप्तः काव्या शैव्या एतौ ज्यातौ आरोह चंड नृनरयोरेप्च । नारी । येऽत्रानडुही-प्रभृतय ईकारान्ताः पठ्यन्ते तेषां से पुंवद्भावो न भवति । अनडुहीभार्यः । प्रत्यवरोहिणीभार्यः । आग्रहायणीभार्यः इति ।

वयस्यनन्त्ये ॥ २४ ॥

प्राणिनां कालकृता शरीरावस्था वयः । वयस्यनन्त्ये वर्तमानान्मृदः स्त्रियां ङीत्योर्भवति । कुमारी । किशोरी । वकरी । वधूटी । चिरण्टी । तरुणी । तलुनी । अनन्त्य इति किम् । स्थविरा । वृद्धा । कन्याया कनीन च इति निपातनात् कन्या । अत इत्येव शिशुः । उत्तानशया लोहितपादिका द्विवर्षा त्रिवर्षा नैते साक्षाद्वयोवाचिनः शब्दाः । अथवा द्विवर्षादिषु परिमाणाद्दृदुपीत्येतस्मान्नियमात् न भविष्यतीति ।

रात् ॥ २५ ॥

रसंज्ञकान्मृदः स्त्रियां ङीत्योर्भवति । अकारान्तोत्तरपदो रः स्त्रियां भाष्यते । पञ्चानां पूलानां समाहारः पञ्चपूली । दशपूली । अन्तस्य रसस्य खं स्त्रियां चेति पञ्चतन्त्री दशतन्त्री । पञ्चाजी । अजादिष्वजशब्दो जातिवचनोऽभिप्रेतः । कथं त्रिफला अजादिषु पाठात् ।

परिमाणाद्दृदुपि ॥ २६ ॥

सर्वतो मान परिमाणम् । परिमाणान्तात् रात् दृदुपि सति ङीत्योर्भवति । द्वाभ्यां कुडवाभ्यां क्रीता आर्हीयस्य त्यस्य

रादुबखादित्युप् द्विकुडवी । द्व्याढकी । त्र्याढकी । रादिति सिद्धे नियमार्थोऽयम् । यतः परिमाणादेव हृदुपि नान्यतः । पञ्चभिरश्वैः क्रीता पञ्चाश्वा दशाश्वा तुल्यजातीयस्य नियमान्निवृत्तिः । समाहारे भवत्येव । पञ्चाश्वी । परिमाणादिति योगविभागः कर्तव्यः । तत इष्टतोऽवधारणं लभ्यते परिमाणशब्देनेह रूढिवशात् प्रस्थादिर्गृह्यते । कालसङ्ख्ययोरग्रहणम् । तेन द्विवर्षा । त्रिवर्षा । द्विशता । त्रिशता । द्वे वर्षे प्रमाणमस्याः प्रमाणेध्वंसनं राच्चेति द्व्यडादीनामुप् । उक्तं च ऊर्द्धमानं किलोन्मानं परिमाणं तु सर्वतः । आयामस्तु प्रमाणं स्यात् सङ्ख्या बाह्या तु सर्वतः ।

न बिस्ताचितकम्बल्यात् ॥ २७ ॥

बिस्त आचित कम्बल्य इत्येवमन्तात् रात् हृदुपि ङीत्यो न भवति । बिस्तादीनां परिमाणत्वात् सर्वेण प्राप्तिः । द्वाभ्यां बिस्ताभ्यां क्रीता द्विबिस्ता । त्रिबिस्ता । द्व्याचिता । त्र्याचिता । द्विकम्बल्या । त्रिकम्बल्या ।

काण्डात् क्षेत्रे ॥ २८ ॥

काण्डशब्दान्तात् रात् हृदुपि सति क्षेत्रेऽभिधेये ङीत्यो न भवति । द्वे काण्डे प्रमाणमस्या द्विकाण्डा त्रिकाण्डा क्षेत्रभक्तिः । प्रमाणे द्व्यसड्दघ्नट्मात्रट्इत्यागतानां द्व्यसडादीनां प्रमाणे ध्वंसनं राच्चेति वक्ष्यमाणया इष्टया उप् कांडं धनुः तस्य परिमाणशब्देनासंगृहीतमतः परिमाणाद्धृदुपीत्यनेन नियमेन प्रतिषेधे सिद्धे नियमार्थमिदम् । क्षेत्र एव प्रतिषेधो भवति नान्यत्र । द्विकाण्डी । त्रिकाण्डी रज्जुः । रादितिङी विधिः ॥

पुरुषात्प्रमाणे वा ॥ २८ ॥

हृदुपीति वर्तते प्रमाणे यो वर्तते पुरुषशब्दः तदन्ताद्रात् हृदुपि वा ङीत्यो भवति । द्वौ पुरुषौ प्रमाणमस्याः खातायाः द्वयसडादीनां प्रमाणे ध्वमनेराङ्गेति उप् । द्विपुरुषा द्विपुरुषी । त्रिपुरुषी । त्रिपुरुषा । अपरिमाणत्वात्पुरुषस्य परिमाणाद्धृदुपीतिनियमान्निवर्तितो ङीत्यो विकल्पते । प्रमाण इति किम् । द्वाभ्यां पुरुषाभ्यां क्रीता द्विपुरुषा । हृदुपीत्येव । समाहारे पञ्चपुरुषी ॥

गुणोक्तेरुतोखरुस्फोडः ॥ ३० ॥

वेति वर्तते । गुणोक्तेर्मृद उकारातात् वा ङीत्यो भवति खरुशब्दं स्फीडञ्च वर्जयित्वा । यः शब्दो गुणे वर्तित्वा द्रव्ये वर्तते स गुणोक्तिरित्युच्यते । पटुः । पटवी । मृदुः । मृद्वी । गुणोक्तेरिति किम् । आखुः । जातिशब्दोऽयम् । उत इति किम् । सुधिरिय कन्या । अखरुस्फोड इति किम् । खरुरिय कन्या । पाण्डुरियं कन्या । सत्वे निविशतेऽपैति पृथग्जातिषु दृश्यते । आधेयश्चाक्रियाजश्च सोऽसत्वप्रकृतिर्गुणः । सत्व द्रव्यं तत्र निविशते उत्पद्यते आश्रयति वा स गुण इति सबंधः । द्रव्यादवैति अपगच्छति यथाम्रात् हरितता पीततायां उत्पन्नाया पृथग्जातिषु दृश्यते यथा सैव हरितता तरुणतृणेषु आधेयः उत्पाद्यः यथा कुसुमयोगात् गन्धो वस्त्रे यथा वा घटे रक्तता अक्रियाजश्च क्रियाजश्च क्रियातो नोत्पद्यते यथा कासादिषु महत्वादि चकारात् क्रियाजश्च यथा संयोगो विभागो वा असत्वप्रकृति. द्रव्यस्वभावरहितः निर्गुण इत्यर्थः ॥

बह्वादेः ॥ ३१ ॥

वेति वर्तते बहु इत्येवमादिभ्यश्च मृद्वयः स्त्रियां वा

ङीत्यो भवति । बहु । बह्वी । पटुतिः । पटुती । बहु पटुति अञ्चति अङ्कति अंहति शकटि शक्ति केचिच्छस्त्रेर्थे शक्तिं पठन्ति सामर्थ्ये शक्तिरेव तेषाम् शक्ति सारि राति राधिशाद्दि अहि कपि मुनि यष्टि किमर्थमिकारान्ता पठ्यन्ते यावता कृदिकारादक्तेरित्येव सिद्धे पटुतिशब्दान्न स्यात् इतरेभ्यश्चाव्युत्पत्तिपक्षो इतः प्राण्यङ्गात् श्रोणिः श्रोणी धमनिः । धमनी । इत इति किम्, ग्रीवा । प्राण्यङ्गादिति किम्, कौणि । साणिः । कृदिकारादक्तेः भूमिः । भूमी । अक्तेरिति किम् । कृतिः । हतिः । अकार्थावित्येके इहापि मा भूत् अकरणि-हन्तेर्वृषल कृदिकारादिति किम् । सुगन्धिः । सुरभिगधिः । स्त्रीहृतो न भवति । व्युत्पत्तिपक्षे कृदिकारस्यैच पूर्व. प्रपंचः । चंड अगल कमल कृपण विकट विशाल विशंकट भरुज चन्द्र-भागान्नद्याम् कल्याण उदार पुराण अहःशब्दस्येह पाठोऽनर्थक· केवलस्य स्त्रियामवृत्तेः सविधौतु उत्तरपदभूतस्य दोड्ख इत्य नेनैव त्रैरुप्यं सिद्धम् । बहुशब्दस्य गुणवाचित्वात्पूर्वणैव विकल्पे सिद्धे द्विर्बहुं सुबहुं भवतीति पुनर्ग्रहणम् । तेन शकुदुको अणताङीविधिः क्वचिन्न भवति । कामिकेति ।

पतिवत्न्यन्तर्वत्न्यौ ॥ ३२ ॥

पतिवत्नी अन्तर्वत्नी इत्येतौ शब्दौ निपात्येते पतिः मच्छब्दस्य ङीत्ये परतः मतोर्वत्वं नुमागमश्च निपात्यते जीवति भर्तरि पतिवत्नी । जीवत्पतिरित्यर्थः । अन्यत्र पतिमती पृथवी । अंतःशब्दादधिकरणप्रधानात् अस्तिसमानाधिकरणयाभावात् विहितोमतुर्नुक् च निपात्यते गर्भिण्याम् । अन्तर्वत्नी गर्भिणी । अन्यत्र अन्तरस्यामस्ति शालायाम् । उक्तं च । पतिवत्न्या नुक्ता वत्वमन्तवत्न्यामतुर्नुका । जीवत्पत्यां च गर्भिण्यां यथासंख्यं निपात्यते ।

पत्नी ॥ ३३ ॥

पत्नीति निपात्यते पतिशब्दस्य स्त्रियां नकारो अंतादेश पुंयोगे निपात्यते ङीत्यो नकारान्तत्वादेव भवति । इयमस्य पत्नी । अस्य पुंसः वित्तस्य स्वामिनीत्यर्थः । पुंयोगादन्यत्र पतिरियमस्य ग्रामस्य ।

सपत्न्यादौ ॥ ३४ ॥

सपत्न्यादिषु पत्नीशब्दो निपात्यते वास इति विभाषया पत्नीशब्दस्य निपातने प्राप्ते नित्यार्थं वचनम् । समानः पतिरस्याः सपत्नी । यद्येवं पत्नीति वर्तते समान दिभ्य इति वक्तव्ये यन्नकारेकारस्य समुदायस्योच्चारणं किमर्थम् । समानशब्दस्य सभावार्थं इकारापायेपि नकारश्रवणार्थं च । सपत्न्याः अयं सापत्न्यः । कृतेकारस्येच्चारणं पुंवद्भावप्रतिषेधार्थमित्येके सपत्नीभार्यः । एव एकपत्नी । वीरपत्नी । विडपत्नी । पुत्रपत्नी । भ्रातृपत्नी ।

वा से ॥ ३५ ॥

से पत्नी वा निपात्यते पतिशब्दान्तस्य मृदः स्त्रियां वा नकारः अन्तादेशो निपात्यते । वसे षसे वेदं निपातनम् । अनीच इति नाभिसम्बध्यते गृह्यमाणस्य शब्दस्याभावात् । वासे दृढ़. पतिरस्या दृढपतिः । दृढपत्नी । स्थिरपतिः । स्थिरपत्नी । वृद्धपतिः । वृद्धपत्नी । स्थूलपतिः । स्थूलपत्नी । षसे ग्रामस्य पतिः ग्रामपतिः । ग्रामपत्नी । अप्राप्ते विकल्पोऽयम् । पुंसा योगे पत्नीति नित्यं निपातनम् । तेन पत्नीशब्देन तासे राजपत्नीत्येव भवति । स इति किम् । पतिरियमस्य ग्रामस्य ।

वर्णाद्बहुलं तोनस्तु ॥ ३६ ॥

वर्णवाचिनो मृदः स्त्रियां बहुल ङीत्यो भवति तका-

रस्य तु नकारादेशः तुशब्द किमर्थं बहुल ङीविधिर्भवति तकारस्य तु नकारो नित्यं यथा स्यादित्येवमर्थः । एता । एनी । स्येता । स्येनी । रोहिता । रोहिणी । हरिता । हरिणी । शबली । पिशङ्गी । कल्माषी । सारंगी । काली संज्ञायां वर्णे च । काला अन्या । क्वचिदप्रवृत्तिरेव श्वेता । असिता । पलिता । कृष्णा । कपिला । क्वचिदुभयथा । शोणी । शोणा । वडवा । नीली औषधिः । प्राणिनि च नीली वडवा । नीली गौः । सज्ञायामुभयम् । नीली । नीला । आच्छादने न भवत्येव । नीला साटी । नीला मेघमहतिः । वर्णादिति किम् । कृता । हृता । अत इत्येव । स्तिः कन्या ।

कुण्डगोणस्थलभाजनागकुशकामुककबरादमत्रावपनाकृत्रिमाश्राणास्थौल्यायोविकारमैथुनेच्छाकेशवेशेषु ॥ ३७ ॥

कुण्डादिभ्यः कबरशब्दपर्यन्तेभ्य अमत्रादिष्वर्थेषु यथासङ्ख्यं स्त्रिया ङीत्योा भवति । कुण्डी भवति अमत्र चेत् कुण्डा अन्या दाह इत्यर्थः । गोणी भवति आवपनं चेत् गोणा अन्या । सज्ञैषा । स्थली भवति अकृत्रिमा चेत् स्थला अन्या । भाजी भवति श्राणा चेत् भाजा अन्या । भाजयते. स्त्रियां युक्ति प्राप्ते अत एव निपातनादकारः । नागी भवति स्थौल्यं चेत् नागा अन्या । तन्वी दीर्घा वा संज्ञाया वा । जातिविवक्षायां तु नित्यं ङी । कुशी भवति अयोविकारश्चेत् कुशा अन्या काष्ठादिमयी तदाकृति. । कामुकी भवति मैथुनेच्छा चेत् कामुका अन्या । कबरी भवति केशवेशश्चेत् कबरा अन्या ।

पुंयोगात् खोरगोपालकादेः ॥ ३८ ॥

अत इति वर्तते पुंयोगाद्धेतोर्यः शब्दः स्त्रियां वर्तते खभूतः तस्मात् ङीत्योा भवति गोपालकादीन् वर्जयित्वा । उपा-

ध्यायस्य स्त्री उपाध्यायी । गणकी । प्रष्ठी । महामात्री । एते संज्ञाशब्दा पुंयोगात् स्त्रियां वर्तते । पुंयोगादिति किम् । देवदत्ता । खोरिति किम् । प्रसूता । प्रजाता । परिभ्रष्ठा । पुंयोगादेते शब्दाः स्त्रियां वर्तन्ते न तु पुंसि संज्ञाभूताः । अगोपालकादेरिति किम् । गोपालिका । पशुपालिका । आदिशब्दः प्रकारवाची । तेन सूर्यादेवतायां ङीर्न भवति । सूर्यस्य भार्या सूर्या । देवतायामिति किम् । सूर्यो नाम मनुष्यः तस्य सूरीति ।

पूतक्रतोरैच ॥ ३९ ॥

पुंयोगादिति वर्तते । पूतक्रतुशब्दात्तु ङीत्यो भवति ऐकारश्चान्तादेशः । पूतक्रतोः स्त्री पूतक्रतायी । पुंयोगादित्येव । पूताः क्रतवो यस्याः सा पूतक्रतुः ।

वृषाकप्यग्निकुसितकुसीदात् ॥ ४० ॥

ऐचेति वर्तते पुंयोगादिति च । वृषाकपि अग्नि कुसित कुसीद इत्येतेभ्यः स्त्रियां ङीत्यो भवति ऐकारश्चान्तादेशः । वृषाकपायी । अग्नायी । कुसितायी । कुसीदायी । कुसितकुसीदयोः संज्ञाशब्दत्वात् पूर्वेणैव सिद्धेऽप्यैकारार्थं वचनम् । पुंयोगादित्येव । वृषाकपिर्नाम काचित् ।

मनोरौ च ॥ ४१ ॥

पुंयोगादिति वर्तते औकारश्चान्तादेशः ऐकारश्च । मनोः स्त्री मनावी । मनायी । केषांचिन्मनुरित्यपि ॥

वरुणभवसर्वरुद्रेन्द्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् ॥ ४२ ॥

वरुणादिभ्यो मृड्भ्यो ङीः स्त्रियां त्यो भवति आनुगागमः । अत्र केषांचिच्छब्दानां पुंयोगादिति सिद्धेऽप्यानुगर्थं ग्रहणम् ।

वरुणानी । भवानी । सर्वाणी । रुद्राणी । इन्द्राणी । मृडाणी । हिमारण्ययोर्महत्त्वे । महद्धिम हिमानी । महदरण्यमरण्यानी । यवाद्दोषे । सदोषो यवः यवानी । यवनाल्लिप्याम् । यवनानां लिपिः यवनानी । उपाध्यायमातुलाभ्यां वा । आनुकएवायं विकल्पः । उपाध्यायी । उपाध्यायानी । मातुली । मातुलानी । आचार्याद्णत्वं च । आचार्यानी । अचार्या । आर्यक्षत्रियाभ्यां अपुयोगे वेति वक्तव्यम् । आर्याणी । आर्या । क्षत्रियाणी । क्षत्रिया । अपुंयोग इति किम् । आर्यस्य भार्या आर्यी । क्षत्रियस्य भार्या क्षत्रियी । आनुगिति द्विमात्रोच्चारणमिष्टिसग्रहार्थम् ।

क्रीतात्करणादेः ॥ ४३ ॥

क्रीतशब्दान्तान्मृदः करणादेः स्त्रियां ङीत्येो भवति । वस्त्रेण क्रीयते या वस्त्रक्रीती । वसनक्रीती । साधनंकृताबहुलमित्यत्र बहुलवचनाल्लुबधम् । तिद्वाक्कारकाणां कृभ्दिः सविधिः प्राक्सुबुत्पत्तेरिति करणवाचिशब्दस्य क्रीतशब्देन सविधिः । पश्चादकारांतलक्षणो ङीविधिः । करणादेरिति किम् । सुक्रीता । दुःक्रीता । ताइदुडोत्यपुम्महुस इति सत्यत्वे कथ सा हि तस्य धनक्रीता प्राणेभ्योऽपि गरीयसी बहुलवचनादन् सुबन्तेन वृत्तिर्न कृदन्तेन सुबुत्पत्तिश्च बहिरङ्गा अन्तरङ्गे टापि कृते भवतीति सिद्धम् । क्रीतान्तान्मृद इति विशेषणात् वाक्येन भवति, व्रत्येण क्रीता ।

क्तादल्पे ॥ ४४ ॥

करणादेरिति वर्तते । करणादेर्मृदः क्तान्तात् अल्पे ङीत्येः भवति । अत्रापि प्राक् सुबुत्पत्तेः सविधिः । अभ्रविलिप्ती द्यौः । अल्पान्यस्यामभ्राणीत्यर्थः । रूपविलीप्ती पात्री, अल्प इति किम् । चन्दनानुलिप्ता ।

जातेर्वात् ॥ ४५ ॥

क्तादिति वर्तते । जातिशब्दपूर्वः क्तान्तो यो वसः तस्मात् ङीत्यो भवति । अस्वाङ्गादेरुत्तरत्र विकल्पो वक्ष्यते । स्वाङ्गे पूर्वपदमिहोदाहरणम् । शङ्खौ भिन्नौ यस्याः सा शङ्खभिन्नी । ऊरुच्छिन्नी । गलकोत्कृत्ती । केशलूनी । जातेरिति किम् । मासजाता । बहुजाता । अजाता । सुखजाता । दुःखजाता । वादिति किम् । सख्यजानुप्रतिष्ठिता । जातान्तात्प्रतिषेधो वक्तव्यः । दन्तजाता । स्तनजाता । पाणिगृहीत्यादीनां गुर्वनुज्ञातेन ङीर्वक्तव्यः । पाणिगृहीती भार्या । यस्यास्तु यथाकथंचित् पाणिर्गृहीतः सा पाणिगृहीता । तइतिदतोक्तं जीवतिकालसुखादिभ्यः परनिपातः तान्तस्येति जातिरत्र सकृदाख्यातनिर्ग्राह्या ॥

वा ऽस्वाङ्गादेः ॥ ४६ ॥

क्तादिति वर्तते । वादिति च अस्वाङ्गादेः क्तान्ताद्वसात् वा ङीत्यो भवति । सागरं जग्धमनया सागरजग्धी । सागरजग्धा । पलाण्डुभक्षिती । पलाण्डुभक्षिता । सुरापीती । सुरापीता । अस्वाङ्गादेरिति किम् । शंखभिन्नी । स्वाङ्गादेः पूर्वेण नित्यो विधिः । वेति व्यवस्थितविभाषा तेनेह न भवति । वस्त्रं छन्नमस्याः वस्त्रछन्ना । वसनच्छन्ना । षसेपि संज्ञायां विकल्पः । प्रवद्भविलूनी । प्रवद्भविलूना ॥

स्वाङ्गान्नीचोस्फोडः ॥ ४७ ॥

वेति वर्तते । स्वाङ्गं न्यक् अस्फोड् यत् तदन्तान्मृदः वा ङीत्यो भवति । दीर्घकेशी । दीर्घकेशा । गौरमुखी । गौरमुखा । स्वाङ्गादिति किम् । बहुयवा । अस्फोड इति किम् । कल्याणगुल्फा । कल्याणपार्ष्णी । वेतिव्यवस्थितविभाषा व्याख्याता ।

तेनअङ्गगात्रकण्ठेभ्यो वा प्रतिषेध. । मृदङ्गी । मृदङ्गा । मृदुगात्री । मृदुगात्रा । स्निग्धकण्ठी । स्निग्धकण्ठा । वसाधिकारे पुनर्न्यग्रहणं वार्थम् । अधिकेशी । अधिकेशा । निःकेशी । निःकेशा माला । इह कस्मान्न भवति कल्याण पाणिपादमस्याः कल्याणपाणिपादा । स्वाङ्गसमुदायः स्वाङ्गग्रहणेन न गृह्यते किम् स्वांग अद्रवं मूर्तिमत्स्वाङ्ग प्राणिस्थमविकारजम् । अतत्स्थं तत्र दृष्टं चेत् तस्य चेत् तत् तथायुतम् । स्वाङ्ग मुखादि । अद्रवमिति किम् । बहुकफा । मूर्तिमदिति किम् । बहुज्ञाना । प्राणिस्थमिति किम् । क्षणमुखा शाला । अविकारजमिति किम् । बहुसोफा । अतत्स्थं तत्र दृष्टं च प्राक् प्राणिनि दृष्टं संप्रत्यप्राणिस्थमपि स्वाङ्गम् । दीर्घकेशी । दीर्घकेशा रथ्या । तस्य चेत्तत् तथा युतम् येन प्रकारेण प्राणिनो युतंदृष्टं तस्या प्राणिनोपि यदि तत्तथायुतं दृश्यते एवमपि स्वाङ्गम् । दीर्घमुखा दीर्घमुखी अर्चा ॥

नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गात् ॥ ४८ ॥

स्वाङ्गान्नीच इति वर्तते । वेति च । नासिकादयो ये नीचः तदन्तान्मृदः वा ङीत्यो भवति । दीर्घनासिकी । दीर्घनासिका । तनूदरी । तनूदरा । विम्बोष्ठी । विम्बोष्ठा । ओत्वोष्ठयोर्वासे परूपमुपसंख्यास्यते । समजङ्घी । समजङ्घा । समदन्ती । समदन्ता । चारुकर्णी । चारुकर्णा । तीक्ष्णशृङ्गी । तीक्ष्णशृङ्गा । नासिकोदरयोर्बहुच इत्यनन्तरे प्रतिषेधे प्राप्ते ग्रहणम् । सहनञ्विद्यमानलक्षणस्तु प्रतिषेधो भवत्येव शेषाणामस्फोडइति पूर्वस्मिन् प्रतिषेधे प्राप्ते उपादानम् । महादिप्रतिषेधस्तु भवत्येव । पुच्छाच्चेति वक्तव्यम् दीर्घपुच्छी । दीर्घपुच्छा । कबरमणिशरविषेभ्यो नित्यमिति वक्तव्यम् । कबरं पुच्छमस्याः कबरपुच्छी । मणिः पुच्छे

अस्या. मणिपुच्छी । विषं पुच्छे अस्याः विषपुच्छी । ईब्बिशेषणे वेत्यत्र खड्गादिभ्यः इबतस्य परवचनमुक्तम् । उपमानात् पक्षपुच्छाभ्यामिति वक्तव्यम् । उलूक इव पक्षावस्याः उलूकपक्षी शाला । उलूक इव पुच्छमस्या उलूकपुच्छी सेना ॥

न क्रोडादिबह्वचः ॥ ४८ ॥

क्रोडादिर्गणः । क्रोडाद्यन्तात् बह्वजन्ताच्च सृदः ङीत्यो न भवति । स्वाङ्गान्नीच इति प्राप्तिः । क्रोडाशब्दः स्त्रीलिङ्गः । कल्याणी क्रोडा अस्याः कल्याणक्रोडा । कल्याणगोरवा । कल्याणबाला । कल्याणखुरा । कल्याणशफा । कल्याणगुदा । क्रोडादिराकृतिगणः । सुभगा । सुगला । बह्वच.खल्वपि । पृथुजघना । दृढहृदया । महाललाटा ॥

सहनञ्विद्यमानात् ॥ ॥ ५० ॥

सह नञ् विद्यमान इत्येतेभ्य उत्तरं यत्स्वाङ्गं तदन्तात् ङीत्यो भवति । सकेशा । अकेशा । विद्यमानकेशा । सनासिका । अनासिका । विद्यमाननासिका । सुदन्ता । विद्यमानदन्ता ॥

नखमुखात्तवौ ॥ ५१ ॥

नख मुख इत्येवमन्तान्मृदः खुविषये ङीत्यो न भवति । सूर्पणखा । व्याघ्रणखा । वज्रणखा । पूर्वपदात्खावगहतिणत्वम् । गौरमुखा । श्लक्ष्णमुखा । संज्ञाशब्दा एते । खाविति किम् । सूर्पमिव नखा अस्या सूर्पनखी । सूर्पनखा । चन्द्रमुखी । चन्द्रमुखा ॥

सख्यशिश्वी ॥ ५२ ॥

सखी अशिश्वी इत्येतौ शब्दौ निपात्येते ङीविधिर्निपात्यते । सखीयं कुमारी । नास्याः शिशुरस्ति अशिश्वी ॥

जातेरयोङः ॥ ५३ ॥

अत इति वर्तते । जातिवाचिन अयकारोङो मृदः स्त्रियां ङीत्यो भवति । आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह । आकृतिः संस्थान आकृतिग्रहणमस्या आकृतिग्रहणा । ब्राह्मणत्वादीनां जातिविशेषाणां संस्थानविशेषाभावात् कथं संग्रहः । लिङ्गानां च न सर्वभाक्एकालिंगो द्विलिङ्गो वा भावो जाति । ब्राह्मणत्वादिषु केवलमुपदेशमात्र जातिव्यवहारस्य निबंधनम् । जात्यभावेऽपि द्विलिंगतास्ति देवदत्तः देवदत्ता इति । अथ कथं त्रिलिङ्गेषु तटस्तटी तटमित्येवमादिषु जातिवाचित्वम् । सकृदाख्यातनिर्ग्राह्या अभिधानप्रत्ययथोरनाकस्मिकत्वात्तन्निमित्त जातिरिति । एवं सकृदाख्याता निश्चयेन ग्राह्या ननु सर्वे शब्दा जातिवाचिन इत्यस्मिन् दर्शने यदृच्छाशब्दानां क्रियागुणशब्दाना च जातिशब्दत्व देवदत्तादयोपि संज्ञाशब्दा बाल्यकौमारयौवनादिष्ववयविनीमाकृतिमवलबन्ते। एवच देवदत्ता कारणाशुक्लेत्यत्र ङीविधिः प्रसज्येत यदीद दर्शनमाश्रीयेत व्यावर्त्य नास्तीति ग्रहणमनर्थक स्यात् । तस्माद्येषां जातिरेव प्रवृत्तेर्निमित्तं त इह जातिशब्दाः । गोत्र च लौकिकमपत्यमात्रं जातिः मात्राकृतिः प्रतीयते नापि किंचिल्लिङ्गमस्ति येन सकृदाख्यातेन लिङ्गाना च न सर्वभागित्यस्मिन् दर्शने गोत्रंचेति न वक्तव्यम् चरणैः सहेति चरणमध्ययनवशात् क्रिया तदात्मकं जातिः । कुक्कुटी । ब्राह्मणी । तटी । नाडायनी । बठ्हची । कठी । कठेन प्रोक्तमधीते या शौनकादिभ्यश्छन्दसि णिनिति णिन् । परस्याणः उपप्रोक्तादित्युप् । शौनकादिष्वेव । कठचरकादिति इन उप् । जातेरिति किम् । मुण्डा । अयोङ इति किम् । आर्या । क्षत्रिया ।

पाककर्णपर्णपुष्पफलमूलवालद्यु: ॥ ५४ ॥

पाकादयो द्यभूता यस्य तस्माज्जातिवाचिनो मृद: स्त्रियां ङीत्यो भवति । ओदनपाकी । क्षणपाकी । मूषिककर्णी । संकुकर्णी । यष्टीपर्णी । शालिपर्णी । शखपुष्पी । हिरण्यपुष्पी । दासीफली । पूगफली । दर्भमूली । सौर्यमूली । गोवाली । अश्ववाली । पुष्पफलमूलोत्तरपदादुत्तो ङीविधिर्नेष्यते तदजादिषु पठनीयम् । पूर्वेण सिद्धे नियमार्थमेतत् स्त्रियामेव ये जातिवाचिन: शब्दा: तेषु एतेभ्य एव ङीविधिर्नान्यस्मात् । बलाका । मक्षिका ।

इतो मनुष्यजाते: ॥ ५५ ॥

इकारान्तान्मनुष्यजातिवाचिनो मृद: स्त्रियां ङीत्यो भवति । कुन्ती । अवन्ती । अपत्यार्थे द्विकुरुनडुद्यजादकौशलात्-ज्य इति ज्य । तस्य कुन्त्यवन्तिकुरुभ्य: स्त्रियामित्युप् । एवं दाक्षी । प्लाक्षी । इत इति किम् । विट् । दत् । यथासख्यमञणो-अतोऽप्राच्यभर्गादेरित्युप् । मनुष्यग्रहणं किम् । तित्तिरि: । जातेरिति वर्तमाने पुनर्जातिग्रहणं योऽपि यथा स्यात् । औदमेयी । अयोऽङिति प्रतिषेध: उत्तरत्र त्रिसूत्र्यां च वर्तते । इञ उपसंख्यानमजात्यर्थं कर्तव्यम् । सुतङ्गमेन निर्वृत्ता नगरी सौतङ्गमी । बुञ्छण्कठेत्यादिना सुतङ्गमादिभ्य इञ् ।

ऊरुत: ॥ ५६ ॥

मनुष्यजातेरिति वर्तते । उकारान्तान्मनुष्यजातिवाचिनो मृद: स्त्रियां ऊकारस्त्यो भवति । कुरू: । इक्ष्वाकू: । पर्शू: । अस्य कुन्त्यवन्तिकुरुभ्य:स्त्रियामिति अञणो: अतोऽप्राच्यभर्गादेरित्युप् । द्विमात्रोच्चारणं शेषाद्वेति परस्यापि कपो बाधनार्थम् । तथाहि ब्रह्म बन्धुर्यस्या: सा ब्रह्मबन्धू: ।

वीरबन्धूः । अत्र च समुदायो ब्राह्मणविशेषजातिः । यदृभ्दावेन मृदमृदोरेकादेशः मृद्भवतीति मृत्सञ्ज्ञायां स्वाद्युत्पत्तिः । मनुष्यजातेरित्येव । रुरूः । कृकवाकुः । आखुः । अयोङ इत्येव । अध्वर्युः स्त्री । अलाबूः । कर्कन्धूरित्येवमादयः ऊणादिकाःकथं अलाबुकर्कंधुदन्त्रफलमिति इकः प्रोद्या इति प्रादेशेन सिद्धम् ।

पङ्गोः ॥ ५७ ॥

पङ्गुशब्दात् स्त्रियां ऊत्यो भवति । पङ्गूः । श्वसुरशब्दस्योकाराकरयोः खमूश्च त्यो वक्तव्यः । श्वश्रूः ॥

ऊरुद्योरिवे ॥ ५८ ॥

ऊरुशब्दो द्युर्यस्य तस्मान्मृदः इवार्थे गम्ये स्त्रियामूत्यो भवति । करभोरूः । कदलीस्तम्भोरूः । नागनासोरूः । इव इति किम् । वृत्तोरुः कन्या ।

संहितसफलक्षणवामादेः ॥ ५९ ॥

संहिताद्यादेर्मृदः ऊरुद्योः स्त्रियामूत्यो भवति ।अनिवार्थोऽयमारम्भः । संहितोरूः । सफोरूः । लक्षणोरूः । वामोरूः ।सहित सहाभ्यां चेति वक्तव्यम् । सहितोरूः । सहोरूः ।

बाहून्तकद्रुकमण्डलुभ्यः ॥ ६० ॥

बाहुशब्दान्तान्मृदः कद्रुकमण्डलुशब्दाभ्यां खुविषये ऊत्यो भवति । भद्रबाहूः । भद्रद्राहूः । कद्रूः । कमंडलूः । कासां चिदेताः संज्ञाः । खाविति किम् । वृत्तौ बाहू अस्याः वृतबाहूः । कद्रुः । कमण्डलुः ॥

हृतः ॥ ६१ ॥

अधिकारेणेयं संज्ञा । यानित ऊर्द्धमनुक्रमिष्यामः आकपः हृत्संज्ञास्ते वेदितव्याः । वध्वति । यूनस्तिः युवतिः ।

कृदुतृगइति सृत्संज्ञाया स्वाद्युत्पत्तिः । बहुत्वनिर्देशोऽनुक्तपरिग्रहार्थः । मध्यान्म उक्तो ऽन्यतोऽपि भवति । अन्तमः । आदिमः । धर्म्यादुण् विहितः । अधर्मादपि । आधर्मिकः । कृतामिह बहुत्वेन निर्देशे किं प्रयोजनम् । अनुक्ताच्च कृदुत्पत्तिर्यथा स्यादन्तमादिषु । तथा अनुक्ता अपि कृतेभवन्ति । अग्रपश्चाद्भिम इत्येवमादयः ॥

यूनस्तिः ॥ ६२ ॥

युवन्नित्येतस्मात्तिर्भवति स्त्रियाम् । युवतिः । यूनः स्त्रीविवक्षायां कुत्साद्यर्थविवक्षायां च परत्वात् कादयः प्राप्नुवन्ति तस्माद्यून इति योगविभागः । यूनः कृत्प्रसङ्गे स्त्रीत्यय एव भवति ततः कादयः । युवतिकाः ।

ष्यैाऽक्षु रूपान्त्ययोर्वृद्धेऽनार्षेऽणिञोः ॥ ६३ ॥

स्त्रियामिति वर्तते । अणिञौ यौ वृद्धेऽनार्षे विहितौ अक्षुरूपान्त्यौ तदन्तस्य मृदः ष्य इत्ययमादेशो भवति । निर्दिश्यमानयोरणिञोरेव ष्यादेशः । पौत्रादि वृद्धमिति अपत्यविशेषस्य वृद्धसंज्ञा । ऋषेरिदमार्षं तद्गृह्यते वृद्ध इति । स्फे रुः दीरिति अचां रु संज्ञोक्ता रुः उपान्त्यं सन्निहितं ययोरणिञोस्तयो ष्यादेशः । षकारः वे ष्यस्य पुत्रयत्योर्जिरित्यत्र विशेषणार्थः । करीषस्येव गन्धोऽस्य करीषगन्धिः । उपमानादिति वा इकारः सान्तः । करीषगन्धेरपत्यं स्त्री कारीषगन्ध्या । कौमुदगन्ध्या । वराहस्यापत्यं स्त्री वाराह्या । बालाक्या । जातिलक्षणस्यायोङ इति प्रतिषेधः अनर्लिबधाविति स्यानिवद्भावप्रतिषेधात् । अणिञ्लक्षणोऽपि ङीत्यो न भवति ततः ष्यान्ताद्टाप् । अक्षिति हलामविवक्षार्थं अचां निर्द्धारणं क्रियते अक्षुरूपान्त्ययोरिति अन्यथा येनाव्यवधानं तेन व्यवहितेऽपीति एकेन वर्णेन व्यवधाने

वाराह्यादिषु स्यात् । अञ्जिति बहुत्वनिर्देशः प्रधानभूतेा-यत्राचां बहुत्वमस्ति तत्रादेशः तेनेह न भवति । दाक्षी । प्लाक्षी रूपांत्ययोरिति किम् । औपगवी । वृद्ध इति किम् । अहि-च्छत्रे जाता आहिछत्री । अनार्ष इति किम् । वाशिष्ठी । वैश्वामित्री । अणिञोरिति किम् । आर्तभागी । ऋतभा-गाद्विदादिलक्षणोऽञ् । इह उडुलोम्नोऽपत्यं स्त्री औडुलोम्या । बाह्वादित्वादिञ् टिखे कृते रूपान्त्यत्वं ततः ष्यादेश इति आनुपूर्व्यम् ॥

गोत्रावयवात् ॥ ६४ ॥

अणिञोरिति वर्तते । गोत्रमिति पूर्वाचार्याणां वृद्धस्य संज्ञा । गोत्रावयवाः गोत्राभिमताः कुलाख्याः गोत्रावयववा-चिनेा मृदः वृद्धे विहितयेारणिञोः स्त्रियां ष्यो भवति । अरूपां-त्यार्थोऽयमारम्भः । पुष्किकस्यापत्यं स्त्री पौष्किक्या । भुष्किकस्य भौष्किक्या । मुखरस्य मौख्यी । यत्रानन्तरापत्येऽपि ष्यो दृश्य-ते क्रौड्यादिषु तत्पठनीयं यथा अन्तकाम्या देवदत्ता ॥

क्रौड्यादेः ॥ ६५ ॥

क्रौड्य इत्येवमादिभ्यश्च स्त्रियां ष्यो भवति यथासम्भ-वङीटापोः प्राप्तयोः क्वचिदनन्तरापत्यार्थः क्वचिद्बहुजर्थः क्वचि-दरूपान्त्यार्थः आरम्भः क्वचिदणिञोरनयोरपि त्यएवायं ष्य इष्यते । क्रौडी । क्रौड्या । इतोमनुष्यजातेरिति ङीविधिः प्राप्तः । क्रौडि लाडि ष्याडि आपिशलि आपक्षिति एते इञन्ताः । चौपयत चैटयत सैकयत वैल्वयत एते नकारान्ता अणन्ताः । सौधातकिः इञन्तः । सूतशब्दाद्युवत्या ष्यः । सूत्या । सूता अन्यत्र । भोजात् क्षत्रियजातौ । भोज्या । भोजा अन्या । भौरिकिसाल्वस्थलिकापिष्टलि एते इञन्ताः । गौकक्षा टाबन्तोच्चारणं ञित्वनिवृत्त्यर्थम् । गौकक्ष्यापुत्रः ॥

दैवयज्ञिसौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्यो वा ॥ ६६ ॥

दैवयज्ञि सौचवृक्षि सात्यमुग्रि काण्ठेविद्धि इत्येतेभ्यः वा ष्यो भवति । उभयत्र विभाषेयम् । वृद्धे प्राप्ते अनन्तरापत्ये चाप्राप्ते । दैवयज्ञ्या । दैवयज्ञी । सौचिवृक्ष्या । सौचिवृक्षी । सात्यमुग्र्या । सात्यमुग्री । काण्ठेविद्ध्या । काण्ठेविद्धी । अनन्तरापत्ये इञ उपसंख्यानमजात्यर्थमिति ङी वृद्धापत्ये इतोमनुष्यजातेरिति ॥

समर्थात्प्रथमाद्वा ॥ ६७ ॥

समर्थादिति प्रथमादिति वेति च पदत्रितयमधिकृतं वेदितव्यम् किंबहुसर्वनाम्नोद्व्यादेरित्यतः प्राक् वक्ष्यति तस्यापत्यं उपगोरपत्यं औपगवः । तस्येत्येतत्तांतं सूत्रे प्रथमं सन्निविष्टम् तस्मादपत्याभिधाने ष्यः समर्थादित्युच्यते सामर्थ्यं च सुवन्तस्येति सुवन्तात्योत्पत्तिः द्वद्वणादिति विशेषणार्थंतु ङ्याम्ह्रस्वग्रहणमधिक्रियते वृद्धस्य उपगोरपत्यमिति वाक्यस्यासुवन्तत्वात् वाक्यावयवस्य चासामर्थ्यात् ष्यानुत्पत्तिः । समर्थादिति किम् । कम्बल उपगोरपत्यं देवदत्तस्य । यद्येवं समर्थः पदविधिरिति समर्थादेव भविष्यति किमनेन कृतवर्णानुपूर्वकात् पदात् ष्यो यथा स्यादित्येवमर्थम् । सूत्थितस्यापत्यं सौत्थितिः । वैक्षमाणिरिति नेन्द्रस्येत्यत्र वक्ष्यति समुदायकार्यं तावद्भवति पश्चादेकादेशः । एवं वासंहितात्योत्पत्तावनिष्टं रूपं स्यात् । प्रथमादिति किम् । तान्ताद्यथा स्यादपत्यशब्दान्मा भूत । वाग्रहणं किम् । उपगोरपत्यमिति वाक्यमपि साधु यथा स्यात् । अनन्तराद्वाग्रहणात् सविधिरपि । उपगवपत्यम् ॥

प्राग्द्रोरण् ॥ ६८ ॥

द्रोः माने वय इति वक्ष्यति प्रागेतस्माद्योऽर्थो वक्ष्यन्ते तेष्वण् भवतीति वेदितव्यम् । अधिकारो विधिर्बाऽयम् । अधिकारपक्षे पीलाया वा बोदश्वित इत्येवमादौ वावचनादपवादविषये नास्ति वृत्तिः । विधिपक्षेपि परिहृत्यापवादविषयं तत वत्स-गौंऽभिनिविशते । वक्ष्यति तस्यापत्य औपगवः । आपटयः । अपवादेन बाधितोऽप्युत्तरत्रानुवर्तताभिति प्राग्वचनम् ।

अश्वपत्यादेः ॥ ६९ ॥

अश्वपति इत्येवमादिभ्यः समर्थविभक्त्यन्तेभ्यः अण् भवति प्राग् द्रोरर्थेषु । पतिद्योरिति रायो वक्ष्यते । तस्यायमपवादः । अश्वपतेरपत्यं आश्वपतः । अश्वपति गजपति गणपति राष्ट्र पति कुलपति पशुपति धान्यपति बन्धुपति सभापति क्षेत्रपति येऽत्र द्रुसंज्ञाः तेभ्यः दोश्छइति छ बाधित्वा पूर्वनिर्णयेनायमेवाण् ।

दित्यदित्यादित्यपतिद्योरर्यः ॥ ७० ॥

प्राग् द्रोरिति वर्तते । दिति अदिति आदित्य पतिद्यु इत्येतेभ्यः समर्थविभक्त्यंतेभ्यः प्राग् द्रोरर्थेषु रायो भवति । अणोऽपवादः । दितेरपत्यं दैत्यः । द्व्यचश्छतोर्नित्यइतीमढण पूर्वनिर्णयेनायं बाधते । सर्वतोत्यार्णादिति ङीविधौ ङ्ते परत्वाड्ढुण् च भवति । दैतेयः । लिंगविशिष्टपरिभाषावानित्या अदितेरपत्यं आदित्यः । आदित्यस्यापत्यमादित्यः । प्राक्तनस्य यकारस्य क्यच्च्यानावृत्त्यापत्यस्येति हलो यमां यमि खमिति वा खम् । पतिद्योः खल्वपि । बार्हस्पत्यः । सैनापत्यः । प्राजापत्यः । रायादयोऽर्थविशेषलक्षणादणपवादात् पूर्वनिर्णयेन राय

एत्र भवति । वनस्पतीनां समूहः वानस्पत्यम् । यमाच्चेति वक्तव्यम् । यमस्यापत्य याम्यः । पृथिव्या जाजौ । पार्थिवः । पार्थिवी । देवस्य यज्ञजौ । दैव्यम् । दैवम् । बहिषष्टिखं यज्ञ । बाह्यम् । ईक एव । बाहीकः । झेर्मात्रटिखमनित्यमारातीय इत्यादौ । स्याद्गोऽकारः । अश्वत्थाम्नोऽपत्यं अश्वत्थामः । लोम्नश्चापत्येषु बहुषु । उडुलोमाः । शरलोमाः । बहुष्विति किम् । औडुलोमिः । शारलोमिः । सर्वत्र गोरजादिप्रसगे यः । गव्यः । अजादिप्रसंग इति किम् । गोरुप्यम् । गोमयम् ॥

उत्सादेरञ् ॥ ७१ ॥

प्राग्ढोरिति वर्तते । उत्स इत्येवमादिभ्यः सप्तमर्थविभक्त्यन्तेभ्यः प्राग्ढोरर्थेष्वञ् भवति । अणस्तदपवादानां च बाधकः । अञि सति यञञोरिति बहुत्वे उञ भवति । उत्सस्यापत्यं औत्सः । उदपानस्यापत्यमौदपानः । उत्स उदपान विकिर विनद महानद महाप्राण तरुण तलुन वष्कयशब्दादसे असमास इत्यर्थः । धेनु षड्ऋति जगती त्रिष्टुप् अनुष्टुप् जनपद भरत उशीनर पीलु कुण उदस्थानशब्दाद्देशे पृषदश्व भल्लकीय रथंतर मध्यंदिन बृहत् महत् सत्वत्शब्दो मत्वंतः आगतनुको गृह्यते । कुरु पञ्चाल इंद्रावसान उष्णिह ककुभ् सुपर्ण ग्रीष्मादछन्दसीति वक्तव्यम् । छन्दश्चेह वृत्तजातिः । तरुणशब्दस्य लिंगविशिष्टस्य ग्रहणम् । तरुण्या अपत्यं तारुणः रायादयोऽर्थविशेषलक्षणादणपवादात् पूर्वनिर्णयेन भवन्तीति ।

स्त्रीपुंसान्नुकृत्वात् ॥ ७२ ॥

बक्ष्यति ब्रह्मणस्त्व एतस्मात्त्वसंशब्दनात् प्राग्योऽर्थो बक्ष्यते तेषु स्त्रीशब्दात् पुंशब्दाच्च अञ् भवति नुगागमः । स्त्रीषु भवं स्त्रीणा समूहः स्त्रीभ्यः आगतम् स्त्रीभ्यो हितं

स्त्रीणां भावो वा स्त्रैणम् । एव पौंस्नम् । नेापुंसोहतीत्तिप्रतिषेधात् पुंसष्टिख न भवति । स्त्रीशब्दस्य तु नुग्वचन सामर्थ्यात् । स्त्रैणाः पौंस्ना इत्यत्र यञञोरित्युप् प्राप्नोति इह च स्त्रैणानां संघ इति संघाङ्कलक्षणइत्यण् प्राप्नोति । चेत्नैतौ दोषौ अपत्याधिकारात् प्रागूर्द्धं च वृद्धग्रहणेषु लौकिकगोत्रग्रहणमितिवक्ष्यते नच स्त्रैण पौस्नमिति वा लौकिकं गोत्र तस्मादुपरगौ न भवतः । पुवद्यजातीयदेशीय इतिवचन योगापेक्षं ज्ञापकं वतोऽर्थे नायं विधिरिति । स्त्रीवत् । पुवत् ।

वृद्धेऽच्यनुप् ॥ ७३ ॥

प्राग्द्वोरिति वर्तते । यस्कादिभ्यो वृद्ध इत्यत्र उबुक्त तस्यानुभवति प्राग्द्वीय अजादावुत्पत्स्यमाने । गर्गाणा छात्राः गार्गीयाः । यञञोरिति बहुत्वे उप् प्राप्त. ङ्यविषये प्रतिषिध्यते । यस्य ङ्याचेत्यरव क्यङ्तावृत्यापत्पस्येति यखम् त्याश्रयलक्षण ऐञभवति । यास्कीयाः । शिवादिलक्षणस्याणः यस्कादिभ्यो वृद्ध इत्युप् प्राप्त । आत्रेयीयाः । द्वयचः इतोनिञइतिढण्तस्य भृग्वत्रिकुत्सवशिष्टगोतमागिरोभ्यइत्युप्प्राप्तः । खारपायणीयाः । यस्कादिभ्यो वृद्ध इत्यनेन नडादिफणः उप् प्राप्तः । वृद्ध इति किम् । कुञ्जलस्येद कौञ्जलम् । बादरम् । अवयवार्थे आगतस्याणः उपफल इति उबेव भवति । अचीति किम् । गर्गेभ्यः गर्गरूप्यम् । गर्गमयम् । प्राग्द्वोरित्येव गर्गेभ्यो हितं गर्गीयम् । वृद्धाद्बहून्तात् एकस्मिन् यूनि द्वयेोर्वा यूनोर्यस्यः तस्मिन्नष्टेऽप्यनुबभवति । बिदानामपत्यं युवा बैदः वैदा । अञन्तादत इञ् । तस्य त्रिषयराजार्षाद्युन्युवणिञोरित्युप् । त्यखे त्याश्रयमित्यजादित्वमस्ति । वर्णाश्रये नास्ति त्याश्रयमिति न मतव्यम् । अचीति विषयनिर्देशः । एकद्वयन्ताच्च वृद्धात् युवबहुत्वविवक्षायां उबुच वक्तव्यः । वैदस्य वैदयोः अपत्यानि युवानः बिदाः ।

रस्योबनपत्ये ॥ ७४ ॥

प्राग्द्रोरिति वर्तते । रस्य निमित्तत्वेन संबन्धी यो हृत् अपत्यवर्जिते प्राग्द्रोरर्थे विहितः तस्योऽभवति । पचसु गुरुषु भवः पञ्चगुरुर्नमस्कारः । दशसु धर्म्मेषु भवः दशधर्म्मः । द्वावनु योगावधीते द्वयनुयोगः । त्र्यनुयोगः । हृदर्थे षसः । संख्यादीरसंज्ञः । भवार्थे आगतस्याणः उप् । रस्येति निमित्तविशेषणं किम् । उबन्ताद्यो हृत् तस्योम्मा भूत् । पंचगुरोर्नमस्काररस्येदं पांचगुरवम् । यदि रस्य निमित्त यो हृत् तस्योप् इह तर्हि न प्राप्नोति पंचानां कपालानां समाहारः पंचकपाली । पंचकपाल्या संस्कृतः पंचकपालः । नैष दोषः । अठयविकन्यायेन पचकपालशब्दात् त्योत्पत्तिः । यथा अवेर्मांसं आविकमिति अविकशब्दादेव त्यो नाविशब्दात् । अनपत्य इति किम् । द्वयोर्देवदत्तयोरपत्यं द्वैदेवदत्तिः । अजग्रहणमनुवर्तते तेनेह न भवति । पंचभ्यो गर्गेभ्य आगतं पंचगर्गमयम् । प्राग्द्रोरित्येव । द्वाभ्यामक्षाभ्यां दीव्यति द्वैयक्षिकः । त्रैयक्षिकः ।

यूनि ॥ ७५ ॥

प्राग्द्रोरिति वर्तते । अचीति च यूनि यस्त्यस्तस्योप् भवति प्राग्द्रवीय अजादौ त्य उत्पत्स्यमाने । फांटाहृतिः । तस्यापत्यं युवा फांटाहृतेर्ण इति णः फांटाहृतः । तस्य यूनश्छात्रा बुद्धिस्थेष्वानपत्ये अजादौ त्ये णस्योपि कृते इञन्तमिदं जातम् । इञ इत्यण् भवति । फांटाहृताः । भगवित्तस्यापत्य भागवित्तिः । तस्यापत्यं युवा दोष्ठण् सौवीरेषु प्राय इति ठण् । भागवित्तिकः । तस्य यूनश्छात्राः ठण उपि कृते इञइत्यण् भागवित्ताः । तिकस्यापत्य तैकायनिः । तस्यापत्यं युवा फेश्छः इति छः तैकायनीयः । तस्य यूनश्छात्राः छस्योपि कृते दोश्छ इति छः तैकायनीयाः । ग्लुचु-

कस्यापत्य फिरदोरिति फिः ग्लुचुकायनिः । तस्यापत्यं युवा प्राग्द्वोरण् ग्लौचुकायनः तस्य यूनश्छात्रा अणपि तस्येदमित्यण् ग्लौचुकायना. । कपिञ्जलादस्यापत्यं कापिंजलादिः तस्यापत्यं युवा कुवादेर्गर्य इतिगर्यः । कापिञ्जलाद्यः तस्य यूनश्छात्रा गर्यस्योपि कृते इञ इत्य कापिंजलादाः । अचीत्येव । फांटाहृतरूप्यम् । फांटाहृतमयम् । प्राग्द्वोरित्येव । भागवित्तिकाय हितं भागवित्तिकीयम् ।

फणफिञोर्वा ॥ ७६ ॥

यूनीति वर्तते । यूनि यौ फराफिञौ तयोर्वा ञ्यभवति प्राग्द्वीये अजादौ त्ये विवक्षिते । पूर्वेण नित्ये ञ्यपि प्राप्ते विभाषेयम् । गार्ग्यस्यापत्यं युवा यञिञोरिति फण् गार्ग्यायणः । तस्य यूनश्छात्रा गार्गीया गार्ग्या वा। फिञः खल्वपि यस्कस्यापत्य शिवादिभ्योऽण् यास्कः । यास्कस्यापत्यं युवा द्व्यचोऽत इति फिञ् यास्कायनिः तस्य यूनश्छात्राः यास्कीयाः । यास्कायनीयाः ।

तस्यापत्यम् ॥ ७७ ॥

तस्येति तासमर्थात् ापत्यमित्येतस्मिन्नर्थे यथाविहितं त्ये भवति । हृदर्थनिर्देशलिंगवचनादिकमविवक्षितमप्राधान्यात् । उपगोरपत्यं औपगव. । तान्तादण् उक्तार्थस्यापत्यशब्दस्य निवृत्तिः सुपोधुसूदोरिति सुप उप् ऐप् आश्वपतः दैत्यः । सैनापत्यः औत्सः । स्त्रैणः । पौस्नः वृत्तौ स्वभावत एकार्थीभावः प्रकृत्यर्थो विशेषणभूतोऽप्राधान्यार्थस्य सामान्येन प्रवृत्तस्य विशेषेवस्थापनात्स्यार्थः प्रधानम्। गुणप्रधानभावेन प्रकृतिस्त्यश्च त्यार्थं सह ब्रूत इति । ननु च तस्येदं विशेषणं एते अपत्यं समूहो निवासो विकार इति

तस्येदमित्येव सिद्धं किमर्थमिदमुच्यते बाधकबाधनार्थम् । भानोरपत्यं भानवः । श्यामगवः । दुलक्षणश्छो बाधितः । तस्या-पत्यमद्वाह्वादेरिञित्येव वक्तव्ये इह करणं पूर्वैरुत्तरैश्च त्यैर-भिसबन्धो यथा स्यादित्येवमर्थम् ॥

पौत्रादि वृद्धम् ॥ ७८ ॥

पुत्रस्यापत्यं पौत्र. बिदादित्त्वादञ् प्रथमादिति वर्त-मान अर्थवशात्तया विपरिणम्यते प्रथमस्य पौत्रादि यदपत्य तत् वृद्धसंज्ञ भवति संज्ञाविषयस्य प्रथमस्य गर्गस्यापत्यं गार्ग्यः । वात्स्यः । वृद्धेकुञ्जादिभ्योऽफ इति वर्तमाने गर्गादेर्यञिति यञ् । पौत्रादीति किम् । गार्गः । अनन्तरमपत्य वृद्ध मा भूत ।

एकः ॥ ७९ ॥

वृद्धमिति वर्तते । वृद्धे अपत्ये विवक्षिते एक एव त्यो भवति । स्वस्याः स्वस्याः प्रकृतेः अपत्यभेदविवक्षायां अनेक त्यं बुध्या समुदायीकृत्य नियमः क्रियते यदिदं गर्गादिपितृकं अपत्यजातं वृद्धं तस्मिन्नेक एव त्यो भवति । स च परम-प्रकृतेर्भवति यदपि व्यवहितेन जनितमपत्यं तदपि परम-प्रकृतेः सामान्येनापत्यं भवत्येव । यद्यपि सर्वेऽप्यपत्येन युज्यन्ते तथापि प्रथमादित्यनुवर्तनात् परमप्रकृतेरेव भवि-ष्यति गर्गस्यापत्यं गार्ग्यः । तत्सुतोपि गार्ग्यः । एवं व्यव-हितेऽपि वृद्धापत्ये विवक्षिते गर्गशब्दात् यञेव भवति । अथवा प्रकृतिनियमोऽयं वृद्धापत्ये विवक्षिते एक एव शब्दः प्रथमा प्रकृतिः त्यमुत्पादयति नान्येति प्रकृतिर्नियम्यते । एवं नड-स्यापत्यं नाडायनः ।

ततो यूनि ॥ ८० ॥

ततो वृद्धत्यान्ताद् यून्यपत्ये विवक्षिते एक एव त्यो

भवति। गार्ग्यस्यापत्यं युवा गार्ग्यायणः । दाक्षायणः । औपगविः । नाडायनिः ।

जीवति तु वंश्ये युवा ऽस्त्री ॥ ८१ ॥

वंशः पितृपितामहादिप्रबन्धः तत्र भवो वंश्यः पित्रादिः । पौत्रादीति वर्तते । तच्चार्थवशात् तांतं संबध्यते । पौत्रादेर्यदपत्यं चतुर्थादिकं तद्वंशे जीवति युवसंज्ञं भवति स्त्रियं वर्जयित्वा । गार्ग्यस्यापत्यं गार्ग्यायणः । दाक्षेर्दाक्षायणः । अस्त्रियामिति किम् । गार्ग्यस्यापत्यं स्त्री गार्गी दाक्षी । तु शब्दो वृद्धसंज्ञासमावेशनिवृत्त्यर्थम् इह दोषः स्यात् सालङ्केरपत्यं युवा यञिञोरिति फण् । पैलस्यापत्यं युवा द्व्यचोऽण इति फिञ् तयोर्यूनि पैलादेरित्युप् भवति । वृद्धसंज्ञासमावेशे तु वृद्धेऽयनुबिति प्राग्द्रवीये अजादावनुप् प्रसज्येत । अस्तु यूनीति भविष्यति इह तर्हि दोषः फण्फिञोर्वेति उञिबभाष्यते उत्पक्षेऽपि वृद्धसंज्ञासमावेशे वृद्धेऽनुबिति अनुप्स्यात् । अथासमावेशे कथ वृद्धलक्षणो वुञ् गार्ग्यायणानां समूहः गार्गायणकं वक्ष्यति वृद्धोक्षोष्ट्रादिसूत्रे वृद्धग्रहणेनैव सिद्धे राजन्यमनुष्यग्रहण ज्ञापकमपत्याधिकारादन्यत्र वृद्धग्रहणे लौकिकं गोत्रग्रहणम्। तेन वृद्धयूनोः समावेशः।

भ्रातरि च ज्यायसि ॥ ८२ ॥

पौत्रादेरपत्यमिति वर्तते भ्रातरि च ज्यायसि जीवति कनीयान् भ्राता युवसंज्ञो भवति । मृतेऽपि वंश्ये यथा स्यादित्यारंभः भ्राता वंश्यो न भवति साक्षात् परम्परया वा अकारणत्वात् गार्ग्यस्य द्वौ पुत्रौ ज्यायसि जीवति कनीयान् गार्ग्यायणः । एवं दाक्षायणः ज्यायांस्तु भ्राता गार्ग्यो दाक्षिरिति ।

बान्यस्मिन् सपिण्डे स्थविरतरे जीवति ॥ ८३ ॥

पौत्रादेरपत्यमिति वर्तते येषां सप्तमः पुरुष एकस्ते सपिण्डाः परस्परं वसे यसे वा सपिंडशब्दः समानस्य सभावः इहैव निपातितः । प्रकृतं जीवतीति शत्रन्तं स्थविरतरस्य विशेषणम् इदं तु जीवतीति पदं तिङतं सञ्ज्ञिनो विशेषणम् । भ्रातुरन्यस्मिन् सपिण्डे स्थविरतरे जीवति पौत्रादेरपत्य यज्जीवति तद्भा युवसंज्ञं भवति गार्ग्यायणो गार्ग्यः । दाक्षायणो दाक्षिः । अन्यग्रहणं किम् । भ्रातरि इति वर्तते । तस्मिन्नेव सपिंडे पितृव्यपुत्रे जीवति स्यात् । सपिंडग्रहणमसम्बन्धान्यसम्बन्धनिरासार्थम् । ज्यायसीति वर्तमाने स्थविरतरग्रहणं किम् । स्थानवयोभ्यां ज्येष्ठे सपिंडे यथा स्यात् भ्रातृव्ये वयोज्येष्टे पितृव्यः कनीयान् युवसंज्ञो न भवति । जीवतीति किम् । मृते गार्ग्य एव ।

पूजाकुत्सयोर्व्यत्ययः ॥ ८४ ॥

वेति वर्तते । परस्परविषयगमनं व्यत्ययः । वृद्धस्य युवसंज्ञा यूनश्च वृद्धसंज्ञेत्यर्थः. पूजायां कुत्सायां च गम्यमानायां यथासंख्यं वृद्धयूनोर्वा व्यत्ययो भवति पूजायाम् तत्र भवान् गार्ग्यायणः तत्र भवान् गार्ग्यो वा । युवसंज्ञासामर्थ्यात् वृद्धस्त्यं युवत्येन योगः । कुत्सायां गार्ग्य त्वं जाल्म गार्ग्यायणस्त्वं जाल्म । वृद्धसंज्ञासामर्थ्यात् युवत्यस्य निवृत्तिः ।

अद्भाह्वादेरिञ् ॥ ८५ ॥

तस्यापत्यमिति वर्तते । अकारान्तेभ्यो वृद्धः बाहु इत्येवमादिभ्यश्च अनन्तरे वृद्धे युवसंज्ञके चाऽपत्ये इञ् भवत्यणोऽपवादः । आकम्पनिः । दाक्षिः । औपगविः । अनकारान्तार्थं बाधकबाधनार्थं च बाह्वादिग्रहणम् । बाहविः ।

औपवाकविः । बाह्व उपवाकु निवाकु वराकु उपविन्दु एभ्योऽण् प्राग्रः । वला द्वयच इति ढण् प्राग्रः । वृकला बलाका मूषिका भगला लगहा भ्रुवका सुमित्रा दुर्मित्रा एभ्यः स्त्रीभ्यो ढणिति ढण् । मानुषीलक्षणो वा ढण् स्यात् । पुष्करसत् अनुरदत् अनुशतिकादित्वादनयोः पदद्वयस्यैप् । देवशर्मन् इन्द्रशर्मन् कुनामन् पंचन् सप्तन् अमितौजसः सख च सुधावत् उदंच् अञ्चेर्निपातनात् नखाभावः शिरस् शिरोमात्रस्यापत्यं नास्ति इति तदन्तविधिः द्वास्तिशौर्षिः । पैलुशौर्षिः । शिरसः शीर्षादेशो वक्ष्यते माषसरावित् क्षेमवृत्तिवत् शृंखलतोदित् खरनादित् निपातनादणत्वम् नगरमर्दित् अकारमर्दित् लोमन् लोम्नो तदन्तविधिः इत उत्तर प्रागुदंकशब्दात् कुर्वृष्यन्धकादिनाण् प्राग्रः । अजीगर्त कृष्ण युधिष्ठिर अर्जुन सात्यगद प्रद्युम्न राम संकर्षण मध्यदिन् सत्यक उदक संभूयोम्भसोः सख च व्यान्ताख्यातयोः ख्याते संप्रत्यय इति तेन बाह्वादिप्रभृतिषु येषां लौकिकगोत्रभाव प्रति प्रवर्तकत्वमस्ति तेभ्य एव इञादयः । इह माभूत् बाहुर्नाम कश्चित् तस्यापत्य बाहवः । आकृतिगणत्वादस्यांवान्धि; अजवेनविरिति ।

सुधातुरकङ् च ॥ ८६ ॥

सुधातृशब्दादिञ् भवति तत्सन्नियोगेन अकङादेशश्च । सुधातुरपत्यं सौधातकिः । व्यासवरुडनिषादचण्डालबिम्बादीनामिति वक्तव्यम् । न वक्तव्यम् । अव्यभिकन्यायेन कान्तेभ्य एव त्यविधिः । वैयासकिः । वारुडकिः । नैषादकिः । चाण्डालकिः । बैम्बकिः । कार्मारकिः ।

वृद्धे कुञ्जादिभ्यो ञ्फः ॥ ८७ ॥

वृद्धसंज्ञके अपत्ये विवक्षिते कुञ्जइत्येवमादिभ्यः ञ्फो

भवति । इञोऽपवादः । आदौ ञकारः व्रातञ्फादस्त्रियामिति विशेषणार्थः । कुञ्जस्यापत्य पौत्रादि कौञ्जायन्यः । कौञ्जायन्यौ कौञ्जायनाः । व्रातञ्फादस्त्रियामिति स्वार्थे ञ्फो भवति द्विसंज्ञः कुञ्ज बध्न शंख गण लोमन् लोमशब्देन तदन्तविधिरिति केचित् । भस्मन् शठ अयं गर्गादिष्वपि शाक शौरड शुभ विपास् अयं शिवादिष्वपि स्कन्दभ । वृद्ध इति किम् । कुञ्जस्यापत्यमनन्तरं कौञ्जिः । वृद्ध इत्ययमधिकारश्च शिवादिभ्योऽणित्यतः प्राक् ।

नडादेः फण् ॥ ८८ ॥

नड इत्येवमादिभ्यो वृद्धेऽपत्ये फण् भवति । नडस्यापत्यं वृद्ध नाडायनः । वृद्ध इत्येव । अनन्तरो नाडिः । नड चर वक सुंज्ञ इतिक इतिश उपक लमक सलंकु शलकञ्जादेश लभते सालङ्कायनः । कथ सालंकायनः कथं सालंकिः पिता सालंकिः पुत्रः सलंक इति प्रकृत्यन्तरमस्ति । अथवा पैलादिषु पाठसामर्थ्यात् इञपि भवति पञ्चपूल वाजव्या तिक अग्निशर्मन् वृषगणे । गोत्रे आग्निशर्म्मायणो भवति वार्षगणश्चेत् आग्निशर्म्मिरन्यः प्राण नर सायक दास मित्र द्वीप तगर पिंगल किंकर कथन कतर कतल काश्य काठ्य सैव्य अजावाच्य स्तम्भ शिंशपा अमुष्य निपातनात् साधुः । कृष्णरणौ ब्राह्मणवासिष्ठयोः । यथाक्रमं ब्राह्मणवाशिष्ठेऽर्थे । अजमित्र लिगु चित्र कुमार क्रोष्टुरपरत्वं क्रोष्ट च । लोह दुर्ग अग्र तृण शकट सुमत निमत ब्राह्मणचकणैरोपीष्यते चाटकैर बदर अश्वल अस्वर कामुक ब्रह्मदत्त उदम्बर अलोह दड अन्ये इमानपि पठन्ति वक्ष्यमाणान् रुच् जत् इत्वत् जनत्वत् हिंसक दंडिन् हस्तिन् पञ्चाल चमसिन् । लौकिकगोत्रमात्र इत्येव नडो नाम कश्चित्तस्यापत्य नाडिः ।

हरितादिभ्यः ॥ ८८ ॥

हरितादिर्बिदाद्यन्तर्गणः । हरितादिभ्यः अञन्तेभ्यः फण् भवति । इञोऽपवादः । इह वृद्धग्रहणमनुवर्तमानमञो विशेषणं वृद्धे यो ञ् विहितः तदन्तात् फण् एक इतिनियमाद्यूनि द्रष्टव्यः । हरितस्यापत्यं युवा हारितायनः । कैंदासायनः ।

यञिञोः ॥ ८० ॥

अत्रापि वृद्धग्रहण यञिञोर्विशेषणं वृद्धे विहितौ यौ यञिञौ तदंतात्फण् भवति । सामर्थ्याद्यूनीति ज्ञातव्यम् । गार्ग्यायणः । दाक्षायणः । इह गार्ग्यो अपत्यं गार्गेय इति लिंगविशिष्टस्य ग्रहणेऽपि परत्वाट्ठण् भवति ।

सरद्वच्छुनकदर्भाद् भृगुवत्साग्रायणेषु ॥ ८७ ॥

वृद्ध इति वर्तते । सरद्वत् शुनक दर्भ इत्येतेभ्यः फण् भवति यथासंख्य भार्गवे वात्स्ये आग्रायणे चापत्येऽभिधेये । सारद्वतायनो भवति भार्गवश्चेत् सारद्वतोऽन्यः । शौनकायनो भवति वात्स्यश्चेत् शौनकोऽन्यः । दार्भायणो भवति आग्रायणश्चेत् दार्भिरन्यः । सरद्वत्शुनकशब्दौ बिदादिषु पठ्येते ।

द्रोणपर्वतजीवन्ताद्वा ॥ ८२ ॥

द्रोण पर्वत जीवन्ता इत्येतेभ्यः वृद्धापत्ये फण् च भवति । द्रौणायणः । द्रौणिः । पार्वतायनः । पार्वतिः । जैवन्तायनः । जैवन्तिः । वृद्ध इत्येव । द्रौणिः ।

बिदादिभ्योनृष्यानन्तर्येऽञ् ॥ ८३ ॥

वृद्ध इति वर्तते । बिदइत्येवमादिभ्यः अनृषीणामानन्तर्ये अञ् भवति । बिदस्यापत्यं बैदः । बिद उर्व कश्यप कुशिक भरद्वाज उपमन्यु किलात किदर्भ विश्वानर ऋष्टि-

धेण ऋतभाग हर्यश्व प्रियक अपस्तंब कुचवार सरद्वत् शुनक धेनु गोपवन शिग्रु विन्दु भाजन तामज अश्वावतान श्यामाक स्यापर्ण गोषवनादिप्रतिषेधः प्राग्घरितादेरित उर्द्धं बहुत्वे-अजः उबेव भवति । हरित किन्दास वच्चस्क अर्कलूष वध्योग विष्णुवृद्ध प्रतिबोध रथन्तर गविष्टिर निषाद निषादशब्दस्य सुधातुरकङ्चेत्यत्र नैषदकिरुक्तोऽनन्तरे वृद्धे परत्वादयमञ् मठर अयं गोपवनादिष्वपि मठराद्यञपि एते हरितादय इत्याचार्यस्मृतिः पृदाक स्तदाक पुनर्भ्वादिष्वनन्तरेऽपत्ये पुनर्भू पुत्र दुहितृ ननांदृ परस्त्री परशु च या तु सवर्णा परस्य स्त्री परस्त्री सा कल्याण्यादिषु पठते पारस्त्रियेणः । वृद्ध इत्येव अनन्तरो बैदिः । बाह्वादेराकृतिगणत्वात् ऋष्यण् न भवति लौकिकगोत्रमात्र इत्येव । बिदो नाम कश्चित् तस्य बैदिः । अनृष्यानन्तर्य इति किमर्थम् । पुनर्भूप्रभृतीनामनृषीणामानन्तर्ये अनन्तरेऽपत्ये अञ्वेदितव्यः ये तु ऋष्यपत्यानां नैरन्तर्ये प्रतिषेधमाचक्षते तेषा कौशिको विश्वामित्र इति न स्यात् ऋष्यानन्तर्ये प्रतिषेधो नास्ति इन्द्रभू· सप्तमः । काश्यपनाभारद्वाजानां कतमोऽसीति तस्येदमित्यणा भविष्यतीति ।

गर्गादेर्यञ् ॥ ८४ ॥

वृद्ध इति वर्तते । गर्ग इत्येवमादिभ्यः वृद्धापत्ये यञ् भवति । गर्गस्यापत्यं पौत्रादिः गार्ग्यः । गर्ग वत्स वाजादसे अस इति किम् । सौवाजिः । संकृतिः अज व्याघ्रपात् विदभृत् पुलस्ति प्राचीनयोग पुनस्त्यशब्दात् ऋष्यपि पौलस्त्यः । स्त्रियामपि पौलस्त्यी यञि पौलस्त्यायनीति विशेषः । रेन अग्निवेश शङ्ख सठ धूम अवट मनस् धनजय वृत्त विश्वावसु जरमरण लोहित संशित बभ्रु मंडु मंक्षु संकु सचुलि गुगुहलु जिगीषु

मनु मन्तु तन्तु मनायी ढण् प्राप्नः । भस्य ढ्त्यढ इति पुंवद्भावः कस्मान्न भवति कौडिन्यागस्ती इतिनिर्देशात् यदि यञि पुंवद्भावः स्यात् कुण्डिनीशब्दस्य पुंवद्भावे टिखे च कृते कौंडिन्य इति न स्यात् । सूनु कथक रुक्ष तलुक्ष तड वतण्ड कपि कत सकल कुरुकत अयमनुशतिकादौ अनुडुह कंठ गोकक्ष अगस्त्य कुण्डनी यज्ञवल्क अभयजात विरोहित वृषणगण रहोगण संडिल मुद्गल मुसल पराशर जतूकर्ण मन्त्रितः अस्मरथ शर्कराक्ष पूतिमाष स्थूर अरराक वामरथ पिंगल कृष्ण गोलुन्द उलूक तितंभ तितिव भिषज तिलक मंडित विकित दिवहू इन्द्रहू एकहू एकलू पिप्पलु वृहदग्नि मुलाभिन् कुटीगु चक्थ । वृद्ध इत्येव । आनन्तरो गार्गिः । कथमनन्तरो जामदग्न्यो रामः पाराशर्यो व्यास इति । गोत्राध्यारोपेण अनन्तरापत्ये ऋष्यणा भवितव्यम् । लौकिकगोत्रमात्र इत्येव । यो गोत्रस्याप्रवर्तको गर्गस्तस्यापत्यं वृद्धं गार्गिः ।

मधुबभ्रोर्ब्राह्मणकौशिकयोः ॥ ८५॥

वृद्ध इति वर्तते । मधु बभ्रु इत्येताभ्यां यञ् भवति यथासंख्यं ब्राह्मणे कौशिकेऽभिधेये । माधव्यो ब्राह्मणश्चेत् माधवोऽन्यः । बाभ्रव्यः कौशिकश्चेत् बाभ्रवोन्यः । बभ्रुशब्दो गर्गादिषु पठ्यते तस्येह नियमार्थं वचनम् । कौशिक एव यथा स्यात् गर्गादिषु पाठो लोहितादिकार्यार्थः बाभ्रव्यायणी । अथ गणे एव कौशिकग्रहणं कर्तव्यम् । इह करण वृद्धार्थम् । ननु गणेपि वृद्धे यञ्विहित एदमेव तर्हि ज्ञापकं गणपाठे क्वचिदनन्तरापत्येऽपि यञ् भवति जामदग्न्यो रामः पाराशर्यो व्यास इति ।

कपिबोधादाङ्गिरसे ॥ ८६ ॥

वृद्ध इति वर्तते । कपिबोधशब्दाभ्यां यञ् भवति आङ्गिरसे अपत्यविशेषे । काप्यः आङ्गिरसश्चेत् । अन्यत्र इतोनिञ इति ढगि कापेयः । बौध्यः आङ्गिरसश्चेत् बौधिरन्यः । इहापि कपिशब्दस्य गर्गादिषु पाठः तस्य नियमार्थं वचनम् । अङ्गिरस एव यञ् । गर्गादिषु पाठो लोहितादार्थः । काप्यायनी । मधुबोधयोस्तु यस्कतयोरुभय माधवी माधव्यायनी । बौधी बौध्यायनी ।

वतण्डात् ॥ ८७ ॥

आङ्गिरस इति वर्तते । वतण्डशब्दादाङ्गिरसे अपत्यविशेषे वृद्धे यञ् भवति । वातण्ड्यः । आङ्गिरस इत्येव । अनाङ्गिरसे शिवादिपाठादण् वातण्ड इति गर्गादिषु पाठाद्दनांगिरसे यञ् लोहितादिकार्यार्थं । वातण्ड्यायनी ।

स्त्रियामुप् ॥ ८८ ॥

आङ्गिरस इति वर्तते । वतण्डशब्दादाङ्गिरस्यां स्त्रियां यञ उबभवति । वतण्डस्यापत्यं वृद्धा स्त्री वतण्डी । यञ उपि जातेरयोङ इति ङीविधिः । आङ्गिरस इत्येव । वातण्ड्यायनी शिवाद्यणि वातण्डा । वृद्धादन्यत्र वातण्डी ।

अश्वादेः फञ् ॥ ८९ ॥

वृद्ध इति वर्तते । आङ्गिरस इति निवृत्तम् । अश्व इत्येवमादिभ्यः वृद्धे फञ् भवति । अश्वस्यापत्यं आश्वायनः । अश्व अश्मन् शङ्ख शूद्रक कुल्लादिषु गर्गादिषु च पठ्यते । विद पुट रोहिण खद्वार खज्जूर वटिल भंडिल भटल भडित भंडित प्रकृत रामोद् स्त्रयो वा काश काण वात गोलाक्ष अर्क स्वनच्छन

पत चक्र कुल अविष्ट पविन्द पवित्र गोमिन् श्याम धूम्र-
आग्निन् विश्वंभर स्फुट कुट चुटि शपादात्रेये । सापिरन्यः ।
जनक सनक खनक ग्रीष्म अर्ह बीज रीक्ष विसंप विश्याला
गिरि चपल चुप दास येत्र वृद्धत्यान्ताः तेभ्यः सामर्थ्यात्
यूनि फञ् द्रष्टव्यः वैश्य वैल्य वाद्य आनडुह्य धाप्य जात
शब्दात् पुसि जातेर्योऽन्यः । अर्जुनः अस्य बह्वादिषु पाठो-
नन्तरार्थः सूद्रक सूमनस् दुर्मनस् आत्रेयाद्भारद्वाजे । आत्रेयो
न्यः । भारद्वाजादात्रेये विदाद्यञि भारद्वाजोन्यः । उत्सः
उत्सादिषु पाठोऽनन्तरार्थः आतव कितव शिव खदिर वृद्ध-
इत्येव । आश्विवः । लौकिकगोत्र इत्येव गोत्रस्याप्रवर्तको
योऽश्वः तस्यापत्यमेकान्तरितमाश्विवः ।

भर्गात्त्रैगर्ते ॥ १०० ॥

वृद्ध इति वर्तते । भर्गशब्दात् फञ् भवति त्रैगर्तेऽपत्य-
विशेषे । भार्गायणो भवति त्रैगर्तोऽचेद् भार्गिरन्यः ।

शिवादिभ्योऽण् ॥ १०१ ॥

वृद्ध इति निवृत्तम् । इत उर्ध्वं सामान्येनापत्ये त्यवि-
धानम् । शिव इत्येवमादिभ्यः अण् भवत्यपत्यमात्रे । इञादी-
नामपवादः । शिवस्यापत्यं शैवः । शिव प्रोष्ठ प्रोष्ठिक चंड
जंभ भूरि अस्मदादितोनञ इति ढण् प्राप्तः । कुठार
अनभिग्लान संधिः मुनि ककुस्थ कोहड कहूय रोवाविरल
वतण्ड स्त्रियां बातंड्या तृण कर्ण क्षीर हृदय परिषिक गोपिलका
जटिलका वधिरका मंजीरक वृष्णिक खजर खंजल रोभ आलेखन
विश्रवण रवण विश्रवसोऽपत्यमिति विगृह्य विश्रवणरवणादेशौ
प्रकृत्यन्तरे वा अव्यविकन्यायेन ताभ्यामेवाण् वर्तनात्त विक-
ट पिटक वृक्षक विभाग नभाक ऊर्णनाभ जरत्कारू उत्कोचस्तु
रोहितिका आर्यश्वेता आभ्यां स्त्रीभ्यो ढण् प्राप्तः । सुपिष्ट

मयूर कर्ण खर्जुर कर्ण तक्षन् अत्र कारिलक्षणस्य इञो बाधाय स्त्रिवक्ष्यत एव । लाक्षण्यइति ऋष्टिषेण विदादिष्वस्य पाठो वृद्धार्थः । गङ्गा अत्र नदीलक्षणस्याणो ढ्यच इति ढण् बाधकः तमपि बाधित्वा ढ्यचोनद्याइत्यण् प्राप्तः । तस्यापि तिकादिषु पाठात् फिञ् बाधकः स्यात् अयं गङ्गाशब्दः शुभ्रादिषु च पठ्यते । तेन त्रैरूप्यम् । गाङ्गः । गाङ्गायनिः । गाङ्गेयः । विपाश अत्रापि नदीमानुषीलक्षणस्याणः ढ्यचइति ढरा बाधकः तमपि ढ्यचोनद्या इत्यण् बाधते । तमपि बाधित्वा कुलादिलक्षणो ञक्ष एव स्यात् त्रैरूप्य चेष्यते । वैपाशः वैपाशायन्य इति यस्क लच्च दुच्च अयस्थूण भलन्दन विरूपाक्ष विरूपा भूमि इला सपत्नी ढ्यचोनद्याः इति गणसूत्रम् । अन्यथा ढ्यच इति ढण् प्रसज्येत । त्रिवेणी त्रिवेणं च ।

नदीमानुषीभ्योऽदुभ्यस्तदाख्याभ्यः ॥ १०२ ॥

नदीमानुषीभ्य इत्यर्थनिर्देशः । 'नदीमानुषीवाचिप्रकृतिभ्यः अदुसञ्ज्ञाभ्य. तदाख्याभ्यः अण् भवति ढणोपवादः । यमुनाया अपत्यं यामुनः प्रणेता इरावत्या अपत्य ऐरावतः । उद्दालः । वितस्तायाः पलालशिराःवैतस्तः । नर्मदाया नीतो नार्मदः मानुषीभ्यः । चिन्तितायाः चैन्तितः । सुदर्शनायाः सौदर्शनः । स्वयंप्रभायाः स्वायंप्रभः । नदीमानुषीभ्य इति किम् । सौपर्णेयः । वैनतेयः । सुपर्णा वनिता च देव्यौ अन्येषां पक्षिणयौ । अदुभ्य इति किम् । चान्द्रभागायाः चाद्रभागेयः । वायुत्रेगेयः । तदाख्याभ्य इति किम् । या काभ्यः प्रकृतिभ्योण् प्रार्थ्यते ता एवाख्या नामधेयानि नदीमानुषीणां यदि भवति तेनेह न भवति । शोभनाया अपत्यं शौभनेयः । पुरस्तादपवादोऽय-

मिति अनन्तरणं बाधते न व्यवहितं क्षुद्राभ्योवेति ढणं पुलिकायाः पौलिकेरः ।

कुर्वृष्यन्धकवृष्णेः ॥ १०३ ॥

कुरवः अन्धकाः वृष्णयश्च क्षत्रियोवंशाख्या· ऋषयश्चेह ग्राम्या मठपतयो वशिष्ठाद्या गृह्यन्ते । महर्षीणामहिंसादिव्रतोपपन्नाना अपत्यापत्यवत्संबंधो नास्ति । कुरु ऋषिअन्धकवृष्णिवाभिभ्यो वृद्धयः सामान्येनापत्ये अण् भवति । इञोऽपवादः । कुरुभ्यः माकुलः । साहदेवः । दौर्योधनः । ऋषिभ्यः वाशिष्टः । वैश्वामित्रः । अन्धकेभ्यः स्वाफल्कः । रांधसः । श्वैत्रकः । वृष्णिभ्यः अदारः प्रातिवाहः । वासुदेवः । आनिरुद्धः । इह आत्रेयः इति परत्वाद्ढढण् यद्यपि भीमसेनः कुरुः जातसेनः ऋषिः उग्रसेनो ऽन्धकः विष्वक्सेनो वृष्णिः तथापि परत्वात्सेनान्तलक्षणो राय इञ्च भवति मध्येपवादेयं पूर्वं नित्यं बाधते ।

मातुरुत्संख्यासंभद्रादेः ॥ १०४ ॥

मातृशब्दस्य संख्यासंभद्रादेः उकारश्चान्तादेशो भवति अण् चाधिकारात्। द्वयोर्मात्रोरपत्यं द्वैमातुरः । भरतः। शातमातुरः । सांमातुरः । भाद्रमातुरः । अभिधानवशात् जननीपर्यायस्य मातृशब्दस्य ग्रहणम् । संख्यासंभद्रादेरिति किम् । सौमात्रः। वैमात्रेयः । विमातृशब्दः शुभ्रादिषु पठ्यते ।

कन्यायाः कनीन च ॥ १०५ ॥

कन्यायाः कनीन इत्ययमादेशो भवति । अण् च तस्माद्ढढणोऽपवादः । कानीनकः कर्णः । कानीनो हि नारकः ।

विकर्णसुङ्गलगलाद्वत्सभरद्वाजाजिषु ॥ १०६ ॥

विकर्ण सुङ्ग लगल इत्येतेभ्यः अण् भवति यथासंख्यं

वात्स्ये भारद्वाजे आत्रेये चापत्यविशेषे । वत्सभरद्वजात्रिष्वित्यत्र वत्सादयः शब्दाः उपचारात् वृद्धत्यान्तेषु वर्तमाना गृह्यन्ते वैकर्णो भवति वात्स्यश्चेत् वैकर्णिरन्यः काश्यपे वैकर्णयः । सौङ्गो भवति भारद्वाजश्चेत् सौङ्गिरन्यः लिङ्गविशिष्टस्य ग्रहणे सुङ्गायाः अपत्यं सौङ्गो भवति भारद्वाजश्चेत् । अन्यत्र सौङ्गेयः । छागलो भवति आत्रेयश्चेत् छागलिरन्यः ।

पीलाया वा ॥ १०७ ॥

पीला तदाख्या मानुषी । पीलाया अपत्ये वा अण् भवति । पैलः । पैलेयः ।

ढण् च मण्डूकात् ॥ १०८ ॥

मण्डूकशब्दात् ढण् भवति चकारादण् च वा । तेन त्रैरूप्यम् । माण्डूकेयः । माण्डूकः । मण्डूकिः । स्त्रियां माण्डूकेयी । अणन्तस्य कौरव्यासुरिमाण्डूकादिति फटि कृते माण्डूकायनी । ठञन्तस्य माण्डूक्या ।

स्त्रीभ्यो ढण् ॥ १०९ ॥

इह स्त्रीग्रहणेन स्त्रियामित्येवं विहितास्टाबादयः स्त्रीत्या गृह्यन्ते । स्त्र्यर्थग्रहणन्तु न भवति शुभ्रादिषु मातृशब्दस्य पाठात् ज्ञायते । स्त्रीत्यान्तेभ्यः ढण् भवत्यपत्ये । सौपर्णेयः । वैनतेयः । वायुवेगेयः । स्त्रीत्यग्रहणमिति विशेषणं किम् । स्त्र्यर्थे मा भूत् । इबिडः स्त्रिया अपत्यं दरदः अपत्यं ऐडबिडः दारदः पीलायावेत्यतो मण्डूकप्लुत्या वेति व्यवस्थितविभाषा वर्तते तेन वडवायाः वृषे वाच्ये ढण् भवति । वाडवेयो वृषः । अपत्ये वाडव इति । कुक्कुकोकिलाभ्यामण् भवति । कुक्कुया अपत्यं कौक्कुटः । कोकिलाया अपत्यं कौकिलः ।

द्व्यचः ॥ ११० ॥

द्व्यचश्च स्त्रीत्यान्तात् अपत्ये ढण् भवति । मानुषीलक्षणस्या णोऽपवादः । दत्तायाः दात्तेयः । गुप्तायाः गौप्तेयः ।

इतोऽनिञः ॥ १११ ॥

स्त्रीभ्य इति निवृत्तम् । अविशेषेण स्त्रियाश्च विधानाद्व्यच इति वर्तते । इकारान्तान्मृदः अनिञन्तात् ढण् भवति । बलेरपत्य बालेयः । नाभेयः । आत्रेयः । दौलेयः । इत इति किम् । दाक्षिः । अनिञ इति किम् । दाक्षायणः । द्व्यच इत्येव । मरीचेरपत्यं मारीचः ।

शुभ्रादेः ॥ ११२ ॥

शुभ्र इत्येव मादिभ्यः ढण् भवति । इञादीनामपवादः । शुभ्रस्यापत्यं शौभ्रेयः । शुभ्र विष्टपुर ब्रह्मकृत शतद्वार शतहार शलाथल शलाकाभ्रू लेखाभ्रू विधवा कृकसा रोहिणी रुक्ममिणी विकचा विवसा इलिका दिशा शालूका अज वस्ति सकन्धि लक्ष्मणश्यामयोर्वाशिष्टे । लाक्षमणिरन्यः । श्यामायनेन्यः । अश्वादेरिति फञ् । गोधा । कृकलास । प्राणि विकणाचि प्रवाहण भरत भागर मण्ड्र मकुष्ट सूकरडु मृषंडु कर्पूर इतर अन्यतर आलीट सुदत्त सुदत्त सुनामन् सुदामन् कद्रु तुद अकशाप कुमारिका कुवेरिका कुसेरुका जिह्मासिन् परिधि वायुदत्त सलाका सवला स्वध्वर अम्बिका अशोक गन्ध पिङ्गला खरोन्मत्ता कुदत्तां कुसम्बा शुक्र बलीवर्दिन् विस्र बीज श्वन् अश्व अजि बिमातृ आकृतिगणश्चायम् । तेन गाङ्गेयः पाण्डवेय इत्यादि सिद्धम् ।

विकर्णकुषीतकात्काश्यपे ॥ ११३ ॥

विकर्णकुषीतकशब्दाभ्यां ढण् भवति काश्यपे अपत्यवि-

शेषे । वैकर्णेयः काश्यपश्चेत् । वैकर्णिरन्यः । कौषीतकेयः । काश्यपश्चेत् कौषीतकिरन्यः ।

भ्रुवो वुक् ॥ ११४ ॥

भ्रूशब्दादपत्ये ढण् भवति वुक् चागमः । भ्रौवेयः ।

कल्याण्यादीनामिनङ् ॥ ११५ ॥

कल्याणी इत्येवमादीना ढण् भवति इनङादेशश्च येऽत्र स्त्रीत्यान्ताः शब्दा तेषामादेशार्थं वचनम् । ढण् पूर्वेण सिद्धः । अन्येषामुभयार्थं वचनम् । कल्याण्या अपत्य कल्याणिनेयः । सौभागिनेयः । कल्याणी सुभगा दुर्भगा बन्धकी अनुकृष्टि जरती बलीवर्दी ज्येष्ठा कनिष्ठा मध्यमा परस्त्री जारस्त्री ।

कुलटाया वा ॥ ११६ ॥

कुलान्यटतीति कुलटा । अत एव निपातनात् परूपम् । कुलटाया वा इनङादेशो भवति ढण् स्त्रीभ्य इत्येव सिद्धः । कौलटिनेयः । कौलटेयः । अनियतपुंस्कत्वविवक्षायां परत्वात् क्षुद्रालक्षणोढ्रण् । कौलटेरः ।

चटकाराणैरः ॥ ११७ ॥

चटकशब्दाराणैरो भवति । चटकस्यापत्यं चाटकैरः । लिङ्गविशिष्टस्यापि ग्रहणम् चटकायाः अपत्य चाटकैरः । स्त्रीढण् परत्वात् णैरः । स्त्रियामपत्ये उक्तवक्तव्यः । चटकस्य चटकाया वा अपत्यं स्त्री चटका । हृदुप्युभिति स्त्रीत्यस्योप् पुनष्टाप् ।

गोधाया णारः ॥ ११८ ॥

गोधाशब्दादपत्ये णारो भवति । गौधारः । रणासिद्धे

णारवचनं ज्ञापकं अन्येभ्योपि भवतीति । जडस्यापत्यं जाडारः । पण्डस्यापत्यं पाण्डारः । पक्षस्य पाक्षारः ।

ढ्रण् ॥ ११९ ॥

ढ्रण् च भवति गोधाशब्दात् गौधेरः । शुभ्रादिषु पाठात् गोधेय इति च भवति ।

क्षुद्राभ्यो वा ॥ १२० ॥

अनियतपुंस्का अङ्गहीना वा क्षुद्राः क्षुद्राभ्य इत्यर्थनिर्देशः । क्षुद्रावाचिप्रकृतिभ्य. स्त्रीलिंगाभ्यः वा ढ्रण् भवति । दास्या अपत्यं दासेर. । दासेयः । नट्या नाटेरः । नाटेयः । काणायाः काणेरः । काणेयः । ढ्रयच इत्ययं ढण् सर्व्येऽपवादः पूर्वस्य नदीमानुषीलक्षणस्याणो बाधक. ।

स्वस्रुश्छण् ॥ १२१ ॥

स्वस्रशब्दात् ऋकारान्तपूर्वान्तात् अपत्ये छण् भवति । अणोऽपवादः । मातृष्वस्रीयः । पैतृष्वस्रीयः । स्वस्रुरिति कृतषत्वग्रहणं किम् । भ्रातृस्वसुरपत्य भ्रातृस्वस्रः । उरिति किम् । मातुःस्वसुरपत्यं मातुष्वस्र. । वा स्वस्रपत्योरित्यनुप् ।

चतुष्पाद्भ्यो ढञ् ॥ १२२ ॥

चत्वारः पादाः यासा ताः चतुष्पादः । चतुष्पाद्वाचिप्रकृतिभ्यः स्त्रिलिङ्गाभ्यः ढञ् भवत्यणादीनामपवादः । कामण्डलेयः । सैतिवाहेयः । सादृवाहेयः । जाम्बेयः । ढञ् सति तस्मादुत्पन्नस्य युवत्यस्योऽभवति न ढणि ।

गृष्ट्यादेः ॥ १२३ ॥

गृष्टि इत्येवमादिभ्यः शब्देभ्यः ढण् भवत्यणादीनामपवादः । गृष्टेरपत्यं गार्ष्टेयः अचतुष्पाद्वचनं किह गृष्टिशब्दो गृह्यते ।

गृष्टि वृष्टि हलि वालि विदृक्रादि अजवस्त्रि मित्रयोरपत्यं मैत्रेयः । भ्रौणहत्यादिना यकारादेः ढं निपात्यते । बहुषु यस्कादिभ्यो वृद्ध इति उप् । मित्रयव. ।

क्षत्राद् घः ॥ १२४ ॥

क्षत्रशब्दादपत्ये घो भवति । क्षत्रस्यापत्य क्षत्रियः । जातावभिधानम् । अन्यत्र क्षात्रिः ।

राजश्वसुराद्यः ॥ १२५ ॥

राजश्वसुरशब्दाभ्या अपत्ये यो भवति राज्ञोऽपत्यं राजन्यः । इहापि जातावभिधानम् । राजनोऽन्यः । श्वसुरस्यापत्य स्वसुर्यः । ख्यातस्य सम्बन्धवचनस्य प्रेषणात् सज्ञाया स्वासुरिः ।

कुलाड्ढकञ्च ॥ १२६ ॥

कुलशब्दादपत्ये ढकञ् भवति । यश्च कुलस्यापत्यं कौलेयकः । कुल्यः । इहापि भवति ईषदसिद्धं कुल बहुकुलं वासुपोबहुप्राकुरिति बहुत्य. बहुकुलस्यापत्यं बाहुकुलेयकः । बहुकुल्यः ।

खः ॥ १२७ ॥

कुलशब्दात् खश्च भवति । कुलीनः । उत्तरत्र खस्यानुवृत्तिर्यथा स्यादिति योगविभागः ।

सादेः ॥ १२८ ॥

सह आदिना वर्तते इति सादिः । सादेः कुलशब्दात् खो भवति । आढ्यकुलीनः । राजकुलीनः । क्षत्रियकुलीनः । सत्यविधौ तदन्तविधिरितिपूर्वेण न सिद्धयति ।

महतोऽञ्खञौ ॥ १२८ ॥

महच्छब्दपूर्वात् कुलशब्दात् अञ्खञौ इत्येतौ भवतः । महतः आत्वविषये अभिधानं माहाकुलः । माहाकुलीनः । केचित्खस्यानुवृत्तिमिच्छन्ति । महाकुलीनः । आत्वविषये इति किम् । महता कुलं महाकुलं तस्मात्खादेरिति ख. । महत्कुलीनः ।

दुसो ढण् ॥ ३० ॥

दुःशब्दपूर्वात् कुलादपत्ये ढण् भवति । पापं कुलं दु.कुलम् इदु.ङीत्यदुम्मु इति सत्वषत्वे । दुष्कुलस्यापत्यं दौष्कुलेयः । केचित्त खमप्यनुवर्तयन्ति । दुष्कुलीनः ।

स्वसुश्छः ॥ १३१ ॥

स्वसृशब्दादपत्ये छो भवत्यणोऽपवादः । स्वस्रीयः ।

भ्रातुर्व्यश्च ॥ १३२ ॥

भ्रातृशब्दादपत्ये व्यो भवति व्यश्च अणोऽपवादः । भ्रातुरपत्यं भ्रातृव्यः । भ्रात्रीयः । कथं लोके भ्रातृव्यशब्देन सपत्नोऽभिधीयते उपचारात् । एकद्रव्याभिलाषश्च उपचारनिमित्तं सपत्नी इव सपत्नः शक्तः । पृषोदरादिपाठात्कारो निपात्यते ।

रेवत्यादेष्ठण् ॥ १३३ ॥

रेवती इत्येवमादिभ्यः अपत्ये ठण् भवति । अणादीनामपवादः । रेवत्या अपत्यं रैवतिकः । रेवती अश्वपाली मणिपाली द्वारपाली वृकत्वं चित् वृकग्राह कर्णग्राह दण्डग्राह कत्कुटाक्ष ।

वृद्धस्त्रियाः क्षेपे णश्च ॥ १३४ ॥

पौत्राद्यपत्यं वृद्धं क्षेपः कुत्सा । वृद्धस्त्रीवाचिशब्दादप-

त्ये णेा भवति ठण् च क्षेपे गम्यमाने । गार्ग्या अपत्यं युवा गार्गेा जाल्मः गार्गिकेा जाल्मः । ग्लुचुकायन्या अपत्यं युवा ग्लौचुकायनेा जाल्मः ग्लुकायनिकेा जाल्मः । क्षेपश्चात्र प्रतिषिद्धाचरणेन पितुरज्ञानाद्वा गम्यते । वृद्ध इति किम् । कारिकेयेा जाल्मः । स्त्रिया इति किम् । औपगविः जाल्मः । क्षेप इति किम् । गार्गेयेा माणवकः ।

दोष्ठण् सौवीरेषु प्रायः ॥ १३५ ॥

वृद्धग्रहणं क्षेपग्रहणं चानुवर्तते । सौवीरेष्विति वृद्धविशेषणम् । सौवीरेषु यद्वृद्धवाचि दुसंज्ञं तस्मादपत्ये प्रायष्ठण् भवति क्षेपे गम्यमाने वेति वक्तव्ये प्रायेाग्रहणं परिगणनार्थम् । भागपूर्वपदो वित्तिर्द्वितीयस्तार्णविदवः तृतीयस्त्वलाकसापेयेा वृद्धाट्ठण् बहुलं ततः । भागवित्तेरपत्यं युवा भागवित्तिकः । भागवित्तायनः । तार्णविंदवस्यापत्यं युवा तार्णविन्दविकः । तार्णविन्दविः अकसाप इति शुभ्रादिषु आकशापेयस्यापत्यं युवा आकशापेयिकः । आकसापेयिः । दुग्रहणं स्त्रीनिवृत्त्यर्थं अविशेषेणेष्यते सौवीरेष्विति किम् । औपगविर्जाल्मः । क्षेप इत्येव । भागवित्तायनेा माणवकः ।

फेरश्च च १३६ ॥

वृद्धग्रहणं क्षेपग्रहणं सौवीरेष्विति च वर्तते । फिञन्तात् सौवीरेषु वृद्धात् अपत्ये ञेा भवति ठण् च क्षेपे गम्यमाने । दोरित्यधिकारात् फेरित्यत्र फिञ एव संप्रत्ययः यमुन्दत्तिकादिः यामुन्दायनीयः । यामुन्दायनिकः । प्राय इत्यनुवर्तनादणपि भवति । तस्य फिञन्तापरस्य जिह्यराजार्षायून्युवणिजेा लुप् यामुन्दायनिर्जाल्मः । सुपामन् सौयामायनिः तस्यापत्यं युवा सौयामायनीयः । सौयामायनिकः ।

अणि । सौयामायनिः । वृषस्य वार्ष्यायणिः । फिञ् सनियोगे वृद्धभावे वक्ष्यते वार्ष्यायणेरपत्य वार्ष्यायणीयः । वार्ष्यायणिकः । अणि वार्ष्यायणिः । क्षेत्र इत्येव । यासुन्दायनिर्माणवकः । अणेव भवति । सौवीरेष्वित्येव । तैकायनेरपत्यं युवा अण् तस्योप् । तैकायनिर्जालमः ।

यमुन्दश्च सुयामाच वार्ष्यायणिः फिञः स्मृताः ।
सौवीरेषु च कुत्सायां द्वौ यौगौ शब्दवित्स्मरेत् ॥

फाण्टाहृतेर्णः ॥ १३७ ॥

क्षेप इति निवृत्तम् । वृद्धग्रहण सौवीरेष्विति च । जिष्यराजार्षादित्यत्र अणिजोरुप्यञ्ञाब्रह्मणगोत्रमात्राद्युवत्यस्योपसंख्यानमिति उम्माभूदिति । णित्कारणं फिञ्यत्र भवतीति वक्तव्यम् । फांटाहृतायणिर्माणवकः । सौवीरेष्वित्येव फांटाहृतायनः । सौवीरेषु मिमतशब्दाराच्च फिञौ वक्तव्यौ । मैमतः । मैमतायनिः । सौवीरेष्वित्येव । मैमतिः ।

कुर्वादेर्ण्यः ॥ १३८ ॥

सौवीरेष्विति निवृत्तम् । कुरु इत्येवमादिभ्यः अपत्ये ण्यो भवति । आदौ णकार जिष्यराजार्षादित्यत्र विशेषणार्थः । कुरोरपत्यं कौरव्यः । राजार्षात् कुरुशब्दात् ज्यो वक्ष्यते तस्य द्विसप्तकत्वाद्बहुषूप् । तिकादिषु कौरठ्यायणिः । कुरु गर्ग रथंजय अतिमारक रथकाराज्जातौ चपटूक सम्राजक्षत्रिये कवि पितृमत् ऐन्द्रजालि धातुअियेजि दामोक्षीषि गणकारि कैसौरि कांपिजलादि एन्द्रजाल्यादिभ्यः ततोयूनीति यूनि रायः । क्रोड कुट सलाका मुर खरडाक एमुक शुद्धस्त्रीकेशिनी स्त्रीलिङ्गनिर्देशसामर्थ्यात् पुंवद्भावो न भवति ।

सूर्पणाय श्यावनाय श्यावरथश्यावपुत्र सत्यकार वह्निः कार पथिकारिन् मूढ़ सीक्ष भूहेतु शकलान इनपिण्डी वामरथ वामरथ्यस्य सकलादिकार्यं भवति सकलादयो गर्गाद्यन्तः पातिनः बहुत्वेऽभवति वामरथाः । स्त्री वामरथ्यायनी वामरथ्यायनः वामरथ्यस्य छात्राः वामरथाः शकलादिभ्यो वृद्ध इत्यराभवतीति । वामरथानां संघः वामरथः । संघाकादिना अण् ।

सेनान्तलक्षणकारिभ्य इञ्च ॥ १३९ ॥

कारिशब्दः कारुवाचि सेनांताच्मृद्दः लक्षणशब्दात्त कारिवाचिभ्यश्चापत्ये इञ् भवति रायश्च । हारिषेण्यः । हारिषेणिः । भैमसेन्यः । भैमसेनिः । जातसेन्यः । जातसेनिः । लाक्षण्यः । लाक्षणिः । कारिभ्यः कौंभकार्यः । कौंभकारिः । तान्तुवाय्यः । तान्तुवायिः । तक्षन् शब्दात् शिवादिलक्षणोण् स इञो बाधको न तु ण्यस्य । तेन द्वैरूप्यम् । तात्क्षणः । तात्क्षण्यः ।

तिकादेः फिञ् ॥ १४० ॥

तिक इत्येवमादिभ्यः अपत्ये फिञित्ययं त्यो भवति । तिकस्यापत्यं तैकायनिः । तिक कितव संज्ञा बाल शिखा उरस् शाद्य सैन्धव यमुन्द रूप्य नाडी सुमित्रा कुदेवर देवरथ तितिलिन् सिलालिन् उरस कौरव्य द्विसंज्ञस्येदं ग्रहणम् उरसशब्देन राष्ट्रसमानशब्देन साहचर्यात् कथं कौरव्यः पिता कौरव्यः पुत्रः । अजयान्तादिञ् तस्योप् । लांकव गौकक्ष्य भौरि कि चौयमत चैटयत सैकयत दौंजयत त्वजवत् चंद्रमस् शुभ गङ्गा वरेण्य बध आरद्वा वाह्यक खल्यका लोयका सुयामन् उदन्या यज्ञ यदिहावृद्धं दुसंज्ञ पठ्यते तस्य नित्यार्थं वचनम् ।

कौशल्येभ्यः ॥ १४१ ॥

अपत्ये; फिञ् भवति । बहुवचनेन कर्मारछागवृषा गृह्यन्ते । कोशलस्यापत्यं कौशल्यायनिः । सर्वत्र मूलप्रकृति, फिञ् तस्यायनादेशे कृते कौशल्य इति । विकृतनिर्देशात् युट, निपात्यते । एवं दागठ्यायनिः । कार्मार्यायणिः । छाग्यायनिः वार्ष्यायणिः । राष्ट्रसमानशब्दात् कौशलात् ञ्यो वक्ष्यते कर्मारशब्दात् कारिलक्षणो ण्योऽपि भवति इञः प्रयोगो नोपलभ्यते ।

द्व्यचोऽणः ॥ १४२ ॥

अणंतात् द्व्यचो मृदः अपत्ये फिञ् भवति इञोऽपवादः । कर्तुरपत्यं कार्त्रायणिः । पोतुरपत्यं पौत्रः तस्यापत्य पौत्रायणिः। एवं शैवायनिः । द्व्यच इति किम् । औपगविः । अण इति किम् । दाक्षिः ।

वा वृद्धाद्वोः ॥ १४३ ॥

पौत्राद्यपत्यं वृद्धं अवृद्धं यद्दुसंज्ञं तस्मादपत्ये वा फिञ् भवति । वायुरथायनिः । वायुरथिः । आदित्यगतायनिः । कारिशब्दात्वरत्वादनेन भवितव्यम् । नापितायनिः । ण्योपि भवति नापित्यः । इञोनिधानं नास्ति । अवृद्धादिति किम् । आकंपनायनः । औपगविः । दोरिति किम् । आश्वग्रीविः ।

वाकिनादेः कुक् ॥ १४४ ॥

वेति वर्तते वाकिन इत्येवमादिभ्यः अपत्ये वा फिञ् भवति यदा फिञ् तदा कुकागमः । वाकिनस्यापत्यं वाकिनकायनिः । वाकिनिः । गारेवस्यापत्यं गारेवकायनिः ।

गारेवि: । वाकिन गारेव कार्कंद्य काक लङ्क वर्मिलमिर्मणो-र्नरवं च । यदिहावृद्धं द्रुसंज्ञं तस्य कुगर्थं वचनं अन्यस्यो-भयार्थम् ।

पुत्रान्ताद्वा ॥ १४५ ॥

वा वृद्धाट्टोरिति वर्तते । पुत्रान्तान्मृदः द्रुसंज्ञकात् वा कुगागमो भवति फिञि परतः । प्रकृतेन वाग्रहणेन फिञ विकल्प्यते अनेन कुक् । तेन त्रैरूप्यम् । वासवदत्तापुत्रस्यापत्यं वासवदत्तापुत्रकायणिः । वासवदत्तापुत्रायणिः । वासवदत्ता-पुत्रिः । गार्गीपुत्रकायणिः । गार्गीपुत्रायणिः । गार्गीपुत्रिः ।

फिरदोः ॥ १४६ ॥

त्र्यान्तरोपादानात् फिञि निवृत्ते तसंबद्धः कुगपि निवृत्तः । वेति वर्तते अदोमृदः अपत्ये फिर्भवति वा । त्रिपृष्ठायनिः । त्रैपृष्ठिः । श्रीविजयायनिः । श्रैविजयिः । ग्लुचुकायनिः । ग्लौ-चुकिः । वेति व्यवस्थितविभाषा तेनेह न भवत्येव । दाक्षिः । प्लाक्षिः । अदोरिति किम् । रामदत्तिः ।

मनोर्जातौषुत्काञ्यौ ॥ १४७ ॥

मनुशब्दात् अञ् य इत्येतौ त्र्यौ भवतः षुत्कागमः समुदायेन जातौ गम्यमानायाम् । मानुषः । मनुष्यः अपत्याप-त्यवत्सबन्धद्वारेण व्युत्पत्तिमात्रम् क्रियते परमार्थतस्तु रूढिश-ब्दावेतौ । अत एव यञिञोरिति बहुपूत्र भवति । मानुषा इति । जाताविति किम् । अपत्यमात्रे अण् भवति लोहि-तादिपाठात् पौत्रादौ यञि तूडभवति । मानव्यः । मानव्यौ । मनवः । स्त्री मनव्यायनी । जाताविति किम् । अपत्यमात्रे औत्सर्गिकः अणेव भवति ।

पुरुदेवस्य पौत्रादावर्ककीर्तिर्जितारिहतः ।
पालयामास लक्ष्मीवान् मानवो मानवी प्रजाः ॥
वृद्धापत्यविवक्षाया तु गर्गादित्वाद्यञा भवितव्यम् ।
अपत्ये कुत्सिते मूढे मनौरौत्सर्गिकः स्मृतः ॥
नकारस्य च मूर्द्धन्यः तेन सिद्ध्यति माणवः ।
नेदं णत्वार्थं बहु वक्तव्यम् माणवचरकात्
खञिति निपातनात् सिद्धम् ।

द्विः ॥ १४८ ॥

यानि ऊर्द्ध्वमा पादपरिसमाप्तेस्त्यान्वख्यानः द्विसंज्ञास्ते वेदितव्याः । वक्ष्यति राष्ट्रशब्दाद्राज्ञोऽञ् । पाञ्चालः । पाञ्चालौ । पञ्चालाः । सत्यां द्विसंज्ञायां द्वेर्बहुषु तेनैवास्त्रियामित्युप् सिद्धः ।

राष्ट्रशब्दाद्राज्ञोऽञ् ॥ १४९ ॥

राष्ट्र जनपद. राजशब्दश्चेह क्षत्रियपर्यायः । राष्ट्रशब्दाद्राजवाचिनः अपत्येअञ् भवति स्वभावतः पचालादिशब्देन राष्ट्रं राजा चाभिधीयते । अथवा पचालानां निवासो जनपद इति निवासार्थे आगतस्याणो जनपद वसिति वसि कृतेअवरकालेनापि पंचालशब्देन क्षत्रियशब्दो लक्ष्यते यथा देवदत्तस्य पितेति पचालस्यापत्यं पाञ्चालः । पाञ्चालौ । पाञ्चालाः । ऐक्ष्वाकः । ऐक्ष्वाकौ । इक्ष्वाकवः । इक्ष्वाकुशब्दस्य अञि श्रोणहत्येत्यादिना उक्ष निपात्यते । राष्ट्रशब्दादिति किम् । श्रीविजयस्य श्रैविजयिः । द्रुघ्नोः द्रौघ्नराः । राज्ञ इति किम् । पञ्चालो नाम ब्राह्मणः तस्यापत्य पाञ्चालिः ।

शाल्वेयगान्धारिभ्या ॥ ५० ॥

शाल्वा नाम क्षत्रिया तस्माद्वृद्धच इति ढणि शाल्वेयः । सात्वेय गांधारि इत्येताभ्यां राजशब्दाभ्या अञ् भवति अञो-

पवादे द्वित्कुरुनाद्यजादकोशलाञ्ज्य इति ञ्ये प्राप्ते वचनम् । शाल्वेयस्यापत्य शाल्वेयः । गांधारेरपत्यं गांधारः । गांधारी । बहुषूपि गांधारयः ।

द्व्यञ्मगधकलिङ्गसूरमसादण् ॥ ५२ ॥

राष्ट्रशब्दाद्राज्ञ इति वर्तते । द्व्यचो मृदः मगध कलिङ्ग सूरमस इत्येतेभ्यश्च अण् भवति । अञोऽपवादः । आङ्गः । वाङ्गः । सौह्मः । पौण्ड्र. । मागधः । कालिङ्गः । सौरमसः । सर्वत्र बहुषूप् । अजैव सिद्धे किमर्थमण् विधीयते द्व्यचोऽण इति फिञ् यथा स्यात् नास्त्यत्र विशेषः सर्वस्यैव युवत्यस्य द्वेरुत्तरस्य वधिष्यते । इह तर्हि विशेषः राजसमानशब्दराष्ट्रात् तस्य राजन्यपत्यवदिति वक्ष्यते । अङ्गानां राजा आङ्ग इति अणि सति आङ्ग स्यापत्यं आङ्गायनिः । द्व्यचोण इतिफिञ् युवत्योयं न भवतीति उप् नास्ति । अपि च अञि सति संघाद्यर्थेविवक्षायां अण् प्रसज्येत अणि सति वृद्धचरणाञ्ञिदितिवुन् भवति । आङ्गक वाङ्गकः । मागधकः । कालिङ्गकः । सौरमसकः ।

द्वित्कुरूनाद्यजादकोशलाञ्ज्यः ॥ ५३ ॥

दुसंज्ञान्मृदः इकारात्तात् कुरुशब्दात् नकारादेः अजादकोशलशब्दाभ्या च ज्यो भवत्यञोऽपवादः । दो आम्बष्ठस्यापत्यं आम्बष्ठ्यः । सौवीरस्य सौवीर्य. । कांबचस्य कांबच्यः । दार्वस्य दार्व्य. । द्व्यजलक्षणो फिञ्परत्वादेनेन बाध्यते । इकारान्तात् अवन्तेरावन्त्यः । कुन्तेः कौन्त्य· । वसन्तेर्वासन्त्यः । तपरकरणं किम् । कुमारी नाम जनपदः क्षत्रियश्चास्ति तस्यापत्यं कौमारः । कुरोः कौरव्यः । नादेः निचकस्य नैचक्यः । निषधस्य नैषध्यः । नीयस्य नैप्यः । अजादस्य आजाद्यः । कोशलस्य कौशल्यः । सर्वत्र बहुषूप् ।

शाल्वावयवप्रत्यग्रथकलकूटास्मकादिञ् ॥ ५४ ॥

शल्वा नाम मानुषी क्षत्रिया तस्या अपत्यं द्व्यच इति ढक्यि शाल्वेय इत्युसि कृते निपातनादणपि भवति । शाल्वः । क्षत्रियः तस्य निवासो जनपदः शाल्वः । तदवयवाः उदुम्बरास्तिलखला मद्रकारायुगन्धराः । भुञ्जिङ्गा शरदण्डाश्च शाल्वावयवसंज्ञिताः । शाल्वावयवेभ्यो राजन्याच्चिभ्यः प्रत्यग्रंथिः । कालकूटिः । आस्मकिः । सर्वत्र बहुषूप् योज्यः ।

पाण्डोर्ड्यण् ॥ ५५ ॥

राष्ट्रशब्दाद्राज्ञ इति वर्तते पाण्डुशब्दाड्ड्यण् भवत्यपत्येऽर्थे । पाण्डोरपत्यं पाण्ड्यः डकार टिखार्थः णकारः ञ्नित्यादिरक्तविकार इति पुंवद्भावप्रतिषेधार्थः । पाण्ड्या भार्या अस्य पाण्ड्याभार्यः । कथमयं प्रयोगः असिद्धिर्द्वितीयो न ससार पांडवः पाण्डवा यस्य दासाः इति येन जनपदेन समानशब्दो राजा तस्य जनपदस्य स्वामी यदि विवक्षितः तदायं विधिर्वेदितव्यः अन्यत्रोत्सर्ग एव भवति । इह प्रकरणे राजसमानशब्दात् राष्ट्रात् तस्य राजन्यपत्यवदिति वक्तव्यम् । राजसमानशब्दात् राष्ट्रात् तस्येति तासमर्थात् राजन्यभिधेये अपत्य इव त्यविधिर्भवति पञ्चालानां राजा पाञ्चालः । शाल्वेयानां राजा शाल्वेयः । एवं आङ्गः । आम्बष्ठ्यः । औदुम्बरिः । पांडवानां राजा पाण्ड्यः । सर्वत्र बहुषूप् । अस्मादपत्यविवक्षायां वाक्षट्टादेरिति फिञ् । पाञ्चालायनिः ।

उप् चोलादेः ॥ ५६ ॥

राष्ट्रशब्दाद्राज्ञ इति वर्तते । चोलादेः परस्य उप् भवति तस्य संभावादणञोः । चोलस्यापत्यं चौलः । केरलः । कांबोजः ।

शकः । यवनः । आदृशब्दः प्रकारवाची तस्य राजनीति वर्तते चोलानां राजा चोलः ।

कुन्त्यवन्तिकुरुभ्यः स्त्रियाम् ॥ ५७ ॥


कुन्ति अवन्ति कुरु इत्येतेभ्य उत्पन्नस्य ङेरुप् भवति स्त्रियामभिधेयायाम् । कुन्ती । अवन्ती । कुरूः । द्वित्कुरुनाद्यजादकोशलाज्ञ इत्यस्य उपि कृते इतोमनुष्यजातेरिति ङीविधिः । कुरुशब्दादूरुतः इति ऊत्यः । स्त्रियामिति किम् । कौन्त्यः ।

अनोऽप्राच्यभर्गादेः ॥ ५८ ॥

स्त्रियामिति वर्तते । अतस्त्यस्य उञ्भवति स्त्रियामभिधेयाया प्राच्यान् भर्गादींश्च वर्जयित्वा । कुन्त्यादित्यः उञ्वचनं ज्ञापकम् इह अत इति तदन्तविधिर्न भवति । सामर्थ्यादणजोरुप् भवतीति वेदितव्यम् अपाच्यो नाम राष्ट्रसमानशब्दो राजा तस्यापत्यंस्त्री अपाच्या अत उपि टाप् । एव सूरसेनी । मद्रस्यापत्यंस्त्री मद्री । अण उपि जातिलक्षणो ङीविधिः । दरदो ऽपत्यं स्त्री दरद् । अत इति किम् । औदुम्बरी । शाल्वावयवत्वादिञ् इतोमनुष्यजातेरिति ङीविधिः । अप्राच्यभर्गादेरिति किम् । प्राच्या येराष्ट्रा भिधाना राजानः तेभ्य उप् प्रतिषिध्यते । पांचाली । वैदेही । पैप्पली । आङ्गी । वाङ्गी । सौह्मी । पौण्ड्री । मागधी । कालिङ्गी । भर्गादेरप्राच्यार्थ उप् प्रतिषेधः । भर्गस्यापत्य स्त्री भार्गी । करूसस्य कारुसी भर्ग करूस केकय कस्मीर सैल्वासुस्थाल उरस कौरव्य वचनाद्यर्थेण उपि कुरूः अनेनानुपि कौरव्येति यौधेयः । सौक्रेयः सौत्रेयथाष्ट्रावाणेयनृगर्भभरत उसीतरकस्य पुनरकारस्य यौधेयादिभ्यः द्रुसंज्ञकेभ्यःपरस्योप् प्राप्तः प्रतिषिध्यते उच्यते पश्वादेरणिति द्रिसंज्ञकोण् स्वार्थिको वक्ष्यते तस्यायं प्रतिविधिः न तु राष्ट्रसमानशब्दा-

दापत्यस्य उच्यमानः कथं स्वार्थिकस्य भिन्नप्रकरणस्थ रुढभवति इदमेव यौधेयादिभ्यः प्रतिषेधवचन ज्ञापकं भिन्नप्रकरणस्यापि द्वेरुढभवति आपत्यग्रहणेन गृह्यते इति किमेतस्य ज्ञापने प्रयोजनं इह स्त्रियामुप् पशुः रक्षाः असुरी इति पशु रक्षस् असुर इति राष्ट्रशब्दाराजानः एषामपत्यः स्वः स्त्रीत्वविशिष्टो विवक्षित इति अणञोरागतयो उप् चोलारिति उपि कृते पुनः पश्वादेरति स्वार्थिकोण् तस्यापि स्त्रियामनेनोप् सिद्धः ।

इत्यभयनन्दिविरचितायां जैनेंद्रमहावृत्तौ तृतीयस्याध्यायस्य प्रथमः पादः समाप्तः ।



तेन रक्तं रागात् ॥ १ ॥

रज्यतेऽनेन शुक्लं वस्त्वति रागः कुसुम्मादि द्रव्यं तेनेति भासमर्थात् रागविशेषवाचिनो मृदः रक्तमित्येतस्मिन्नर्थे यथाविहितं त्यो भवति । कषायेण रक्तं वस्त्रं काषायम् । हारिद्रम् । कौसुम्भम् । माञ्जिष्टम् । रागादिति किम् । देवदत्तेन रक्तम् । पुंखौघः प्रायेणेत्येतद्घञ्विधाने अपेक्ष्यते तेन वर्णविशेषस्य रागस्य ग्रहणादिह न भवति । पाणिना रक्तमिति इहोपमानाद्भवति काषायौ गर्दभस्य कर्णौ हारिद्रौ । कुक्कुटस्य पादाविति ।

नीलपीताद्कौ ॥ २ ॥

नील पीत इत्येताभ्यां भांताभ्यां रक्तमित्येतस्मिन्नर्थे यथासंख्यं अ क इत्येतौ त्यौ भवतः । नीलेन रक्तं नीलम् । लिङ्गविशिष्टस्यापि ग्रहणम् । नील्या रक्तं नीलम् । पीतेन रक्तं पीतकम् ।

लाक्षारोचनाशकलकर्दमाट्ठण् ॥ ३ ॥

लाक्षादिभ्यो भासमर्थेभ्यो रक्तमित्येतस्मिन्नर्थे ठण् भवति । अणोऽपवादः । लाक्षया रक्तं लाक्षिकम् । साकलिकम् । सकलकर्दमाभ्यामणपीष्यते ।

भाद्युक्तः कालः ॥ ४ ॥

तेनेति वर्तते भविशेषवाचिनो मृदः भासमर्थात् युक्त इत्येतस्मिन्नर्थे यथाविहितं त्यो भवति योसौ युक्तः श्चेत् कालस्तेन स भवति नित्ययुक्तौ हि भकालौ न तयोः सन्निकर्षविप्रकर्षौ स्तः तत्कथं पुष्यादिना भेन युक्तः काल इत्युच्यते ठयन्निचाराभावात् नैष दोषः । इह पुष्यादिसमीपस्थे चन्द्रमसि पुष्यादयः शब्दाः वर्तमाना गृह्यन्ते ।

पुष्येण युक्तः कालः पुष्यसमीपगतेन चन्द्रेण सा युक्त इत्यर्थः । पौषी रात्रिः पौषमहः । तिष्यपुष्ययोर्भाणीति यकारस्य खम् । माघी रात्रिः । माघमहः । मादिति किम् । चन्द्रसंयुक्ता रात्रिः काल इति किम् । पुष्येण युक्तश्चन्द्रमाः ।

उसभेदे ॥ ५ ॥

अभेदोनामाविशेषः पूर्वेण विहितस्योस् भवति न चन्द्रेण युक्तस्य कालस्य भेदो रात्र्यादिविशेषोऽभिधीयते । अद्य पुष्यः । अद्य कृत्तिकाः । अद्य रोहिण्यः । युक्तवदुसिलिङ्गसंख्य इति युक्तवद्भावः । अत्र यावान् कालः त्रिंशन्मुहूर्तमात्रो भेन युक्तो न तस्य भेदोऽभिधीयते । अभेद इति किम् । पौषी रात्रिः । पौषमहः । अभेद इति प्रसज्यप्रतिषेधः तेनेहापि न भवति । पौषः अहोरात्रः । पौषः कालः इति अथेह कथमुस् न भवति अद्य दिवा पुष्यः अद्य रात्रौ पुष्यः इति पूर्वमहःप्रहरात्मकस्य समुदायस्याभेद उसं विधाय पश्चाद्दिवारात्रिशब्दयोः प्रयोगः कृतः ।

खौ श्रवणाश्वत्थाभ्याम् ॥ ६ ॥

खौ भेदेपि उस् यथा स्यादित्यारम्भः । श्रवण अश्वत्थ इत्येताभ्यामुत्पन्नस्य यस्य उस् भवति खविषये । श्रवणेन युक्तः श्रवणा रात्रिः । अश्वत्थेन युक्ता अश्वत्था रात्रिः । अश्वत्थो मुहूर्तः । फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्य इति श्रवणाशब्दनिर्देशो ज्ञापक इह सूत्रे उसि युक्तवद्भावो न भवति । खाविति किम् । श्रावणी रात्रिः । आश्वत्थो रात्रिः ।

द्वन्द्वाच्छः ॥ ७ ॥

द्वन्द्वाद्युक्तसमर्थात् युक्तः काल इत्येतस्मिन्नर्थे छो भवति भेदे वाभेदेच । अणोऽपवादः । राधानुराधीयं तिष्यपुनर्वसवीयमहः । अद्य तिष्यपुनर्वसवीयम् । अय परत्वादुणो बाधकः ।

परिवृतो रथः ॥ ८ ॥

तेनेति वर्तते । तेन परिवृत इत्येतस्मिन्नर्थे यथाविहितं त्र्ये भवति यः परिवृतो रथश्चेत् स भवति । वस्त्रेण परिवृतो रथो वास्त्रः । काम्बलः । चार्मणः । अनइति अणि टिखाभावः । रथ इति किम् । वस्त्रेण परिवृता शय्या । स इह कस्मान्न भवति छात्रैः परिवृत्तो रथ इत्यनभिधानात् । अथवा समन्ताद्वृतः परिवृत इत्याश्रयणात् । रथैकदेशस्त्र्यमुत्पादयति न छात्रादिः इह कस्मादण् न भवति । पाण्डुकम्बलैः परिवृतो रथ इति अनभिधात् । कथं पाण्डुकम्बली रथ इति पाण्डुकम्बला अस्य सवृत्त्यापाठात् पक्षे कृते इन्द्रष्ठ्यः । ठस्याभिधानं नास्ति । तीयान्तात् स्वार्थे वा ईकण् वक्तव्यः । द्वैतीयिकम् । द्वितीयम् । तार्तीयिकम् । तृतीयम् । विद्याया अभिधाने नेष्यते द्वितीया विद्या । तृतीया विद्या । इह कथमण् भवति न विद्यते पूर्वः पतिर्यस्याः सा अपूर्वा कुमारी तादृशीं कुमारीमुपपन्नः कौमारः पतिरिति तत्र भव इत्यण् भविष्यति कुमार्यां भवः पतिः कौमारः पतिः । पुंयोगात् कौमारी भार्या इत्यपि सिद्धम् ।

तत्रोद्धृतममत्रेभ्यः ॥ ९ ॥

भुक्तावशिष्टमुद्धृत्तमुच्यते इति केचित् तत्र नातिश्लिष्टं अन्यत्रापि प्रयोगात् उद्धृतं ब्राह्मणेन लब्धमिति तत्रेति ङेप्समर्थात् अमत्रवाचिनो मृदः उद्धृतमित्येतस्मिन्नर्थे यथाविहितं त्र्ये भवति । सरावेषु उद्धृत ओदनः सारावः । मात्रवः । अमत्रेभ्य इति किम् । पाणावुद्धृत ओदनः ।

स्थण्डिलः ॥ १० ॥

स्थण्डिल इति निपात्यते स्थण्डिलशब्दादीवन्तात् शयितर्यभिधेये अण् निपात्यते समुदायेन व्रते गम्ये । स्थण्डिले शेते स्थाण्डिलो ब्रह्मचारी । व्रतादन्यत्र स्थण्डिले शेते देवदत्त इति ।

संस्कृतं भक्षाः ॥ ११ ॥

सतो गुणान्तराधानं संस्कारः । खरविशदमभ्यवहार्यं भक्षः तत्रेति ईप्समर्थात् संस्कृतमित्येतस्मिन्नर्थे यथाविहितं त्यो भवति यत्तत् संस्कृत भक्षाश्चेत् भवति । भाण्ट्रे संस्कृताः भाण्ट्राः । एव कैलासापात्राः । भक्षाः इति किम् । फलके संस्कृतो मालागुणः ।

शूलोखाद्यः ॥ १२ ॥

शूल उखा इत्येताभ्यां ईप्समर्थाभ्यां संस्कृतं भक्षा इत्येतस्मिन्नर्थे यो भवति । अणोऽपवादः । शूले संस्कृत शूल्यम् । उखाया संस्कृतमुख्यम् । उपमानात् सिद्धम् । पिठरे शूले इव संस्कृत पिठरशूल्यम् । मयूरव्यंसकादित्वात् समासः ।

दध्नष्ठण् ॥ १३ ॥

दधिशब्दात् ईप्समर्थात् संस्कृतं भक्षा इत्येतस्मिन्नर्थे ठण् भवति । दधिनि संस्कृतं दाधिकम् । तत्र यद्दधि संस्कृत तद्दध्ना संस्कृतमित्यपि भवति एव तेन संस्कृतमिति वक्ष्यमाणेन ठणा सिद्धं नार्थोऽनेन दोषः । यदन्यत्रोत्पन्न दधिकृतमेवोत्कर्षमपेक्षते तदिहोदाहरणं यस्य तु दध्ना लवणादिना च संस्कारः तस्य वक्ष्यमाणमुदाहरणम् ॥

वोदश्वितः ॥ १४ ॥

उदश्वित् शब्दात् ईप्सनमर्थात् संस्कृतं भक्षा इत्येतस्मिन्नर्थे ठण् भवति। उदश्विति संस्कृत औदनः औदश्वितकः। औदश्वितः। अतोपि वावचनात् ज्ञायते तेन संस्कृतात्तत्र संस्कृतार्थभेदः। अन्यथा ईवन्तादेव ठण् भात्तादण् इत्युभयं सिद्धं स्यात्।

क्षीराद्ढण् ॥ १५ ॥

क्षीरशब्दात् ईप्सनमर्थात् संस्कृतं भक्षा इत्येतस्मिन्नर्थे ढण् भवति। अणोऽपवादः। क्षीरे संस्कृता क्षैरेयी यवागूः।

सास्मिन् पौर्णमासीति रवौ ॥ १६ ॥

सेति वासमर्थात् अस्मिन् इति ईश्वर्थे यथाविहितं त्यो भवति यत्तद्वानिर्दिष्टं पौर्णमासी सा चेद्भवति। इतिकरणाद्यादि लोके विवक्षा समुदायेन चेत् संज्ञा गम्यते पूर्णचन्द्रसा युक्तः कालः पौर्णमासी इदमेव ज्ञापकं अत्राण् भवीतीति। माघी पौर्णमासी अस्मिन् मासे अर्द्धमासे संवत्सरे वा माघो मासः अर्द्धमास संवत्सरः एवं पौषः। खाविति किम्। माघी पौर्णमासी अस्मिन् पञ्चदशरात्रे। इतिशब्दः किमर्थः। विद्यमानेपि लक्षणे लौकिकप्रयोगानुसारणार्थः। इह मा भूत माघी पौर्णमासी अस्मिन् हि भवति संवत्सरपर्वणि।

अश्वत्थाग्रहायणीभ्यां ठञ् ॥ १७ ॥

सास्मिन् पौर्णमासीति वर्तते। अश्वत्था आग्रहायणी इत्येताभ्यां पौर्णमासीति वासमर्थाभ्यामस्मिन्निति ईश्वर्थे ठञ् भवत्यणोऽपवादः। अश्वत्थेन युक्तः कालः अश्वत्था पौर्णमासी अस्मिन्मासे अर्द्धमासे संवत्सरे आश्वत्थिकः। अग्रहायणेन युक्तः कालः आग्रहायणी आग्रहायणिकः।

फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यो वा ॥ १८ ॥

फाल्गुन्यादिभ्यो वा ठञ् भवति सास्मिन् पौर्णमासीति वर्तते । फाल्गुनी पौर्णमासी अस्मिन् मासे संवत्सरे वा फाल्गुनिकः फाल्गुनः । एवं आश्वयुणिकः । आश्वयुणः । कार्तिकिकः । कार्तिकः । चैत्रिकः । चैत्रः ।

सास्य देवता ॥ १९ ॥

सेत्यत्र लिंगवचने अप्रधानभूते । सेति वासमर्थात् अस्येति तार्थे यथाविहितं त्र्यो भवति यतद्धानिर्दिष्टं देवता चेत्सा भवति । अर्हन् देवता अस्य आर्हतः । भगवती देवता अस्य भागवतः । आर्हस्पत्यः । सेतिवर्तमाने पुनः साग्रहणं संज्ञा विषयनिवृत्त्यर्थम् तेन संज्ञायां वायं विधिः । देवतेति किम् । कन्या देवदत्तस्य ।

कस्येः ॥ २० ॥

कशब्देन प्रजापतिरभिधीयते । कस्य इकारोन्तादेशो भवत्यराच्च सास्य देवतेत्यस्मिन्विषये । को देवता अस्य कायं हविः । अग्नि पूर्वेण सिद्धे इत्वार्थं वचनम् । आस्मसामर्थ्यात् यस्येदघां चेति खं न भवति ।

शुक्राद्धः ॥ २१ ॥

शुक्रशब्दात् घो भवत्यणोऽपवादः । सास्यदेवतेति वर्तते । शुक्रो देवतास्य शुक्रियः ।

अपोनप्त्रपान्नप्तृभ्याम् ॥२२॥

घ इति वर्तते अपोनप्तृ अपान्नप्तृ इत्येताभ्यां घो भवत्यणोऽपवादः । सास्यदेवतेति वर्तते । अपोनप्त्रीदेवता अस्य अपोनप्त्रियः । अपान्नप्त्रीदेवता अस्य अपान्नप्त्रियः । यप्र-

त्यसन्नियोगेन प्रकृत्योः अपोनप्तृअपान्नप्तृभावो निपात्यते संप्रेषे अपोनपाते ब्रूहि अपान्नपाते ब्रूहि इति भवति ।

छः ॥ २३ ॥

अपोनप्त्र अपान्नप्तृ इत्येताभ्यां छश्च भवति सास्य देवतेत्यस्मिन् विषये अपोनप्त्रीयः । अपान्नप्त्रीयः । योगविभाग उत्तरार्थः । यौगीपुत्रादिभ्यश्छो वक्तव्यः । यौगीपुत्रीयः । तार्णविन्दवीयः । शतरुद्राद्घश्च । शतरुद्रियः । शतरुद्रीयः ।

महेन्द्राद्घाणौ च ॥ २४ ॥

सास्य देवतेति वर्तते । महेन्द्रशब्दाद् घ अण् इत्येतौ भवतः छश्च । महेन्द्रो देवता अस्य माहेन्द्रियः । माहेन्द्रः । माहेन्द्रीयः ।

सोमात्यण् ॥ २५ ॥

सोमशब्दात्यण् भवति सास्य देवतेत्यस्मिन्विषये । अणोपवादः । सोमो देवता अस्य सौम्यः । स्त्रियां सौमी । हलोहृतोङ्यामिति यखम् ।

वाय्वृतुपित्रुषसो यः ॥ २६ ॥

वायु ऋतु पितृ उषस् इत्येतेभ्य यो भवत्यणोऽपवादः । सास्य देवता इति वर्तते । वायव्यः । ऋतव्यः । पित्र्यः । रीङृत इति रीङादेशः । उषस्यः ।

द्यावापृथिवीसुनाशीरमरुत्वदग्नीषोमवास्तोष्पति गृहमेधाच्छ च ॥ २७ ॥

द्यावापृथिवी इत्येवमादिभ्यः छो भवति यश्च सास्य देवतेत्यस्मिन्विषये । द्यौश्च पृथिवी च द्यावापृथिव्यौ देवते अस्य द्यावापृथिवीयः । द्यावापृथिव्यः । सुनो वायुः शीर आदित्यः सुनश्च शीरश्च देवताद्वन्द्व इत्यानङ् सुनाशीरौ

देवते अस्य सुनासीरीयः । सुनाशीर्यः । मरुत्वान् देवता अस्य मरुत्वतीयः । मरुत्वत्यः । अग्निश्च सोमश्च देवते अस्य अग्नीषोमीयः । अग्नीषोम्यः । सोमवरुणे अग्नेरीडितोत्वम् । स्तुत्सोमौचाग्नेरिति षत्वम् । वास्तोष्पतीयः । वास्तोष्पत्यः । पुङ्गिङ्गत्वं तायां अनुप् षत्वं च निपातनात् । गृहमेधीयः । गृहमेध्यः ।

सर्वत्राग्निकलिभ्यां ढञ् ॥ २८ ॥

सास्य देवतेति वर्तमाने सर्वत्रग्रहणं सर्वार्थसंग्रहार्थम् । अग्निकलिशब्दाभ्यां सर्वेष्वर्थेषु ढञ् भवति प्राग्दो । अग्निर्देवता अस्य अग्नौ भवः आग्नेरागतो आग्नेयः एवं कालेयः ।

कालेभ्यो भववत् ॥ २९ ॥

कालविशेषवाचिभ्यः भव इव त्यविधिः भवति । वत्करण सर्वविशेषपरिग्रहार्थम् । येभ्यः कालविशेषवाचिभ्यो मृद्भ्यः भवे ये त्या विहिताः सास्य देवतेत्यस्मिन्विषये तेभ्य एव मृद्भ्यः त एव त्या अतिदिश्यन्ते । यथा मासे भवं मासिकं सांवत्सरिकं वासन्तं प्रावृषेण्यं कालाठञ् भसंज्ञयादृतुभ्येण् प्रावृषेण्यः । एते त्या भवन्ति तथा मासो देवता अस्य वसन्तो देवता अस्य प्रावृट् देवता अस्येति अत्रापि भवन्ति ।

महाराजप्रोष्ठपदाभ्यां ठण् ॥ ३० ॥

महाराजो वैश्रवणः । महाराज प्रोष्ठपदा इत्येताभ्यां ठण् भवति सास्य देवतेत्यस्मिन्विषये । महाराजो देवता अस्य माहाराजिकः । प्रोष्ठपदा देवता अस्य प्रौष्ठपदिकः । ठण्प्रकरणे तदस्मिन्वर्तते इति नवयज्ञादिभ्य उपसंख्यानम् । नवयज्ञोऽस्मिन् वर्तते नावयज्ञिकः । पाकयज्ञिकः । पूर्णमासादण् वक्तव्यः । पूर्णमासोऽस्यां वर्तते । पौर्णमासी तिथिः ।

पितृव्यमातुलमातामहपितामहाः ॥ ३१ ॥

पितृव्यादयः शब्दा निपात्यन्ते समर्थविभक्तिस्त्योनुबन्धस्त्यार्थ इति सर्वमिदं निपात्यते पितृमातृभ्यां तासमर्थाभ्यां भ्रातरि वाच्ये व्यङलौ निपात्येते पितुर्भ्राता पितृव्यः । मातुर्भ्राता मातुलः । ङित्वाट्टिलम् । ताभ्यामेव पितरि डामहः । मातुः पिता मातामहः । स एव डामहो मातरि वाच्यायाटिच् । मातुर्भ्राता मातामही । पितुर्भ्राता पितामही । टित्वान्ङीविधिः ।

तस्य समूहः ॥ ३२ ॥

तस्येति तासमर्थात् समूह इत्येतस्मिन्नर्थे यथाविहितत्त्वो भवति चित्तवदवृद्धं यस्य न चान्यत्र प्रतिपदं ग्रहणं तद्धेदाहरणम् । अचित्तवतष्ठण् वक्ष्यते । वृद्धाद्वुञ् । प्रतिपदमुक्तादिभ्योपि वुञादिः । काकानां समूहः काकम् । शौकम् । वाकम् । इह पञ्चानां पूलानां समूहः पञ्चपूला इति प्राप्नोति समूहार्थे ऽण् तस्य रसोवनपत्य इत्युप् परिमाणाद्वुदुपीतिनियमात् । असति ङीविधौ टापा भवितव्यम् । नायं दोषः समाहारलक्षण एवात्र रस. हृदुत्पत्ति र्न भवत्यनभिधानात् ।

भिक्षादेः ॥ ३३ ॥

तस्य समूह इति वर्तते । भिक्षा इत्येवमादिभ्यः यथाविहितं त्वो भवति पुनर्विधानं छणो बाधनार्थम् । भिक्षाणां समूह भैक्षम् । भिक्षा गर्भिणी क्षेत्र करीष अङ्गार चर्मन् सहस्र युवति पद्धति अथर्वन् दक्षिणा इह पाठसामर्थ्यात् गर्भिणी युवतिशब्दे न पुंवद्भावः ।

वृद्धोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ् ॥ ३४ ॥

वृद्धादिभ्यो वुञ् भवति । तस्य समूह इति वर्तते । औपगवानां समूह औपगवकम् । कापटवकम् । औक्षकम् । औष्ट्रकम् । औरभ्रकम् । राजकम् । राजन्यकम् । राजपुत्रकम् । बाल्वकम् । मानुष्यकम् । आजकम् । वृद्धाच्चेति वक्तव्यम् । बार्द्धकम् । प्रकृत्या अके राजन्यमनुष्ययुवान इति क्यवाना वृत्यापत्यस्येति यखं न भवति । इह वृद्धग्रहणात् सिद्धे राजन्यमनुष्ययोः पृथग्ग्रहणं ज्ञापकमपत्याधिकारादन्यत्र वृद्धग्रहणेन लौकिकं गोत्रमपत्यमात्रमुच्यते नतु पौत्राद्यपत्यं वृद्धमिति तथाहि लोके किङ्गोत्रो भवान् इति पृष्टः बात्स्यायनो ऽस्मीत्याह राजन्यमनुष्ययोस्तु जातिशब्दत्वात् लौकिकगोत्रग्रहणम् ।

केदाराद्यञ्ञ ॥ ३५ ॥

केदारशब्दाद्यञ् भवति वुञ् च तस्य समूह इत्यस्मिन्विषये ढणोपवाद । केदाराणां समूह कैदार्य्यम् । कैदारकम् । गणिकायाः यञ्ञ वक्तव्यः । गणिकाणां समूहः गाणिक्यम् ।

ठञ् कवचिनश्च ॥ ३६॥

ठञ् भवति कवचिनश्च केदाराच्च तस्य समूह इत्यस्मिन्विषये । कवचिनां समूहः कावचिकम् । कैदारिकम् ।

ग्रामजनबन्धुसहायेभ्यस्तल् ॥ ३६ ॥

ग्रामादिभ्यस्तल् भवति तस्य समूह इति वर्तते । ग्रामाणां समूह ग्रामता । जनता । बन्धुता । सहायता । गजाच्चेति वक्तव्यम् । गजता ।

चरणेभ्यो धर्मवत् ॥ ३७ ॥

चरणवाचिशब्देभ्यः समूह इत्येतस्मिन्नर्थे धर्म इव-त्या भव-

न्ति । इदमेव ज्ञापकम् । अस्त्येतच्चरणाद्धर्मनाम्नयोरिनिवृद्धचरणाञ्ञिदित्यारभ्य चरणाद्धर्म इत्यधिकारेऽस्यते स इहातिदिश्यते । वत्करणं सर्वविशेषपरिग्रहार्थम् । यथा कठानां धर्मः काठकम् । कालापकम् । मौदकम् । पैप्पलादकम् । आर्वाभकम् । वाजनेयकम् । छान्दोग्यम् । औकियक्यम् । आथर्वणः । वृद्धचरणाञ्ञिदिति वुञ् । छन्दोगौकियकयाज्ञिकबह्वृचनटाण्ण इति ण्यः । अथर्वण इति च निपात्यते आथर्वणिकानां धर्म इत्यत्र वाक्ये तथा कठानां समूहः काठकमित्येवमादि योज्यम् ।

अचित्तहस्तिधेनोष्ठक् ॥ ३८ ॥

अचित्तमचेतनम् । अचित्तार्थवाचिभ्यः हस्तिधेनुशब्दाभ्यां च ठरा भवति तस्य समूह इत्यस्मिन्विषये । अपूपानां समूहः आपूपिकम् । शष्कुलीनां समूहः शाष्कुलिकम् । हास्तिकम् । धैनुकम् । पश्वां णस् वक्तव्यः । पर्शूना स्त्रीणां समूहः पार्श्वम् । स्त्रित्वात्पदसंज्ञाया अलक्षणमोरोत्वं न भवति । खण्डिकादिभ्योऽञ् वक्तव्य इतिचेत् न वक्तव्यः । नास्ति विशेषः । अस्त्रिवासत्पक्षे वा खंडिकादिषु येऽचित्तवतः तेभ्यः औत्सर्गिकोऽण् सिद्धः येत्वचित्ताः ते भिक्षादिषु पठनीयाः । खडिकः अहन् बहवक्षुद्रकमालवाः अद्रिसंज्ञाताः क्षत्रिया इत्यर्थः तेषां समूह वृद्धलक्षणो वुञ् प्राप्तः । ननु च यथा राष्ट्रावध्योरित्यत्र राष्ट्रादुच्यमानो वुञ् न राष्ट्रसमुदायाद्भवति काशिकौशलेषु भवा काशिकौशलीयाः इति अ एव भवति तथेह वृद्धादुच्यमानस्त्यः कथं वृद्धसमुदायादिति एवं तर्हि तदन्तविधिना भविष्यति इदमेव ज्ञापकं सामूहिके त्ये तदन्तविधिर्भवति क्षौद्र-

कमालवी सेना क्षौद्रकमालवकमन्यत् । भिक्षुक शुक उलूक अयं यज्ञन्तः बहुत्वे अर्थं प्रयोजयति । श्वनुयुग वरत्र हंस इति खडि कादिसामूहिके तदंतविधिर्ज्ञापितः । तेन औपगवकापटवानां समूहः औपगवकापटवकम् । ब्राह्मणराजन्यकम् । दम्यहस्तिनां समूहः दाम्यहस्तिकम् । गौधेनुकम् । गोधेनुकम् । धेनोर्नञ् पूर्वाया नेष्यते ऽधेनूनां समूहः आधेनवम् ।

केशाश्वाभ्यां यञ्छौ वा ॥ ३३॥

केश अश्व इत्येताभ्या यथासंख्यं यञ्छ इत्येतौ त्यौ वा भवतः । केशानां समूहः कैश्यम् । कैशिकम् । अश्वानां समूह अश्वीयम् । आश्वम् ।

पाशादेर्यः ॥ ३४ ॥

पाश इत्येवमादभ्यः यो भवति तस्य समूह इति वर्तते । पाशानां समूहः पाश्या । तृण तृण्या । घूम्या । वात्त वात्या । लिङ्गं लोकतो ज्ञेयम् । पाश तृण घूम वात अंगार पालवाल पिटक पिटाक शकल ह्लानल वन पुरुष ।

ब्राह्मणमाणववाडवात् ॥ ३५ ॥

य इति वर्तते । ब्राह्मण माणव वाडव इत्येतेभ्यो यो भवति तस्य समूह इत्यस्मिन्विषये । ब्राह्मणानां समूहः ब्राह्मण्यम् । माणव्यम् । वाडव्यम् ।

गोखलरथात् ॥ ३६ ॥

गो खल रथ इत्येतेभ्यः तान्तेभ्यः यो भवति समूहे । गवां समूहः गव्या । खल्या । रथ्या । योगविभाग उत्तरार्थः ।

त्रेनकट्यः ॥ ३७ ॥

गो खल रथ इत्येतेभ्यः यथासंख्यं त्र इन् कट्य इत्येते

प्रत्यया भवन्ति । तस्य समूह इति वर्तते । गर्ग समूहः गार्गा । खलिनी । रथकट्या । खलादिभ्यः इन् वक्तव्यः । डाकिनी । कुटुम्बिनी । लोकतो लिङ्गव्यवस्था ।

राष्ट्रे ॥ ४५ ॥

समूह इति निवृत्तम् । अर्थान्तरोपादानात् तस्येति वर्तते । राष्ट्र जनपद तस्येति तामनर्थात राष्ट्रे यथाविहित त्वो भवति । शिवानां राष्ट्रं शैवम् । जनपदापेक्षया पुलिङ्गता प्रयोक्तव्या । शैवः । अयुष्टः । आभिसारः । राष्ट्राभिधाने बहुत्वे उञ्वक्तव्यः । अङ्गानां राष्ट्रं अङ्गाः । बङ्गाः । सुह्माः । गान्धार्यादिभ्यो वेति वक्तव्यम् । गान्धारीणां राष्ट्रं गान्धारयः । वासातः । वसातयः । शैवः । शिवाः । राजन्यादिभ्यो वा वुञः उञ्वक्तव्यः । राजन्यानां राष्ट्रं राजन्याः । राजन्यकः । दैवयातकः । दैवयात्वका । विल्वबनादिभ्यो नित्यमुञ् न भवतीति वक्तव्यम् । बैल्ववनकः । आंबरीषपुत्रकः । आत्मकामेयकः । नदं बहु वक्तव्य राष्ट्रविवक्षायाः निवासविवक्षायाश्च प्रतिनियमार्थम् बहुत्वविषये जनपदस्य निवासविवक्षयैव तत्र जनपद उक्तिति वञ् भवति गार्गार्यादीनां राजन्यादीनां च उभयी विवक्षा बिल्वबनादीनां राष्ट्रविवक्षैव ।

राजन्यादेर्वुञ् ॥ ४६ ॥

राजन्य इत्येवमादिभ्यः तासमर्थेभ्य वुञ् भवति राष्ट्रे । राजन्यकः । राजन्य आव्रति बात्सक शालङ्कायन दैवयातव जालन्धरायण । कौन्तल आत्मकामेय आंबरीषपुत्र वसाति बिल्वधन मैलूषज उदुवर वैतल आर्जुनायन सप्रियदाक्षि ऊर्णनाभ आकृतिगणश्चायं मालव त्रिगर्त बिराटादीनां ग्रहणम् ।

भौरिक्याद्यैषुकार्यादिभ्यो विधभक्तौ ॥ ४७ ॥

आदिशब्दः प्रत्येकमभिसम्बध्यते भौरिक्यादिभ्यः एषुकार्यादिभ्यश्च यथासङ्ख्यं विध भक्त इत्येतौ त्यौ भवत राष्ट्रेऽर्थे । भौरिकीणां राष्ट्रं भौरिकिविधः । भौलिकिविधः । भौरिकि भौलिकि चौपगत चैटयत सैकवत कास्ये वाखेजक वालिज्यक वैयत् । एषुकारिभक्ता मारसायनभक्ता । एषुकारि सारसायन चान्द्रायणा द्व्याक्षायण त्र्याक्षायण अलायन । ताडायत सौवीरदासमित्रायण शौद्रायन तपंद शैंड । विश्वमाणव वैश्वधेव चतुरडदेव सापिण्डि ।

तदस्मिन्युद्धे योद्धृप्रयोजनात् ॥ ४८ ॥

योद्धारश्च प्रयोजनं च योद्धृ प्रयोजनं तदिति वासमर्थात् अस्मिन्निति ईबर्थे यथाविहितं त्यो भवति यत्तद्वानिर्दिष्टं योद्धारश्चेत तद्भवंति प्रयोजनं चेत् तद्भवन्ति यत्तस्मिन्निति निर्दिष्टं युद्धं चेद्भवति । विद्याधराः योद्धारः अस्मिन् युद्धे वैद्याधरं युद्धम् । कौरवम् । भारतम् । प्रयोजनात् खल्वपि सुलोचना प्रयोजनमस्मिन् युद्धे सौलोचनम् । स्वार्थंप्रभम् । सौतारम् । संग्रामे त्वभिधेये पुलिङ्गता वैद्याधरः सग्रामः । सौलोचनः संग्रामः । युद्ध इति किम् । सुभद्रा प्रयोजनमस्मिन्वैरे । योद्धृप्रयोजनादिति किम् । रथा वाहनमस्मिन् युद्धे ।

प्रहरणमिति क्रीडायाणः ॥ ४९ ॥

तदस्मिन्निति वर्तते तदिति वासमर्थात् अस्मिन्नितीबर्थे णेा भवति यत्तद्वासमर्थम् प्रहरणं चेत्तद्भवति यत्तदस्मिन्नितिनिर्दिष्टं क्रीडा सा चेद्भवति इति करणः ततश्चेद्विवक्षा अद्रोहेण यत्र घातेा सा क्रीडा । दण्डः

प्रहरणमस्यां क्रीडायां दाण्डा । मौष्टा । पादा । प्रहरणमिति किम् । गन्धोदकसेचनमस्यां क्रीडायाम् । क्रीडायामिति किम् । असिः प्रहरणमस्मिन् युद्धे ।

स्यैनंपातातैलंपाता ॥ ५० ॥

स्यैनंपाता तैलपाता इत्येतौ शब्दौ निपात्येते । स्येनानामिव पातः स्येनपातः अस्यां क्रीडायां वर्तते स्यैनंपाता । तिलानामिव पातः तिलपातः अस्यां क्रीडायां तैलंपाता । अस्मिन्नर्थे णो निपात्यते पूर्वपदस्य च मुमागमः । कथं दंडपातः क्रिया अस्यां तिथौ वर्तते दांडपाता तिथिः । मुशलपातोऽस्यां वर्तते मौशलपाता भूमिः । पूर्वसूत्रे इतिकरणादन्यत्रापि णो भवति ।

तद्वेत्य धीते ॥ ५१ ॥

तदिति इप्सनर्थात् वेत्ति अधीते इत्येतयोरर्थयोर्यथाविहितं त्यो भवति तदिति प्रत्येकं सम्बध्यते तद्वेत्ति तदधीते इति यथा तेन दीव्यतिरवनतिजयतिजितमित्यत्र तेनेति मुहूर्तं वेत्ति मौहूर्त्तः । औत्पातः । व्याकरणमधीते वैयाकरणः वैद्यान्तः ।

क्रतूक्थादिसूत्रान्ताट्ठण् ॥ ५२ ॥

सपूपा यज्ञाः क्रतवः । क्रतुविशेषवाचिभ्यो मृद्भ्यः उक्थादिभ्यः सूत्रान्ताच्च ठण् भवति तद्वेत्यधीते इति वर्तते अग्निष्टोमं वेत्यधीते वा आग्निष्टोमिकः । राजसूयिकः । वाजपेयिकः । उक्थादिभ्यः उक्थशब्दः केषुचिदेव सामसु रूढः स

च औक्थिक्ये वर्तमानः त्यविधिं लभते वक्ष्यमधीते औक्थिकः । औक्थिकमधीतेइत्यर्थः । औक्थिकशब्दात्तु न त्यविधिर्भवत्यनभिधानात् । एव यज्ञशब्दोपि याज्ञिकये त्यविधिं लभते याज्ञिक. । लोकायतमधीते लोकायतिक. । सूत्रांतात् वार्तिसूत्रिकः । सांग्रहसूत्रिकः । सूत्रांतादकलादेरिष्यते तेन कालसूत्र इत्यणेव भवति । सूत्रांतयत्रा वक्ष्यादेः प्रपंचः । उक्थ लोकायत न्याय न्याय्य पुनरुक्त सज्ञा चर्चा कुमंर श्लक्षण संहिता पद क्रम मंभात वृत्ति संग्रह गण गुण आयुर्वेद वसंत सहचरिते अध्ययने वसतात् वर्षा शरद व्यस्तसमस्तात् शिशिर हेमन्त प्रथम गुण ऋतुगण प्रथमगण अणुगण इति केचित् अथर्वन् विद्यालक्षणकालसूत्रांतात् अकल्पादेः । वायसविद्यिकः । सांयविद्यकः । हास्तिलक्षणिकः । मातृकलिपकः । पैत्रिकलिपकः । वार्त्तिसूत्रिकः अल्पादेरिति किम् । कालसूत्र. । विद्यामाननक्षत्र धर्मत्रिपूर्वात् इह विद्यान्तात्ठणुक्त तस्यायं प्रतिषेधः । अङ्ग विद्यामधीते आङ्गविद्यः । क्षात्रविद्य. । धार्मविद्यः । त्रैविद्यः । त्रयवयवा विद्या इति यसे अय प्रतिषेधः रसे तु रस्योवनपत्यइत्युपा भवितव्यं तत्र नास्ति विशेषः । आख्यानाख्यायिकेतिहासपुराणेभ्यश्च । आख्यानाख्यायिकयोरर्थग्रहण इतिहासपुराणयो. स्वरूपग्रहणम् आख्यानात् यावक्रीतिकः । आधिभारिक. । आख्यायिकायाः वासवदत्तिकः । ऐतिहासिकः । पौराणिकः । सर्वसादेरसाच्चोपसर्वादेःरसाच्चोप् भवति सर्ववेद. । सर्वतंत्रः । सादे. सवार्त्तिकः । ससग्रहः । सर्वत्र टणवप् रसात् पंचकल्पः । त्रिलक्षणः । त्रिसूत्रः । विद्यालक्षण-

कल्पसूत्राट्ठण्क् । पदोत्तरपदादिकः । पूर्वपदिकः । उत्तरपदिकः । शतषष्टिभ्यां षष्ठिक । शतषष्ठिकः । शतषष्ठिकी । षष्टिषष्ठिकः । षष्टिषष्ठिकी । अनुशूलदण्डलक्षणेभ्यश्च ठक् । अनुशूलेन नयः । अनुशूलमधीते वानुशूलिकः । लाक्षिकः । लाक्षणिकः । द्विपद ज्योतिष्पथानुपदअनुकल्प इतिकरण प्रयोगार्थं वर्तते ततोऽय विभागो लभ्यते ।

क्रमादेर्वुन् ॥ ५३ ॥

तद्वेत्त्यधीते इति वर्तते । क्रम इत्येवमादिभ्यो वुन् भवति क्रमं वेत्त्यधीते वा क्रमकः । क्रम पद शिक्षा मीमासा सामन् । अनुब्राह्मणादिन्वक्तव्यः । ब्राह्मणमदृशेो ग्रन्थो अनुब्राह्मणं तदधीते अनुब्राह्मणी । अनुब्राह्मणिनौ । अनुब्राह्मणिनः । मत्वर्थीयेन सिद्धेऽपि अण्बाधनार्थमिदं वक्तव्यम् ।

उप्प्रोक्तात् ॥ ५४ ॥

प्रोक्तेऽर्थे विहितः प्रोक्तः प्रोक्तप्रत्यान्तात् अध्येतृवेदितृोरुत्पन्नस्य त्यस्योब् भवति । गोतमेन प्रोक्तं गौतमं तद्वेत्त्यधीते वा गौतमः । भद्रबाहुना प्रोक्तं भाद्रबाहवं तद्वेत्त्याधीते वा भाद्रबाहवः । परस्याण उपि कृते योऽवस्थितः । प्रोक्तार्थविषयो अण् तस्य न्यत्कात् अनीच इत्यधिकारात् टिड्ढाणञ्जिति ङीविधिर्न्न भवति अतष्टापि गौतमा । भाद्रबाहवा स्त्री ।

सूत्रात्कोऽकः ॥ ५५ ॥

सूत्रवाचिनः ककारोऽकः अध्येतृवेदितृोरुत्पन्नस्य त्यस्योऽभवति अप्रोक्तार्थोऽयमारम्भः । पञ्चाध्यायाः परिमाणमस्य

पंचकं सूत्रम् । एवमष्टक द्वादशक पञ्चक जैलेन्द्राः । अष्टकाः पाणिनीयाः द्वादशका आर्हताः । संख्याप्रकृतेरिति वक्तव्यम् । इह मा भूत् तत्त्वार्थवार्तिक मधिते तात्त्वार्थवार्तिकः । कलापकमधीयते कालापकः ।

छन्दोब्राह्मणानि चाऽत्रैव ॥ ५६ ॥

प्रोक्तग्रहणमनुवर्तमानं छन्दोब्राह्मणानां विशेषणम् । अत्रेत्यनेन अध्येतृवेदितृत्यविषयो गृह्यते छन्दोवाचीनि ब्राह्मणवाचीनि च प्रोक्तत्यान्तानि अत्रैव अध्येतृवेदितृत्यविषये वर्तन्ते अध्येतृवेदितृत्यविषया वृत्तिरेव यथा स्यादित्यर्थः उभयावधारणं चेदमेवकारोपादानात् लभ्यते अन्यथा आरभ्यसामर्थ्यात् विषयावधारणे सिद्धे एवकारोऽनर्थकः स्यात् प्रोक्तत्यान्तस्यात्रैव वृत्तिर्नान्यत्र तथा वृत्तिरेव न केवलावस्थानमित्युभयथा नियमः अन्यत्रानियमात् क्वचित् स्वातंत्र्यं भवति अर्हता प्रोक्तं शास्त्रं क्वचिदुपान्यतरयोगः आर्हतंमहत्तु विहितमिति क्वचिद्वाक्यमार्हतमधीते क्वचिद्वृत्तिः आर्हत इति इद पुनर्नियमात् युगपदेव विग्रहः कठेन प्रोक्त छदोधीयते कठाः सौनकादिषु वैशंपायनांतेवासिभ्य इतिवचनात् णिन् तत्रैव कठचरकाद्धुञिति ते स्योप् ततः परस्याण् उपप्रोक्तादित्युप् । मोदेन प्रोक्तमधीत्त मोदाः पैप्पलादाः कलापिनोणित्यत्र अणग्रहणसामर्थ्यात् अन्यत्राप्यण् आर्वाभिनः वैशंपायनान्तेवासिभ्यः इति णिन् वाजसनेयिनः । सौनकादित्वात् णिन् ब्राह्मणानि स्वल्वपि ताण्डिना प्रोक्तं ब्राह्मणमधीयते ताण्डिनः । सौनकादिषु पुराणप्रोक्तेषु ब्राह्मणकल्पेष्विति णिन् । भल्लवेन प्रोक्तमधीते पूर्ववत् णिन् भाल्लविनः । एवं साद्यायनिनः । ऐतरेयिणः । छदोग्रहणेन सिद्धे पृथक् ब्राह्मणग्रहणं किम् । पुराणप्रोक्तत्वविशिष्टब्राह्मणप-

रियहार्थम् । इह मा भूत् याज्ञवल्केन प्रोक्तानि ब्राह्मणानि शकलादिभ्यो वृद्ध इत्यण् वरवम् "खुलभेन प्रोक्तानि सौलभानि" कलापिनोणित्यन्यत्राप्यण् याज्ञवल्कादयो अवरकाला इति व्यवहारः । चकारः किमर्थः ब्राह्मणसदृशब्राह्मणानां समुच्चयार्थ. । काश्यपेन प्रोक्तं कल्पं अधीयते काश्यपिनः कौशिकेन प्रोक्तं कल्पमधीयते कौशिकिनः । सौनकादिषु काश्यपकौशिकाभ्यामिति णिन् गुणभूतछन्दसां च समुच्चयार्थं पाराशर्येण प्रोक्तं सूत्रमधीयते पाराशरिणो भिक्षवः शिलालिना प्रोक्तमधीयते शैलालिनो नटाः ॥ सौनकादिषु पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोरिति णिन् । कर्मन्देन प्रोक्तमधीयते कर्मन्दिनः । कृशाश्वेन प्रोक्तमधीयते कृशाश्विनः । सौनकादिष्वेव कर्मन्दा कृशाश्वाभ्यामिन्निति भिक्षुनटसूत्रयोरिति वर्तते ।

तदस्मिन्नस्तीति देशः खौ ॥ ५७ ॥

तदिति वासमर्थात् अस्मिन्निति ईवर्थे यथाविहितं त्यो भवति यत्तद्वासमर्थं अस्ति चेत तद्भवति यत्तदस्मिन्निति निर्दिष्टं देशश्चेत्तद् भवति समुदायेन खुविषये इति करणात् भूमादिविषये विवक्षा औदुम्बरः । बाल्वजः । पार्वतः । मतवर्थोयोऽनेन बाध्यते ।

तेन निर्वृत्तः ॥ ५८ ॥

देशःखावति वर्तते । तेनेति भासमर्थात् निर्वृत्त इत्येतस्मिन्नर्थे यथाविहित त्यो भवति देशः खौ । ककन्देन निर्वृत्तकाकंदी । मकन्देन निर्वृत्ता माकंदी । कुशाम्बेन निर्वृत्ता कौशाम्बीसहस्रेण निर्वृत्ता । साहस्री । परिखा । खावित्येव वनेन निर्वृत्तम् इह यदा अकर्मका अपि धवः खगयः सकर्मका भवंतीति

कर्मणि निर्वृत्तशब्दो व्युत्पाद्यते तदा तेनेति कर्तरि करणे वा भा यदात्वकर्मकविवक्षया कर्तरि निर्वृत्तशब्दः तदा हेतौ भा ।

तस्य निवासादूरभवौ ॥ ५८ ॥

देश खाविति वर्तते तस्येति तासनर्थात् निवास अदूरभवइत्येतयोरर्थयोर्यथा विहितं तयो भवति देशनाम्नि गम्यमाने निवसत्यस्मिन्नति निवासः काल इत्यधिकरणे घञ् । भवतीति भवः पचाद्यच् अदूरे भवः निपातनात्सविधि । वसतेर्निवासः वासातम् ओघुष्टम् । शलाकायानिवास. शालाकम् । वाराणस्या अदूरभवा वाराणसी । विदिशाया अदूरभवं वैदिशम् । ब्रोहीमत्या अदूरभव ब्रैहिमतं नगरम् ।

वुञ्छण्कंठेलसेन्नढण्यफक्ञिञ्क्रराठणोऽरीहणकृशाश्वर्स्यकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशबलपक्षकर्णसुतंगमवराहकुमुदादिभ्यः ॥ ६० ॥

वुञादय. षोडश त्याः यथासंख्यं अरीहणादिभ्यः षोडशेभ्यो गणेभ्यो भवन्ति यथा सभव प्राग्रीश्वरीयेषु चतुर्थेषु । अरीहणादिभ्यः वुञ् । अरीहणेन निर्वृत्तं आरीहणकम् । अरीहण द्रुघण द्रवण खदिर भगल उलुंद सापरायण क्रौष्टायण चैत्रायण त्रैगर्तायण रायस्फोष विषय विसाय उदुण्ड उदश्वन शालायन खाण्डायन खंडवीरण काशकृत्स्न जांघवन शिंशपा किरण रैवत तैल्व वैभतायन सोमायन भाडिल्यायन सुवज्र विपाश वायव । कृशाश्वादिभ्यश्छरा घञ्ञि । कृशाश्वेन निर्वृत्तं कार्शाश्वीयम् । कृशाश्वारिष्ट । अरिष्ट वेशन्त वक्यविशाल रोमक लोमक वर्वर शवल रोमश वर्वर सूकर पत्तर सदृश मुख धूम अजिर विनत